सं.प.ग्र.–१९
अ. १६

टीकात्रयोपेतं

गीतगोविन्दमहाकाव्यम्

सम्पादकाः
डॉ. आर्येन्द्र शर्मा, अध्यक्षः
श्री. खण्डेराव देशपाण्डे, उपाध्यक्षः
श्री. व्ही. सुन्दर शर्मा, संशोधनसहायकः



संस्कृतपरिषत्, उस्मानिया विश्वविद्यालय,
हैदराबाद–७

१९६९

संस्कृतपरिषद्ग्रन्थावली–१९
अ. १६

श्रीजयदेवकविविरचितं

गीतगोविन्दमहाकाव्यम्

सञ्जीवनी, पदद्योतनिका, जयन्ती
इत्याख्यटीकात्रयोपेतम्

सम्पादकाः

डॉ. आर्येन्द्र शर्मा, एम्. ए., डी. फिल्.
अध्यक्षः

श्री. खण्डेराव देशपाण्डे, एम्. ए., डिप्. एड्.
उपाध्यक्षः

श्री. व्ही. सुन्दर शर्मा, शिरोमणिः
संशोधनसहायकः



संस्कृतपरिषत्, उस्मानिया विश्वविद्यालय,
हैदराबाद–७

१९६९

प्रथमावृत्तिः १९६९

मूल्यम्–रूप्यकाः १४

उस्मानियाविश्वविद्यालयस्थसंस्कृतपरिषदा
प्रकाशितम्

श्री. केदार शर्मा इत्येतैः कमर्शियल प्रिंटिंग प्रेस, बेगमबाज़ार,
हैदराबाद इत्यत्र मुद्रितम्

Sanskrit Academy Series No. 19
A. 16

GĪTAGOVINDA MAHĀKĀVYAM

OF

JAYADEVA

WITH

THREE COMMENTARIES

Editors
Dr. Aryendra Sharma, M. A., D. Phil.
Director
Sri Khanderao Deshpande, M. A., Dip. Ed.
Jt. Director
Sri V. Sundara Sharma, Siromani
Research Assistant



SANSKRIT ACADEMY,
Osmania University, HYDERABAD-7
1969

First Edition
Price Rs. 14/-

Published by
THE SANSKRIT ACADEMY,
Osmania University, Hyderabad-7

Printed by Sri Kedar Sharma, at the Commercial Printing Press,
Begum Bazar, Hyderabad.

INTRODUCTION

The Gītagovinda of Jayadeva, a gem in the Sanskrit Lyrical Poetry, has held sway over the Indian mind for the last seven centuries. Its great religious importance to the Vaiṣṇavas, its unparallelled poetic beauty and its inimitable musical charm have attracted a number of commentators to display their skill and scholarship in its interpretation. Three of such commentaries, so far unpublished, are included in the present edition.

The text of the main work as well as of the commentaries is based on a number of manuscripts, some in the possession of the Osmania University Library and others obtained by the Academy from various sources. In all twelve manuscripts have been collated for publishing this work.

The first of these commentaries, the Sañjīvanī, was written by Vanamālibhaṭṭa, son of Śivadāsa Paṇḍita, and is designated by the author as Vanamāli Sañjīvanī. Two mss. of this commentary are preserved in the Osmania University Library, Both of them are full of mistakes, but since the textual interpretations given in the commentary are of considerable importance, it was decided to publish it. Fortunately manuscripts of the commentary are available in many Indian as well as foreign libraries. A copy of the manuscript of the commentary was obtained from the Government of Madras Oriental Library, Madras. Two manuscripts each were obtained from the Central Library Baroda, and Bhandarker Oriental Research Institute, Poona. These five manuscripts supplied many correct readings and missing links and removed obscurity of many passages.

A photocopy of the first two and last two pages of a manuscript of the commentary was obtained from the Harward University Library, Cambridge, to find if it could shed any light on the author and his commentary, but it did not contain any additional information.

The special feature of the Sañjīvanī lies in its novel interpretations of the text from the angle of sexual love and pleasure. It gives a number of quotations from works on erotics in support of its explanations.

None of the manuscripts gives any information about the author and his date. However, the manuscript of the Osmania University

Library is dated 5-7-1804 [1] and the manuscript of the Central Library, Baroda, marked ग, mentions its date as ८-8-1802. [2] The manuscripts also mention that the author wrote the commentary in Vārāṇasī.

The author of the second commentary Padadyotanikā is one Nārāyaṇa Paṇḍita. Again, no information is available about the author and his date. A manuscript of the commentary which is in the Osmania University Library is dated 1-1-1768, [3] which shows that the manuscript is two hundred years old. Besides this manuscript, one manuscript of the commentary was obtained from B. O. R. I, Poona and copies of two manuscripts were obtained from the Saraswati Mahal Library, Tanjore. The O. U. manuscript gives at the end a bunch of five verses collected from the text along with its commentary and calls it 'Pañca Ratna Stabaka' which is printed here under Appendix 1.

For editing the text of the third commentary, Jayantī, the editors had to depend on the only manuscript available with the O. U. Library. A verse at the end of the work states that the author of the commentary was one Kṛṣṇa, son of Ammaṇṇa who was a physician. The commentary discusses the figures of speech found in the text

The list of the manuscripts made use of is given on a separate page along with their indicative letters. The editors hope that the copious footnotes and the index of verses in the text will make the work commendable to the readers.

It will be evident from the perusal of the book that the editors have spared no pains to present the work in as correct a form as possible. We are thankful to the authorities of the libraries mentioned above who kindly supplied us either the original manuscripts or their copies. We are grateful to the Government of Andhra Pradesh, especially to Sri N. Ramesan, Finance Secretary, and Sri S. R. Ram Murthy, Education Secretary, for sanctioning a special grant to print this work. Lastly we are thankful to Sri Kedar Sharma, Manager of the Commercial Printing Press, for getting the work printed.

Editors.

---

1. सं. 1860 ज्येष्ठ वदि 13 गुरुवासरे । (सं. 1860 appears to be incorrect as the said तिथि does not fall on Thursday in that year. It must be सं. 1861)
2. संवत् 1859 श्रावण सुदि 9 शनौ पुस्तकं गीतगोविन्दं समाप्तिमगमत् ।
3. श्री सर्वजितनामसंवत्सरे पुष्य शुद्ध द्वादशी भृगुवासरे व्यलिखत् गीतगोविन्दं सुबाजीशर्मणिपर्वतो ।

कुञ्चिका

प्रचुरणेऽस्मिन् प्रकटनाय स्वीकृतानां पाठान्तरादिपरिशीलनार्थञ्चोप-
युक्तानां मातृकाणां सङ्केतनिर्देशः

1.	No. 62/3	सञ्जीवनीसहित-गीतगोविन्दम्	उस्मानियाविश्व-विद्यालयग्रन्थालयः	प्रकटनार्थ-मङ्गीकृतः	अ
2.		,,	,,		व
3.	R.No. 4507	,,	मद्रास् राजकीय-प्रांच्यलिखिपुस्त-कभाण्डागारः	प्रतिकृतिः	इ
4.	No. 1553	,,	सेण्ट्रल् लैब्ररी, वरोडा		फ
5.	No. 11222	,,	,,		ग
6.	No. 78/A.1883–84	,,	भाण्डार्कर् प्राच्य-परिशोधनागारः, पूना		ह
7.	No. 494/1887–91	,,	,,		ज
8.	No. 91/4	पदद्योतनिका-सहितगीत-गोविन्दम्	उस्मानिया विश्व-विद्यालय ग्रन्थालयः	प्रकटनार्थ-मङ्गीकृतम्	ड
9.	No. 52/A 1882–83	,,	भाण्डार्कर् प्राच्य-परिशोधनागारः, पूना		क
10.	B. 10155	,,	तञ्जापुरसरस्वती-महाल् ग्रन्थालयः	प्रतिकृतिः	ल
11.	B. 10158	,,	,,	,,	म
12.	No. 71/2	जयन्तीसहित-गीतगोविन्दम्	उस्मानिया विश्व-विद्यालय ग्रन्थालयः	प्रकटनार्थ-मङ्गीकृतम्	च

अनुक्रमणिका

श्रीः

जयदेवमहाकविविरचितं

गीतगोविन्दमहाकाव्यम्

प्रथमः सर्गः

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्
नक्तं भीरुरयं त्वमेव [1]तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्ज[2]द्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥१॥

सञ्जीवनी

श्रीगणेशाय नमः । श्रीकृष्णाय नमः ॥

स्थिराणां जङ्गमानां च येन सृष्टिर्निरूपिता ।
सर्वेशाय नमस्तस्मै कृष्णाय जगदात्मने ॥

भूयाद्भद्राय भवतां कृष्णः कमललोचनः ।
कालिन्दीकेलि[3]संसृष्टो मेघश्यामोऽतिसुन्दरः ॥२॥

लीला ह्यनादिसंसिद्धा गिरिचन्द्रविहारिणः ।
जयदेवद्विजद्वारा चतुरेषु प्रकाशिता ॥३॥

श्रीमद्गिरिवराधीशं वृन्दारण्यपुरन्दरम् ।
कृष्णचन्द्रं प्रपद्येऽहं भक्तानुग्रहकातरम् ॥४॥

श्रीकृष्णदेवकरुणाप्रतिलब्धविद्यः
श्रीविठ्ठलेशकृपयाऽऽप्तकिशोरभक्तिः ।

---

1. तदिदम्–अ. ब. 2. द्रुमैः–अ. ब. 3. संश्लिष्टेः–ब. संहृष्टो–फ.ग.ह.ज.

गोविन्दगीतविवृतिं वनमालिनामा
भट्टस्तनोति [1]सुकृती शिवदाससूनुः ॥५॥

ग्रन्थोऽयं जयदेवोक्तो व्याख्यातो विमलाशयैः ।
गोविन्दजयदेवोक्तो नेतरैर्वनमालिना[2] ॥६॥

टीकाशतं कविवरैः कृतमेव रम्यं
यद्यस्ति [3]चेत्तदपि नो विफलः प्रयासः ।
राकाधिपे समुदितेऽप्यथ किं प्रदीपो
[4]नापेक्ष्यते भवनकोणतमोनिवृत्त्यै ॥७॥

सर्वस्नेहरसाम्बुधि[5]प्रमथनप्रोद्भूतलीलाकृतिः
श्रीराधोत्पललोचना [6]प्रसृमरप्रत्यङ्गगौरच्छटा ।
[7]प्रत्यानन्दरसैकसारसलसन्नेत्राम्बुदाडम्बरः
कृष्ण[8]श्चाम्बुजलोचनस्तदुभयं वर्वर्ति सर्वोपरि ॥८॥

राधा विशाखा ललिता जयन्ती विजया जया ।
सुमुखी [9]सुभगा चेति राधासख्यः प्रकीर्तिताः ॥९॥

ग्रन्थादौ महाकविनृपचक्रचूडामणिः श्रीजयदेवः स्वज्ञानसर्वस्वसार-निश्चितं [10]प्रारभ्य निर्विघ्नसमाप्तिकामः श्रीरुवामाधवरतिरूपबीजं [11]वस्तु महामङ्गलमाचरति- [12]मेघैरिति । श्रीवृषभानुजासहचरी श्रीराधानाम्नीं वल्लभामित्याह-। इत्थं कथमिति । हे राधे ! नन्द[13]नन्दनकांक्षितसाधिके । यमुनाकूले कलिन्दतनयातटे नक्तं रात्रौ राधामाधवयोः [14]चैत्रवैशाखयोः केलयः क्रीडाप्रकारा यत्र जयन्ति [15]तद्गृहमेकान्तकुञ्जकेलिमन्दिरम् ।

1. सुकृति–अ. 2. पद्यमिदं नास्ति–फ.ग.ज. 3. मे तदपि नो विपुलः–ग.ह.ज. मे तदपि नो विफलः–फ. चेत्तदपि नो विपुलः–अ. चेत्तदपि नो विपुलः मयासः–ब. 4. नापेक्षते भवनकोण–अ. नापेक्ष्यन्ते भुवनकोण–ब. 5. प्रमथनमोद्भूत–ब. 6. रसभर–फ. 7. सर्वानन्दरसैकसारसुलसन्नूताम्बु-दाडम्बरः–ग.फ.ह.ज. 8. स्वाम्बुजलोचनः–फ. 9. सुभगा चाष्टौ–ग. 10. प्रारम्भनिर्विघ्नसमाप्तिकामः–अ.ब.फ. प्रारम्भनिर्विघ्नसमाप्तिकारणम्–ज. प्रारम्भनिर्विघ्नपरिसमाप्तिकारणम्–ग. 11. आदित एतदवधि व्याख्याभागो नोपलभ्यते–इ. 12. न स्तः–अ.ब.इ. 13. नन्दनाकांक्षित–इ.ग.फ. 14. चैत्रवशाखयोः नास्ति–अ. ब. 15. तद्रहगृहमेकान्त–ग. तद्रहग्रहमेकान्त–फ. तद्रहोगृहमेकान्त–ह. ज. तद्गृहग्रहमेकान्त–अ.

रह इति । कामिनां[1] विनोदस्थानं [2]रागिणां चात्यन्तम् । इमं अं. श्रीकृष्णं इमाश्च श्यामाः किशोरी[3]स्त्वमेव [4]युगपत्तत्प्रापयेत्यन्वयः। शृङ्गारे नायिकायाः प्राधान्यम् । चैत्रवैशाखयोरित्यनेन [5]वसन्तकालोऽपि कामिनां [6]केलिपुष्ट्यर्थं लक्षितः। कीदृश्यः केलयः ? वनभुवः [7]वृन्दावनभूसम्बन्धिन्यः। कीदृशयोः ? नन्दनिदेशतः [8]नन्दन्या जयन्त्याः देशतो निकटतः। नन्दनीयः श्लाघनीयः । निदेशतः [9]सन्देशतो वा। [10]प्रत्यध्वं अध्वन्यध्वनि प्रत्यासन्ना ये कुञ्जद्रुमास्तान् प्रति चलितयोः। प्रकटितसौभाग्ययोः। कीदृशं [11]गृहम् ? वरं श्रेष्ठम् । [12]पुनः कीदृशम् ? भीरुरयं भीरूणां कामयानानां रयो गमनवेगो यत्र। [13]पुनः कीदृशम् ? मेघै[14]र्जलदैः मेघसदृशैर्गाढान्धकारैर्वा तमालद्रुमैः श्यामवृक्षैश्च मेदुरं स्निग्धम् । श्रीकृष्णविशेषणानि [15]च। कीदृशम् ? अम्बरं [16]नवीनरसभोक्तारम् । [17]पुनः कीदृशम् ? मेघैस्तमालद्रुमैश्च मेदुरं [18]स्निग्धम् । [19]स्निग्धनीरदपुञ्जश्यामांगम् । भीरुरयं भीरूणामभिसारिकाणां रयो [20]राभस्यं स्मितमात्रेण यस्मात्तम् । अथ वा राधामाधवयो रहःकेलयः अभिसारोत्सवकारिण्यः एकान्तक्रीडा जयन्ति सर्वोत्कर्षेण वर्तन्त इति। [21]नन्दयतीति नन्दः सुरतारम्भस्तस्य निदेशः [22]प्रेरणमिति केचन। यत्तु नन्दाज्ञाभिप्रायं व्याख्यानं [23]तदत्यन्तमनौचित्या[24]दुपेक्ष्यम् । कीदृशयोः ? अध्वन्यध्वनि प्रत्यासन्ना ये [25]कुञ्जा द्रुमाश्च तान् प्रति, इत्थं चलितयोः। इत्थं [26]कथमिति। मेघैर्मेदुरं स्निग्धं अम्बरं, तमालद्रुमश्च वनभुवः श्यामाः, तस्मादिमं गृहं त्वमेव प्रापय। तत्राप्ययं नक्तं रात्रौ भीरुः [27]भयशीलः।

---

1. कामिनीविनोद–अ.फ. 2. रागिणाञ्च सम्मतम्–फ. 3. स्त्वमेव तु–इ. 4. युगपत्प्रापय–ब. 5. वसन्तः कामिनीकेलिपुष्टचर्थम्–ज. 6. पुष्टचर्थम्–फ. 7. वृंदावनभुंवन्दिन्यः–अ. 8. नन्दन्याः नास्ति–ग. 9. सन्देशितो व–अ. 10. प्रत्यध्वं नास्ति–ग.फ.ह.ज. 11. वरं गृहम्–अ. 12. 13. पुनः नास्ति–अ. इ. 14. जलधरैः–इ. 15. च. नास्ति–अ.ब.इ.ग. 16. वीतरभोक्तारम्–अ. 17. पुनः नास्ति–अ. 18. स्निग्धम् नास्ति ग.ह.ज. 19. श्रीकृष्णविशेषणानिर्मलांगम्–ब. नीलपुञ्जश्यामलांगम्–फ. नीरदपुञ्जश्यामलम्–ग. 20. राभ्यस्यम्–ब. 21. नन्दयति हर्षयतीति–इ.ग.फ.ह.ज. 22. प्रेरणं तस्मादिति केचन–ज. 23. तदत्यन्तमनौचितम्–ग. 24. उपेक्ष्य–अ. अपेक्ष्यम्–ब. 25. कुञ्जद्रुमास्तान्–ब. 26. कथम्–ग. 27. भयशील: नास्ति–अ.ब.

ननु सर्वतस्तिमिरपुञ्जे [1]कुञ्जे कथं व्रजामीति [2]भङ्ग्योक्तिः। [3]किन्तु त्वमग्रतो व्रज तव प्रत्यङ्गोच्चलितानन्तगौरच्छटाभिर्विधुतान्धतमसि मार्गे [4]श्यामोऽप्ययं सुखं व्रजेदिति भावः। '[5]लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः' (पा. सू. १.४.९०.) इत्यादिना कर्मप्रवचनीययोगे द्वितीया। श्यामा इति [6]गौरवत्वाद्बहुवचनम्। 'नक्तं रात्रौ [7]व्रते' चेति 'निदेशो निकटाज्ञयोः' इति त्रिलोचनः। '[8]भीरुः स्यात्कातरे पुंसि कामयानेऽपि योषिति' इति [9]महोदधिः। 'श्यामा स्यादप्रसूता स्त्री श्यामा षोडशवार्षिकी' [10]इत्यपि विश्वः [11](८९.११)। [12]'वरः श्रेष्ठे नवरसास्वादके परिणेतरि' इति [13]यादवः। [14]'भूः प्रकारे च सत्तायां धरण्यां सम्भवेऽपि च' इति [15]मेदिनीकारः। [16]अकारो ब्रह्मविष्णुईशमान्यादिषु अनेकार्थः। 'राधो वैशाखमासे स्याद्राधा गोप्यां च विद्युति' इति [17]विश्वः(६६.१)। 'वैशाखे माधवो [18]राधो' [19]इत्यमरः (१.३.१६). ॥१॥

पदद्योतनिका

[20]भद्राय भवतां भूयात् कृष्णः सद्भक्तिभावितः।
कालिन्दीजलसंसर्गमेघश्यामोऽतिसुन्दरः॥

---

1. नास्ति–ज. 2. भयोक्तिः–ग.फ. 3. गर्हि–ब. 4. श्यामोऽप्यहं सुखं व्रजामीति भावः–अ. ब. 5. लक्षणेत्थंभू तेत्यनेन–इ.फ.ग.ह.ज. 6. गौरत्वात् –अ. 7. जते चेति–व. वृते चेति–फ. 8. भीरुःस्यात्कातरे पुंसि कामयानयेति योष्विति–महोदधिः–अ. भीरुस्यात्कातरपुंसि कामयाने त्रिषु स्त्रियामिति–महोदधिः–व. 9. नास्ति–फ. 10. इति विश्वोऽपि–ब. इत्यपि–फ.ग.ह.ज. 11. "अप्रसूताङ्गनायाञ्च तथा सोमलतौषधौ। त्रिवृताशारिबागुन्द्रानिशाकृष्णप्रियंगुषु॥" इत्येव विश्वकोशे दृश्यते। 12. श्रेष्ठे नवरसालोदके पनेतरि–अ. वरः श्रष्ठे नवरसालोदके यवनेतरि–ब. वरः श्रेष्ठे नवरसास्वादके परितेतरि–इ.ग. वर श्रेष्ठे नवरसे स्वादके परिणेतरि–फ. 13. नास्ति–फ. 14. भूः प्रकारे वसन्नायाम्–फ.ग.ज. भूः प्रकारे वसत्तायाम्–ह. 15. ? 16. वाक्यमिदं नास्ति–ग.फ. 17. नास्ति–फ. 18. मासः–फ. 19. नास्ति–फ. 20. अस्मात्पूर्वं वक्रतुण्डेत्यादिविघ्नेशप्रार्थनाश्लोको दृश्यते–ल. म.

[1]इह कविः [2]प्रारीप्सितस्य ग्रन्थस्य [3]निर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्ण-स्मरणरूपं वस्तुनिर्देशलक्षणं मङ्गलं तावदाचरति–मेघैरिति। राधामाधवयोः रहःकेलयः यमुनाकूले [4]जयन्तीत्यन्वयः। राधाकृष्णयोः रहःकेलयः एकान्तक्रीडाः यमुनातीरे जयन्ति सर्वोत्कर्षेण वर्तन्ते। कथम्भूतयो [5]राधामाधवयोः? प्रत्यध्व-कुञ्जद्रुमं [6]अध्वनि [7]मार्गे कुञ्जे लतागृहे द्रुमे [8]वृक्षे च। [9]इत्थं इति नन्दनिदेशतो नन्दाज्ञया चलितयोः [10]प्रस्थितयोः। यद्वा अध्वकुञ्जद्रुमान् प्रति उद्दिश्य चलितयोः। [11]इतीति किम्? हे राधे! अम्बरमाकाशं मेघैर्मेदुरं [12]सान्द्रं व्याप्तमित्यर्थः। वनभुवः [13]तमालद्रुमैः तमालवृक्षैः श्यामाः। अयं कृष्णः नक्तं रात्रौ [14]भीरुर्भयशाली अतिबालत्वात्। [15]तत्तस्मात्कारणा-त्त्वमेव इमं पुरोवर्तिनं कृष्णं गृहं प्रापय [16]गृहं [17]नय। [18]एवकारेण नन्दस्यास्मिन् विश्वासाभावः सूचितः ॥१॥

जयन्ती

श्रीगुरुभ्यो नमः।

श्रीसरस्वत्यै नमः। निर्विघ्नमस्तु ॥

हे राधे! अम्बरं आकाशं मेघैः जलदैः मेदुरं व्याप्तम्। जातमिति शेषः। वनभुवः काननभूमयः तमालद्रुमैः तमालवृक्षैः श्यामाः कृष्णवर्णाः। नक्तं निशायां, अयं कृष्णः भीरुः भयशीलः। यद्वा नक्तम्भीरुः रात्रिकाले भीरुः भयशीलः, दिवा न बिभेतीत्यर्थः। तत्तस्मात् कारणात् भयानकमेघादिसमृद्धेः

---

1. इतः पूर्वमधोलिखितः श्लोको दृश्यते 'क' पुस्तके—
"पिपासूनां भक्तियोगात् श्रीकृष्णचरितामृतम्।
लिख्यते जयदेवेन गीतगोविन्दपुस्तकम् ॥"

2. प्रारम्भितस्य–क. प्रारीप्सिताविघ्न–ल.म. 3. निर्विघ्नेन–क. 4. पदत्र-यमिदं नास्ति–ल.म. 5. नास्ति–ड. 6. 7. नास्ति–ल.म. 8. वृक्षे च इत्यर्थः–क. 9. नास्ति–क. 10. नास्ति–ड.क. 11. इतीति किम् नास्ति–ल.म. 12. नास्ति–ड. 13. तमालद्रुमैः नास्ति–क. 14. भीरुर्भयनाशीलः. बाल-त्वात्–क. भीरुरयं बालत्वात्–ल.म. 15. तस्मात्कारणात्–क. 16. नास्ति–क.ल.म. 17. नास्ति–ल.म. 18. एवंकारेण नन्दस्य अन्यस्मिन् विश्वासाभा-वात्–क. एवंकारेण नन्दस्यान्यस्मिन् विश्वासाभावो द्योत्यते–ल.म. एवंकारेण नन्दस्यान्यस्मिन् विश्वासाभावः सूचितः–ड.

त्वमेव; इतरानपेक्षायामेवकारः। इमं भीरुं कृष्णं गृहं निवासस्थानं प्रापय। णिच्। इत्थं उक्तप्रकारेण नन्दस्य गोपाधिपस्य निदेशतः आज्ञातः चलितयोः प्रापणीयप्रकारतया प्रस्थितयोः राधा राधाह्वगोपी मधोर्गोत्रापत्यं पुमान् माधवः, मायाः लक्ष्म्याः धवो वा कृष्णः, तयोः रहःकेलयः सुरतक्रीडाः आश्लेषचुम्बनादयः। अध्वनि कुञ्जाः लतादिपिहितोदराश्च ते द्रुमाश्च वृक्षाः तेषु तेषु प्रत्यध्वकुञ्जद्रुमम्। यमुनाकूले यमुनातीरे जयन्ति उक्तप्रकारेण वर्धन्ते। (अत्र) वस्तुनिर्देशाख्यं ग्रन्थमुखम्। "आशीर्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखम्" इति [1]काव्यादर्शात् (१–१४)। उत्कृष्टत्वात् क्रीडाः रक्षन्त्विवत्याशीः। तादृशक्रीडाशालिनं नमस्कुर्मः इति नमस्कारश्[2]चाक्षेपाल्लभ्यते ग्रन्थमुखतः। अत्र मेघानां बाहुल्येन चन्द्रनक्षत्रप्रकाशरोधात् वनभूमीनां अन्धकारवत्वं तेन च पान्थानां असञ्चारः। सञ्चारेऽपि अन्धकारवशात् तत्रत्यक्रीडापराणां परानवलोकनं व्यज्यते। एवं रात्रेरपि गमकत्वम्। मेघरात्र्योरुद्दीपनविभावत्वम्। परस्परते राधाकृष्णयोरालम्बनविभावत्वम्। भीरुरित्यनेन कालासहिष्णु(त्व)रूपमौत्कण्ठ्यं विरहत्रासश्चेति सञ्चारिभावौ। चलितयोरित्यनेन तदनुसरणमनभावः। एवं 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति भरतसूत्रोक्तेः (नाट्य-शा. ६.३२.३) शृङ्गाररसो निष्पद्यते।

"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः॥" (द.रू.४.१)

इति राधाकृष्णयोः परस्परं रतिरूपस्थायिनः ज्ञायमानत्वात् शृंगारो रसः।

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायीभावाः प्रकीर्तिताः॥ (सा.द.३.१८५)
शृङ्गारहास्यकरुणवीररौद्रभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥ (सा.द. ३.१८२)

इत्यादिस्थायिकाः शृङ्गारादयो रसा भवन्तीति प्रकृते रतिस्थायिकः शृङ्गाररसोऽत्र। मेदुराम्बरस्य तमालच्छन्नभमीनां च रात्रिकालस्य भीरुत्वस्य च प्रत्येकं गृहप्रापणीयत्वे हेतुत्वात्समुच्चयालङ्कारः। राधाया अनूढत्वेऽपि तद-

---

1. अलंकारसर्वस्वात् इति जयन्ती. 2. श्चाक्षेपलभ्य इति ग्रन्थमुखतः–च.

वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ।
श्रीवासुदेवरतिकेलिकथासमेत-
मेतं करोति जयदेवकविः प्रबन्धम् ॥२॥

धीनतया परकीयात्वम् । स्वोयासामान्याभोगापेक्षया परकीयाभोगः परमानन्दहेरिति । ईषत्समासवत्वाद्वैदर्भी रीतिः प्रसादो गुणः ॥

अत्र केचित्—माधवस्य भीरुत्वेन प्रापयेत्यनेन च कटचारोहणानयनमिति शिशुत्वम् । राधायाश्च प्रौढात्वेन ज्यायस्त्वमिति रसाभासतामाशङ्क्य तत्परिहारार्थमेवं व्याचख्युः । तथा च, इत्थं पूर्वोक्तप्रकारेण नन्दनिदेशतः समीपादिति माधववचनमेव । अयं माधवः । विरहनिर्विण्णतयाऽहङ्कारभङ्गादस्मच्छब्दस्थाने इदं शब्दप्रयोगः । इमं मां गृहं प्रापय गृहिणीत्वमेव प्रापय । 'गृहिणी गृहमुच्यते' इति न्यायेन त्वमेवात्मानं गृहिणीं कुर्विति भावः । एवं वक्तृबोद्धव्यवैशिष्ट्याद् गृहमिषेण क्रीडार्थमेव गन्तव्यमिति व्यज्यते । इदमन्येषाम् । माधवस्य तु भगवदवतारत्वेन नानारूपविभूतिमत्त्वं प्रकटितमेव । एवञ्च माधवः नन्दयशोदयोर्बाल एव दृश्यते । गोपिकानामुद्यद्यौवन एवेति नन्दस्य वालकवद्भानं राधायां ज्यायस्त्वभानं न राधामाधवयो रसाभासापादकमिति । शार्दूलविक्रीडितं वृत्तम् ॥१॥

सञ्जीवनो

ननु जयदेवस्य पुरुषत्वाद् गोप्यकेलिकथने कथमधिकार इत्याक्षिप्य स्वस्य [1]तत्त्वं निराकुर्वन् अभिसाराख्यं प्रबन्धं [2]प्रौढिनिरूपणेनैव विस्तारयति; श्रीराधाऽनुग्रहं च प्रार्थयते—वाग्देवतेति । जयः श्रीकृष्ण [3]एव देवो यस्य स एव कविः काव्यकर्ता [4]एतं प्रबन्धं करोतीत्यन्वयः । प्रबन्धचिह्नं भोजे—

'शृङ्गारैकप्रधानो यो गीततालादि[5]संयुतः ।
अभिसारार्थनिपुणः प्रबन्धः [6]सम्प्रकीर्तितः ॥

---

1. स्तब्धत्वम्—इ.ग.हृ.ज. तद्वत्वम्—फ. 2. प्रोटि—ब. 3. नास्ति—फ.ग.हृ.ज. 4. एवं—अ. 5. संयुगः—ब. 6. स्स प्रकीर्तितः—इ.फ.ग.हृ.

प्रकर्षेण बन्धोऽन्योन्या[1]सक्तिरूपो [2]नायिकानायकयोर्यत्र स प्रबन्धः। [3]एतं कीदृशम्? श्रीः शृङ्गारशोभासम्पत्तिः [4]रूढितः कान्तिरूपा, राधा चात्र प्रस्तुता। तथा [5]चोक्तं श्रीभागवते, 'य उत्तराननयत्कोशलान् दिवं द्यौ रूढितः स्वर्गो ज्ञायते' [6]द्योतत इति द्यौः वैकुण्ठस्तद्वदत्रापि श्रीराधैव [7]ज्ञायते। वसुष्वष्टासु दीव्यतीति वसुदेवो नन्दो वासुदेवस्तया राधया सहितः श्रीवासुदेवः। तस्य या रतिकेलयः स्नेहक्रीडाप्रकाराः, तासां याः कथाश्चतुष्षष्टिबन्धात्मिकास्ताभिः समेतं युक्तम्। कीदृशम्? वाचां देवता श्रीकृष्णः [8]तस्य चरितं रसात्मिका लीला, [9]वैदग्ध्यं वा। तया तेन वा चित्रितं मण्डितं कामोद्बोधकप्रकारान्वितं वा चित्तमन्तः[10]करणमेव सद्म गृहं यस्य सः। तच्चोक्तं श्रीभागवते—

'सा [11]वाग् या तस्य गुणान् गृणीते'

इत्यनेनान्यत्र वाग्देवत्वं निरस्तम्। गृहमपि विविधोपकरणैश्चित्रितं भवति। तद्वदत्रापि भगवद्गुणचित्रैरलंक्रियते[12]। प्रवेशमात्रेण पवित्रीकृतं वर्धमान[13]स्नेहेनालिखितम्। विविधकेलिप्रदर्शनेन [14]प्रकाशनेन वा चित्रितमिति भावः। कीदृशः? पद्मावती नाम स्वस्य प्रमदा, इः कामो वाऽस्याः तस्य वा चरणयोश्चारणे [15]नृत्यनिपुणतारूपे नर्तने चक्रवर्ती [16]नृपराजो नटराजो वा, [17]सदा [18]शृङ्गारित्वात्। एतेन कवेः शृङ्गारित्वं सूचितम्। पद्मानि क्रीडार्थं यत्र सा पद्मावती। [19]अथ वा सौन्दर्यसौभाग्यद्योतकं सामुद्रिकशास्त्रोक्तं पद्मं वा हस्ते यस्याः सा पद्मावती श्रीराधा। तस्याश्चरणयोश्चारणं [20]सेवकतया आत्मनिवेदनम्, तत्र चक्रः[21] सेवकसमूहस्तद्वर्तितुं शीलं यस्य सः। [22]तच्चरणलालनेन चक्रवर्तित्वमात्मनोऽभिमन्यमानः चक्रो रथांगस्तत्प्रण(य)वानिति वा[23]। उक्तं च—

'शृङ्गारी चेत्कविः काव्ये तदा रसमयं जगत्।

---

1. शक्ति–अ.ब. 2. नायकनायिकयोः–ग.ह.ज. नायकः नायिकयोः–अ. 3. नास्ति–अ.ह. 4. रूढिरूपा कान्तिः–अ.ब. 5. तच्चोक्तम्–फ.ग.ह.ज. 6. द्योत्यते–फ. 7. ज्ञातव्या–इ.फ.ग.ह.ज. 8. तच्चरितम्–ग. 9. वेदध्यम्–ब. 10. करणेमव–ब. 11. वाग्यया–फ़. वाग् तया–ग. 12. क्रियेत–ब. क्रियतो–इ. 13. स्नेहेन लिखितम्–इ.फ.ग.ह.ज. 14. प्रकाश वा–ब. नास्ति–फ.ग.ह.ज. 15. नृपनिपुणतारूपेणर्तनेन–ब. 16. नास्ति–ब. 17. तदा–ग. 18. श्रृंगारितात्–अ. 19. यद्वा–ग. 20. — 21. चारणं—चक्रः नास्ति–अ.ब. 22. — 23. तच्चरण—वा नास्ति–इ.फ.ग.ह.ज.

[1]स एव चेदशृङ्गारी तदा विरसतां व्रजेत् ।।' (स. कं. ५.३) इति । [2]लोकोक्तिरलङ्कारः । 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः (३.३.१८९) । '[3]कविः [4]काव्यकरे च' इति विश्वः (१०९.२४) । '[5]चक्रः कोके व्रजे पुंसि क्लीबे सैन्यरथाङ्गयोः' इति [6]मेदिनी (२७.३१) । '[7]गृहं गेहो दवसितं वेश्म सद्म निकेतनम्' इत्यमरः (२.२.४) । [8]सद्मा पद्मेत्याद्यनुप्रासार्थम्[9] । 'इः कामः' इत्येकाक्षरे (४) ।।२।।

पदद्योतनिका

[10]इदानीं [11]कविः सरस्वतीलक्ष्म्योः कीर्तनपूर्वकं कृष्णस्य सुरतक्रीडावर्णनं कर्तुमाह वाग्देवतेति । [12]जयदेवकविरेतं प्रबन्धं [13]कृष्णकेलिकथाप्रतिपादकं ग्रन्थं करोतीत्यन्वयः । कथम्भूतो जयदेवकविः ? [14]वाग्देवताचरितचित्रितचित्त–सद्मा वाग्देवतायाः सरस्वत्या[15]श्चरितेन [16]रचनाविशेषेण चित्रितं मण्डितं चित्त-सद्म मनोगृहं यस्य [17]सः । पुनः कथम्भूतः ? पद्मावत्याः लक्ष्म्याश्चरणयो[18]श्चारणे संवाहने चक्रवर्ती [19]नृप इव । [20]लक्ष्मीसेवया हि चक्रवर्तित्वप्राप्तिरिति । [21]कीदृशम् ? श्री वासुदेवेति । श्रीः राधारूपा वासुदेवः श्रीकृष्णस्तयो रतिकेलि-कथया [22]सुरतक्रीडाकथनेन [23]समेतं [24]युक्तं, [25]तत्प्रतिपादकमित्यर्थः ।।२।।

---

1. स एव वद शृङ्गारी–अ 2. श्लोकोक्तिरलङ्कारः–अ.ब. श्लेषोक्ति-रलङ्कारः–फ.ग.ह.ज. 3. नास्ति–ब. 4. काव्यकरे स्तरे श्चेति–अ. काव्यकरे शूरे–फ.ग.ह.ज. 5. चक्रः कोके पुमान् क्लीवं वज्रं सैन्यरथांगयोः–मेदिनी । 6. नास्ति–अ.ब. इत्यपि–इ.ग.ह.ज. 7. गृहं गेहादवसितं वेष्म सद्म निकेतन-मित्यमरः–अ. गृहा गेहो पद्मापद्मेत्यादिवदेसितं वेश्मसद्मनिकेतनमित्यमरः–व. गृहं गेहो दवसिते वेश्म सद्म निकेतनम्–इत्यमरः–ह.ज. 7. गृहं– ,9. प्रासार्थम् नास्ति–फ. 8. सद्मा सद्मेति अनुप्रासार्थम्–अ. अनुप्रासार्थम्–ब. सद्मा पद्मेत्यादि बन्धानुप्रासार्थमिति–ह. सद्म पद्मेत्यादि बन्धानुप्रासार्थमिति–ज. बन्धानुप्रा-सार्थमिति–इ.ग. 10, 11. न स्त–ल.म. 12. जयदेवकविरचितं प्रबन्धं गीत-गोविन्दवर्णनमित्यन्वयः–ल.म. 13. नास्ति–क. 14. नास्ति–ड. 15. चरितेन वचसा चित्रितं चित्तसद्म–ल.म. 16. वचनरचनाविशेषेण–क. 17. नास्ति–ड. 18. चारणेन संवाहनेन–क.ल.म. 19. नृपश्रेष्ठः–ल.म. 20. अलं प्राप्तमिति–ल. म. 21. कथम्भूतं प्रबन्धम्–क.ल.म. 22. सुरतलक्षणकथायाः–ल.म. 23, 24. न स्तः–ल.म. 25. तत्प्रतिपादकमित्यर्थः नास्ति–ड.ल.म.

यदि हरिस्मरणे सरसं मनो
यदि विलासकथासु कुतूहलम् ।
मधुरकोमलकान्तपदावलीं
शृणु तदा जयदेवसरस्वतीम् ॥३॥

जयन्ती

वाचां देवता सरस्वती तस्याः चरितैः भक्तानुग्रहकवितारूपप्रसादादिभिः काव्यनाटकादिवाग्विलासैर्वा चित्रितं व्याप्तं चित्तमेव सद्म यस्य सः । सरस्वत्या निवासगृहीभूतचित्तवानित्यर्थः । पद्मावती नाम जयदेवोपास्यदेवता, तस्याश्चरणयोः चारणाः परिचारकाः, तेषां चक्रवर्ती श्रेष्ठः; भगवत्याराधक इत्यर्थः । विशेषणद्वयेन स्वस्य कविताकरणसामर्थ्यं भगवद्भक्तिमत्त्वैश्वर्यं च सूचितम् । जयदेव इति कविः श्रीः राधारूपा, वसुदेवाङ्गजरूपो विष्णुः तयो रतिकेलिः सुरतक्रीडा तस्याः कथा कीर्तनं तेन समेतं युक्तम् । प्रतिपादकमिति यावत् । एतं हृत्स्थं वक्ष्यमाणं प्रबन्धं गीतगोविन्दसंज्ञकं करोति कुरुते इत्यर्थः । वर्तमानसमीपत्वाल्लट् । अत्र चकारादेरनेकावृत्त्या वृत्त्यनुप्रासः । 'चरणचारणचक्रे'ति, 'मेतमेत'मिति व्यञ्जनयुगस्यासकृदावृत्त्या छकानुप्रासः शब्दालङ्कारः । चित्तसद्मेत्यत्र रूपकम् । एषां निरपेक्षतया परस्परं संसृष्टिः । वसन्ततिलका वृत्तम् । 'प्रबन्ध कल्पनाकथा' इत्यमरः (१.६.६) । प्रबन्धशब्देन कल्पितत्वमयोनेरनुत्तमत्वात् ॥२॥

सञ्जीवनी

एवं तावद्विद्वज्जनप्रवृत्त्यर्थमन्यकाव्यापेक्षया [1]स्वकाव्योत्कर्षं प्रथयन् गीतगोविन्द[2]श्रवणे श्रोतृगणं प्रोत्साहयति—यदीति । हे[3] दाः बहुपुण्यप्रदाः ! यदि हरिस्मरणे [4]कृष्णस्मरणे मनश्चित्तं सरसं भगवत्प्रणययुक्तम् । रसः शृङ्गाररसः । तत्सहितं वा साभिलाषं वा । तदा जयदेवसरस्वतीं गीतगोविन्दरूपां वाचं [5]शृणुतेत्यन्वयः । मनस्तत्कर्तुमभिवाञ्छा तदाऽत्यादरेण शृणुत [6]धारयत । [7]तद्धारणमेव [8]तदिति करिष्यतीति भावः । [9]किंच, यदि

1. ततत्काव्योत्कर्षम्–ग. 2. श्रयणे–अ. श्रवयो–ब. श्रवण–ज. . महावग्दु–ब. देहाः–ग. 4. नास्ति–ब. 5. शृण्वतत्यन्वयः–ब. 6. धारयतेति–ज. 7. तध्दारणम्–ज. 8. तदेव–इ.फ.ग.ह.ज. 9. किन्तु–अ.ब.

विलासः स्त्रीणां [1]प्रतितिथि केशाद्यधोऽङ्गस्पर्शश्चरणोर्ध्वं च [2]रतिकोशोक्तस्तस्य [3]कलासु चतुष्पष्टिक्रीडासु कुतूहलं कौतुकम् । विलासलक्षणं रतिकोशोक्तं ग्रन्थ-विस्तरभयान्न लिखितम् । कीदृशम् ? मधुरामिष्टाम् । [4]श्रीराधाशृङ्गारप्रा-धान्यात् । कोमला मृदुला । प्रणयपूर्वकश्रीकृष्णवचनसंयुक्तत्वात् । कान्ता कमनीया [5]स्निग्धसाहचर्य[6]वचनयुक्तत्वात् । तत्पदानामावली परम्परा यस्या-स्ताम् । कर्मधारयः समासः ।

(मधुरं यथा—)

[7]मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
[8]मासि माद्यन्ति मधुनो मधुनेव मधुव्रताः ॥

इति दण्डी (काव्यादर्शः १.५१) ।

सुकुमारं यथा—

सुप्रयोगैर्महत्कष्टैर्युक्तमस्पष्टसन्धिभिः ।
सुकुमारार्थसंयुक्तं [9]सुकुमारं प्रचक्षते ॥

कान्तं कथा—

यन्मनःश्रोत्रविशदं प्रह्लादजनकं भवेत् ।
शब्दवन्धानुयोगेन तत्कान्त[10]मभिचक्षते ॥

इत्यपि । [11]तत्र मधुरं द्विविधम्; अक्षराश्रितमर्थाश्रितं च । तत्राक्षर-मधुरत्वमपृथक्पदत्वम् । अर्थमधुरत्वं वचनवैचित्र्यम् । कोमलत्वमपि द्विविधम् । वन्धस्यापरुषत्वमपि कोमलत्व[12]मर्थकोमलत्वं [13]वा । तत्सर्वमन्यकवीनां काव्ये साधारणम् । अत्र त्वसाधारणं राधाकृष्ण[14]दूतीनामेतत्सर्वम् । अतो जयदेवसरस्वतीं सर्वश्रेष्ठां [15]शृणुतेति । [16]"कला स्याच्चन्द्रकलायां कला स्यात्क्रीडनादिषु" इति विश्वः (१०४–४३) । दीपकोऽयमलङ्कारः । तल्लक्षणं शिशुबोधे—

---

1. प्रतितिथिकेस्याद्यधोगस्यस्पर्शाचरणोर्द्धं चरति–अ. प्रतितिथिकेशाद्यधो-ङ्गस्पर्शा चरणोध्र्वंचरसि–व. 2. चरतीति रतिकोशोक्तः–ज. 3. रतिकलासु–ग. 4. 6. श्रीराधा—वचन नास्ति–ग. 5. स्निग्धसहचर्यादि–इ.फ.ह.ज. 7. मधुरं यथावत् रसवत् वासु वस्तुन्यपि रसस्थितिम् । मासु माद्यन्ति मधुनो मधुने च वधुवता इति दण्डी–अ.ब. 8. येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः काव्यादर्शः(१-५१)–इ.फ.ग.ह.ज. 9. सुकुमारं च वक्ष्यते–फ. 10. मभिचक्ष्यते–फ. मवक्ष्यते–ग. 11. 13. तत्र–वा नास्ति–इ.फ.ग.ह.ज. 12. पदमिदं नास्ति–ब 14. इति नाम्नि तत्सर्वम्–अ.ब. कृतीनामेतत्सर्वम्–इ. 15. शृणुतेति भावः–फ.ग.ह.ज. 16. कला स्यान्मूलविवृध्दौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालयोः कला ॥ (विश्वः–१०४.४३) कला स्यात्क्रीडनादिषु–ज.

[1]प्रस्तुतौचित्य[2]सम्बद्धैर्यद्वाक्यैः सह सङ्गतिम् ।
दधानं दीपयत्यर्थान् दीपकं तदुदाहृतम् ॥

एवमेतैः शब्दैर्विषयप्रयोजनसम्बन्धाधिकारिणो दर्शिताः । तत्र रहःकेलय इति विषयः । यमुनाकूल [3]इत्यधिकरणम् । राधामाधवयोरिति वसन्तकालः समयः । सद्भक्तिरिति प्रयोजनम् । [4]प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । श्रीराधाकृष्ण-रसभावितान्तः[5]करण एवाधिकारीत्येवं सर्वाणि क्रीडा[6]साधनानीति रहस्यम् ॥३॥

पदद्योतनिका

[7]अथ कविः निजग्रन्थप्रयोजनमाह—[8]यदीति । हे कृष्णभक्त ! [9]तदा तर्हि जयदेवसरस्वतीं शृणु इत्यन्वयः । यदि यर्हि हरिस्मरणे [10]कृष्णचिन्तने [11]सरसं सानुरागं तव मनोऽस्तीत्यध्याहारः । [12]यदि विलासकलासु, [13]विलासकलाः चतुष्षष्टिः, तासु कुतूहलमस्तीति । [14]कथम्भूतां जयदेवसरस्वतीम् ? मधुरा सरसा अर्थतः कोमला शब्दतः [15]कान्ता मनोहरा पदावली [16]पदसमूहो [17]यस्याम् ॥३॥

जयन्ती

अधिकारिणः प्राह—यदीति । हे जनेति सम्बोधनाध्याहारः । हरेः विष्णोः स्मरणं तस्मिन् मनः सरसं यदि, सरसं सरागं सादरमित्यर्थः । यदि वा विलासाः शृङ्गारचेष्टाः [18]तद्वन्तो विलासिनः तेषां कलासु कुतूहलं कुतुकयुक्तं यदि भवति । विशेषणद्वयेन शान्तशृङ्गारयोः [19]प्रतिपाद्यत्वात् प्रवृत्ति-

---

1. प्रस्तुतौचित्यसंवर्धि—फ.ग.ह. प्रस्तुतौचित्यसम्बन्धि—ज. 2. सम्बन्धिः—अ. 3. इत्यधिकारिणः—अ.ब. 4. प्रतिपाद्यप्रतिपादकरूपः सम्बन्धः—फ. प्रतिपादकप्रतिपाद्यरूपः सम्बन्धः—ग.ह.ज. 5. करणोऽत्राधिकारी—फ. 6. साधनानि निरूपितानि—इ.फ.ग.ह.ज. 7. कथम्—ल.म. 8. नास्ति—क.ल.म. 9. कथा तदा—क. 10. नास्ति—ल.म. 11. सरसं सरागम्—ल.म. सानुरागं सरसम्—क. 12. यदि यर्हि—क.ल.म. 13. विलासः कृष्णविलासस्तस्य कलाश्चतुष्षष्टिः—क.ल.म. 14. किंविशिष्टाम्—ल.म. 15. अतः कान्ता मनोहरा—ल.म. अतः कारणात् मनोहरा—क. 16. नास्ति—लं. 17. यस्यां सा—ल.म. 18. जयन्ती व्याख्यानुरोधेन मूलपाठः 'विलासिकलासु कुतूहलम्' इति । 19. प्रतिपादकत्वात—च.

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव [1]एव शरणः श्लाघ्यो [2]दुरूहद्रुतेः ।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-
स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥४॥

मार्गा निवृत्तिपन्थानश्चाधिकारिणः । उभयोस्तदा मधुरा च सा कोमला च सा कान्ता च सा पदानां आवलिः यस्यां सा तां जयदेवसरस्वतीं वाणीं गीतगोविन्द-रूपां शृणु । माधुर्यसौकुमार्यकान्तिरूपगुणवैशिष्ट्यं श्रवणीयत्वकारणं न तु श्रुतिकटुत्वादिदोषयुक्तमित्यर्थः ।

"माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम्"
"सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात्"
"शृङ्गारे च प्रसादे च कान्त्यर्थं व्यक्तिसंग्रहः"
इति चन्द्रालोके (४–६,८,१०) ॥३॥

सञ्जीवनी

इदानीं स्वसरस्वतीप्रामाण्योत्कर्षाय केनचिद्भागवतोत्तमेन कविराज-सभायां वर्णितं पद्यं सङ्गृह्यते कविना । नन्वेतन्नानागुणसंयुक्ताऽपि सरस्वती [3]लक्ष्मणसेनमहानृपतिवरसभायामुमापतिधरादीनां कवीनामप्यस्ति । सा किं न श्रोतॄणां [4]श्रवणरतिजनकेत्याह—वाच इति । उमापतिधरसंज्ञो लक्ष्मणसेनमन्त्री वाचः [5]वाणीः पल्लवयति [6]विस्तारयति । तथा तस्यापि काव्यं व्यङ्ग्यार्थशून्यं शब्दवि[7]चित्रार्थशून्यमधमं च । [8]न रसज्ञचतुरहृदयाह्लादजनकमिति भावः । तथा च राजसभायां शरण इति नामा कश्चित्कविर्दुरूहस्य गूढार्थस्य द्रुतेः शीघ्रो-च्चारणतः श्लाघ्यः स्तुत्यः । तथा चास्य कवेः काव्यं गूढार्थत्वादिदोषसहितं प्रसादानुग्रह[9]रहितं चेति । अत एव न [10]विद्वज्जनमनोरतिजनकमिति ध्वनितम् । तथा च शृङ्गारोत्तरस्य सत्प्रमेयस्य शृङ्गाररस एव उत्तरः श्रेष्ठो तत्र; शृङ्गारे-

---

1. नास्ति–ब. 2. दुरूहद्रुमे–अ.ब. दुरूहादृते–ड. 3. लक्षणसेन–अ. 4. रतिजनकेत्याह–ग. 5. नास्ति–अ.ब. 6. नास्ति–ब. 7. विचित्रार्थगुण-शून्यम्–फ.ह.ज. चित्रार्थगुणशून्यम्–ग. 8. नवरसज्ञ–ग. 9. रचितं–अ.ब. 10. विद्वज्जनमोरति–अ.

णोत्तरं मुख्यं वा; सत्प्रमेयमुत्तमं वस्तु तस्य रचनैः कवितायां मुख्यप्रकथनैः। [1]आचार्यगोवर्धनेन गोवर्धनाचार्येण सह [2]स्पर्धी स्पर्धावान्न कोऽपि विश्रुतो [3]विख्यातः। [4]शृङ्गाररस[5]रचनायामेव तस्य [6]प्रौढत्वम्। रसान्तरकथने सोऽप्यसमर्थ एव। [7]अत एव तत्कवित्वं न सज्जन[8]हृदयगमकमिति भावः। [9]आचार्यपदमुपहासार्थम्। धोयीनामा कविक्ष्मापतिः कविराजः श्रुतिधरः श्रवणमात्रग्राही श्रुतार्थधरो वा। न तु तस्य [10]काव्यरचनायां स्वकौशल्यम्। उच्चारितमात्रग्राहक इति भावः। [11]क्ष्मापतिः; शब्देनाहङ्कारकथनाय [12]राजोपमा न तु कविगणना तस्येत्यर्थः। गिरां वचसां [13]सन्दर्भशद्धिं गुणालङ्कारादिग्रथनविशेषं जयदेवकविरेव जानीते; नान्यः कश्चित्कविः। अत एव जयदेवकृतगीतगोविन्दकाव्यश्रवणे सन्तोषः, तथा नान्यत्र काव्ये। अत [14]एव श्रोतव्यमिति भावः। [15]"पल्लवः स्यात्किसलये विटपे विस्तरे जले" इति विश्वप्रकाशः (११०.३१)। "लघु क्षिप्रमरं द्रुतम्" इत्यमरः (१.१.६४)। "उत्तरं प्रतिवाक्ये स्यादूर्ध्वे दिव्योत्तमेन्यव" दिति च (विश्वः १०१.९९)। उदात्तनामाऽयमलङ्कारः। तल्लक्षणं शिशुबोधे—

"उच्चैः समृद्धिमद्वस्तुवर्णनं स्यादुदात्तता।
सामर्थ्यं जायते यत्र [16]चरमोत्कर्षचित्रिता ॥ इति ॥४॥

पदद्योतनिका

[17]कविरन्यग्रन्थेभ्यो मद्ग्रन्थे बहवो गुणाः सन्तीति द्योतयन्नाह—[18]वाच इति। उमापतिधरः कविर्वाचः [19]वचनानि परं पल्लवयति विस्तारयति

1. आचार्यगोवर्धनाचार्येण सह–अ.ह. 2. नास्ति–अ.फ.ग.ह.ज. 3. न विख्यातः–फ.ह.ज. 4. शृङ्गाररसमुख्य–इ.फ.ग.ह.ज. 5. रचनायातस्य–ब. 6. प्रौढ्यम्–इ.फ.ग.ह.ज. प्रौढं च–अ. 7. अतस्तत्कवित्वम्–इ.फ.ग.ह.ज. 8. गृह्यदयगमक–अ. 9. आचार्यमुपहासार्थम्–ब. 10. कविरचनायां स्वकौशलम्–अ.इ.फ.ग.ह.ज. 11. क्ष्मापतिशब्देन–इ.फ.ग. 12. राजोपमानं तु–ब. 13. संशुद्धिम्–ग. 14. एतदेव–इ.फ.ग.ह.जं. 15. पल्लवः। किसलये पिङ्गे विटपे विस्तरेचले' इवि विश्वः–इ.फ.ग.ह.ज. किसलये पिङ्गे विटपे विस्तरेचल इलपूति विश्वप्रकाशः–ब. 16. चमोत्कर्ष–ब. परमोत्कर्ष–इ. 17. इदानीं कविः–क. अथान्यसर्वकविभ्यः पदलालित्ये द्योतयन्नाह–ल. अथान्यसर्वकविभ्यः पदलालित्य द्योतयन्नाह–म. 18. वाचः पल्लवयतीति–क. 19. वचनपरं पल्लवयति–ल.म. वचनानि पल्लवयति–क.

[1]न तु गुणादिकम्। [2]गिरां [3]सन्दर्भशुद्धिमर्थतः शब्दतश्च ग्रन्थेन विशुद्धि जयदेव [4]एव परं जानीते नान्य इत्यर्थः। शरणः कवि[5]र्दुरूहद्रुतेः [6]विषयस्य ग्रन्थस्य शीघ्रोच्चारणतः श्लाघ्यः स्तुत्यः। शृङ्गारेति। शृङ्गारोत्तराणि शृङ्गारप्रधानानि [7]सन्ति उत्कृष्टानि प्रमेयानि वाक्यानि तेषां रचनैः प्रबन्धः आचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुतः। [8]आचार्यगोवर्धनः कविः [9]शृङ्गार-प्रधानमेव प्रबन्धं [10]करोति। धोयी नामा कविक्ष्मापतिः कविराजः श्रुतिधरः[11] श्रुत्या श्रवणमात्रेणैव धारयति न पुनरर्थादिग्रहणे प्रवीण इत्यर्थः। राजपदेन महाहङ्कारकथनम् ॥४॥

जयन्ती

ख्यात्यर्थं कविं स्तौति—(वाच इति)। उमापतिधरः तन्नामको मण्यालोकव्याख्याता कविः वाचः पल्लवयति विस्तारयति। तत्कवितायां समासव्यासरूपगुण इत्यर्थः। जयदेव एव गिरां वाचां सन्दर्भस्य घटनायाः शुद्धिं दोषरहितत्वं प्रतिकूलवर्णत्वादिराहित्यं जानीते। जयदेवतुल्यो यथोचितार्थसन्दर्भकर्ताऽन्यो नास्तीत्यर्थः। दुरूहात् कष्टात् [12]क्लिष्टार्थात् ऋते दुरूहं विनेत्यर्थः। शरणः शरणसंज्ञकः श्लाघ्यः; अक्लिष्टकाव्यकर्तेत्यर्थः। शृङ्गारो रतिस्थायिकः प्रथमरसः उत्तरं अधिकः यस्मिन् तच्च तत् सत् निर्दुष्टं प्रमेयं कल्प्यमानवस्तु तस्य रचनानि काव्यरूपाणि तैः। कोऽपि कविः आचार्यश्चासौ गोवर्धनः गोवर्धनाचार्य इत्यर्थः; तत्स्पर्धी तत्सदृशः न विश्रुतः नाकर्णितः न ज्ञात एवेत्यर्थः। धोयी—एतत्संज्ञकः कवीनां क्ष्मापतिः राजा श्रेष्ठ इति श्रुतिधर आकर्णितः। यद्वा श्रुतिधरः सकृत्श्रुतस्य शास्त्रस्य धर इति[13] ॥४॥

---

1. नान्यः–ल.म. 2. नास्ति–ड. 3. सन्दर्भशुद्धि वचनरचनाविशुद्धिम्–लं.म. 4. नास्ति–ड. 5. र्दुरूहादृतेः–ड. 6. विषयग्रन्थस्य–क. 7. नास्ति–क. 8. तः 11. पर्यन्तो भागो नास्ति–ल.म. 9. शृङ्गारप्रधानमेवाप्रधानमेवा प्रबन्धं करोति–ड. 10. करोतीत्यर्थः–क. 12. 'दुरूहादृते' इति पाठानुसारिणी व्याख्येयम् 13. अतः परं "गुरुकविपितृवर्णमानि" इति दृश्यते–ड.च.

प्रथमः प्रबन्धः

[1]गौडमालवरागे रूपकताले

प्रलयपयोधिजले धृतवानसि वेदम्
विहितवहित्रचरित्रमखेदम् ।
केशव धृतमीनशरीर
जय जगदीश हरे ॥ १ ॥

सञ्जीवनी

एवं तावत्पूर्वश्लोकोक्ता राधामाधवयो रहःकेलयस्ता एव श्रीकृष्णचन्द्र[2]सम्भोगपुष्टचर्थं भगवल्लीलाविलासानां प्रतापसौभाग्यादीनाञ्च श्रीकृष्णचन्द्राधीनत्वं वदन् दशावतारप्रस्तावे [3]श्रीकृष्णचन्द्रस्य नायकचूडामणित्वं च संयोग[4]रसपुष्टचर्थं विप्रयोगरसमाह–प्रलयेत्यादिना । यथा—

"संयोगरसपुष्टचर्थं विप्रयोगनिरूपणम् ।
[5]कषायिते हि वस्त्रादौ भूयान् रागो हि जायते ।"

[6]गीतस्यास्य गौडमालवरागो रूपकतालः । ध्रुवपदं च । गीतलक्षणम्—

"स्वरतालग्रामभेदरागरागाङ्गभूषितम् ।
[7]संस्कृतं प्राकृतं वाऽथ गीतं गीतविदो विदुः ॥" इति ।

रागलक्षणम्—

"नितम्बिनीचुम्बितवक्त्रपद्मः
[8]शुकद्युतिः कुण्डलवान् [9]प्रमत्तः ।
[10]सङ्केतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥"

---

1. मालवगौडरागेण यतितालेन गीयते–च. 2. भोग–ब. 3. श्रीकृष्णनायकं–अ.ब. श्रीकृष्णचन्द्रनायकं–फ.ज. 4. रूपपुष्टचर्थं–इ. 5. काव्या हि ते हि शास्त्रादौ–अ.ब. कारवायिते हि वस्त्रादौ–इ.ग. कखायिते हि वस्त्रादौ–फ.ज. 6. गीतस्या गौडमालवरागे– ब. 7. सत्कृतं– ब. 8. शुष्कद्युतिः–ज. 9. ममप्तः– ब 10. सेकेत–अ.

ताललक्षणम्—

"रूपके स्याद्द्रुतं लघु" इति सङ्गीतरत्नाकरः। षोडशध्रुवकास्तल्लक्षणं ग्रन्थविस्तर[1]भयान्न लिखितम्। [2]पदस्य पुनःपुनरावृत्तिः ध्रुवपदम्। हे केशव! सुखशायिन् प्रशस्तचिकुर [3]इति वा। धृतमीनशरीर, धृतं मीनस्य [4]शरीरमिव शरीरं येन। धृतमीनबन्ध इत्यर्थः। स च विपरीत[5]रतौ भवति। तत्स्वरूपम्—

"प्रसार्य हस्तचरणौ पुमान्यत्राङ्गनायते।
नायिकामुपरिस्थाप्य मीनबन्धः प्रकीर्तितः॥

[6]किञ्च, मीनो हि [7]रसवेदी मकरकेतनस्तोय[8]प्रेमनिर्वाहकश्च मङ्गलार्थश्च। तद्वदत्रापि धृतमीनबन्ध एव मङ्गलम्। हे देव! क्रीडाकर्तः! हे हरे! भक्तजनसन्तापहरिन्! [9]सर्वामङ्गलहारिन् वा। [10]युवतिकामतापनाशन इति वा। जय जयेति [11]वीप्सायाम्। अतिशयेन सर्वोत्कर्षेण वर्तस्व। [12]जय जगदीश इति वा पाठः। [13]गच्छतीति जगद्युवतिवृन्दं तस्येश [14]नायक सकलचूडामणे। प्रथम मीनबन्धकेलिमाह—प्रलयेति। प्रकर्षेण मनसो लय[15]स्तदाकारता यत्र [16]सुरते स प्रलयः। स यथा—

"सुरते च समाधौ च मनो [17]यत्र न लीयते।
किं तेन सुरतेनार्थः किं तेन च समाधिना॥इति॥

[18]तत्रानन्द[19]श्रमजनितपयोधौ [20]यत् जलं तस्मिन् वेदं वात्स्यायनशास्त्रप्रतिपाद्यं मीनबन्धादिकुशलत्वं, वेद्यते [21]ज्ञायने [22]रतिकोशोक्तकेशस्पर्शादि[23]लीला च

---

1. भयात्तु न लिखितम्–ग. 2. यदा तु पुनराक्रतिर्ध्रुवम्–ग. 3. इति पाठे–फ. 4. नास्ति–ह. 5. रते–ग. 6. नास्ति–अ.ब.फ.ग.ह.ज. 7. रणवेदी–ग 8. प्रेमानिर्वाहकश्च–ब. 9. पदमिदं नास्ति–इ. 10. युवतीजनकामतापनाशन इति वा–फ. 11. वीप्सया–इ.फ.ग.ह.ज. 12. जय जय–ज. 13. गच्छति जगत्–अ.ब. गच्छतीति नानाशृङ्गाररसमापद्यते तत्–इ.फ.ग.ह.ज. 14. नायकस्य–अ.ब. नायकचूडामणे–इ.फ.ग.ह.ज. 15. स्तदाकारः ता यत्र–ब. 16. सुरतैः–अ.ब. 17. यत्र च लीयते–अ.ब. यस्य न लीयते–फ. 18. त्रंनन्द जनिरतययोधौ–ब. 19. भ्रम–इ. 20. जलम्–अ.ब. 21. ज्ञायतेरिति–अ.ब. ज्ञायते स वेद–ह. 22. रसकोषोक्त–फ. 23. लीनां च–अ.ब. लीलां वा–इ.फ.ग.ह.ज.

[1]नानाशृङ्गाररसमापद्यते तत्[2]। अखेदं यथा स्यात्तथा [3]लीलया धृतवानसि। त्वं पोषितवानसीत्यर्थः। कीदृशं वेदम्? [4]विहितं [5]कृतं वहित्रस्य पोतस्य चरित्रं केलि[6]जलधिपारप्रापकरूपं येन। एतेन नायकचूडामणित्वं सूचितम्। पक्षे मीनरूपं स्तौति। प्रलयकालीना ये [7]पयोधयो जलधयस्तेषां जले मज्जन्तं [8]वेदं मीनशरीरं लीलया धृतं आदाय, न तु कर्मवशेन; अखेदं यथा स्यात्तथा धृतवानसि त्वम्। अल्पजलनिवासो [9]मत्स्यानभीष्टः। सुतरां जलधौ। तथा च श्रुति:--"यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं देवात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये"। (श्वेताश्व ६.१८) इति। [10]कश्च ईशश्च तौ केशौ (वसौ) सेवकोत्तमौ यस्येति हे केशव। धृतं मीनशरीरं [11]येने(ति); तत्सम्बोधने। जय सर्वोत्कर्षेण वर्तस्व। ननु सर्वोत्कर्ष[12]वृत्तौ किं सामर्थ्यम्? तत्राह—हे जगतां चतुर्दशभुवनानां ईश नियन्तः। हे हरे[13]! हरति भक्तानां [14]क्लेशं भजनानुसारेणेति [15]तथा। तच्चोक्तं श्रीभागवते—"हृद्यन्तःस्थो [16]ह्यभद्राणि विधुनोति सुहृत्सताम्" इति। एतेन [17]दुर्घटकार्यशीघ्रकारित्वेन [18]दक्षिणालक्षणो नायकगुण उक्तः "[19]प्रलयो नष्टसंज्ञता" इत्यमरः (१.६.३३) ॥१॥

पदद्योतनिका

कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थञ्च दशावतारवर्णनमाह—प्रलयेत्यादि [20]जगदीश इत्यन्तम्। अस्य गीतस्य मालवरागः। [21]रागलक्षणम्—

---

1. तः 2. पर्यन्तं नास्ति–इ.फ.ग.हृ.ज. 3. नास्ति–इ.फ.ग.हृ.ज. 4. नास्ति–अ.ब. 5. नास्ति–हृ. 6. जलधिकार–व. 7. पयोधयस्तेषाम्–अ.ब. 8. वेदं अखेदं यथा स्यात्तथा धृतं आदाय न तु कर्मवशेन। अखेदं धृतवानसि त्वम्–अ.ब. 9. मत्स्याभीष्टः–अ.ब.इ.ग.हृ.ज. 10. कः ब्रह्मा च ईशः शिवश्च तौ वसौ सेवकोत्तमौ–इ.फ.ग.हृ.ज. 11. येन तत्सम्बोधम्–इ.फ.ग.हृ.ज. 12. वर्तने–फ. 13. नास्ति–अ.ब.ज. 14. कुशम्–व. 15. यथा–ब. नास्ति–ग. सारेण नाशकेति तथा–फ. 16. ह्यभप्राणि–अ. ह्यभदणि–ब. 17. दुष्कर–इ.फ.ग.हृ.ज. 18. दक्षितालक्षणो–इ.ग. दक्षिपतोलक्षणो–फ. दक्षिताक्षणो–हृ. दक्षतालक्षणो–ज. 19. प्रलयो नष्टसंज्ञेत्यमरः–अ. प्रलयो नष्टसङ्गेत्यमरः–ब. प्रलयोनष्टचेष्टता–अमरकोशः 20. जगदीश हरे इत्यतन्म्–क. 21. तल्लक्षणम्–क.ल.म

नितम्बिनीचुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्केत[1]शालां विशति प्रदोषे मालाधरो मालवरागराजः ।।

(काललक्षणम्—)

"[2]लघुयुग्माभिघातेन रूपकः कथितो दृढः ।"

हे केशव ! धृतं मीनशरीरं वेदोद्धरणार्थं येन । हे जगदीश ! हे हरे ! जय उत्कर्षेण [3]वर्धस्व । [4]कस्मादित्यत आह[5] । त्वं प्रलयपयोधिजले कल्पान्तसमुद्रजले वेदं धृतवानसि । [6]कथम् ? अखेदं अपरिश्रमं यथा । पुनः कथम् ? विहितेति । विहितं कृतं वहित्रचरित्रं [7]समुद्रतरणनौका[8]चेष्टितं यत्र क्रियायाम् ।।१।।

जयन्ती

षड्जादिस्वरैः रञ्जयतीति रागः मालवगौडदेशीयो रागः तेन, ताल-कालक्रिययोर्मानं समत्वेन लयत्वात् [9]चञ्चत्पुटादिः तद्विशेषो यतिसंज्ञकः तेन (च) गीयते वक्ष्यमाणदशावताराष्टपदी । (प्रलयेति ।) प्रलयकाले जगत्संहारकाले पयोधिः समुद्रः तस्य जले अखेदं दुःखरहितं यथा स्यात्तथा विहितानि रचितानि वहित्रस्य मत्स्यपुच्छस्य चरित्राणि परिवर्तनानि यथा स्यात्तथा विचरन् वेदं श्रुतिगणं धृतवानसि । शङ्खासुरं वेदचोरं हत्वा वेदोद्धरणं कृतमिति मत्स्यावतारप्रयोजनं कथितम् । ध्रुवा नाम पुनः पुना रञ्जनार्थं गीतान्त्ये पठचन्त इति ध्रुवाः । तल्लक्षणं सङ्गीतरत्नाकरे । हे केशव ! धृतमीनशरीर ! मत्स्यरूप ! जगदीश ! जगता-मुत्पत्तिस्थितिलयकर्तृत्वादीश्वर ! हे हरे ! जय सर्वोत्कर्षेण वस । ईश्वरत्वादेव मामवेति भावः । वेदोद्धारकत्वाद्धर्मरक्षक इति भावः । अथ वा विहितानि वहित्रस्य नौकायाः चरित्राणि आकर्षणरूपाणि यस्मिन् कर्मणि तथा । अस्मिन् पक्षे सर्वबीजपूरितां मनुनाधिष्ठितां नौकां मुखरोमाग्रे बध्वा मूलमत्स्यो मेरु-शृङ्गं अनयदिति कथाऽनुसन्धेया ।।१।।

---

1. शाली–ड. 2. पङ्क्तिरियं नास्ति–ड.ल.म. 3. वर्तस्व–क.
4. तः 5. पर्यन्तं नास्ति–क. 6. कथम्भूतम् ? अपरिश्रमं यथा अखेदम्–ल.म.
7. समुद्रतरणकारणनौकाचेष्टितलक्षणं यस्य क्रियायाम्–ल.म. 8. येष्टितम्–ड
9. चञ्चूपुटादिः–च.

क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे
धरणिधरणकिणचक्रगरिष्ठे ।
केशव धृतकच्छपरूप
जय जगदीश हरे ।।२।।

सञ्जीवनी

कच्छपसदृशबन्धान्तरमाह—क्षितिर[1]तीति । हे धृतकच्छपरूप ! स्वीकृतकच्छपबन्ध । तल्लक्षमणम्—

"हस्तौ पादौ च [2]सङ्कोच्य कान्तामुपरि वल्लभः ।
स्थापयेत्सुरते यत्र कच्छपः स प्रकीर्तितः ।।"

तव पृष्ठे [3]पृष्ठभागे क्षितिर्बृन्दा[4]वनभूमिस्तिष्ठति वर्तत इत्यन्वयः । कीदृशे पृष्ठे ? अतिविपुलतरे । अतिशयेन विपुलयति विशेषेण महत्त्वं रसस्य प्राप्नोति तथा । 'पुल महत्त्वे' (धा.पा. ८४१) धातुः । अनेन नायकस्य श्रान्तोद्वहनत्वं सूचितम् । पुनः कीदृशे [5]पृष्ठे ? धरणिधरणकिणचक्रगरिष्ठे । [6]पूर्वोक्तबन्धधारणेन किणं कुङ्कुमादिचिह्नं यच्चक्रं चक्राकृतिकङ्कणं तेन गरिष्ठे प्राप्तगौरवेऽनर्घ्य इत्यर्थः । अन्यद्धि रत्नं अचिह्नमव्रणमेवानर्घ्यमिदं पुनस्त्वच्छरीररत्नं [7]प्रियानखचिह्नितमप्यमूल्यमिति श्रीराधोक्तिरत्र सर्वत्र ज्ञेया । तद्यथा—

"सर्वस्यापि हि रत्नस्य [8]व्रणेऽर्घः परिहीयते ।
दयिताधररत्नं तु व्रणितं [9]यात्यनर्घताम् ।।" इति ।।

तिष्ठतीति फलपर्यन्तकार्यनिर्वाहकतया [10]स्थिरतालक्षणो नायकगुण उक्तः । "[11]क्षितिः सहनशीला स्याद्विस्तीर्णे च धरास्वपि" इति महोदधिः । "[12]पृष्ठंपृष्ठ-

---

1. इति नास्ति–अ.ब. 2. सङ्गोप्य–ग. 3. पृष्ठविभागे–इ.फ.ग.ह.ज. 4. वननिकुञ्जभूमिः–इ.फ.ग.ह.ज. 5. पृष्ठे नास्ति–अ.ब.इ.ग.ह. 6. पूर्वोक्तकच्छपबन्ध–फ.ज. 7. प्रियानशं–अ. 8. व्रणेद्धः–अ. व्रणेद्धः–ब.व्रणेऽर्धः–फ.ग.ह.ज. 9. यात्यनर्घ्यताम्–अ.ब.इ.फ.ग.ह.ज. 10. स्थिरतालक्षणे–अ.ब. 11. क्षितिः सहनशीला । अस्य विस्तीर्णे च धरास्वपिति महोदधिः–अ.ब. क्षिति सहनशीले स्याद्विस्तार्णे च धरास्वपीति महोदधिः–इ.फ.ग.ह.ज. 12. पृष्ठं परमगात्रेऽपि देहस्यावयवान्तरे–मेदिनीकोशः–अ. 'पृष्ठं तु पृष्ठेदेशेस्यात् पृष्ठं स्याद्धि बिलाशये' इति मेदिनीकारः–फ.ज.

प्रदेशे स्यात्पृष्ठः स्याद्धि बिलाशये" इति मेदिनीकारः (१०.७)। पक्षे कच्छपरूपं स्तौति। हे [1]केशव ! हे धृतकच्छपरूप धृतं कच्छपस्य रूपं येन तादृश। [2]जय [3]स्वोत्कर्षमाविष्कुरु। ननु [4]निन्द्यं कच्छपरूपं मया कस्य हेतोर्धृतमित्यत आह—क्षितिरिति। तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। कच्छपपृष्ठं [5]अत्यन्तकठिनतरं क्षोण्या [6]धारणमपसारणं च जात्यनुकरणार्थमिति भावः। ननु [7]पञ्चाशत्कोटियोजनविस्तीर्णा पृथ्वी मम पृष्ठे कथं स्थितेत्यत आह—अतिविपुलतरे(इति)। अतिशयेन धरापेक्षयाऽप्यधिकविस्तीर्णे। पुनः कीदृशे ? [8]धराणधरणकिणचक्रगरिष्ठे, धरण्या धराया धरणेन यज्जातं किणचक्रं [9]चक्राकृति[10]मृतरुधिर[11]मण्डलं तेन गरिष्ठे गौरव[12]युक्ते। एतेन [13]पीनत्वं गौरवं चोक्तम्। "किणः स्यान्मृतरक्तके" [14]इति विश्वप्रकाशः। "[15]घुणा चिह्ने व्रणकिणौ" इति हारावली। [16]"कूर्मे कमठकच्छपौ" इत्यमरः (१.१०.२१)। [17]"चक्रं चक्रे च निर्दिष्टं [18]रसचक्रेऽरिचक्रके" इति वैजयन्ती। [19]यथा—"रतिचक्रे प्रवृत्तस्य न च शास्त्रं न च क्रमः" [20]इति। धरा [21]धरित्री धरणी" इत्यमरः (२.१.२)। "कच्छपः कमठे प्रोक्तस्तद्बन्धेऽपि रतिप्रियैः" इति भोजे। "विस्तीर्णे विपुलः प्रोक्तो विपुलत्वप्रदेऽपि च" इति कोशसमुच्चये ॥२॥

पदद्योतनिका

क्षितिरिति। हे केशव ! धृतं कच्छपरूपं येन हे जगदीश हरे जय। तव पृष्ठे क्षितिः पृथ्वी [22]तिष्ठतीत्यन्वयः। [23]कीदृशे पृष्ठे ? [24]अतिविपुलतरे अतिक्रान्तो विपुलतरः पदार्थो येन। पुनः [25]कीदृशे ? धरण्याः [26](पृ) थ्व्याः धरणेन [27]वहनेन यत्किणचक्रं [28]मृतरक्तपिण्डस्तेन गरिष्ठे [29]दृढे ॥२॥

---

1. नास्ति–इ.फ.ग.ह.ज. 2. जय जय–अ.फ.ह.ज. 3. सवोत्कर्ष–ग. 4. निन्द्यकच्छपस्य रूपं–फ.ह.ज. कच्छपस्य निन्द्यकरूपम्–ग. 5. अत्यन्तं–इ.फ.ग.ह.ज. 6. धारणं च–फ.ग. 7. पञ्चाशत्कोटिविस्तीर्णा–फ. 8. पदमिदं नास्ति–अ.ब. 9. रक्ताकृति–फ.ग.ह.ज. 10. मृति–अ.ब. 11. मण्डले–ब. 12. युक्तै–ब. 13. पोनरसं–अ.ब. पीननगौरवत्वं–ग. पीनरसगौरवं–फ.ह.ज. 14. विश्वप्रकाशे नोपलभ्यते। 15. व्रणचिह्नं–फ.ज. किणः चिह्ने–ग. कणचिह्ने–ह. 16. कूर्मः–इ.ग.ह.ज. 17. चक्रं चक्रेऽथ–फ.ग.ह.ज. 18. रथचक्रे–फ.ज. 19. तथा–अ.ब. 20. नास्ति–अ.ब. 21. नास्ति–फ.ग. 22. तिष्ठति–ल.म. 23. कथम्भूते–क.ल.म. 24. अतिविमलतरे–ल. 25. कथम्भूते–ल.म. कथम्भूतम्–क. 26. पृथिव्याः–ल.म. 27. नास्ति–क. 28. नास्ति पदमिदं–ल.म. 29. ददे–ड. अतिदृढे–ल.म.

वसति दशनशिखरे तव लग्ना
शशिनि कलङ्ककलेव निमग्ना ।
केशव धृतशूकररूप
जय जगदीश हरे ॥३॥

जयन्ती

(क्षितिरिति) अतिविपुलतरे अतिविस्तृते सर्वलोकाधारत्वात् धरण्याः पृथिव्याः धरणेन वहनेन जातेनेति करणे तृतीयातत्पुरुषः पञ्चमी वा । किणानि वहनसञ्जातत्वक्काठिन्यरूपाणि तेषां चक्राणि समुदायाः तैः गरिष्ठे श्रेष्ठे । अतिकठिन इत्यर्थः । तव पृष्ठे उपरितनभागे क्षितिः तिष्ठति निश्चलतया वसति । पृथिवीरक्षकस्य तव मद्रक्षणं कियदिति व्यङ्ग्यम् । हे (धृतकच्छप-रूप!) धृतं कच्छपस्य रूपं आकृतिर्येन तत्सम्बोधनम् । शेषं प्राग्वत् ॥२॥

सञ्जीवनी

एवंविधात्मिककेलिमुदितं तदङ्ग[1]सौन्दर्यं वर्णयन्त्याह—वसतीत्यादिना । हे [2]केशव ! धृतशूकररूप । शूकरोति तनूकरोति [3]कन्दानिति शूकरः । [4]अत्र तु मानकन्द[5]खनने तथात्वं तस्योच्यते । उक्तं च—

"कामिनीनयनकज्जलपङ्का-
दुत्थितो मदनमत्तवराहः ।
कामिमानसवनान्तरचारी
कन्दमु[6]त्खनति [7]मानलतायाः ॥ इति ॥

तव दशनशिखरे धरणी लग्ना तिष्ठतीत्यन्वयः । धत्ते रसं प्रेयसीं वा धरणी । [8]तच्छीला सा तव दशनशिखरे दन्ताग्रे दशनक्षत[9]विभागे वसति । कस्मिन् केव ? शशिनि परमान्दजनके चन्द्रे निमग्ना कलङ्कलेखेव । सा यथा विद्यमानाऽपि न शोभातिरस्कारिणीति । एतेन नायकस्य गुणप्रकर्षो दर्शितः । पक्षे वराहावतार-

---

1. सौदर्न्यमित्याह—ग. 2. केशव नास्ति—इ.फ.ग.ह.ज. 3. कन्दा-नीति—इ.फ. 4. अत्रत्वमानकन्दशमने—ब. 5. षणने—फ.ग.ज. 6. त्पणति—इ. त्वणति—ग. त्षणति—ज. 7. कन्दलतायाः—ग. 8. तच्छीला नास्ति—ग 9. विधाने—इ.फ.ग.ह.ज.

[1]माह स्तौति च। हे [2]केशव! [3]धृतशूकररूप; धृतं शूकरस्य [4]वराहस्य रूपं येन। [5]जय जय। वराहप्रयोजनमाह—वसतीत्यादिना। तव दशनशिखरे दन्तस्याग्रे लग्ना [6]सक्ता [7]धरणी [8]वसुन्धरा वसति। अत्र [9]निमग्न-पदोपादानेन बालचन्द्रस्य [10]सादृश्यं कार्यते। [11]अनेनानायासेन दंष्ट्रया धरण्यु-[12]द्धरणेन बलातिशयनिरूपणेन महासत्त्वतालक्षणो नायकगुण उक्तः। शेषं समानम्। "रदना दशना दन्ताः" इत्यमरः (२.६.९१)। [13]"कला स्यादंश-मात्रके" इति [14]हलायुधः। "अग्रं शिखरमित्याहुरद्रिशृङ्गे च" इति धरणिः[15]। "शूकरः शूकरे प्रोक्तस्तनूकारिणि वस्तुनि" इति भोजे। (उत)प्रेक्षागर्भितोप-मालङ्कारः ॥३॥

पदद्योतनिका

वसतीति। केशवेत्यादि[16]पूर्ववत्। [17]धृतं सूकररूपं येन। तव दशनशिखरे [18]दन्ताग्रभागे धरणी पृथ्वी लग्ना [19]सम्बद्धा वसति। [20]तत्र दृष्टान्तः— [21]शशिनि चन्द्रे निमग्नाऽन्तःस्थिता कलङ्ककलेव कलङ्करेखेव ॥३॥

जयन्ती

(वसतीति।) धरणी पृथिवी तव दशनस्य दंष्ट्रायाः शिखरे प्रान्तभागे लग्ना वसति। हे केशव! शशिनि चन्द्रे निमग्ना एकदेशवर्तित्वात् ज्योत्स्नायाः अनावरकत्वात् निमग्ना कलङ्कस्य चिह्नस्य कलेव अंश इव। कलङ्कांशोपमानेन पञ्चाशत्कोटियोजनपरिमितधरण्याः दंष्ट्राग्रनिवासेन अतिवैपुल्यं अनायासेन पृथिव्युद्धरणेन व्यज्यत इति अलङ्कारेण वस्तुध्वनिः। धृतसूकररूप! वराहावतार। शेषं प्राग्वत् ॥३॥

---

1. माह। स्तौति—धृतशूकररूपेति—ब. 2. नास्ति—इ.फ.ग.ह.ज. 3. नास्ति—ग. 4. नास्ति—अ.ब.इ.ग.ह. 5. जय जयेति पूर्ववत्—फ.ज. जय—ह. 6. शक्ता—ब 7. 8. न स्तः—ग. 9. निमग्नेति पदोपादेन—फ.ज. पादा-पदनेव—ब. 10. नास्ति—अ.ब. 11. अनेनामायासेन—अ.ब. 12. द्धरणे बलातिशयनिरूपणे—ग. 13. तः 15. पर्यन्तो भागो नास्ति—अ.ब. 14. नास्ति—हलायुधे 16. पूर्ववत् नास्ति—ड. 17. नास्ति—ल. 18. तव दन्ताग्र—क. 19. नास्ति—ल.म. 20. तत्रोत्प्रेक्षते—ल.म. 21. शशिनि स्थिता कलङ्ककलेव कलङ्करेखेव निमग्ना—क. केशव शशिनि चन्द्रे निमग्नाऽन्तःस्थिता कलङ्ककलेव कलङ्करेखेव—ल.म.

तव करकमलवरे नखमद्भुतशृङ्गं
दलितहिरण्यकशिपुतनुभृङ्गम् ।
केशव धृतनरहरिरूप
जय जगदीश हरे ॥४॥

सञ्जीवनी

[1]पुनः कोकशास्त्रप्रदर्शितां नखक्षतादिरूपां लीलां चतुरा नायिका प्रकारान्तरेणाह—[2]तवेति । क्रीडायां प्रवर्तमानस्याग्रपश्चाद्भावो नास्ति । [3]तत्तदवसरजन्यत्वात् । [4]नखक्षतनिर्दयत्वकथनाय रतिसमये नृसिंहरूप इत्युक्तम् । तव [5]करकमलवरे तव हस्तकमलवरे श्रेष्ठे नखमस्ति । कीदृशम् ? [6]अद्भुतशृङ्गम् । अद्भुतमाश्चर्यजनकमग्रभागो यस्य तत्तथा । रक्तत्वकथनेन कञ्जसाम्यम् । पुनः कीदृशम् ? दलितहिरण्यकशिपुतनु[7]भृङ्गम् । दलितो विदारितो हिरण्यकशिपौ स्वर्णशय्यायां तनुरेव भृङ्गो यत्र तत् । अन्यत्र भ्रमरेण कमलं विदार्यते; अत्र [8]तु स एव दलित इत्यनेन शृङ्गाररसपूर्तिरुक्तेति भावः । [9]केशवेत्यादि पूर्ववत् । पक्षे [10]नरहरिरूपं स्तौति । हे [11]केशव ! हे धृतनरहरिरूप, धृतं नरहरिरूपं येन तत्सम्बोधनम् । [12]जय जय । श्रीनृसिंहावतारप्रयोजनमाह— तवेति । तव करकमलवरे करो हस्तः स एव कमलवरः कमलश्रेष्ठस्तत्र नखं तिष्ठति । [13]कीदृशम् ? अद्भुतशृङ्गम्, अद्भुतमाश्चर्यरूपं शृङ्गं अग्रभागो यस्य तादृशम् । अद्भुतत्वमेवाह— दलितेत्यादिना[14] । दलिता विदारिता हिरण्यकशिपोर्दैत्यस्य तनुर्देहः स एव भृङ्गो भ्रमरो येन तादृशम् । [15]अन्यत्र कमले तन्मकरन्दपानादिना भृङ्गानां तृप्तिर्भवति । इह तु नृहरिकरकमलाग्र[16]भागेन भृङ्ग एव विदारित इत्यद्भुतत्वम् । नरहरिरूपेत्यनेनातिविकटशौर्यबलातिशयेन

---

1. नास्ति—अ.ब.फ.ग.ह.ज. 2. तवेत्यादि—इ.फ.ग.ह. 3. तत्तदिवसरज्यत्वान्—अ. तत्र दिवसरजन्यत्वात्—व 4. नखक्षता—अ.ब. 5. कमलवरे—फ. 6. नास्ति—फ.ग.ह.ज. 7. भृङ्गे—व. 8. सुत एव—ब. 9. जयजयेति केशवेत्यादि पूर्ववत्—फ.ज. 10. जय जय श्रीनरहरिरूपं स्तौति—ब. 11. केशव नास्ति—इ.फ.ग.ह.ज. 12. जय जयेति—फ.ज. जय—ग. 13. तः 14. पर्यन्तं नास्ति—फ.ग.ज. 15. अन्यत्र कमले तन्मकरन्दपादिनो तादृशं अन्यत्र कमले तन्मकरन्दपानादिना भृं कर कमलाग्रभागेन भृङ्ग एव—ब. 16. भागे—अ.

नायके साहसिकत्वातिशयगुणः[1] सूचितः। "माणिक्ये शिखरे [2]शृङ्गं [3]भूभृतां च विषाणके" इति वैजयन्ती। "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" इत्यमरः (२.६.८३)। "शृङ्गं प्रभुत्वे शिखरे चिह्ने [4]क्रीडाम्बुजे" इति विश्वप्रकाशः (१४.२१)। "[5]तनुः काये कृशे [6]चाल्पे विरलेऽपि च वाच्यवत्" (इति विश्वप्रकाशः (७०.१८))। "[7]द्विरेफः पुष्पलिड्भृङ्गषट्पदभ्रमरालयः" इत्यमरः (२.५.३०)। "[8]हिरण्यकशिपुर्दैत्ये शयने स्वर्णनिर्मिते" इति भोजे[9] ॥४॥

पदद्योतनिका

तवेति। [10]हे धृतं नरहरिरूपं नरसिंहरूपं येन; तत्सम्बोधनम्। तव करकमलवरे हस्तपद्मश्रेष्ठे नखमस्तीत्यध्याहारः। कथम्भतं नखम्? [11]अद्भुतशृङ्गम्; अद्भुतमाश्चर्यकारकं शृङ्गमग्रभागो यस्य। अद्भुतत्वे हेतुमाह। दलितो विदारितो हिरण्यकशिपोः दैत्यस्य तनुरेव भृङ्गो भ्रमरो येन। अन्यत्र भ्रमरेण कमलं दल्यते। इह तु [12]वैपरीत्येनेत्याश्चर्यम् ॥४॥

जयन्ती

(तवेति।) तव कर एव कमलवरं उत्कृष्टपद्मं तस्मिन् अद्भुतं आश्चर्यजनकं शृङ्गं शिखरं यस्य तत्। दलितः छिन्नः हिरण्यकशिपुः हिरण्याक्षानुजः तस्य तनुरेव भृङ्गो भ्रमरो येन तत्। नखं वसतीति शेषः। धृतनरहरिरूप! नरश्च हरिश्च नरहरी तयो रूपे मुखकायौ यस्य सः। हे नृसिंह इत्यर्थः। अत्र करस्य कमलारोपणेन निमित्तेन दैत्यतनोर्भृङ्गत्वनिरूपणमिति परम्परितरूपकम्। शृङ्गं नखस्य अर्थतः केसररूपत्वमापततीति एकदेशविवर्तितं रूपकम्। अनयोरङ्गाङ्गिभावेन सङ्करः। तेन च कमलकेसरतुल्यमृदुनखाग्रेण दैत्यसंहारस्यात्यनायासजन्यत्वमित्यद्भुतरसो वीररसाद्व्यज्यत इति ॥४॥

---

1. स्वचितः–अ. 2. शृङ्गे–अ.इ.फ.ज. भृगे–ब. 3. प्रभूतांचविषाणके–अ. प्रभृतां च विशाणिके–ब. भूभृतां च विषाणकेऽपीति–फ.ज. 4. क्रीडाम्बुयन्त्रके–विश्वप्रकाशः। 5. तनुस्काये कृते वाल्पे विरले वापि चान्यवत्–अ.ब. 6. वाल्पे विरले चापि चान्यवत्–फ.ग.ज. वाऽपि विरले चापि चान्यवत्–इ. 7. द्विरेफः पुष्पलिट्भृङ्गयद्वदभ्रमरानय इति विश्वः–अ. द्विरेफः पुष्पट्भ्रमरो भृङ्गा इति विश्वः–ब. द्विरेफः पुष्पमधुलिट् भ्रमरो भृङ्ग इति विश्वः–फ.ग.ज. द्विरेफः पुष्पलिट्भ्रमरो भृङ्ग इति विश्वः–ह. 8. तः 9. पर्यन्तो भागो नास्ति–अ.ब. 10. हे हरे–क. 11. अद्भुतशृङ्गमग्रभागो–ड. 12. वैपर्येणेत्याश्चर्यम्–क.

छलयसि विक्रमणे बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ।।५।।

सञ्जीवनी

[1]आलिङ्गनरूपां क्रीडामाह–छलयसीत्यादिना । हे [2]केशव ! धृतवामनरूप । [3]वामयति नामयति आलिङ्गनादिभिर्वा मानादिना वा यः स वामनः, तत्सम्बोधनम् । [4]तेन मानेन त्वं [5]विक्रमणे [6]सुरतविक्रमे [7]सुरतपराक्रम इत्यर्थः । वलिं त्रिवलिं छलयसि वञ्चयसि । विपरीतविधानेन [8]जात्यान्नमयसीति सूचितम् । हे अद्भुत[9]वामन ! [10]आश्चर्य [11]वामन । पदनखेति सम्बोधनम् । [12]विपरीतसुरतेन तत्र [13]यत्पदनखं पदनखक्षतं तत्क्षालनाय यत् नीरं तेन जनितं जनस्य [14]नन्दनन्दनस्य पावनं [15]चित्तप्रसादो येन तत्सम्बुद्धिः । चित्तप्रसादकारिन् । एतेन [16]नायकोत्कर्षः पावनत्वञ्च नायकस्योक्तम् । ननु नखदानं [17]करनखेनैव जन्यते, न पदनखेनेति । सत्यम्, एतत्तु विपरीतरतौ नायिकापदनखक्षताभिप्रायेण [18]ज्ञातव्यम् । पक्षे वामनरूपं स्तौति । [19]हे केशव ! धृतवामनरूपेति । [20]अद्भुताश्चर्यरूप[21]वामन अद्भुतमदृष्टपूर्वं दैत्यानां दर्पं नाशयतीति वामनः । अद्भुतत्वमेवाह–[22]पदनखेति । पदनखसम्बन्धि यन्नीरं गङ्गाजलं तेन जनितं जनानां [23]पावित्र्यं येन तादृश । जय केशवादि पूर्ववत् । वामनावतारप्रयोजन-

---

1. हिरण्यकशिपूआलिङ्गनरूपां–अ.ब. 2. केशव नास्ति–फ.ग.ह.ज. 3. वामयति नामयति आलिङ्गनादिना यः स वामनः–इ. वामयति भामयति आलिङ्गनादिना वा गनादिना यः स वामनः–ज. 4. येन–ब. 5. विक्रमे–अ.ब.इ.ग.ह. 6. सुरतविक्रमे नास्ति–अ.ब.इ. 7. सुरतरप्तपराक्रम–ब. 8. जात्यान्न वामयसीति–ग. जात्याभ्रामयसीति–फ. 9. वामनः–अ. 10. आश्चर्यवामन नास्ति–फ. 11. वामनः–अ.ब. 12. विपरीतेन–ग. 13. यं पदनखम्–अ.ब. 14. नन्दनन्दन्यपावनं–अ. नन्दनन्दन्ययावनं–ब. 15. चित्तप्रसादो नास्ति–अ. 16. नायिकोत्कर्षः–इ.फ.ग.ह.ज. 17. करनखैर्नैव–अ. 18. दातव्यम्–ज. 19. हे धृतवामनरूपेति–ब.इ.फ.ग.ह.ज. 20. अद्भुतवामन आश्चर्यरूपवामन–फ.ज. 21. वामनः–अ.ब. 22. पदनषेति–अ. 23. पवित्रं येन तादृशम्–ब.

माह्—छलयसीत्यादि। विक्रमणे पराक्रमे बलिं दैत्यं छलयसि वञ्चयसि। श्रीकृष्णो वामनरूपं विधाय बलेः [1]पदत्रयपरिमितां भूमिं याचयित्वा पश्चाद्बृहद्रूपं प्रकटीकृत्य बलिमधःक्षिप्त्वा चतुर्दशभुवनानि गृहीतवानिति पुराणप्रसिद्धेः। छलयसीत्यनेन नायकस्य अनुनयचातुरी सूचितेति भावः। "बलिस्त्रिवल्यामसुरे बलिः पूजोपहारके। बलिर्बलिष्ठः" इति वैजयन्ती। "[2]अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्" इत्यमरः (१.१०.४)। "वामनः कर्षके [3]विष्णौ वामनो नतिकारकः"; "छलन्तु कौतुके प्रोक्तं छलं केलिकलास्वपि" इति रत्नकोशः[4] ॥५॥

पदद्योतनिका

छलयसीति। धृतं वामनरूपं येन। [5]अद्भुत[6]वामनश्चाश्चर्यहेतुः। वामन त्वं [7]विक्रमेण पादविक्षेपे कर्तव्ये बलिमसुरं छलयसि वञ्चयसि। [8]कीदृशस्त्वं इति सम्बोधनम्। पदेति। पदनखनीरेण पदनखाग्रसम्बन्धिजलेन गङ्गारूपेण जनितं कृतं जनपावनं लोकपावित्र्यं [9]येन ॥५॥

जयन्ती

(छलयसीति।) हे (अद्भुतवामन!) अद्भुतः आश्चर्यकरः, स चासौ वामनः खर्वः तत्सम्बोधनम्। पदनखस्य चरणनखस्य नीरेण सलिलेन जाह्नवीरूपेण जनितं उत्पादितं जनानां सगरसुतादीनां पावनं पुण्यं येन; तत्सम्बुद्धिः। विक्रमणे पदविक्षेपे बलिं विरोचनसुतं छलयसि वञ्चयसि। त्रिलोकाक्रमणार्थं त्रिपादयाच्ञा छलं कृतम्। अन्यार्थप्रयुक्तवाक्यमर्थान्तरप्रकाशनं छलम्। त्रिपादाभिप्रायवाक्यं त्रिलोकाक्रमणेन प्रकटितमिति छलम्। नवकम्बलवाक्यवत्। अत्रापि वामनेन [10]अत्युच्चसत्यलोकातिक्रमणात्। ब्रह्माण्डकटाहभेदेन बाह्यजलाप्लुतनखोदकत्वं जाह्नव्यास्तेन सकललोकपवित्रीकरणं विरुद्धकार्यकरणमाश्चर्यं नखोदकस्य निषिद्धत्वात्। हे वामनरूप उपेन्द्रावतार। (शेषं प्राग्वत्) ॥५॥

---

1. पदत्रयमितां—फ.ज. 2. तः 4. पर्यन्तो भागो नास्ति—अ.ब. 2. अणोभिस्तोय—फ. अर्णोभिस्तोय—ह.ज. 3. विश्वौ—ग. 5. हे अद्भुतवामन आश्चर्यहेतुवामन—क. 6. वामनाश्चर्यहेतुः—ड. 7. क्रमणे—ड. 8. कीदृशं त्वं—ड. 9. येन नास्ति—ड. 10. अत्युच्चय—च.

क्षत्रियरुधिरमये जगदपगतपापं
स्नपयसि पयसि शमितभवतापम् ।
केशव धृतभृगुपतिरूप
जय जगदीश हरे ॥६॥

सञ्जीवनी

अतिदुस्सह[1]तापोपशमनीं क्रीडामाह–क्षत्रियेति । बिभ्रति रसमिति [2]भृगवो रसिकाः, रसिकानां पतिः [3]प्रभुः प्रशस्तो भृगुपतिरूपः । प्रशंसार्थे [4]रूपः । रसिकचूडामणे । [5]जय जगदीशेत्यादिपदं पूर्ववत् । क्षत्रियरुधिरसदृशे पयसि जगदपगतपापं स्नपयसि। श्रीकालिन्दीजलक्रीडायां कुङ्कुम[6]किर्मीरितायां गच्छतीति [7]जगन्नायिकासमूहं [8]स्नपयसि स्नानं [9]कारयसीत्यन्वयः । कीदृशं जगत् ? व्रजयुवति[10]समूहम् । [11]अपगतपापं स्नानमात्रेण नष्टसंसार[12]कलुषम् । पुनः कीदृशं [13]जगत् ? शमितभवतापम् । शमितः शान्ति प्रापितः भवस्य कामस्य विरहोत्पन्नः तापो येन। भवोऽत्र कामवाचकः । भीमो भीमसेन इतिवत् । पक्षे [14]परशुरामावतारं स्तौति । हे [15]केशव ! हे [16]धृतभृगुपतिरूप । धृतं भृगुपतेः [17]परशुरामस्य रूपं येन; तादृश जय । परशुरामावतारप्रयोजनमाह–(क्षत्रियेति ।) क्षत्रियाणां रुधिराणि प्रचुराणि यत्र पयसि [18]कुरुक्षेत्राख्यतीर्थ-वरजले जगत् प्राणिजातं अपगतपापं नष्टपातकं यथा भवति तथा [19]स्नपयसि स्नानं कारयसि । कीदृशं जगत् ? [20]शमितभवतापं; शमितो [21]नाशितो

---

1. तापोपमाम्–फ. 2. भ्रगुः–अ. भगुः–ब. 3. प्रभुः नास्ति–ह. 4. रूपप्–ग. 5. जय जगदीशादिपदं पूर्ववत्–अ.ब.फ.ग.ह. जय जगदीशपदं पूर्ववत्–ज. 6. कीर्मिता–अ. किर्मिरिता–ब. कर्मिरितायां–इ.फ.ग.ह.ज. 7. जगन्नायका–अ.ब. 8. स्नपयसीत्यन्वयः–फ.ग. 9. कारसी–अ. 10. वृन्दम्–ब.इ.फ.ग.ह.ज. 11. अपगतपाप–अ. अपगतपनृपो–ब. 12. क्लेशम्–फ. 13. जगत् युवतिवृन्दम्–ब.फ.ग.ह.ज. 14. परशुरामावतारमाह स्तौति च–ग. 15. केशव नास्ति– इ.फ.ग.ह.ज. 16. धृतें–ब. 17. परशुरामंस्वरूपं येन तादृश । जय इत्यादि पूर्ववत्–ज. 18. कुरुक्षेत्राक्षतीर्थ–अ. कुरुक्षेत्राख्यतोर्थः–ब. 19. स्नापयति–अ. 20. शमितभवतापं नास्ति–ग. 21. नाशितो नास्ति–ब.

भवस्य [1]संसारस्य तापो यत्र तादृशम् । अनेन [2]तेजस्वितालक्षणो नायकगुण [3]उक्तः । "[4]रुधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमा[5]सृजोः" इति विश्वः (१०१.१२१) । "पयः स्यात्क्षीर[6]नीरयोः" [7]इत्यपि मेदिनीकोशः (३२.२८) । "भवः संसारतापे [8]स्यात्तथा सङ्करजातिषु" इति [9]धरणिः । "भवो जन्मनि च प्रोक्तो [10]भवः कामोऽपि कीर्त्यते" [11]इति मेदिनीकारः[12] (१५९.२०) ॥६॥

पदद्योतनिका

क्षत्रियेति । हे [13]धृतभृगुपतिरूप [14]धृतं भृगुपतिरूपं (येन) धृतपरशुरामरूप । क्षत्रियरुधिरमये पयसि [15]जगत् स्नपयसि इत्यन्वयः । क्षत्रियशोणितविकारे जले [16]जगत् स्नपयसि स्नानं कारयसि । स्नाने फलमाह । [17]कीदृशं जगत् ? [18]अपगतपापं गतकलुषम् । पुनः [19]किम्भूतम् ? शमितभवतापं दूरीकृत-[20]संसारतापम् ॥६॥

जयन्ती

क्षत्रियेति । क्षत्रियाणां रणहतानां कुरुक्षेत्रे रुधिरमये शोणितरूपे शमन्तपञ्चकद्वन्द्वरूपे पयसि जगत् मनुष्यादिजङ्गमरूपं कर्म अपगतं नाशितं पापं यथा स्यात्तथा शमितः भवतापः संसाररूपः आध्यात्मिकादिसन्तापः यथा स्यात्तथा स्नपयसि । तत्र स्नानात्पापक्षयः मुक्तिश्च भवतीति भावः । अत्रापि शोणितस्यास्पृश्यत्वात् तत्स्पर्शने पुनः स्नानविधिना तत्रैव निमज्जनात्पुण्यं भवतीति बह्वाश्चर्यकरं तव चरित्रमिति भावः । हे भृगूणां भार्गवाणां पतिः श्रेष्ठः तद्रूप परशुरामावतार ॥६॥

---

1. संसारस्य नास्ति–ब. 2. तपस्विकलक्षणोक्त–अ.ब. 3. उक्तः नास्ति–फ. 4. रुधिरमंगायके प्रोक्तं रुधिरं कुंकुमासृजोरिति–फ. 5. श्रजोः– अ.ब. 6. नीरयोरपि–ग. नीरयोरिति–फ. 7. इति विश्वप्रकाश इत्यपि–ब. इत्यपि नास्ति–फ.ग. 8. स्यादथ–फ. 9. धरणिः नास्ति–फ. 10. भवः काम इति–फ. भवः प्रकीर्त्यत इति–ज़. भवः काम इति कीर्त्यंत इति–ह. 11. इति मेदिनी–ग. 12. भवः क्षेमेशसंसारे सत्तायां प्राप्तिजन्मनोः–मेदिनी । 13. नास्तीयं सम्बुद्धिः–ड. हे केशव धृतभृगुपतिरूप–क. 14. धृतं भृगुपतिरूपं नास्ति–क.ल.म. 15. जगत्तर्पयसीत्यन्वयः–क. 16. जगत्स्नानं कारयसि–क. 17. कथम्भूतं जगत्–क.ल.म. 18. नास्ति–ड. 19. कथम्भूतम्–क.ल.म. 20. संसारे तापम्–ड.

वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ।
केशव धृतरघुपतिरूप
जय जगदीश हरे ।।७।।

सञ्जीवनी

सुप्रसन्नात्मिकां क्रीडामाह–वितरसीत्यादिना । हे [1]केशव! धृतरघुपतिरूप [2]जय; [3]रघव एकपत्नी[4]पतयस्तेषां पतिः श्रेष्ठः; [5]तत्सम्बुद्धिः । एतेन [6]वहुयुवतिष्वासक्तिर्निवारिता । दिक्षु रतिविहार[7]दिशासु रणे स्मरसङ्ग्रामे [8]दशमुखो दशप्रकारो यो मौलिः केशपाशः, तेन बलिं पूजां वितरसि [9]विस्तारयसि । यद्वा दशमुखाय कामाय मौलिना किरीटरत्नेन बलिं पूजां वितरसि[10] ददासि इति केचित् । कीदृशम् ? दिक्पतिकमनीयम् । दिशां पतयः इन्द्रादयस्तेषां कमनीयं मनोहरं तदभीष्टं वा; तदगोचरमिति वा । पुनः किम्भूतम् ? रमणीयं रतिजनकम् । [11]शेषं पूर्ववत् । पक्षे रामावतारं स्तौति— [12]धृतरघुपतिरूपेति । हे [13]केशव ! धृतरघुपतिरूप जय [14]जय । श्रीरामपुरुषार्थमाह— [15]वितरसीत्यादिना । रणे सङ्ग्रामे दिक्षु आशासु दशमुखस्य [16]रावणस्य ये मौल्यो मस्तकानि किरीटानि वा तान्येव बलिं उपहारं वितरसि ददासि । [17]कीदृशम् ? दिक्पतिकमनीयं [18]दिशां ये पतयः इन्द्रादयस्तेषां कमनीयं अभीष्टदम् । तत्र हेतु —रमणीयं मनोहरम् । अनेन दिक्पालाकाङ्क्षितेन [19]रावणवधेन गाम्भीर्यलक्षणो नायकगुण उक्तः । "किरीट[20]तलमूर्धांसु मौलिः केशे च संयते" । "करोपहारयोः पुंसि बलिः [21]प्राण्यङ्गतो स्त्रियाम्" इत्यमरः (३.३.१९५.) ।।७।।

---

1. केशव नास्ति–इ.फ.ग.ह.ज. 2. जय नास्ति–अ.व. 3. राघव वा एक–अ.फ.ग., राघवा एकएक–ब. 4. वृतयः–फ. 5. तत्सम्बोधने–फ. 6. बहुयुवति तथासक्तिः–ग. 7. दशासु–अ. 8. दशविधो–अ. 9. तः 10. पर्यन्तोभागो नास्ति–ब. 11. केशकवपूर्ववत्–ब. 12. नास्ति–अ.ब.इ.फ.ग.ह.ज. 13. केशव नास्ति–इ.फ.ग.ह.ज. 14. नास्ति–इ.फ.ग.ह.ज. 15. वितरसीति–ग. 16. रावणस्य नास्ति–अ.ब. 17. कीदृशे–अ. 18. दिशां पतयः–अ.ब. दिशां पतयो ये–फ. 19. रावणेन–ह. 20. रत्न–फ.ग.ह. रव–इ. रक्त–ज. 21. प्राण्यङ्गजे–अमरः ।

वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभम् ।
केशव धृतहलधररूप
जय जगदीश हरे ॥८॥

पदद्योतनिका

वितरसीति । हे धृतरामशरीर त्वं रणे सङ्ग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु वितरसि [1]ददासि । कीदृशम् ? दिक्पतिकमनीयं इन्द्रादीनां काम्यं इच्छाविषयमित्यर्थः । रमणीयं मनोहरं दशदिक्षु [2]दश दानात् ॥७॥

जयन्ती

(वितरसीति ।) दिक्पतिभिः इन्द्रादिभिः कमनीयं अभिलषणीयं, कमु कान्ताविति अभिलाषार्थकत्वात् । दशमुखस्य मौलिभिः देवतोद्देशेन विशस्यमानः पशुः, तं रमणीयं श्लाघ्यं पौलस्त्यकुलीनत्वात् । मुखानामपि दशत्वात् दिक्षु प्रतिदिशं तत्पालप्रीत्यर्थं दत्तवानिति भावः । रणे दशापि मुखानि विकीर्णानीति तेषां बलित्वेन परिणामः । हे [3]धृतरामशरीर ! राघवरूपेत्यर्थः ॥७॥

सञ्जीवनी

एवं रतिविहारगर्वितं प्रत्याह–[4]वहसीत्यादिना । हे [5]केशव ! धृतहलधररूप । 'हल [6]विलेखने' धातुः । हलनं हलः । [7]विलेखनं नखक्षताधरक्षतरूपं रतौ धत्ते इति हलधरः । सुरतकेलिप्रशस्तो हलधररूपस्तत्सम्बुद्धिः । [8]धृतनानानखाधरक्षतप्रद[9]रूप त्वं विशदे निर्मले वपुषि शरीरे वसनं वस्त्रं वहसि । स्वाङ्गसुन्दरस्य वसनधारणं [10]भारमतो धारयसीत्युक्तम् । कीदृशम् ? जलदाभं जलदानां [11]मेघानां [12]नीलमेघवृन्दानां [13]आभा शोभा [14]यस्य तत् । जलदपद-

---

1. नास्ति–क.ल.म. 2. दशासु वितरसि–ल.म. 3. 'केशव धृतरामशरीर' इतिमलपाठः एतद्व्याख्यानुसारी । 4. वहसीति–ग. 5. केशव नास्ति–ब.फ.ग.ह.ज. 6. विलेषणे–अ. विशेषणे–ब.फ. 7. विलेषनं–अ. विलैखम्–ब. 8. नखाधृतप्रदरूपत्वविषदे–अ. नधरक्षत.पट्रूपत्वं विशदे–ब. 9. रूपः–ग. 10. भारतमो–ग. 11. मेघानां नास्ति–इ.फ.ग.ह.ज. 12. मेघवृन्दानां–अ. 13. आभा नास्ति–अ.ब.इ. 14. यस्मात्तत्–अ.ब.इ.फ.ग.ह.ज.

स्याभिप्रायोऽयम्—[1]यथा जलदाः स्वजीवनं दत्त्वा विश्वजीवनं [2]कुर्वन्ति तथा त्वमपि वेदोक्तं हित्वा विहारं कुरु। न हि वेदोक्तमर्यादापालनेन सर्वोऽपि रसः [3]साधयितुं शक्यः। पुनः कीदृशम्? [4]हलहतभीतिमिलितयमुनाभम्। हलेन [5]यत् हननं [6]भीत्या तद्भयेन मिलिता या यमुना तस्या आभेवाभा दीप्तिर्यस्य तत्। हलहतीति पाठे(ऽपि) स एवार्थः। हलधरपदेन [7]धीरललितलक्षणो नायकगुण उक्तः। पक्षे हलधरावतारं स्तौति—[8]वहसीति। हे केशव! [9]हे धृतहलधररूप; धृतं हलधरस्य रूपं येन; तादृश [10]जय जय। बलदेवस्य लीला-माह—[11]वहसीत्यादिना। [12]विशदे कर्पूरपरागगौरे वपुषि [13]शरीरे जलदाभं सजलनीलमेघ[14]स्निग्धं मेचकं वसन वस्त्रं वहसि [15]धारयसीत्यन्वयः। हलहती-त्यादि पूर्ववत्। भीरूणां हि कम्प [16]उचित एवेति भावः। कदाचित् श्रीवृन्दावने वारुणीं पीत्वा व्रजाङ्गनाभिस्सह विहरता बलभद्रेण यमुना [17]जलकेल्यर्थ-[18]माकारिता। मत्तोऽयमिति श्रीकृष्णज्येष्ठो [19]वेति [20]मत्वाऽन्तिकं नायान्तीं कृष्णां क्रोधेन हलाग्रेण कृष्टवानिति पुराणश्रुतेः। हलधरशब्देन [21]दुष्टनाशसाधु-रक्षणार्थं हलं धृतवानसीति सूचितम्। "गात्रं वपुः संहननं [22]शरीरं वर्ष्म विग्रहः"[23]इत्यमर (२.६.७०)।"शुभ्रशुक्लशुचि[24]श्वेतविशद[25]श्येतपाण्डराः" [26]इत्यमरः (१.५.१२)। विशदं निर्मले प्रोक्तं विशदं कनकप्रभे। विशदं प्रकटार्थेऽपि विशदं विमलाशये" इति [27]कोशचूडामणिः। "[28]वस्त्र[29]माच्छा-दनं [30]वासश्चेलं वसनमंशुकम्" इत्यमरः (२.६.११५)। "कर्षके स्याद्धलधरः प्रल-म्बघ्ने च नीरसे। विकर्षणे स्मरकृते दारुण्यपि विकर्षणे" इति भोजे[31]। "[32]भीतिः साध्वसकम्पयोः" इति विश्वः (५४.५६)। उत्प्रेक्षापूर्वकोपमालङ्कारः ॥८॥

---

1. जलदो यथा- ब.इ.फ.ग.ह.ज. 2. करोति-ब.इ.फ.ग.ह.ज. 3. साधयितुमशक्यः—फ. 4. हलर्तमितिमिलितियमुनाभम्—ब. 5. यद्धनं—ब. 6. तस्य भीत्या—ज. 7. वार—इ.फ.ग.ह.ज. 8. नास्ति—अ.ब. 9. हे हलधररूप—ब. 10. जय—ग. नास्ति—फ 11. वहसीति—इ.ग.ह.ज. वहसीत्यादि—फ. 12. विषदे—अ. 13. शरीरे नास्ति—फ. 14. स्निग्धमेचकं—इ.फ.ग.ह.ज. 15. धारयसि इत्वयः—अ. 16. उचित इति भावः—अ. 17. केल्यर्थं—अ.ब. 18. कामारिता—ब. 19. वेत्ति—ब. 20. मा त्वन्तिकं नायान्तीङ—अ. मां त्वांतिकं नायाती—ब. 21. दुष्टनासु-अ. दुष्टनाशन—फ. 22. पादोऽयं नास्ति—अ. 23. अमरः नास्ति—फ. 24. स्वेत—अ. 25. श्वेत—अ.ब. 26. अमरः नास्ति—फ. 27. कोशचूडामणिः नास्ति—फ. 28. तः 31. पर्यन्तो भागो नास्ति—फ. 29. माच्छदनं—ब. 30. वासनमित्यमरः—ह. 32. उद्धरणमिदं नास्ति—अ.ब.फ.

निन्दसि यज्ञविधेरहह श्रुतिजातं
सदयहृदय दर्शितपशुघातम् ।
[1]केशव धृतबुद्धशरीर
जय जगदीश हरे ॥९॥

पदद्योतनिका

वहसीति । [2]हे धृतहलधररूप धृतबलभद्ररूप त्वं वपुषि वसनं वस्त्रं वहसि धारयसि । [3]कीदृशे वपुषि ? विशदे शुभ्रे । [4]कीदृशम् ? जलदाभं सजलमेघसदृशम् । पुनः [5]कीदृशम् ? हलहतिभीत्या लाङ्गलघातभयेन मिलिता उत्थिता या यमुना [6]तद्वदाभा दीप्तिर्यस्य । भयेनातिश्यामत्वं भवति ॥८॥

जयन्ती

(वहसीति ।) विशदे स्वच्छे शुभ्रे वपुषि शरीरे जलदाभं मेघस्य आभेव आभा दीप्तिर्यस्य तत्; नीलवर्णमित्यर्थः । वसनं वस्त्रं वहसि परिधानं करोषि । कीदृशं तत् ? हलस्य लाङ्गलस्य हत्या प्रहारेण भीतिः भयं तेन मिलिता यमुना कालिन्दी तस्या इव आभा यस्य तत् । लाङ्गलाकृष्टयमुनात्वेनोत्प्रेक्ष्यते वसनमिति उत्प्रेक्षालङ्कारः । वाचकाप्रयोगाद् गम्या । सादृश्यवाचकाभावादस्य सम्भावनावाचकत्वाद् गमकम् । यद्वा, हलहतिभीतिमिलितयमुनायाः स्वतः सिद्धत्वादुपमैवालङ्कारः । तेन यमुनाकर्षणरूपचरित्रेण वीररस एव व्यज्यते । हे हलधररूप बलरामरूप ॥८॥

सञ्जीवनी

[7]वेदोक्तमर्यादाग्रहं त्यक्त्वा विहरेति पूर्वोक्तं; [8]तद्वदाचरन्तं प्रत्याह [9]निन्दसीत्यादिना । हे [10]केशव ! धृतबुद्धशरीर । बुद्धं ज्ञातं [11]श्रीवृषभानुजा-

1. अर्धमिदं नास्ति–अ. 2. हे हलधररूप–ल. हे केशव धृतहलधररूप–क. 3. कथम्भूते–क.ल.म. 4. कथम्भूतं वसनम्–क.ल.म. 5. कथम्भूतम्–क.ल.म. 6. तद्वदाभाति श्यामत्वं भवति–ल. 7. वेदोक्तमर्यादासङ्ग्रहं त्यक्त्वा–ह. वेदोक्तमर्यादामत्यक्त्वा–फ. 8. तद्वदाचारं–अ. 9. निन्दसीत्यादि–फ. निन्दसीति–ग.ह.ज. 10. केशव नास्ति–इ.फ.ग.ह.ज. 11. श्रीवृषभानुजास्वरूपं यत्तं–ब.

स्वरूपायत्तं [1]धृतं [2]स्वरूपं येन तादृश । [3]जय जगदीशेत्यादि पूर्ववत् । [4]हे सदयहृदय ! त्वं यज्ञविधेः मकरध्वजयज्ञविधेः । अहहेति खेदे । श्रुतिजातं तत्प्रतिपादक[5]मर्यादाभागं [6]निन्दसि । मर्यादाभूतं भागं न मन्यसे । न वेदस्त्वन्नियामक इत्यर्थः । उक्तञ्च—"[7]रतिचक्रे [8]प्रवृत्तस्य नैव शास्त्रं न च क्रमः" इति [9]भोजे । [10]कीदृशम् ? दर्शितः पशुघातो येन । पक्षे बुद्धावतारं स्तौति [11]धृतबुद्धशरीरेति । हे [12]केशव ! [13]धृतबुद्धशरीर धृतं [14]बुद्धशरीरं येन त्वं जय । ननु बुद्धावतारे वेदनिन्दकस्य बुद्धस्य मम [15]कथमिति श्लाघाप्रसङ्गः क्रियत इत्यत आह—[16]निन्दसीत्यादि । त्वं यज्ञविधेः [17]यज्ञविधानस्य प्रवर्तकं श्रुतिजातं श्रुतिविभागं निन्दसि । न तु सर्वमित्यर्थः । एतदर्थाविर्भावात् । 'यदा यदा हि धर्मस्य' इति वचनात् । किमर्थं सोऽपि निन्द्यत [18]इत्याह—दर्शितेति । [19]अहहेति । [20]कथम् ? दर्शितो बोधितः पशूनां घातो येन तथाभूतम् । वेदोऽपि पशूनां घातं [21]प्रथयति; [22]कथं त्वं निन्दसीति भावः । तथा निन्दायां कारणमाह—सदयेति । [23]दया कृपा तत्सहितं हृदयं यस्य तादृश; सम्बोधनम् । यद्वा, सदयहृदया ब्राह्मणास्तेषां दर्शितः पशुघातो हननं [24]येन । कथं निन्दसि ? [25]गवादिपशुघातं धिगिति । तथा बौद्धशास्त्रे—'अहिंसा परमो धर्म' इति । अयमर्थः—[26]रागवशादज्ञान[27]विलोक्याग्निष्टोमीयं पशुमालभेतेत्यादि[28]स्वर्गादिफलविधिवाक्यैः प्ररोचनया तान् गुड[29]लड्डुकवत् [30]प्रवर्त्य पश्चान्निरपराधवध[31]सा-

---

1. धृतं नास्ति–अ.ब.फ.ह. 2. स्वस्वरूपं वा–फ. 3. जय जगदीशादि–अ.ब.इ.फ.ग.ह.ज. 4. हे सहृदय–ब. हे सदय–ग. 5. मयदि भागं–ब. 6. निन्दसे मर्मादाभूतं भागं न मन्यसे न वेदः त्वन्नियामक इत्यर्थः–ब. 7. इतिचक्रे–अ. 8. प्रवर्तस्य–ब. 9. भोजे नास्ति–अ.ब.फ. 10. कीदृशं बुद्धशरीरम्–फ. 11. नास्ति–अ.इ.फ.ग.ह.ज. 12. नास्ति–इ.फ.ग.ह.ज. 13. नास्ति–अ.ब.फ. 14. बुद्धस्य शरीरम्–इ.फ.ग.ह.ज. 15. कथमतिश्लाघाप्रसङ्गः–इ.फ.ग.ह.ज. 16. निन्दसीति–इ.ग.ह.ज. 17. यज्ञविधानप्रवर्तकं–ग. 18. इत्यत आह–ग.ज. 19. अहहेति खेदे–ज. 20. नास्ति–ज. 21. प्रथम इति–अ. 22. अतस्त्वं–ज. 23. सदया–अ.ब. 24. नास्ति–ब. 25. पशुघातं–ब. 26. रागवशादज्ञान् विलोक्य–ग. रागवशादज्ञानादविलोक्य–फ. 27. विलोकाग्नीषोमीयं–ब. 28. वर्गादि–अ. 29. लड्डूक–अ.ब. लडक–ग. लड्डुक–फ. 30. प्रवृत्तपश्चानिरपराध्य–ब. प्रवृत्तिः पश्चान्निरपराध–फ. प्रवृत्पश्चान्निरपराध–ग. प्रवृत्त्य पश्चानिरपराध–अ. 31. साध्यं–फ.ग.ह.ज.

ध्यनानाप्राणिवधं स्वर्गादिफलं [1]नश्वरं विचार्य परमपुरुषार्थे श्रीकृष्णभजने तान् प्रवर्तयितुं '[2]न हिंस्यात्सर्वा भूतानि' इत्यादिना यज्ञबोधकस्य वेदस्य निन्दां करोषि। न तु [3]सर्वथा वेदनिन्दायां [4]प्रवर्तस इति। [5]तात्पर्यराद्धान्तमज्ञात्वा [6]दुरात्मनां वेदमार्गे श्रीकृष्णभजने वा [7]विश्वासः। तेषां मोहनाय तवावतारप्रयोजनमिति। [8]जगदीशेत्यादि पूर्ववत्। बुद्धशरीरेत्यनेन दयालक्षणो नायकगुण उक्तः। "वेदे [9]श्रवसि च श्रुतिः" इत्यमरः (३.३.७४) "जातं [10]जात्योघजन्मसु" इति विश्वः[11] (५४.१४) ॥९॥

पदद्योतनिका

निन्दसीति। हे धृतबुद्धशरीर [12]बुद्धावतार। हे सदयहृदय [13]दयासहितान्तःकरण। अहह इति खेदानुकारे दयायां वा। त्वं यज्ञविधेः क्रतुविधानस्य श्रुतिजातं वेदसमूहं निन्दसि दूषयसि। कथं भूतं [14]श्रुतिजातम्? [15]दर्शितपशुघातम्; दर्शितः प्रतिपादितः [16]पशूनां घातो वधो यत्र ॥९॥

जयन्ती

(निन्दसीति।) यज्ञविधेः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादि विधेः समस्तवेदं निन्दसि। अहहेति खेदे। वेदोद्धारकस्त्वं कथं निन्दसि स्ववचनं स्वेन? निन्दाकरणे प्रयोजनमाह—सदयेति। दयया करुणया सहितं सदयं हृदयं अन्तःकरणं यस्य तत्सम्बुद्धिः। "अग्नीषोमीयं पशुमालभेत" इत्यादिना दर्शितः प्रकटितः पशोः अजादेः घातो येन तत्। पशुघातकश्रुतिनिन्दायाः सदयहृदयत्वस्य हेतोर्वचनात्काव्यलिङ्गम्। "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्"। श्रुतिजातं वेदसामान्यजातिजातम्। "जातिर्जातं च सामान्यम्" इत्यमरः (१.५.३१)। यज्ञविधेः वेदमात्रं निन्दसि। अहह; स्वर्गादेरप्रत्यक्षत्वा[17]दहहेति भावः। प्रत्यक्षातिरिक्तप्रमाणानङ्गीकारात् तत्साधनार्थं हिंसाकरणं व्यर्थमिति किल निन्दा। हे धृतबुद्धरूप जिनस्वरूप। अत्र वेदवचनप्रतिपादनाद्धास्यो रसः ॥९॥

---

1. नस्वरं–अ. नखरं–ब. अनवरतं–ज. 2. मा हिंस्यात्–इ.फ.ग.ह. अहिंस्यात्–ज. 3. सर्थवेद–ब.फ. 4. प्रवर्तयति–अ.ब. प्रवर्त इति–इ. प्रवर्तत इति–फ.ग. 5. तः 11. पर्यन्तो भागो नास्ति–फ. 6. दुरात्मनं वेदमार्गं–अ.ब. 7. नास्ति–ज. 8. जगदीशादिपदं–अ.ब.इ.फ.ह.ज. 9. यशसि–अ. शवशि–ब. 10. जातो स्वजन्मसु–अ.ब. 12. धृतबुद्धावतार–ल.म. 13. सर्वहितान्तःकरण–क. 14. नास्ति–ड. 15. नास्ति–क.ल.म. 16. पशुघातः पशुवधो यत्र–क. 17. दहहभावः–च

म्लेच्छनिवहनिधने कलयसि करवालं
धूमकेतुमिव किमपि [1]करालम् ।
केशव धृतकल्किशरीर
जय जगदीश हरे ॥१०॥

सञ्जीवनी

पूर्वोक्तविहार[2]पुष्टं प्रत्याह—[3]म्लेच्छेत्यादिना । हे [4]केशव ! हे धृतकल्किशरीर धृतं सापराधशरीरं येन तादृश जय [5]जय । शेषं समानम् । त्वं [6]म्लेच्छनिवहनिधने करवालं कलयसि । म्लेच्छ अव्यक्ते शब्दे । म्लेच्छस्या[7]व्यक्तकूजनस्य निवहः समूहस्तस्य निधने विरामे खड्गं खड्गवदतिकरालं तीक्ष्णं [8]नखं कलयसि ददासि । पक्षे कल्क्यवतारं स्तौति । [9]हे [10]केशव ! [11]धृतकल्किशरीर; धृतं कल्किनः शरीरं येन, तत्सम्बुद्धिः । त्वं जय जय । [12]जगदीशेत्यादिपदं सर्वत्र योज्यम् । ननु पूर्वं [13]मम सदयत्वं कथितं [14]तद्विपरीतप्राणिवधे [15]प्रवृत्तस्येत्यत आह—म्लेच्छेति । म्लेच्छसमूह[16]मारणार्थं किमपि करालमतिभयङ्करं [17]करवालं खड्गं कलयसि धारयसि । एतेन धर्मसंरक्षणपरिपालनेन दृढत्वलक्षणो नायकगुण उक्तः । कमिव ? धूमकेतुमिव औत्पातिकग्रहमिव । औत्पातिकमुदितं ग्रहं म्लेच्छानां नाशो भवतीति करवालस्य धूमकेतुसाम्यम् । [18]औत्पातिकग्रह उदिते प्राणिनां दुःखं स्यादिति भावः । यद्वा, धूमः केतुः चिह्नं यस्य सः [19]धूमकेतुर्वह्निः तमिव । खड्गस्य नीलत्वाद् धूम[20]सादृश्यम् । मुष्टेश्च कनकमयत्वादग्निसाम्यम् । [21]म्लेच्छनिवहनिधन इति [22]निमित्ते सप्त(मी)-चर्मणि द्वीपिनं हन्तीतिवत् । "[23]म्लेच्छः

---

1. कारम्—अ. 2. पुष्टचर्थं—ग. 3. म्लेच्छेत्यादि—फ. म्लेच्छेति—ग. 4. नास्ति—इ.फ.ग.ह.ज. 5. नास्ति—इ.फ.ग.ज. 6. म्लेच्छनिधने—ग. 7. स्याव्यक्तकजनस्य—अ. 8. नास्ति—ग. 9. धृतकल्किशरीरेति । हे केशव ! —ब. 10. नास्ति—इ.फ.ग.ह.ज. 11. नास्ति—फ.ह. 12. जगदीशादिपदं-अ.इ.फ.ग.ह.ज. 13. मम नास्ति—अ.ब. मम सदयहृदयत्वं—ज. 14. तद्विपरीतं—ज. 15. प्रवृत्तस्यात आह—फ. 16. मारणार्थे—ब. 17. नास्ति—फ. 18. उत्पातिक—अ. 19. धूमकेतुचिह्नः—अ. 20. सारस्यम्—अ. साम्यम्—फ. 21. इत आरम्यापदसमाप्ति व्याख्याभागो नास्ति—अ. 22. निमित्तसप्तमी—ज. 23. लिछः—ब.

[1]पापरते जातिभेदे [2]स्यादल्पभाषिणि" (इति विश्वः (२५.४)) । "हर्षापहारके चैव [3]सदाचारोज्झितेऽपि च" इति कोशचूडामणिः । "कल्की तु सापराधः स्यात्कल्की विष्णु[4]र्मलान्विते" इति [5]भोजे । "धूमकेतुः स्मृतो वह्नावुत्पात[6]ग्रहयोरपि" इति [7]विश्वः (५६.२०३) । "[8]समूहनिवहव्यूह" इत्यमरः (२.६.४०) । "निधनं स्यात्कुले नाशे" इति विश्वप्रकाशः (७१.३४) । "[9]खड्गे [10]तु निस्त्रिंश[11]चन्द्रहासाऽसिरिष्टयः । कौक्षेयको मण्डलाग्रः करवालः [12]कृपाणवत्" इत्यमरः (२.८.८९) । "करालो भीषणोऽन्यवत्" इति च । (प्रति)वस्तूपमालङ्कारः[13] ॥१०॥

पदद्योतनिका

म्लेच्छेति। हे धृतकल्किशरीर [14]धृतकल्क्यवतार त्वं [15]म्लेच्छनिवहनिधने म्लेच्छसमूहमारणे निमित्तं किमप्यनिर्वचनीयं करवालं खड्गं कलयसि धारयसि । कथम्भूतं करवालम् ? [16]धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकम् । यद्वा, धूमकेतुरग्निः ॥१०॥

जयन्ती

(म्लेच्छेति ।) म्लेच्छानां वेदप्रामाण्येन क्रियाभ्रष्टानां निवहनिधने मरणे; निमित्तसप्तमी । तत्किमपि ईषत् अनिर्वचनीयत्वेनात्यन्तं करालं भयङ्करं धूमकेतुमिव अत्यर्थं करालं मरणसूचकत्वाद् धूमकेतोः । करवालं खड्गं कलयसि धारयसि । खड्गेनैव दुष्टसंहारः कल्किना अग्रे [17]करिष्यत इति वक्तव्ये बुद्धिस्थत्वेन वर्तमानताध्यवसायः । हे धृतकल्किशरीर कल्किकलेवर ॥१०॥

---

1. पापतरे–विश्वः । 2. स्यादपभाषिणि–विश्वः 3. आचारोष्टज्ञतेऽपि च–ब. नास्ति–अ. आचारेति–ग. आवरोद्वितेपिवेति–इ. 4. र्मलान्विते–ब. 5. नास्ति–फ. 6. ग्रहभेदयोः–विश्वः । 7. नास्ति–फ. 8. समूहे–अमरः । 8. तः 13. पर्यन्तो भागो नास्ति–फ. 9. खड्गे तु खड्गनिस्त्रिंश–ज. 10. त–ब. 11. चन्द्रहासास्यरिष्टयः–व. 12. कृपाणे चेदित्यमरः–ब. 14. धृतावतार–ड. धृतकल्क्यवतारशरीर–ल.म. नास्ति–क. 15. नास्ति–ड. 16. धूमकेतुं औत्पातिक–ड. 17. करिष्यसीति–च.

श्रीजयदेवकवेरिदमुदितमुदारं
शृणु सुखदं शुभदं भवसारम् ।
केशव धृतदशविधरूप
जय जगदीश हरे ।।११।।

सञ्जीवनी

सर्वलीलाकर्तारं [1]पूर्णं [2]श्रीकृष्णं स्तौति–श्रीति । हे रसिक ! श्रीजयदेवकवेः इदं[3]गीतं [4]उदितं स्वतः प्रेम्णा स्फुटी[5]भूतं शृणु । कीदृशम् ? उदारं [6]महद्रसमयत्वात् । अथ वा उदारं अतिरमणीयं; [7]श्रीराधाकेलिनिरूपणत्वात् । [8]पुनः कीदृशम् ? सुखदं सकलानन्दपूर्णत्वात्[9] । पुनः कीदृशम् ? शुभदं [10]समस्तशुभप्रदम् । [11]यद्वा, शुभं ददाति यः श्रीकृष्णस्तत्प्रदम् । भवसारं भवे [12]सारं सारभूतम् । यद्वा, भवो मनोभवः कामः तस्य सारं शृङ्गाररसपूर्णम् । यद्वा, भवत्यस्माद्विश्वमिति स भवः श्रीकृष्णस्तस्य [13]सारं सारभूतं [14]सुरतविस्तारकम् । हे [15]केशव ! धृतदशविधरूप धृतानि दशविधानि [16]दशप्रकाराणि मीनबन्धादिशरीराणि येन तादृश जय जय । [17]पक्षे कृतदशावतारं श्रीकृष्णं स्तौति । हे[18]केशव ! हे धृतदशविधरूप धृतानि दशविधानि [19]दशप्रकाराणि मीनाद्यवताररूपाणि येन तादृश त्वं जय जय[20] । अथ वा दशविधैरवतारै[21]र्निरूप्यत इति । शेषं समानम् । "उदारं[22]सुन्दरं प्रोक्तमुत्कृष्टं पूजितं तथा" इति [23]त्रिलोचनः । "रूपं प्रशस्ते[24]रम्ये च" इति चूडामणिः ।।११।।

---

1. पूर्वं–ब 2. नास्ति–अ. 3. नास्ति–फ. 4. नास्ति–ग. 5. कृतं–अ.फ.ज. 6. मरुद्रस–अ. 7. श्रीराधाकृष्णकेलि–इ.फ.ह.ज. श्रीराधाश्रीनन्दकुमारकेलि–ग. 8. तः 9. पर्यन्तं नास्ति–अ.ब. 10. नास्ति–इ.फ.ग.ह.ज. 11. अथ वा शुभं दायितः श्रीकृष्णतत्पदं–ब.इ.फ.ग. अथ वा शुभं ददाति यः श्रीकृष्णस्तत्प्रदं–ह.ज. 12. नास्ति–फ. 13. नास्ति–ग.ह.ज. 14. श्रुतिविस्तारकम्–ग. 15. नास्ति–इ.फ.ग.ह.ज. 16. दशप्रकाशप्रकाराणि–ब. 17. तः 20. पर्यन्तो भागो नास्ति–इ. 18. नास्ति–फ.ग.ह.ज. 19. शदेविनिप्रकाराणि–ब. 21. रूप्यत इति–फ.ग.ह.ज. 22. सुन्दरे–फ. 23. नास्ति–फ. 24. रम्ये रम्येचेति–अ.

वेदानुद्धरते जगन्निवहते भूलोकमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ।

पदद्योतनिका

श्रीजयदेवेति। हे धृतदशविधरूप धृत[1]दशप्रकारशरीर। श्रीजयदेवकवेरिदमुदितं भाषितं [2]शृणु आकर्णय इति [3]भक्तजनं प्रत्युक्तिः। कीदृशं [4]जयदेवकवेरुदितम्[5]? उदारं मनोहरम्। [6]पुनः कथम्भूतम्[7]? सुखदं सुश्राव्यत्वात्। [8]पुनः [9]कीदृशम्? शुभदं कल्याणदायकम्। [10]पुनः [11]कीदृशम्? [12]भवसारं संसारे [13]धनरूपम् ॥११॥

जयन्ती

ख्यापनापूर्वकं फलमाह—श्रीजयदेवेति। श्रीमान् जयदेवाख्यः कविः; तस्य इदं दशावतारस्तोत्ररूपं उदितं च वचनं उदारं चतुरतारूपगुणयुक्तम्। "उदारताऽतिवैदग्ध्यमग्राम्यत्वात्पृथङ्मता।" इदमुपलक्षणं च [14]सत् ज्ञातमाधुर्यसौकुमार्यकान्तिभिरपि युक्तम्। सुखदं आनन्दप्रदं मङ्गलप्रदम्। भवे संसारे सारं भगवत्स्तुतिरूपं शृणु। मध्यमपुरुषेण भगवद्भक्तो जनः श्रोता आक्षिप्यते इति त्वमित्यध्याहारः। अतो नापृष्टपरिभाषणदोषः। हे धृतदशविधरूप उक्तमत्स्याद्यवतारवहनशील माधव। एतेन अवताराणां दशात्मकत्वं कृष्णस्य पूर्णविष्णुत्वं सूचितम्। अष्टपदसमुदायत्वेन प्रवृत्तत्वादष्टपदीत्वं दशपद्याः। ध्रुवायाः एकादशे मीनशरीरेत्यादिपरिवर्तनेऽपि न ध्रुवत्वभङ्गः। परिवर्तनमपि चमत्काराय। केशवस्थाने माधवयादवमुकुन्दादिपदवत् ॥११॥

सञ्जीवनी

पूर्वकथितं लीलासमूहं श्रीकृष्णचन्द्रविषयं प्रथयन् प्रणमति— [15]वेदानित्यादिना। श्रीकृष्णाय दशाकृतिकृते तुभ्यं नम इत्यन्वयः। [16]पूर्वोक्तां दशविधां

1. दशविधप्रकारशरीर—क.ल.म. 2. नास्ति—ल.म. 3. भक्तान् प्रत्युक्तिः—क. भक्तानां प्रत्युक्तिः—ल.म. 4. तः 5. पर्यन्तं नास्ति—क.ल.म. 6. तः 7. पर्यन्तं नास्ति—क.ल.म. 8, 9. न स्तः—क.ल.म. 10, 11. न स्तः—क.ल.म. 12. भवसारेऽनुरूपम्—ल.म. 13. धनरूपमित्यर्थः—क. 14. सति—च. 15. वेदानिति—इ.फ. 16. पूर्वोक्ता दशविधा दशप्रकारा—अ.ब.इ.ह. पूर्वोक्ता दशविधाः दर्शयते—फ. पूर्वोक्ता दशविधा दशप्रकारा मीनबन्धादिलीला तदाकृतिं—ज.

पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥१२॥

दशप्रकारां मीनबन्धादिलीलाकृतिं करोति तस्मै दशाकृतिकृते [1]कृष्णायेति पूर्णाय [2]नराकृतिपरब्रह्मणे वा । उक्तञ्च—

"कृषिर्भूवाचकः शब्दो [3]नश्च निर्वृतिवाचकः ॥
तयोरैक्यं परं ब्रह्म 'कृष्ण' इत्यभिधीयते ॥" [4]इति ।

[5]किंभूताय ? [6]वेदान् वात्स्यायनादिशास्त्रोक्तबन्धादिकामप्रकारानुद्धरते लोकेषु विस्तारयते । अन्यथा वात्स्यायनशास्त्रं निष्फलमेवात्र स्यात् । पुनः कीदृशाय ? जगत् युवतिसमूहं निवहते विगतसन्तापं [7]कुर्वते । पुनः कीदृशाय ? भवति इति भूः [8]कामस्तस्य गोलः समूहस्तं [9]उद्बिभ्रते धारयते । [10]रासे व्रजवधूमण्डलं वा । रासलीला[11]प्रतिबन्धकं त्वत्समीपमागतं [12]शङ्खचूडाख्यं दैत्यं दारयते [13]विदारयते । अनेन [14]रसैकप्राधान्यमुक्तम् । पुनः (कीदृशाय) ? बलिं [15]त्रिवलिं छलयते [16]व्रजयुवतीनां कामजनितनख[17]क्षतादि[18]प्रदानेन वञ्चयते । पुनः कीदृशाय ? क्षत्रक्षयं कुर्वते । [19]क्षत्रशब्देनात्र [20]सहचरितो वीररसो [21]लक्ष्यते । तस्य क्षत्रस्य क्षयं [22]विनाशं कुर्वते । एतेन सुरतशूरत्वं [23]ध्वन्यते । पुनः कीदृशाय ? पौलस्त्यं जयते । पुल महत्वे धातुः । पुलनं [24]पुलः महत्त्वं [25]तस्य समूहः पौलं, [26]तस्य समूह इत्यण् । पौलं [27]स्त्यायते [28]संहतं भवत्यस्मिन्निति पौलस्त्यो ब्रह्मानन्दः । "स्त्यै ष्टचै शब्दसङ्घातयोः"

---

1. कृष्णाय–ज. 2. नराकृतिपूर्णाय ब्रह्मणे वा–ग. 3. णश्च–ज. 4. नास्ति–अ.ग. 5. किंभूताय ? वेदानुद्धरते–ग. 6. वेदे–अ. 7. कुरुते–अ. 8. कामः नास्ति–फ. 9. बिभ्रते–अ. 10. रासव्रज–अ.ब. 11. प्रतिबन्धकत्वसमीपमागतं–अ.ब. प्रतिबन्धकत्वं समीपमागतं–इ. प्रतिबन्धकतया समीपमागतं–फ. 12. शङ्खचूडं दैत्यं दैत्यं–अ. 13. नास्ति–अ. 14. नासौकप्राधान्यं–ग. 15. पूजां–अ.ब. 16. युवतीनां–अ. 17. क्षतप्रदानेन–ग. 18. प्रधानेन–ब. 19. शब्देन–अ. 20. क्षत्रसहचरितो–ह.ज. 21. लक्षते–अ.ब. 22. नाशं–फ. 23. ध्वनितम्–ज. 24. पुनः–अ. 25. तस्य समूहः पौलं नास्ति– ग.ह. 26. तस्य समूह इत्यण् नास्ति–अ. 27. स्त्यायतं संहतं–ह.फ. स्त्यायते संहते–ज. 28. नास्ति–ब.

(धा.पा. ९१०) इति धातुः । तमपि जयते [1]तं न्यक्कुर्वते । [2]हलं [3]कलयते । "हल [4]विलेखने" (धा. पा. ८३७) धातुः । हलनं हलः; [5]विलेखनं नखक्षतादि [6]तत् कुर्वते । कारुण्यमातन्वते । [7]भक्तेषु कृपां [8]विस्तारयते । म्लेच्छमव्यक्तभाषणम् । "म्लेच्छ अव्यक्ते शब्दे" (धा.पा. २०५) [9]इति धातुः । [10]अव्यक्तश्वाससीत्कारान् मूर्छयते [11]वर्द्धयते । "[12]मूर्छा मोहसमुच्छ्राययोः" (धा.पा. २१२) इति धातुः[13] । पक्षे श्रीकृष्णकृतां बन्धादिलीलां [14]नुत्वा दशावतारिणं सच्चिदानन्दरूपं परिपूर्णविग्रहं श्रीकृष्णचन्द्रं गीतार्थश्लोकसङ्ग्रहेण स्तौति–वेदानित्यादिना । कृष्णाय नराकृतिपरब्रह्मणे तुभ्यं नम [15]इत्यन्वयः । नमस्कारोऽस्तु । ननु मीनाद्यवतारेण [16]तस्य [17]पूर्णस्य [18]स्तुतिः कृतैव; इदानीं [19]नन्दगोपबालकं मां कथं स्तौषीत्यत आह—दशाकृतिकृते (इति) । "आकृतिः कथिता रूपे सामान्यवपुषोरपि" इति विश्वः (५५.१६६) । मीनादि-दशांशरूपकर्त्रे । अंशावतारवानीश्वरस्त्वमेवेत्यर्थः । ननु कुतोऽहमीश्वरः कुतो ममांशा एते [20]तत्राह-पूर्णत्वात् । उक्तञ्च श्रीभागवते—"[21]एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इति । किञ्च कृषिर्भूवाचकः [22]शब्द इति । ननु पूर्णश्चेदहं कुत्सितमीना(द्या)कृतयः किमिति स्वीकृता इत्याशयेनावतारप्रयोजन-माह–वेदानुद्धरते (इति) । [23]वेदोद्धारणं कुर्वते मीनशरीरेण । पुनः कीदृशाय ? जगन्निवहते । [24]भुवनं [25]धारयते कच्छप[26]रूपेण । [27]पुनः कीदृशाय ? भूगोलं धरामण्डलं उद्बिभ्रते ऊर्ध्वं प्रापयते [28]वराहावतारेण । (पुनः कीदृशाय ?) दैत्यं हिरण्यकशिपुं दारयते [29]विदारयते नृसिंहरूपेण नखैः । (पुनः कीदृशाय ?)

---

1. अन्यकुर्वते–ब. अन्यं तत्कुर्वते–ग. अन्यत्कुर्वते–फ.ज. अत्पलं कुर्वते–ह. वाक्यमिदं नास्ति–अ. 2. 3. न स्तः–ब. 4. विशेषणे–अ.फ. विलेषणे–ब. 5. विलेषणं–अ. विलेशणं–ब. 6. नास्ति–फ. 7. सद्भक्तेषु–ब.इ. फ.ज. सद्भक्ते–ह. 8. विस्तारते–अ. 9. नास्ति–इ.फ.ग.ह. 10. अव्यक्तान् श्वाससीत्कारान्–फ.ग.ह.ज. 10 तः 13 पर्यन्तं नास्ति–इ. 11. नास्ति–ग.ज. 12. मूघ्रणं ययोरिति धातुः–ब. 14. स्तुत्वांशावतारिणं–इ.फ.ग.ह.ज. 15. नास्ति–ब.इ.फ.ग.ह.ज. 16. तस्य पूर्णस्तुतिः–ह. 17. नास्ति–ब. 18. नास्ति–अ. 19. ननु नन्दगोप–ग. 20. तत्राहुः–फ. 21. अन्ये–ब.इ. फ.ग.ह.ज. 22. नास्ति–ब.इ.फ.ग.ह.ज. 23. वेदान् उद्धरणं क्रियते–ग. 24. 25. न स्तः–ग. 26. देहेन–ब.इ.फ.ह.ज. 27. पुनः कीदृशाय पदं सर्वत्र योज्यम्–ब.इ.फ.ग.ह.ज. 28. शूकररूपेण–ब.इ.फ.ग.ह.ज. 29. नास्ति–ग.

बलिं दैत्यं छलयते [1]प्रवञ्चयते [2]वामनावतारेण। (पुनः कीदृशाय ?) क्षत्रक्षयं कुर्वते दुष्टक्षत्रियाणां विनाशं कुर्वते परशुरामा[3]वतारेण। (पुनः कीदृशाय ?) [4]पौलस्त्यं जयते, पुलस्त्यवंशे भवः पौलस्त्यः रावणस्तं जयते श्रीरामचन्द्ररूपेण। (पुनः कीदृशाय ?) हलं [5]कलयते। दुष्टनाशाय हलं धारयते [6]बलदेवरूपेण। (पुनः कीदृशाय ?) कारुण्यमनुग्रहमातन्वते विस्तारयते [7]बुद्धरूपेण। (पुनः कीदृशाय ?) म्लेच्छान् मूर्च्छयते [8]नाशयते कल्किरूपेण। एतेन श्रीकृष्णदेवस्यांशावतारप्रयोजनान्युक्तानि। [9]दीपकालङ्कारः ॥१२॥

[10]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां दशावतारवर्णनं नाम प्रथमः प्रबन्धः ॥१॥

पदद्योतनिका

उक्तानेवावतारान् पुनः सङ्क्षेपेण कीर्तयति—[11]वेदानिति। तुभ्यं कृष्णाय नमोऽस्त्वित्यन्वयः। कथम्भूताय कृष्णाय? वेदानुद्धरते मीनरूपेण। पुनः जगन्निवहते धारयते कूर्मरूपेण। भूगोलं [12]पृथ्वीचक्रं उद्बिभ्रते [13]ऊर्ध्वं धारयते वराहरूपेण। दैत्यं हिरण्यकशिपुं दारयते नृसिंहरूपेण। बलिं दैत्यं छलयते वञ्चयते वामनरूपेण। क्षत्रक्षयं क्षत्रियनाशं कुर्वते परशुरामरूपेण। [14]पौलस्त्यं [15]रावणं जयते [16]रामरूपेण। हलं लाङ्गलं कलयते धारयते बलभद्ररूपेण। कारुण्यं दयामातन्वते विस्तारयते बुद्धरूपेण। म्लेच्छानन्त्यजान्मूर्च्छयते [17]नाशयते [18]कल्किरूपेण। अत एव दशाकृतिकृते दशविधरूपधारिणे [19]श्रीकृष्णाय तुभ्यं नमः ॥१२॥

[20]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां दशावतारवर्णनं नाम प्रथमः प्रबन्धः ॥१॥

---

1. प्रपञ्चयते–अ. 2. वामनावताररूपेण–ज. 3. रूपेण–व.इ.फ.ग.ह.ज. 4. पौलस्त्यं रावणं जयते श्रीरामरूपेण–फ.ज. पौलस्त्यं रावणं जयते श्रीरामचन्द्ररूपेण–ग.ह. 5. हलयते–अ. 6. श्रीबलभद्ररूपेण–फ.ग. 7. बुद्धिरूपेण–ब. 8. नास्ति–अ. 9. दीपिकालङ्कारः–अ. 10. इति श्रीजयदेववर्णिते दशावतारवर्णनो नाम प्रथमः प्रबन्धः–अ. इति श्रीजयदेववर्णितदशावतारवर्णनो नाम–फ.ह.ज. 11. अयं श्लोकः सव्याख्यः द्वितीयप्रबन्धारम्भे दृश्यते–ड. 12. पृथ्वोरूपं चक्रं–क. 13. उद्धारयते–क. 14. पौलस्ति–ड. 15. नास्ति–ड. 16. दाशरथिरामरूपेण–क. 17. नास्ति–क. 18. नास्ति–ड. 19. नास्तीदं वाक्यम्–ड.ल.म. 20. इति प्रथमाष्टपदी–ल.म. नास्ति–क.

द्वितीयः प्रबन्धः

[1]गुर्जरीरागे [2]मठताले

[3]श्रितकमलाकुचमण्डल
धृतकुण्डल ए ।
कलितललितवनमाल
जय जय देव हरे ॥१॥

जयन्ती

उक्तार्थं सङ्गृह्य प्रमाणयति—वेदानिति । वेदान् श्रुतिगणान् उद्धारकर्त्रे मत्स्याय । जगन्ति चतुर्दशलोकान् निवहते कूर्माय । भूगोलं उद्बिभ्रते पातालादूर्ध्वं नयते वराहाय । दैत्यं हिरण्यकशिपुं दारयते छिन्दते नृसिंहाय । बलिं छलयते वञ्चयते वामनाय । क्षत्रस्य क्षत्रियकुलस्य कार्तवीर्यादेः क्षयं संहारं कुर्वते परशुरामाय । पौलस्त्यं रावणं जयते संहारेण जयते दाशरथिरामाय । हलं लाङ्गलं प्रलम्बादिसंहाराय कलयते धर्त्रे बलरामाय। कारुण्यं दुर्जनमोहनार्थं कृपां आतन्वते बुद्धाय । म्लेच्छान्मूर्च्छयते इन्द्रियप्रलयसाम्यात् मारयते कल्कये ते । इत्थं दशाकृतीन् वेषान् कृते बिभ्रते कृष्णाय तुभ्यं नमः । अत्र क्रमेण तत्तदवतारप्रचरित्रप्रकटनात् क्रमेण कथनाद्रत्नावल्यलङ्कारः । "क्रमिकाणां पदार्थानां क्रमेण गुम्फनं रत्नावलिः" इति लक्षणात् । तुभ्यं नम इत्यस्य वेदानुद्धरत इत्यादौ पृथग्योजनायां दीपकालङ्कारः । मत्स्यादीनां वेदोद्धारकत्वादि[4]भङ्ग्या कथनात् पर्यायोक्तम् । अत्रापि सर्वात्मकत्वं कृष्णस्य दशाकृतिकृत इतिपदेन दर्शितम् ॥१२॥

[5]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां दशावतारवर्णनं नाम प्रथमः प्रबन्धः ॥१॥

सञ्जीवनी

एवं पूर्वोक्तकेलिप्रतापवर्णनेन [6]दशाकृतिकृते कृष्णायेति यत्प्रोक्तं तदेव गोप्यन्तरक्रीडाकथनेन दर्शितम् । इदानीं सकलनायकचूडामणेः [7]श्रीकृष्णचन्द्रस्य

---

1. गुर्जरीरागेण मङ्गलवृत्तेन मण्टतालेन गीयते—च. 2. प्रतिमण्टताले—ब. प्रतिमण्ठताले—ग. परिमण्ठताले—फ.ह.ज. 3. शृत—अ.ब. 4. भङ्गचकथनात्—च. 5. नास्तीयं पुष्पिका—च. 6. दशावतारकृति—ग. 7. कृष्णस्य—ग.

समस्तनायककलाविशेषान् वर्णयितुमपि च [1]व्रजवध्व: स्वयूथकेलिं कारयितुं [2]श्रीकृष्णं नायकं देवत्वेन स्तुवन्तीति मङ्गलान्तरं श्रितकमलेति गीतेन दर्शयति। गीतस्य गुर्जरीराग:। [3]रागलक्षणम्—

श्यामा सुकेशी मलयद्रुमाणां
मृदूल्लसत्पल्लवतल्प[4]याना।
[5]श्रुते: स्वराणां दधती विभागं
[6]तन्त्रीमुखाद्दक्षिणगुर्जरीयम्॥ इति।

[7]ग्रन्थबाहुल्यभयत्तालल्क्षणं नोक्तम्। गीतस्यायमर्थ:। हे देव! कन्दर्पद्योतक हे हरे! सकलजनमनोहर जय जय। [8]केल्यर्थं नायकोत्कर्षमाविष्कुरु। आदरे [9]द्विर्वचनम्। इदं ध्रुवपदम्। नायकगुणानाह—श्रितेति। पुन: कीदृश? हे श्रितकमलाकुचमण्डल! श्रितं आश्रितं [10]स्वसौभाग्यसौन्दर्यमाधुर्यातिशयार्थं वरस्त्री: लक्ष्मीर्वा [11]या सा कमला; वरस्त्री: श्रीराधा, तस्या: [12]कुचयोर्मण्डलं समग्रकुचप्रदेशो येन तत्सम्बुद्धि:। श्रितं राधाया: कुचमण्डलं यस्येति वा। [13]कमु कान्तामिति वा। कान्तिं लाति आददाति सा कमला राधा[14]। गौरपीनस्निग्धवर्तुलत्वात् तत्सौभाग्यशोभाप्राप्त्यर्थं यां लक्ष्मी[15]र्वरस्त्री[16]श्च सेवत इति भाव:। अनेनालौकिको वरनायकगुण उक्त:। [17]पुन: कीदृश? धृतकुण्डल ए। धृते स्वीकृते [18]कुण्डले कर्णाभरणे येन; सत्सम्बोधनम्। ए इत्यतिहर्षे। अनेन पूर्वक्रीडायां तद्विस्मृतमित्युक्तम्[19]। पुन: कीदृश? कलितेति। कलिता कण्ठे धृता अतिमनोहरा वनमालाऽऽपादलम्बिनी रत्नमयी वा येन। यद्वा कलितानि [20]ललितानि मनोहराणि शृङ्गाररसचेष्टितानि यस्यां [21]सा;

1. वृजध्व: स्वप्रथकेलिं—फ. 2. श्रीकृष्णं नायकगुणकदम्बत्वेन—इ.फ.ग. श्रीकृष्णनायकगुणकदम्बत्वेन—ह.ज. 3. तालल्क्षणम्—अ. 4. याता—इ.फ.ग.ह.ज. 5. श्रुति:—अ.ब. 6. तन्त्रीमुखा दक्षिणगुर्जरीयम्—ग.ह.ज. तन्त्रोन्मुखा दक्षिणगुर्ज्जरीयम्—फ. 7. ग्रन्थबाहुल्यात्तालल्क्षणं—अ.ब. 8. स्वकेल्यर्थं—फ. स्वल्पार्थं—ग. 9. वीप्सा—ग. द्विवचनम्—ह. 10. स्वसौभाग्यातिशयार्थं—अ. स्वसौभाग्यसौन्दर्यातिशयार्थं—फ. 11. यया सा—अ.ब. 12. कुचप्रदेशो—अ.ब. कुचमण्डलाश्रितो यो मण्डलसमग्रकुचप्रदेशो—ज. 13. त: 14. पर्यन्तो भागो नास्ति—ग.फ. 15. वरस्त्री सेवत इति भाव:—फ. 16. स्वसैव। कुण्डले कर्णाभरणे—अ.ब. 17. त: 19. पर्यन्तं नास्ति—ग. 18. पुष्पनिर्मितकुण्डले—इ.फ. पुष्पनिर्मिते कुण्डले—ह.ज. 20. धृतानि ललितानि—ह. 21. नास्ति—इ.फ.ग.ह.ज.

[1]ईदृग्विधा वनमाला यस्येति । [2]अथ[3]वा कलिता धृता राधासखीनां स्वेदोत्पन्ना वनस्य जलस्य माला पङ्क्तिर्यस्मिन् । [4]अथ वा कलिता प्रक्षिप्ता [5]रासरस-महोत्सवे [6]व्रजवल्लवीभि[7]र्ललिता [8]कुङ्कुमकर्पूररागरसगन्धादिभिर्मनोहरा वनमाला यस्य । [9]अतो नृत्यखेदोत्पन्नश्रमजल[10]विन्दुक्लिन्नामपि मालां प्रेयसी-भिर्दत्तेयं (इति) मत्वा[11]अतिवल्लभत्वात् न त्यजतीति भावः । उक्तं च—

"प्रियेण [12]सङ्ग्रथ्य विपक्षसन्निधा-
वुपाहितां वक्षसि पीवरस्तने ।
[13]स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ इति भारविः । (किरा–८.३७)

[14]अनेन नायकस्याखिलविलाससम्पत्प्रियाकौशलञ्चोक्तम् । पक्षे श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचयोर्मण्डलं कुचाग्र[15]भागो येन तत्सम्बुद्धिः । अनेन लक्ष्म्याः [16]केलिकौशलेन रतिकेलिकौशलरूपो नायकगुण उक्तः । लक्ष्म्याश्रयत्वेन धनाढ्यगुणः सूचितो[17] नायकस्य । धृतकुण्डल कलितललितवनमाल इति पद-द्वयेन नायकस्य [18]भव्यत्वं सौभगत्वं च सूचितम् । शेषं समानम् । "मण्डलं राजचक्रे स्याद्बिम्बे च स्वरमण्डले । [19]कान्ताकुचप्रदेशे च मण्डलं वर्तुलेऽपि च ॥" इति विश्वः[20] (१०५.८१) कुचौ स्तनाविति वा । "आपादगामिनीं मालां वनमालां [21]जगुर्बुधाः" इति [22]विश्वः । "[23]कमला श्रीवरस्त्रियोः" इति विश्वः (१०५.५३) ॥१॥

---

1. तादृग्विधा–इ.फ.ग.हृ.ज. 2. यद्वा–ग. 3. अदोत्पन्नवनमालापङ्क्तिर्य-स्मिन्–अ. 4. यद्वा–ग. 5. रासावसरे समहोत्सवे–ग. 6. व्रजवधूभिः–इ. 7. वलिता–फ. 8. कुङ्कुमकर्पूरागरुसुगन्धा–इ.फ.हृ.ज. कुङ्कुमकर्पूरागरु-गन्धा–ग. 9. अत्यानृत्यत्खेदोत्पन्न–ग. 10. बिन्दूनामुपमालां–अ. बिन्दु-भिन्नामपि–फ. श्रमजलस्य बिन्दुक्लिन्नामपि–ज. 11. नास्ति–ब. 12. सङ्ग्रथ्य-वुपक्ष–अ. सङ्ग्रभ्यविपक्ष–ब. 13. श्रजं–अ. 14. अनेन नायिकाखिलविला-सम्सम्पत्प्रियाकौशलञ्चोक्तम्–ब.इ.फ.ग. अनेननायकाखिलविलाससम्पत्प्रिया-कौशलञ्चोक्तम्–हृ.ज. 15. त 17. पर्यन्तं नास्ति–फ. 16. केलिकौशल-रूपो–अ.ब.हृ.ज. 18. भव्यत्वं सूचितमिति–फ. भव्यत्वं सौभगत्वं च सूचि-तमिति–इ.ग.हृ.ज. 19. कन्याकुच–फ. 20. स्यान्मण्डलं द्वादशराजके च देशे च विम्वे च कदम्बके च । कुष्ठप्रभदेऽप्युपसूर्यकेऽपि भुजङ्गभेदे शुनि मण्डलः स्यात्–विश्वः 21. विदुर्बुधाः–इ.फ.ग.हृ.ज. 22. नास्ति विश्वकोशे । 23. कमला श्रीर्हरिप्रिया इत्यमरः–ग.

पदद्योतनिका

[1]इदानीं गुर्जरीरागेण कृष्णं स्तौति । [2]रागलक्षणम्—

श्यामा सुकेशी [3]मलयद्रुमाणां
मृदूल्लसत्पल्लव[4]तल्पयोगात् ।
श्रुतेः स्वराणां दधती विभागं
तन्त्रीमुखा दक्षिणगुर्जरीयम् ।। इति ।

(तालक्षणम्—)

[5]प्लुतमात्रप्रवृत्तिः स्याद्यत्र ताले निरन्तरम् ।
प्रतिमण्ठः स शृङ्गारे सानन्दो गीयते रसे ।।

श्रितेति । हे देव ! हे हरे ! जय जय स्वपक्षपाते सत्वोत्कर्षेण [6]वर्धस्व । श्रितेत्यादीनि [7]सप्तपदीपदानि सम्वोधनानि ज्ञातव्यानि; [8]ए इति पदं हे इत्यर्थे । हे श्रितकमलाकुचमण्डल श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं [9]स्तनमण्डलं येन । हे धृतकुण्डल धृते [10]कुण्डले येन । [11]हे कलितेति । कलिता [12]धृता [13]ललिता सुन्दरी वनमाला पुष्पदाम येन ।।१।।

जयन्ती

पवर्जिता रिग्रहांशन्यासा षाडविका मता ।
कदाचिदवरोहे सा पयुता गुर्जरी भवेत् ।।
दिनस्य प्रथमे यामे गेया सा गानकोविदैः ।।

ध्रुवः प्रथमं व्याख्यायते । हे देव ! हे हरे ! जय जय । वीप्सायां सन्तोषोत्कर्षेण वसेति सूचितम् । दशमात्रात्मकमिदम् । पदानि त्रिंशन्मात्राणि । एकं दलमष्टादशमात्रकम् । अन्यद्द्वादशमात्रकम् । ए इति रागपूर्त्यर्थम् । श्रितं आश्लिष्टं कमलायाः लक्ष्म्याः कुचमण्डलं येन तत्सम्बुद्धिः । धृते कुण्डले येन तत्सम्बुद्धिः । कलिता पिनद्धा ललिता विचित्रतया गुम्फिता वनमाला आपादप्रसृतपुष्पमाला येन तत्सम्बुद्धिः ।।१।।

---

1. कविरिदानीं–क.ल.म. 2. तत्र लक्षणम्–क. 3. मदन–ल.म. 4. ताल्पयाताम्–ल.म. 5. नास्त्ययं श्लोकः–ड.ल.म. 6. वर्तस्व–क. 7. सप्तानि- ल.म. समपदानि–क. 8. हे–ल.म. नास्ति–ड. 9. नास्ति–ड. 10. मकराकारकुण्डले–क. 11. नास्ति–क.ल.म. 12. नास्ति–ड.ल.म. 13. नास्ति–ड.

दिनमणिमण्डलमण्डन
भवखण्डन ए ।
मुनिजनमानसहंस
जय जय देव हरे ॥२॥

सञ्जीवनी

कर्तव्यव्रजयुवतिकदम्बलीला[1]प्रवर्तकान् नायकगुणानाह—दिनमणीत्यादिना। ए इति सादरसम्बुद्धौ। [2]दिनस्य मणिः प्रकाशकस्सूर्यः। मणेः [3]प्रकाशबहुलत्वं सिद्धमेव। तस्य यन्मण्डलं प्रकाशसमूहः [4]तस्य यन्मण्डनं श्रीराधासौन्दर्यं यस्य तादृश; श्रीराधाऽलङ्कारभूत। एतेन [5]नायिकापक्षपातो ध्वनितः। पुनः कीदृश ? हे भवखण्डन ! भवस्य कन्दर्पस्य [6]खण्डनो [7]नाशकस्तत्सम्बोधनम्। कीदृश ? मुनिजनमानसहंस ! मुनिजनास्त्वच्चरणकमलसुभगसौन्दर्यमाधुर्यविचारशीलाः गोपीजनास्तेषां मानसमेव सरस्तत्र हंस मराल। [8]प्रसिद्धं मानससरसि हंसस्तिष्ठति (इति)। अत्र मानससरोवरसदृशे गोपीजनमनसि श्रीकृष्णचन्द्रो हंसतुल्य इति भावः। अनेन मनोहारित्वं प्रोक्तम्। पक्षे दिनमणेः सूर्यस्य मण्डलं [9]तेजस्समूहः तस्य मण्डन अलङ्कारभूत। भवं संसारं खण्डयति [10]नाशयतीति तादृश। एतेन नायकस्य गुणसामर्थ्यं ध्वनितम्। [11]पुनः मुनिजनानां ऋषीणां मानसं चित्तमेव सरः सरोवरस्तस्य हंस। [12]अनेन नायकस्य [13]धूर्तत्वादिरहितत्वं स्वच्छहृदयप्रकाशकत्वञ्चोक्तम्। शेषं जयादिपदं समानम्। "मानसं सरसि स्वान्ते" इति विश्वः (१२१.२१)। "हंसो विहङ्गमेऽपि स्यात्परमात्मनि योगिनि" [14]इति च (विश्वः १२०.८)।

---

1. प्रवर्तनाय नायकगुणानाह–ग. 2. दिनस्य मणिः प्रकाशकः। सूर्यमणेः प्रकाशबहुलत्वं सिद्धमेव–ज. 3. प्रकाशकबहुलत्वं–फ. प्रकाशबाहुल्यं –ग. 4. तन्मण्डलं–अ.ब. तस्य यन्मण्डलं–ग. 5. नायका–अ. 6. नास्ति–अ. 7. नाशक–अ.ब. 8. प्रसिद्धे मानससरसि हंसास्तिष्ठन्ति–ब.इ.फ.ग.ह.ज. 9. नास्ति–अ. 10. नास्ति–ग. 11. पुनः कीदृश–फ.ज. 12. इति अनेन–ग. 13. धूर्तादि–अ.ब.इ.फ.ग. अनेन नायक धूर्तादि–ह. अनेन नायके धूर्तादि–ज. 14. हंसो विहङ्गभेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादिभेदेषु परमात्मनि मत्सरे ॥ विश्वः

कालियविषधरगञ्जन
जनरञ्जन ए।

"मण्डलं तु समूहे स्यान्मण्डलं राजमण्डले। मण्डलं वर्तुले चैव तेजस्यपि च मण्डलम्" इति मेदिनीकारः[1] (२८.१२१)। [2]परम्परितरूपकालङ्कारः। तद्रूपम्—

"नियतारोपणोपायः स्यादारोपः [3]परस्य यः।
[4]तत्परम्परितं श्लिष्टे वाचके भेदभाजि च॥ इति॥२॥

पदद्योतनिका

दिनमणीति ! हे [5]दिनमणिमण्डलमण्डन ! सूर्यमण्डलालङ्कारभूत। हे [6]भवखण्डन ! भक्तानां [7]संसारनाशक। हे [8]मुनिजनमानसहंस ! मुनिजनानां मानसे [9]मनसि हंस इव। मानसे सरसि हंसोऽस्ति। जय जयेति पूर्ववत्॥२॥

जयन्ती

(दिनमणीति।) दिनमणिः सूर्यः तस्य मण्डलवत् मण्डनानि भूषणानि ग्रैवेयादीनि यस्य तत्सम्बुद्धिः। भास्वरत्वरूपसादृश्यधर्मवाचकपदाभावाल्लुप्तोपमालङ्कारः। यद्वा सूर्यमण्डलस्य मण्डनं भूषणम्; तस्मिन् स्थितत्वात्। 'ध्येयस्सदा सवितृमण्डलमध्यवर्ती' इति वचनात्। भवस्य संसारस्य खण्डनः छेदकः, तत्सम्बुद्धिः। मुनिजनानां मानसमेव अन्तःकरणमेव मानससरः तस्य हंसः, तत्सम्बुद्धिः। तेषां मनस्सु ध्येयत्वेन विद्यमानत्वात्। अन्तःकरणस्य सरस्त्वारोपनिमित्तकहंसत्वारोपः श्लेषसंवलित इति श्लिष्टपरम्परितरूपकालङ्कारः॥२॥

सञ्जीवनी

अन्यदप्याहुः—कालियेत्यादिना। कालियः सर्प[10]स्तदाकृतिः कुण्डलीभूतो बन्धस्तस्य गञ्जन [11]सम्मर्दक। बन्धलक्षणञ्चोक्तम्—

---

1. मण्डलं परिधौ कोठे देशे द्वादशराजसु। क्लीबेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे॥ मेदिनी 2. परंपरिचितरूपकालंकारः—अ.ब.इ.फ.ग.ह.ज. 3. परस्परः—फ. 4. परंपरिचितो—अ. तत्परंपरिचितो—ब.ज. तत्परंपरितोक्तिष्टे—फ.ह. तत्परंपरिक्लिष्टे—ग. तत्परं परिचितो क्लिष्टे—इ. 5. नास्ति—ड. दिनमणिमण्डल—ल.म. 6. नास्ति—ड. 7. बन्धनाशक—ल. 8. नास्ति—ड. 9. सरसि हंसोऽस्ति; जय जयेति पूर्ववत्—ल. मनसि हंस इव। मानसे सरसि हंसोऽस्ति; जय जयेति पूर्ववत्—म. मनसि हंसोऽसि। जय जयेति—क. 10. तद्वदाकृतिः—इ.फ.ग.ह.ज. 11. मर्दक—ज.

यदुकुलनलिनदिनेश
जय जय देव हरे ॥३॥

"यत्रोपरि स्थिता पुंसः कान्ताऽऽलिङ्गनलालसा ।
वेष्टयत्य[1]ङ्गमङ्गेन भोगिबन्धः स कथ्यते ॥" इति ।

हे जनरञ्जन जनान् [2]भक्तान् स्वकौशलादिना रञ्जयति। एतेनालौकिकगुणो नायकस्य लक्षित इति । न हि [3]सर्वजनोऽत्यल्पसामर्थ्येन रज्यते । [4]अथ वा जनः श्रीराधासखीजनः । [5]वाङ्माधुर्यादिना रञ्जन [6]रतिप्रद । एतेन [7]नायिकादृढप्रवणत्वमनुकूलत्व[8]ञ्चोक्तम् । हे यदुकुलनलिन[9]दिनेश यदुकुलं नाम गोपकुलमेव; [10]गोपकुलमेव नलिनं तस्य दिनेश सूर्य । एतेन कुलीन[11]सर्वप्रकाशनायकगुणो लक्षितः । उक्तं च पद्मपुराणे—"यादवानां हितार्थाय [12]धृतो गोवर्धनाचलः" इति । पक्षे पुनः कीदृश ? हे कालियविषधरगञ्जन कालियनाम्नो विषधरस्य [13]सर्पस्य गञ्जन गर्वनाशक। [14]अनेन [15]क्लेशहारित्वमुक्तम् । हे जनरञ्जन जनान् गोवर्धनोद्धरणादिना मधुरसम्भाषणादिना च रञ्जन सुखप्रद । अनेन [16]क्लेशरक्षणत्वं शुभवचनत्वं [17]च नायकगुण उक्तः। यादवानां कुलमेव नलिनं कमलं तस्य दिनेश सूर्य। एतेन कुलीनत्वं यादव-[18]सौभाग्यञ्चोक्तम् । "आशीविषो विषधरश्चक्री व्यालस्सरीसृपः" इत्यमरः (१.७.७) । "वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्" [19]इत्यमरः (१.९.४०) । उत्प्रेक्षाऽयमलङ्कारः । [20]अन्यत्समानम् ॥३॥

पदद्योतनिका

कालियेति । कालियनाम्नः सर्पस्य गञ्जन हिंसक । जनरञ्जन भक्तरञ्जक । यदुकुलेति । यादवकुलकमलसूर्य ॥३॥

---

1. अङ्गसङ्गेन–इ. 2. नास्ति–ग. भक्तजनान्–ज. 3. सर्वजनमल्पं–इ.ग.ह.ज. 4. यद्वा–ग. 5. तेषां वाङ्माधुर्यादिना–ज. 6. प्रदः–ब. 7. नायका–अ. 8. च प्रोक्तम्–इ.फ.ह.ज. प्रोक्तम्–ग. 9. दिनेस–अ. 10. नास्ति–अ.ब.ग.ज. 11. सर्वत्र–ब 12. धृतं गोवर्धनाचलमिति–ग. 13. नास्ति–अ. 14. अनेनाऽपि–इ.फ.ग.ह.ज. 15. क्लेशापहारित्वमुक्तम्–ग. 16. क्लेशापहारित्वं क्षणत्वं शुभवचननायकस्य गुणोक्तः–ग 17. नास्ति–अ.ब. 18. सौभाग्यत्वं–अ.ब. 19. इति च–इ.फ.ग.ह.ज. 20. शेषं–इ.

मधु[1]मुरनरकविनाशन
[2]गरुडासन ए ।
सुरकुलकेलिनिदान
जय जय देव हरे ॥४॥

जयन्ती

(कालियेति ।) कालियविषधरः सर्पस्तस्य गञ्जनः मर्दकः तत्सम्बुद्धिः । अत एव जनरञ्जन । कालियनिःसारणेन यमुनाह्लदस्य जनसेव्यत्वं कृतमिति पदार्थहेतुककाव्यलिङ्गालङ्कारः । यदुकुलमेव नलिनं कमलं तस्य प्रकाशकत्वाद्दिनेशः सूर्यः, तत्सम्बुद्धिः । अश्लिष्टपरम्परितरूपकालङ्कारः ॥३॥

सञ्जीवनी

[3]अपरमप्याहुः—मधुमुरेत्यादिना । [4]ए इति सर्वत्रानन्दसम्बोधनं ज्ञातव्यम् । मधौ वसन्ते [5]मुराः, 'मुर वेष्टने' धातुः, अभिमतार्थप्रदा वृक्षाः । नराणां कं सुखं याभ्यस्ता लताश्च, ये वयः पक्षिणस्तानपि न आशयति व्यापारयतीति [6]नाशनः तादृश । [7]अश भोजने, अशु व्याप्तौ, निषेधार्थं नकारः । समासत्वा[8]न्नलोपाभावो वेति केचित् । स्ववंशो[9]स्वरं शृण्वतां [10]वृक्षलतापक्षिणां [11]भोजनभोगतृष्णाव्यापारं हतवान् । [12]किं पुनर्मनुष्याणामिति भावः । हे [13]गरुडासन ! [14]एतेन गरुडबन्ध उक्तः । कामसर्वस्वे कोकशास्त्रे तल्लक्षणम्—

"पक्षवद्बाहुयुगलं विपरीतरते प्रिया ।
धुनोति यत्र कूजन्ती[15] स प्रोक्तो गरुडाकृतिः ॥" इति ।

हे सुरकुलकेलिनिदान देवानां कुले केलीनां निदान आदिप्रवर्तक । नितरां [16]रसप्रद इति वा । [17]यमपेक्ष्य सुरकुलस्य केलौ स्पृहा भवतीति भावः । पक्षे

---

1. सुर–अ. 2. गरुडशन–अ. 3. अपरमथाहुः–ग. 4. यदुस्ताति सर्वत्र–ब. 5. नास्ति–फ. 6. नाश–अ.ब. नाशन–फ.ह.ज. 7. अश् भोजने असूङ व्याप्तौ–ग. असु भोजने अशङ व्याप्तौ–ह. असु भोजने अशुङ व्याप्तौ–फ. असु भोजने अशुञ् व्याप्तौ–ज. असु भोजने अशुन् व्याप्तौ–इ. 8. नलोपाभावो नैकधेतिवत्–ब.इ.फ.ग.ह.ज. 9. रवं–इ.फ.ग.ह.ज. 10. तलसलता–ब. तरुलता–इ.फ.ग.ह.ज. 11. भोजनं भोगतृष्णाव्यापारं–फ. भोगतृष्णां व्यापारं–अ.ब. 12. किं पुनर्मनुष्याणामिति–ग. 13. नास्ति–अ.ब. 14. तः 15. पर्यन्तं नास्ति–ग. 16. रसप्रदे–ब. 17. यमप्रक्ष–अ. यमपैक्ष–ब.

मलकमलदललोचन
भवमोचन ए ।
त्रिभुवनभवननिधान
जय जय देव हरे ॥५॥

मधुनाम्नो मुरनाम्नो नरक[1]नाम्नो [2]दैत्यस्य [3]विनाशक । सुरकुलकेलीनां देवकुलसमूहक्रीडानां निदान आदिकारण । तदुद्भव[4]कारण इति यावत् । अनेन नायकस्य देवक्रीडाविशिष्टसौन्दर्यकुशलादयश्च गुणा उक्ताः । "[5]मधुर्वसन्ते मधुनि मधुरेऽप्यसुरेऽपि च" इति मेदिनीकारः । "मुरोऽसुरेऽथ [6]स्वजनाभिमतार्थ[7]प्रदेऽपि च" इति [8]विश्वः । "कं ब्रह्मणि सुखे वाऽपि जले ब्रह्माण्डकेऽपि च" । [9]त्रिदशा विबुधाः सुराः" इत्यमरः (१.१.७) । "निदानं त्वादिकारणं" चेति (अमरः–१.३.२८) "निदानं कारणे प्रोक्तं विनाशे निश्चयेऽपि च" इति [10]भोजे ॥४॥

पदद्योतनिका

मध्विति । मधुमुरनरकसंज्ञिकानां दैत्यानां नाशक । गरुडासन गरुड एव आसनं यस्य । सुरकुलेति । सुरकुलानां देवसमूहानां केलेः क्रीडायाः सुखस्येति यावत्; [11]निदान आदिकारण ॥४॥

जयन्ती

(मध्विति ।) मधुदैत्यश्च मुरश्च नरकश्च तेषां विनाश घातुक । मधोस्संहारे पूर्वावतारे कृतेऽपि कृष्णावतारे कथनं अभेदद्योतनार्थम् । गरुडः आसनं वाहनं यस्य तत्सम्बुद्धिः । वाहनस्य आसनत्वेन कथनं वेगवद्गरुडेऽपि निश्चलतारोहणव्यञ्जनार्थम् । सुराणामिन्द्रादीनां केलिः क्रीडा तस्या निदानं आदिकारणं तत्सम्बुद्धिः । तत्परिपन्थिमध्वादिदैत्यसंहारकत्वात् । अत्रापि पूर्ववत्काव्यलिङ्गम् ॥४॥

सञ्जीवनी

[12]अपरमप्याहुः—अमलकमलेत्यादिना । अमलं यत्कमलस्य दलं पत्रं तद्वल्लोचने यस्य तादृश । निर्मलकमल[13]कोशारक्तपत्रलोचन इत्यर्थः । अनेन

1. नास्ति–फ. 2. नास्ति–इ.फ.ग.ह.ज. 3. नाशस्य–अ. 4. कारक–इ.फ.ग.ह.ज. 5. मधुर्वसन्ते मधुरे मधुन्यपिति सुखैति–ब. 6. सुजना–ग. 7. प्रदेति च–अ. 8. वैजयन्ती–इ.फ.ग.ह.ज. 9. सुरो देव इत्यमरः–इ.फ.ग.ह. नास्ति–ज. 10. नास्ति–इ.फ.ग.ह.ज. 11. निदानमादिकारणम्–क.ल.म. 12. अपरमथाहुः–इ.ग. 13. कोशरक्तपत्रे–ग

[1]नायिकान्तरसम्भोगमालिन्यं निरस्तम् । भवमोचन कामसन्तापनाशक । त्रिभुवनभवननिधान त्रिभुवनं भवनं यस्य [2]श्रीराधारत्नस्य तस्य निधान निधिविशेष । एतेन नायकगुणोत्कर्षः प्रतिपादितः । पक्षे अमलं यत्कमलं [3]तस्य [4]यद्दलं पत्रं तद्वल्लोचने यस्य । [5]अनेन मनोहरत्वं प्रोक्तम् । [6]भवस्य संसारस्य मोचन [7]निस्तारक । [8]यद्वा भवं जन्म [9]तस्माद्भक्तान् मोचयतीति तादृश । अनेन त्यागरूपो नायकगुण [10]उक्तः । त्रिभुवनमेव भवनं मन्दिरं तदेव [11]निधानं वसतिस्थानं यस्य तादृश । जयादिपदमुभयत्र समानम् । "[12]निधानं [13]त्वालये प्रोक्तं निधानं तु निधावपि" इति विश्वः । "भवनं भाववेश्मयोः" इति च (विश्वः–७५.२५) । "पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्" इत्यमरः (२.४.१४) । "निधानमाकरे प्रोक्तं निधिभेदे स्थितावपि" इति कोशसमुच्चये । अत्र स्तुतिरलङ्कारः ॥५॥

पदद्योतनिका

अमलेति । [14]अमलकमलदलवत् निर्मलपद्मपत्रवत् लोचने यस्य । भवमोचन संसार[15]भञ्जक । त्रिभुवनेति । [16]त्रिभुवनमेव भवनं गृहं तत्र निधानमिव निधिरिव ॥५॥

जयन्ती

(अमलेति ।) अमलं निर्मलं कमलं पद्मं तस्य [17]दले इव लोचने यस्य तत्सम्बुद्धिः । भवमोचन संसारच्छेदक । त्रयाणां भुवनानां स्वर्ग[18]मर्त्यपाताललोकानां समाहारः तदेव भवनं गृहं तत्र निधानं सर्वाभिलाषविषयत्वात्; तत्सम्बुद्धिः ॥५॥

---

1. नायकान्तरमालिन्यं–अ. नायकान्तरसम्भोगमालिन्यं–फ. 2. श्रीरावायत्नस्य तस्य निधानं इति विशेषः–अ. श्रीराधारत्नस्य तस्य तख्यनिधाननिधिविशेषे–ब. 3. 4. न स्तः–अ. तस्य यत्पत्रं–ग. तद्दलं पत्रं–फ. 5. अनेनापि मनोहारित्वं प्रोक्तम्–ब.इ.फ.ह.ज. अनेनापि हारित्वं प्रोक्तम्–ग 6. भोवस्य–अ. 7. विस्तारक–फ. 8. अथ वा–ब.इ.फ.ग.ह.ज. 9. तस्मान्मोचयतीति–ग. 10. नास्ति–ग. 11. निदानं–व. 12. निधानं त्वालये निधावपि–इ.ग.ह.ज. निधानं त्वालये निधावितिं–फ. 13. त्वाभये–अ. 14. नास्ति–ड. अमलकमलवत्–ल.म. 15. भर्जक–क. वन्धक–म. 16. भुवनमेव–क.ल.म. 17. दलेव–च. 18. मृत्यु–च.

जनकसुताकृतभूषण
जितदूषण ए ।
समरशमितदशकण्ठ
जय जय देव हरे ॥६॥

सञ्जीवनी

[1]अपरमप्याहुः—जनकेत्यादिना । जनकसुताकृतभूषण जनानां कं सुखं जनयतीति जनको [2]वृषभानुस्तस्य सुता श्रीराधा तया तस्यां वा कृतानि [3]मकरिकापत्रतिलकादीनि भूषणानि यया येन वा । जनानां स्वसखीजनानां कं सुखं [4]सुतनोतीति[5] जनकसुता राधा तया वा । [6]षूञ् प्राणिप्रसवे । जितानि [7]स्वगुणश्लाघाकथननायिकोपरतिप्रभृतीनि दूषणानि येन । हे [8]समरशमित-दशकण्ठ समरे [9]रतिसङ्ग्रामे शमिता नाशिता दशकण्ठा सुखशून्यदशावस्था येन तादृश । [10]ताः पुनर्दशाः—

[11]"चक्षूरागः प्रथमं [12]चित्तासङ्गस्ततोऽथ सङ्कल्पः ।
निद्राच्छेदस्तनुता विषय[13]निवृत्तिस्त्रपानाशः ॥
उन्मादोऽप्यथ मूर्च्छा मृतिरप्येता दशावस्थाः ॥"

[14]एतेन सकलकला[15]प्रवीणादयश्च नायकगुणा उक्ताः । पक्षे पुनः कीदृश ? जनकसुताकृतभूषण जनकसुतायाः [16]सीतायाः कृतानि भूषणानि येन । [17]यद्वा जनकसुतया कृतं भूषणं यस्मिन् । एतेन तारुण्यसकलकलाप्रवीणनायकगुण उक्तः । पुनः कीदृश ? (जितदूषण) जितो दूषणो नाम राक्षसो येन । अथ वा जितानि स्वस्मिन् श्लाघातिरस्कारादीनि दूषणानि येन । अनेन नायकस्य शूरगुणो लक्षितः । पुनः (कीदृश ? समरशमितदशकण्ठ) समरे

---

1. अपरमथाहुः–इ. 2. वृषभानुस्तत्करोतियवादत्वात्–ब.इ.ग. वृषभानुस्तत्करोतीति पचादित्वात्–फ.ह. वृषभानुस्तत्करोतीति यचादित्वात्–ज. 3. कस्तूरिकापत्र–ग. 4. सुतोतीति जनकसुता सीतया वा–अ. 5. तनोतीति–ग. सुनोतीति–ह.ज. 6. पुत्र प्राणिप्रसवे–ब.ज. षुतणि प्रसवे–फ. षुञ् प्राणि प्रसवे–इ. 7. गुण–अ. 8. शमर–अ.ब. 9. रतिरति–अ. 10. तापुनदशाः अ.ब. ताः पुनर्दश–फ.ह.ज. 11. चतूरागः–अ.ब. 12. चिन्ता–ब.फ.ग. 13. निद्राप्ति–अ.ब. 14. एतैः–इ.फ.ग.ह.ज. 15. प्रवीणवीरादयश्च–इ.फ.ग.ह.ज. 16. नास्ति–ग. 17. जनकसुतया वा–इ.फ.ग.ह.ज.

अभिनवजलधरसुन्दर
धृतमन्दर ए ।
श्रीमुखचन्द्रचकोर
जय जय देव हरे ॥७॥

सङ्ग्रामे शमितो नाशितो दशकण्ठो रावणो येन [1]तथा। अनेना[2]भिमानो नायकगुण [3]उक्तः । "जनकः स्यात्तु पितरि सुखदे मिथिलेश्वरे" इति त्रिलोचनः। "दूषणो राक्षसे प्रोक्तो दूषणं खण्डनेऽपि च"। "[4]समरानीकरणाः कलहविग्रहौ" इत्यमरः (२.८.१०४) ॥६॥

पदद्योतनिका

जनकेति। जनकसुतायाः कृतभूषण कृतालङ्कार। जितदूषण जित-राक्षस। यद्वा जितपाप। समरेति। [5]समरे सङ्ग्रामे शमितो [6]मारितो दशकण्ठो रावणो येन ॥६॥

जयन्ती

जनकसुतेति । जतकसुतायाः कृतं भूषणं येन तत्सम्बुद्धिः। जितः दूषणाख्यखलमन्त्री येन तत्सम्बुद्धिः। समरे शमितः ध्वंसितः दशकण्ठो रावणो येन तत्सम्बुद्धिः ॥६॥

सञ्जीवनी

अपरमप्याहुः—अभिनवेत्यादिना। हे अभिनवजलधरसुन्दर नूतनप्रकटित-स्निग्धनीरदद्युते । जलदो यथा ग्रीष्मसन्तापहारकः सकलानन्दप्रदश्च तथा त्वम्। धृतमन्दर [7]धृतो गोवर्धनो येन सः । गोपसंरक्षणार्थाय [8]धृतोऽयं मन्दराचल इति पद्मपुराणे। किञ्च मन्दराचल इति [9]तन्नामान्तरम्। अथ वा धृतपर्वतबन्ध। तल्लक्षणम्—

"बाहुनैकेन वनितां कान्तो यत्रानुरागिणीम्
दधात्यूर्ध्वं गिरिमिव गिरिबन्धः स कीर्तितः" ॥ इति

श्रीमुखचन्द्रचकोर श्रीसंयुक्तं यत् श्रीराधामुखं तदेवानन्दजनकत्वेन चन्द्रस्तस्य चकोर; तदापन्नजीवन। अत्र श्रीराधाधरचन्द्रामृत[10]पानत्वेन श्रीकृष्णचन्द्रस्य

1. तत्तथा—ह.ज. 2. अभिमानि—ग. अभिमानी—अ.ब.इ.ह.ज. 3. प्रोक्तः—ब.इ.फ.ग.ह.ज. 4. समरानीक इत्यमरः—ब.इ.फ.ग.ह.ज. 5. नास्ति—ड. 6. नास्ति—क.ड. 7. धृतगोवर्धन—इ.फ.ग.ह.ज. 8. धृतोऽहं—अ. 9. नामान्तरम्—ज. 10. पानं श्रीकृष्णचन्द्रस्य—ह.

चकोरपक्षित्वं [1]सूचितम् । श्रीमद्वृन्दावने श्रीराधामुखमेव [2]चन्द्रो [3]नापरश्चन्द्रो विराजत इति । अनेन श्रीमद्वृन्दा[4]वने नायिकानामुत्कर्षः । पक्षे पुनः कीदृश ? [5]अभिनवेति । अभिनवो नूतनो जलधरो मेघस्तद्वत्सुन्दर सुभग । अनेन नायकस्य रतिगम्भीरस्निग्धभव्यत्वं चोक्तम् । (धृतमन्दर) धृतः क्षीराब्धिमथनावसरे [6]मन्दरनामा पर्वतो येन । [7]अनेन नायकसामर्थ्यं [8]प्रोक्तम् । श्रीमुखेति । श्रिया लक्ष्म्या राधाया [9]वा मुखमेव चन्द्रः आह्लादकारित्वात्; तस्य चकोर । अत्रेन्दिरावदनचन्द्राधर[10]पानेन भगवतश्चकोरत्वं निरूपितम् । एतेन नायकस्य रतिकौशलमेवोक्तम् । "प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः" [11]इत्यमरः (३.१.७७) । "धाराधरो जलधरः" इत्यपि (अमरः–१.३.७) । "मन्दरो मन्दरे प्रोक्तो [12]बन्धभेदेऽपि मन्मथे" इति [13]मेदिनीकारः । नायकगुण[14]लक्षणम्—

त्यागी कुलीनः कुशलो रतेषु
कल्यः कलावित्तरुणो धनाढ्यः ।
भव्यः क्षमावान् सुभगोऽभिमानी
स्त्रीणां मतो ([15]मूर्तिधरः स कामः) ॥

इति शृङ्गारतिलके । अत्र स्तुतिरेवालङ्कारः ॥७॥

पदद्योतनिका

अभिनवेति । सजलमेघसुन्दर । [16]धृतमन्दरपर्वत । श्रीमुखमेव चन्द्रस्तत्र चकोर इव ॥७॥

जयन्ती

अभिनवेति । अभिनवश्चासौ जलधरः, स [17]इव सुन्दर मेघश्याम । अत्रापि लुप्तोपमा । धृतः मन्दरो येन तत्सम्बुद्धिः । समुद्रमथनकाले मन्दराचलस्य मथनत्वात् । श्रियाः लक्ष्म्याः मुखमेव चन्द्रः तस्य चकोरः पक्षिविशेषः ज्योत्स्नापायी (तत्सम्बुद्धिः) । अत्रापि परम्परितरूपकालङ्कारेण तन्मुखस्मितानन्दसुखास्वादनं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥७॥

---

1. निरूपितम्–ब.इ.फ.ग.ह.ज. 2. चन्द्रो विराजत इति–अ.ब. 3. नास्ति –फ. 4. वननायिकानां—इ.फ.ह.ज. 5. नास्ति–अ. 6. मन्दरोनाम–अ. मन्दराख्यः–इ.फ.ग.ह.ज. 7. अनेनापि–फ.ग.ह.ज. 8. चोक्तम्–ब.इ.फ.ग.ह.ज. 9. नास्ति–अ. 10. पाने–ग. 11. नास्ति–फ. 12. मन्दभेदेऽपि–अ.ब. बन्धभेऽपि मन्दरः–ह. 13. "मन्दरस्तु पुमान् मन्थशैले मन्दारपादपे"—मेदिनी. 14. लक्षणानाह–अ.ब. 15. कुण्डलीकृतो भागः–'ज' पुस्तके एव लभ्यते । 16. धृतमन्दर धृतमन्दराचल–क.म. धृतमन्दराचल–ल. 17. एव–च.

[1]तव चरणं प्रणता
वयमिति भावय ए ।
कुरु कुशलं प्रणतेषु
जय जय देव हरे ॥८॥

सञ्जीवनी

सकलकलाप्रवीणत्वेन श्रीकृष्णं स्तुत्वा साम्प्रतमभिमतमाहुः; अभीष्टञ्च [2]प्रार्थयन्ते—तवेत्यादिना । हे कृष्ण ! वयं तव चरणं प्रणता इति भावय स्मर जानीहि [3]इति [4]यावत् । ननु मया किमिति भवत्यः स्मर्तव्याः; अयमर्थः—स्मरणं चित्तधर्मस्तस्य त्वन्निष्ठत्वात्त्वयैव तद्विधेयमिति सूचितम् । अथ वा [5]त्वमेव निजचरणप्रणतान् स्वभक्तान् भावय कुर्वित्यर्थः। प्रणतेष्वनुरागिष्वस्मासु कुशलं कुरु । त्वय्यनुरागोऽन्यत्र विरतिश्चेति भावः । तव [6]चरणस्मरणमेवास्मासु [7]कुशलं [8]तदितरमकुशलमेवेति सूचितम् । पक्षे वयं तव चरणे [9]प्रणता इति भावय जानीहि । ननु मया तत् ज्ञातमेव भवतां किमिष्टं कर्तव्यमित्यत आह—कुर्विति । प्रणतेषु शरणागतेषु कुशलं कुरु ॥८॥

पदद्योतनिका

[10]तव चरणेति । हे देव ! शरणागतप्रिय तव चरणे वयं पतिताः शरणं याता इति भावय दयां कुरु । कथम्भूते चरणे ? श्रुतिभिर्विमृग्ये शोधिते । पुनः कथम्भूते ? ब्रह्मादिभिर्देवैः सम्पूजिते । कथम्भूता वयम् ? पाशशतैर्बद्धाः ॥८॥

जयन्ती

तवेति । वयं तव कृष्णस्य चरणयोः प्रणता इति भावय जानीहि । प्रणतेषु अस्मासु कुशलं क्षेमं कुरु । त्वद्भक्तानस्मान् पालयेति भावः ॥८॥

---

1. तव चरणे श्रुतिविमृग्ये ब्रह्मादिसम्पूजिते कर्मपाशशतैर्बद्धा वयमिति भावय ए । कुरु कुशलं प्रणनेषु जय जय देव हरे ॥ क. 2. प्रार्थयन्ति–अ. 3, 4. न स्तः–अ. 5. त्वमेवेति तव चरणे–ग. 6. चरणमेवास्मासु–ग. 7. कुशलमिति सूचितम्–अ. 8. न हीतरमकुशलमेवेति–ज. 9. पतिता–ब.ग.ह.ज. 10. "तव चरणं प्रणता" इत्येतस्याष्टमपदस्य मूलं व्याख्या च–'क' ग्रन्थे परं दृश्यते ।

श्रीजयदेवकविरिदं
कुरुते मुदं ए।
मङ्गलमुज्ज्वलगीति
जय जय देव हरे ॥९॥

सञ्जीवनी

एवमुक्त्वाऽभीष्टमाशास्ते—श्रीजयेति। [1]इदं श्रीजयदेवकृतं व्रजयुवति-[2]गीतिमङ्गलविधानं [3]सद्भक्तेषु मुदं कुरुते। कुरुतामिति वक्तव्ये—'कुरुते' इति साक्षादनुभवाद्वर्तमानतोक्ता। कीदृशं मङ्गलम्? [4]सुरतमङ्गलप्रदम्। कीदृशम्? [5] उज्ज्वलगीति उज्ज्वला दोषरहिता गीतिर्गानं यस्य तत्तथा। श्रीराधाकृष्णसुरतकेलिकथनेनोज्ज्वलत्वम्। तदितरकेलिवर्णने मलिनत्वमेव। शृङ्गारस्यापि तथैवेति भावः। पक्षे श्रीजयदेवकवेः इदं गीतं शृण्वतां पठतां वा [6]मुदं आनन्दं कुरुते। कीदृशम्? मङ्गलं मङ्गलप्रदम्। उज्ज्वलगीति उज्ज्वलाऽलङ्कारादिदोषरहिता गीतिः कवित्वं यस्य। गीतिदोषास्तु भरते—

"शङ्कितं [7]भीतमुद्भ्रान्तमव्यक्तमनुनासिकम्।
काकस्वरं शिरःकम्पं तथा स्थानविवर्जितम्॥
[8]विस्वरं विरसञ्चैव विश्लिष्टं [9]विषमाहतम्।
व्याकुलं तालहीनञ्च गीतदोषान्विदुर्बुधाः"॥

"मुत्प्रीतिः प्रमदो हर्षः" इत्यमरः (१.४.२४)। "शृङ्गारः शुचिरुज्ज्वलः" [10]इति च (अमरः १.७.१७) ॥९॥

पदद्योतनिका

श्रीजयदेवेति। हे देव! हे हरे! जय जयेति प्रार्थयते। श्रीजयदेवकवेरिदमुदितं मङ्गलं गीतविशेषः मुदं हर्षं कुरुते कुरुताद्भक्तानामिति शेषः। कथम्भूतमिदं मङ्गलम्? उज्ज्वलगीतं [11]तवानुगमेन रम्यं गीतं गानं यस्मिन्[12] ॥९॥

---

1. श्रीजयदेवकवेः इदं–इ.फ.ग.ह.ज 2. गीतं–ग. 3. मद्भक्तेषु–फ.ज. 4. तः 5. पर्यन्तं नास्ति–अ.ब. 6. नास्ति–ग. 7. भीतिमुद्रां तमव्यक्तमनुनासिकम्–अ.ब.ग. 8. विश्वरं–अ.ब.ह. 9. विश्वमाहतम्–ग. 10. इत्यपि–इ.फ.ग. 11. नानानुगमनेन–ड. तानानुगमनेन–क. 12. इत्यष्टपदी द्वितीया–ल.म.

पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरो मधुसूदनस्य
व्यक्तानुरागमिव खेलदनङ्गखेद-
स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥१०॥

जयन्ती

श्रीजयेति । जयदेवकवेः इदं मङ्गलसंज्ञकं उज्ज्वलगीतं मुदं सन्तोषं कुरुते । अत्र श्रीपदप्रयोगे मात्राधिक्यं भवति । अत्र सर्वत्र पूर्वदलादष्टादश मात्राः; द्वादशयतिः । अन्त्ये एकादश मात्राः । सप्तसु च यतिः ॥९॥ इति मङ्गलाष्टपदी ॥

सञ्जीवनी

एवं पूर्वोक्तप्रकारेण श्रीराधाकृष्णयो रहःक्रीडा वर्णिता । इदानीं तत्पुष्टिकारिणीं लीलाभूमिकामाह[1] । "[2]सम्भोगरसपुष्टयर्थं विप्रयोगनिरूपणम्" इति पूर्वमुक्तमेव ।

"विप्रयोगात्मिका केलिः प्रथमे [3]सा निरूप्यते ।
सम्भोगरसपुष्टयर्थं प्रेमवाक्यैर्वयस्यया ॥"

तत्रापि श्रीराधोत्कर्षकथनाय यूथलीलामाह—पद्मेत्यादिना । मधुसूदनस्य [4]श्रीराधाधरामृतपानकर्तुः; [5]षुञ् [6]अभिषवे; उरः वक्षःस्थलं वो युष्माकं प्रियं मनोभीष्टं अनुपूरयतु सम्पूर्णं करोतु । कीदृशम् ? पद्मानि क्रीडार्थं विद्यन्ते यस्यां [7]सा [8]पद्मवर्णा वा पद्माङ्किता सामुद्रिकशास्त्रोक्ता महासौभाग्यवती वा पद्मा श्रीराधा; तस्याः पयोधरतटी कुचाग्रं तस्य [9]परिरम्भेणालिङ्गनेन लग्नं [10]यत्काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितं सञ्जातमुद्रं वा । श्रीराधया स्वप्रेमदर्शनाय निजस्तनाग्रलिप्त[11]काश्मीरमुद्रैव दत्तेति भावः । खेलनेन विनोदेन [12]अनङ्गक्रीडायां यः [13]खेदः सुरतायासस्तेन यत्स्वेदाम्बु [14]प्रस्वेदजलं तस्य पूरः

---

1. पद्मेत्यादिना–फ.ज. 2. वाक्यमिदं नास्ति–इ.फ.ग.ह.ज. 3. सन्निरूप्यते–इ.फ.ग.ह.ज. 4. श्रीराधामृत–ग. 5. 6. न स्तः–अ.ब. 7. नास्ति–इ.फ.ग. 8. नास्ति–फ. 9. परिरम्भणेन–अ.ब. 10. यत्काश्मीरकुङ्कुमं–अ.ब. 11. काश्मीरेण मुद्रैव–इ.ह.ज. 12. अनङ्गस्य क्रीडायां–फ.ज. 13. स्वेदः–अ. 14. स्वेदजलं–फ.ज.

प्रवाहो यत्र तादृशम्। कीदृशमिव? व्यक्तानुरागमिव व्यक्तः प्रकटीभूतोऽनुरागः स्नेहो यत्र तादृशमिव। अनेन श्रीराधानुरागाधिक्यात्स्नेहः [1]कुङ्कुमव्याजेन बहिर्निर्गत इति भावः। पक्षे पद्मा लक्ष्मीः, मधुसूदनो मधुदैत्यहन्ता। शेषं समानम्। "पद्मा लक्ष्मीः स्मृता पद्मा पद्मचिह्नाऽपि कामिनी।" "काश्मीरं [2]कुङ्कुमे प्रोक्तम्" इति। अनेन दाक्षिण्यरूपो नायकगुण उक्तः। तल्लक्षणं शृङ्गारतिलके—

"यो गौरवं भयं प्रेम सद्भावं पूर्वयोषिति।
न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा" ॥ इति।

शेषोक्तिरलङ्कारः ॥१०॥

[3]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां उत्कर्षवर्णनं नाम द्वितीयः प्रबन्धः ॥२॥

पदद्योतनिका

अधुना कविः कामोद्दीपकत्वात् [4]वसन्तस्य वर्णनव्याजेन कृष्णक्रीडां व्याकर्तुं भक्तान् प्रत्याशिषं ब्रूते—[5]पद्मेति। मधुसूदनस्य कृष्णस्य उरो वक्षःस्थलं वः युष्माकं प्रियं [6]अभिलाषं अनुपूरयतु इत्यन्वयः। कथम्भूतमुरः? पद्मेति। पद्मायाः लक्ष्म्याः पयोधरतटी स्तनपरिसरस्तस्य परिरम्भणेन आलिङ्गनेन लग्नं [7]यत्काश्मीरं कुङ्कुमकेसरं तेन मुद्रितं चिह्नितम्। ममैवेदं वक्षःस्थलं [8]नान्यस्या इति भावः। [9]कमिव? व्यक्तानुरागमिव प्रकटानुरागमिव। पुनः [10]कीदृशमुरः? खेलदिति। खेलत् खेलगतिं कुर्वन् योऽनङ्गः कन्दर्पस्तस्य खेदेन सुरतायासेन [11]स्वेदाम्बुपूरो घर्मप्रवाहो यत्र ॥१०॥

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां उत्कर्षवर्णनं नाम द्वितीयः प्रबन्धः ॥२॥

---

1. कुङ्कुमरागव्याजेन–फ.ग.ह. 2. कुङ्कुमं–फ. 3. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 4. वसन्तवर्णनव्याजेन–क. वसन्तवर्णनं कृष्णक्रीडां कर्तुं–ड. वसन्तवर्णनव्याजेन कृष्णक्रीडां कर्तुं–ल.म. 5. श्लोकोऽयं सव्याख्यस्तृतीयप्रबन्धारम्भे दृश्यते–ड. 6. अभिलषितं–क. 7. यत्काश्मीर–ड. 8. नान्यस्य इति भावः–क 9. पुनः कथम्भूतमिव–ल.म. पुनःकिम्–क. 10. कथम्भूतमुरः–क. ल.म. 11. स्वेदाम्बु घर्मजलप्रवाहो यत्र–क. स्वेदाम्बुपूरो घर्मजलप्रवाहो यत्र–ल.म.

तृतीयः प्रबन्धः

वसन्ते वासन्तीकुसुमसुकुमारैरवयवै-
र्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम् ।

जयन्ती

अथ रासक्रीडार्थं मङ्गलमातनोति–पद्मेति । पद्मायाः लक्ष्म्याः पयोधरयोस्तटयोः कुचतटयोः कुचपरिसरदेशयोः परिरम्भेण आलिङ्गनेन लग्नं काश्मीरकुङ्कुमं तेन मुद्रितं लक्ष्मीकुचाङ्गलिप्तं, अत एव व्यक्तः प्रकटीभूतोऽनुरागः प्रीतिविशेषो यस्मिन् तदिव । खेलन् क्रीडंश्चासावनङ्गः मन्मथस्तस्य खेदेन आयासेन जातः स्वेदाम्बुपूरः घर्मोदकसङ्घो यस्मिन् तत् । मधुसूदनस्य माधवस्य उरः वक्षःस्थलं वः युष्माकं प्रियं अभीष्टं आरोग्यैश्वर्यादिरूपं अनुपूरयतु वर्धयतु । आशिषि लोट् । अनुरागशब्देन प्रीतिवाचकेन शक्तिमत्त्वमपि प्रतीयत इति प्रीतेरकृत्रिमत्वम् । माधवस्य काश्मीरोल्लेपानुरक्तवक्षःस्थलं बहिः प्रकटितानुमानत्वेन सम्भाव्यत इत्युत्प्रेक्षा । सा चानुरक्ता घर्मोत्प्रेक्षेत्युपगम्यते । काश्मीरलेपननिमित्तोपादानादुत्पादित[1]निमित्तता इवशब्दस्योत्प्रेक्षावाचकत्वाद्वक्तव्या । [2]तल्लक्षणन्तु—

"मन्ये शङ्के ध्रुवं नूनं प्राय इत्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥"

अत्र रतान्तरं व्यज्यते । वसन्ततिलका वृत्तम् ॥१०॥

[3]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां उत्कर्षवर्णनं नाम द्वितीयः प्रबन्धः ॥२॥

सञ्जीवनी

[4]पूर्वश्लोकेन केलिरससान्द्र(ता)[5]मुक्त्वा तद्विधायिनी वासन्ती

---

1. निमित्ता–च. 2. 'तल्लक्षणन्तु' इति 'मन्य' इत्यादिश्लोकान्ते दृश्यते–च. 3. नास्तीयं पुष्पिका–च. 4. इतः पूर्वं 'ग' ग्रन्थे दृश्यते चैवम्–"कीदृशे ? मधोर्वसन्तस्येयं माधविका । वसन्तो नायकः । माधविका वासन्ती नायिका च; तस्याः परिमलेन सौरभेन ललिते मनोहरे । यद्वा मधुर्वसन्तः श्रीराधाधरामृतं वा, तत्प्रियत्वान्माधवः श्रीकृष्णो मधुप्रिया माधविका श्रीराधा, तस्या अङ्गपरिमलेन सौरभेण मुखपरिमलेन वा ललिते सुन्दर इति ध्वनिः । नान्यथेदृशी सौरभसम्पत्तिर्वसन्त(स्य)इति भावः" ॥ 5. मुक्ता–अ.व.फ.ग.

अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ॥१॥

नाम्नी [1]कामुका प्रि(य)सहचरी सरलमिति [2]शृङ्गाररससहितमनुनयसहितं वा यथा [3]भवति तथा वसन्तममये राधामिदमूचे। सहचरीलक्षणम्—

"स्वात्मनोऽप्यधिकं [4]स्नेहं कुर्वाणाऽन्योन्यमक्षयम्।
विस्रम्भिणी वयोवेषादिभिस्तुल्या सखी मता ॥" इति।

वासन्ती माधवी लता; तत्कुसुमवत्सुकुमारैः कोमलैरवयवैरुपलक्षिता। पुनः कीदृशी? कान्तारे वने भ्रमन्ती इतस्ततो गच्छन्ती। [5]श्रीराधाविशेषणं [6]वा। भ्रमन्तीमित्यत्र हेतुगर्भविशेषणम्। बहु वारं [7]वारं कृतं श्रीकृष्णस्यानुसरण-मन्वेषणं यया ताम्; अन्वेषणे हेतुः—[8]पुनः [9]कीदृशी? अमन्दं अधिकं यथा स्यात्तथा कन्दर्पस्य कामस्य ज्वरस्तापस्तेन जनिता उत्पादिता चिन्ता तया आकुलतया [10]आकुलत्वेन। [11]वलद्बाधां [12]वलन्ती [13]प्रसरन्ती बाधा दुःखं यस्यास्ताम्। श्रीकृष्णविरहातुरत्वेन न च जीविष्यतीति भावः। "[14]महारण्ये दुर्गपथे [15]कान्तारः [16]पुंनपुंसकम्" इत्यमरः (३.३.१७२)। "पीडा बाधा व्यथा दुःखम्" [17]इत्यमरः (१.१०.३)। अवयवैरित्यत्र 'जटाभिस्तापस' इतिवत्। "वासन्ती माधवी लता" इत्यमरः (२.४.७२) ॥१॥

पदद्योतनिका

अधुना विरहोत्कण्ठितायाः राधायाः काचित्सखी [18]कृष्णवार्तामाह—वसन्त इति। वसन्ते वसन्तकाले काचित्सहचरी सखी[19] सरसं विलासं वक्ष्यमाणं राधां प्रत्यूचे अवदत्। [20]कीदृशीं राधाम्? वासन्तीकुसुमसुकुमारैः माधवीपुष्प-[21]सुकोमलैरवयवैरङ्गैरुपलक्षिताम्। उपलक्षणे तृतीया। [22]पुनः कीदृशीम्?

---

1. कामुक्यपि सहचरी–इ.फ.ग.ह्.ज. 2. शृङ्गारसहितं–ग. 3. स्यात्–ग. 4. नास्ति–ग. 5. 6. न स्तः–इ.फ.ग.ह्.ज. 7. नास्ति–इ.फ.ग.ह्.ज. 8. 9. न स्तः–ग.ह्.ज. 10. व्याकुलत्वेन–इ.फ. ग.ह्.ज. 11. चलद्बाधां–इ.ज. 12. वलती–अ. चलन्ती–इ.ज. 13. नास्ति–अ.ब. 14. अरण्ये दुर्गमपथे कान्तार इत्यमरः, कान्तारं वनदुर्गमित्यमरः–ग. 15. कान्तार इति अमरः–ब. 16. नास्ति–इ.फ.ग.ह्.ज. 17. इति च–ग. इत्यपि–इ.फ इत्यपि च–ह्.ज. 18. तः 19. पर्यन्तो भागो नास्ति–क.ल.म. 20. कथम्भूतां राधाम्–क.ल.म. 21. सुकुमारैः–ल. 22. कथम्भूतां राधाम्–क.ल.म.

[1]वसन्तरागे यतिताले

ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।
विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥२॥

कान्तारे [2]दुर्गमे वर्त्मनि भ्रमन्तीम् । [3]पुनः कीदृग्विधाम् ? [4]बहुविहितं वारं वारं दूतीद्वारा कृतं कृष्णानुसन्धानं यया । पुनः [5]कीदृशीम् ? अमन्दमुत्कटं यथा स्यात्तथा कन्दर्पज्वरेण [6]जनितया चिन्तया आकुलता तया कृत्वा चलन्ती उद्गच्छन्ती बाधा पीडा यस्याः ॥१॥

जयन्ती

वसन्तवर्णनोपयोगिनीं कथामारचयति—वसन्तेति । सहचरी सखी वसन्ते चैत्रवैशाखरूपे ऋतौ वासन्ती मल्लिका तस्याः कुसुमानीव सुकुमाराः कोमलास्तैः अवयवैः करचरणादिभिः उपलक्षितेत्यर्थः । कान्तारे दुर्गममार्गे भ्रमन्तीम् । बहु अनेकवारं विहितं कृष्णस्यानुसरणं मार्गणं यया ताम् । अमन्दं अत्यर्थं कन्दर्पः कामः तस्य ज्वरः तापः तेन जनिता उत्पादिता चिन्ता कृष्ण-प्रापणोपायविचारः तया, आकुलस्य भावः आकुलता विह्वलता तया वलन्ती वृद्धिमाप्नुवन्ती बाधा पीडा यस्यां ताम् । सरसं रागसहितं यथा स्यात्तथा इदं वक्ष्यमाणं अष्टपदीरूपं ऊचे उक्तवती । अत्रानुप्रासो वाचकलुप्तोपमालङ्कारः । शिखरिणीवृत्तम् ॥१॥

सञ्जीवनी

वसन्तरागे यतिताले । रागरूपम्—

"शिखण्डिबर्होच्चयबद्धचूडः
पुष्णन् पिकं चूतलताङ्कुरेण ।

---

1. वसन्तरागेण रूपकतालेन गीयते—च. एतस्य वसन्तरागः रूपकतालः—ड. 2. दुर्गमवर्त्मनि—क.ल. 3. पुनः कथम्भूताम्—क.ल.म. 4. नास्ति—क. 5. कथम्भूताम्—ल.म. कथम्भूतां राधाम्—क. 6. जनितया उत्पादितया चिन्तया या—क. जनितया उत्पादितया चिन्तया—ल.म.

भ्रमन्मुदा वासमनङ्ग[1]मूर्ति—
र्मत्तो मतङ्गस्थवसन्तरागः ॥

ताललक्षणम्—"लघुद्रुतौ यत्र [2]ताले यतितालस्स कथ्यते।" 'सरस मिदमूचे' इति श्लोकोक्तं प्रपञ्चयति—ललितेत्यादिना [3]गीतेन। हे सखि [4]राधे इह राधे [5]वैशाखे वा [6]हरिर्मनोहरो नन्दसूनुर्विहरति विहारं [7]करोति। इह [8]विहरतीति समक्षं दर्शयति। [9]न हि विरहे परतो दर्शनं सम्भवति तथा विरहातुरा न सम्भवतीति भावः। [10]तत्राप्येको न विहरति किन्तुं युवतिजनेन [11]समं [12]व्रजयुवतिसमूहेन समं [13]सह नृत्यति नृत्यं करोति। अनेन [14]व्रजयुवतियूथलीला प्रोक्तेति भावः। कीदृशे इह? सरसवसन्ते। शृङ्गाररस[15]सहितवसन्तसमये। पुनः कीदृशे? विरहिजनस्य दुरन्ते [16]विरहिणो जना गोपीजनाः यस्य श्रीकृष्णस्य दुःसहे; त्वां विनेत्यर्थः। [17]अथ वा [18]विरहिजनस्य दुरन्ते[19] दुःखेनान्तः समाप्तिर्यस्य तादृशे। [20]वियोगिजनानां दारुणो न तु विहरतां युवतिभिस्सह। यदि [21]श्रीकृष्णं नानुव्रजिष्यसि तदाऽयं [22]वसन्तस्तवापि दारुणो भविष्यतीति भावः। ध्रुवपदम्। वसन्तसरसतामाह—ललितेति। ललिता कमनीया या लवङ्गानां लता तस्याः परिशीलनेनालिङ्गनेन कोमलो [23]मृदुलो [24]मलयस्य चन्दनपर्वतस्य वा समीरो वायुयत्र। अनेन वायुस्त्रिविधो वर्णितः। कोमलेति मन्दत्वम्; लवङ्गेति सुगन्धित्वम्; ललितेति शीतलत्वम्। पुनः कीदृशे? मधुकरा मधुकर्तारो ये न तु तत्पानकर्तारस्तेषां निकरेण समूहेन करम्बिताः संयुक्ता ये कोकिलास्तैः कूजितं शब्दितं कुञ्जकुटीरं अल्पकुञ्जमन्दिरं

---

1. मूर्तिर्मतो मतंगस्थ–ग. मूर्तेर्मत्तो मतंगस्थ–ज. 2. तालौ–अ.ब.इ.फ.ग.ह.ज. 3. नास्ति–अ.ब. 4. नास्ति–अ.ब.ह. 5. चत्रे वैशाखे वा–ह. 6. मनोहरो –अ. 7. करोति समक्षं दर्शयति–ग. 8. विहरइति–अ. विहरसीति–ब. 9. न हि विरहे पुरतो दर्शनं भवतीति भावः–इ.ग.ह.ज. नहि विरहे पुरतो दर्शनं सम्भवतीति भावः–फ. 10. तत्रापि नैको विहरति–ब.इ.फ.ग.ह.ज. 11. नास्ति–इ.फ.ग.ह.ज. 12. व्रजवधूसमूहेन–ब.इ.फ. 13. नास्ति–अ.ब. 14. व्रजयुवतिलीला–ग. 15. सहिते–ज. 16. तः 19. पर्यन्तो भागो नास्ति–अ. विरहिणोऽपि न गोपीजना न तु विहारो यस्य गोपीजनस्य दुःसहेच्छां विनेत्यर्थः–ब. 17. यद्वा–ग. 18. विरहिजनस्य वियोगिनो जनस्य–इ.फ.ग.ह. विरहिजनस्य वियोगिजनस्य–ज. 20. वियोगिनां–फ.ग.ह.ज. वियोगिनो–इ. 21. श्रीकृष्णो नानुव्रजिष्यति–फ.ग. 22. वसन्तोऽपि तव–फ. 23. नास्ति–अ.ब.ग. 24. मलयस्य वा समीरो–ग. मलयस्य पर्वतस्य समीरो–फ.ह.ज.

यत्र । त्वां विना बृहत्कुञ्जमन्दिरमपि कुटीकृतं तुच्छमिति भावः। मधुकरयुक्ताः कोकिलाः [1]त्वद्विरहखेदेनैव कूजन्तीति ध्वनिः । "[2]अल्पा कुटी कुटीरं स्यात्" इत्यमरः । "[3]समूहनिकरव्यूह" इत्यपि (अमरः–२.५.३९१) "करम्बितं तु संयुक्ते समूहार्थे [4]उत्सुकेऽपि च" इति भोजे । "समीरमारुतमरुज्जगत्प्राण-समीरणाः" इत्यमरः (१.१.६२) । "[5]मधुव्रतो मधुकरो मधुलिण्मधुपालिनः" इति च (अमरः–२.५.२९) । "[6]स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः" इति च[7] (अमरः–२.५.३९) । [8]स्वभावोक्तिरलङ्कारः ॥२॥

पदद्योतनिका

पूर्वोक्तमर्थं गीतेनाह–[9]ललितेति। [10]एतस्य वसन्तराग[11]स्तल्लक्षणम्–

"शिखण्डिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतलताङ्कुरेण ।
भ्रमन्मुदा वासमनङ्गमूर्तिर्मत्तो [12]मतङ्गस्थवसन्तरागः ॥"

हे सखि ! हरिरिह सरसवसन्ते विहरति युवतिजनेन समं नृत्यति चेति [13]ध्रुवगते-नान्वयः । हे राधे ! हरिः कृष्णः इहास्मिन् मनोहरवसन्तसमये क्रीडति । कामिनी-समूहेन सह [14]नर्तनं [15]करोति । कीदृशे वसन्ते ? विरहिजनस्य वियोगिजनस्य दुरन्ते दुःखेनान्तः समाप्तिर्यस्य तादृशे । कुत्र स्थल इत्यपेक्षायां सप्तमपद्यस्थितेन वृन्दावनविपिनशब्देनान्वयः । कीदृशे वसन्तसमये ? ललितेत्यादिसप्तपदीपदानि वसन्त[16]समयविशेषणानि । ललिताया मनोहराया [17]लवङ्गलताया [18]लवङ्ग-लताशाखायाः परिशीलनेन सम्पर्केण कोमलो गन्धमनोहरो मलयसमीरो मलयानिलो यत्र । अनेन वायोः सुगन्धित्वमन्दत्व[19]शीतलत्वान्युक्तानि । मधुकरेति । मधुकरनिकरेण भ्रमरसमूहेन करम्बितैर्मिश्रितैः [20]कोकिलैः कूजितः शब्दितः [21]कुञ्ज एव लतागृहमेव [22]कुटीरोऽल्पकुटी यत्र ॥२॥

---

1. त्वद्विरहखेदेनेव–फ. त्वद्विरहेणैव–ग. 2. अल्पा कुञ्जकुटी स्यात्–ग.ह.ज. 3. तः 7. पर्यन्तो भागो नास्ति–अ. 4. शुकेऽपि च–ब. 5. "मधुकरो मधुव्रतो मधुलिहो मधुपालिन" इति च–ब.ड.फ.ह.ज. 6. स्वोमस्वनिकरव्वा-तवारसंघातसंचय इत्यपि–व. स्तोमश्च निकरव्रातवारसंघातसंचयाः–ड.फ.ग.ह.ज. 8. स्वभावोपमालङ्कारः–अ.व. 9. नास्ति–ड.क. 10. तस्य–ल.म. 11. राग-लक्षणम्–ल.म. 12. मतङ्गस्य–ल.म. 13. ध्रुवपदेनान्वयः–ल. ध्रुवपदगते-नान्वयः–म. ध्रुवगतपदेनान्वयः–क. 14. वर्तनं–ड. 15. करोति च–ल.म. 16. समये–ड.ल.म. 17. नास्ति–ल.म. 18. लवङ्गशाखायाः–क.ल.म. 19. शीतलत्वादीन्युक्तानि–क. 20. कोमलैः–क. 21. कुञ्जमेव–क. 22. कुटीरो गुल्मकुटी–ड.

उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ।
अलिकुलसङ्कुलकुसुमसमूहनिराकुलवकुलकलापे ॥३॥

जयन्ती

ललितेति ।

रागश्शुद्धवसन्तोऽयं सांशन्यासग्रहस्तथा ।
पर्वाजितष्षाडवोऽपि ह्यवरोहेऽपि संयुतः ॥
एवं लक्ष्ये प्रसिद्धोऽसौ गेयो यामे तुरीयके ॥

प्रथमं ध्रुवो व्याख्यायते सर्वत्रानुषङ्गात् । इह पुरोवर्तिनि देशे । सरसः शृङ्गारादिरसेन सहितश्चासौ वसन्तः कालः तस्मिन् हरिः कृष्णो विहरति क्रीडति । युवतीनां वल्लवीतरुणीनां जनेन समुदायेन समं सह नृत्यति । कथम्भूते वसन्ते ? विरहिजनः वियुक्तलोकः तस्य दुरन्ते नेतुमशक्ये । एवमन्यानि विशेषणानि सर्वाणि ललितादीनि वसन्तवेद्यानि । सर्वाण्यष्टाविंशन्मात्राणि दलानि । ललितेति । ललिताः रुचिराः लवङ्गलताः देवकुसुमवल्ल्यः तासां परिशीलनं चालनं कम्पनमित्यर्थः । तेन कोमलः सुकुमारः मलयसमीरः दक्षिणवायुः यस्मिन् तस्मिन् । लवङ्गेन सुरभिकोमलेन मन्दः मलयग्रहणेन शीत इति वायोः सौरभ्यमान्द्यशैत्यानि वर्णितानि । मधुकराणां भ्रमराणां निकरेण समुदायेन करम्बिताः मिलिताः कोकिलाः तेषां कूजितं रुतं गुञ्जितं च यस्य तत् तादृशकुञ्जकुटीरं कुञ्जरूपगृहं यस्मिन् सः तस्मिन् ॥२॥

सञ्जीवनी

वसन्तदुःसहतामेव तनोति—उन्मदेत्यादिना । उन्मद उत्कट [1]उद्धतो वा उद्भटो वा [2]उन्मादावस्थां प्राप्तो वा यो मदनः कन्दर्पस्तादृशो मनोरथो येषां पथिकानां तेषां वधूजनास्तैर्जनितः उत्पादितो विलापो वियोगो यत्र । अनेनोद्वेगावस्था तज्जन्यविलापश्चोक्तः । पुनः कीदृशे ? अलिकुलैर्भ्रमरसमूहैः [3]सङ्कुलो व्याप्तः [4]यः कुसुमसमूहः [5]पुष्पवृन्दः तेन निराकुलः नितरां आकुलो व्याकुलो वकुलकलापो [6]वकुलपुष्पाणां [7]समूहो यत्र[8] । [9]अथ वा वकुल एव कलापो [10]भूषणं यत्र । अनेन त्वद्दर्शनं विना नानुरागोदयः कस्यापीत्युक्तम् ।

1. उद्गतो वा उत्कण्ठावस्थां प्राप्तो वा—ग. 2. उन्मादावस्थोच्छ्वासो वा—इ. 3. तः 8. पर्यन्तो भागो नास्ति—ब. 4. नास्ति—इ.फ.ग.ह.ज. 5. नास्ति—अ.ब. 6. 7. न स्तः—अ. 9. यद्वा—ग 10. नास्ति—अ.

मृगमदसौरभरभसवशंवदनवदलमालतमाले ।
युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥४॥

"कलापो भूषणे बर्हे तूणीरे [1]संहतेऽपि च" इत्यमरः (३.३.१२९)। "सङ्कुलं [2]व्यवधाने स्यात्स्पष्टार्थे च वचस्यपि" इति विश्वः (१०५.८४)। "[3]केसरे वकुल" इत्यपि (अमरः २.४.६४)। "केसरः कुङ्कुमे प्रोक्तः केसरो नागकेसरे। वाजिमौलिकरेऽपीह प्रोक्तः [4]पुष्पादिकेष्वपि" इति धरणिः[5]। हेतूक्तिरलङ्कारः ॥३॥

पदद्योतनिका

उन्मदेति। उद्गतौ मदमदनौ हर्षकामौ यत्र एवम्भूतो मनोरथो यस्य एवम्भूतो यः पथिकवधूजनः [6]पथिकस्त्रीजनः तेन जनित [7]उत्पादितो विलापः परिदेवनं यत्र। अलिकुलेति। अलिकुलैर्भ्रमरसमूहैः सङ्कुलो व्याप्तः कुसुमसमूहस्तेन निराकुलो[8]ऽस्तव्यस्तो बकुलानां वृक्षाणां कलापः समूहो यत्र ॥३॥

जयन्ती

अलिकुलेति। अलिकुलैः भ्रमरगणैः सङ्कुलाः व्याप्ताः यैस्तैः कुसुमसमूहैः निराकुलाः अत्यन्तसंवलिताः बकुलानां कलापाः समुदायाः यस्मिन् तस्मिन्। उन्मदः उद्रिक्तः मदनः तस्य मनोरथाः अभिलाषाः यासां तासां पथिकवधूनां विरहिणीनां प्रोषितपतिकानाञ्च जनेन समुदायेन जनितः विलापः प्रियाणां गमनकारणप्रलापो यस्मिन् तस्मिन् ॥३॥

सञ्जीवनी

पुनः कीदृशे ? मृगमदस्य कस्तूरिकायाः [9]सौरभस्य सुगन्धस्य [10]हर्षस्य वा यो रभसो वेगस्तस्यात्मपक्षवादिनी नवदलमाला नूतनपत्रपङ्क्तिर्येषां तादृशाः [11]तमालास्तमालवृक्षा यत्र। [12]पुनः कीदृशे ? [13]युवजनानां तरुण[14]कामिनी-

1. संहतावपि–ब.इ.फ.ग.ह.ज. सङ्गतेऽपि च–अ. 2. व्यवधाने स्यात्स्पष्टार्थेऽस्य वचस्यपि–अ. व्यवधाने स्यादस्पष्टार्थे वचस्यपि–फ. वाच्यवद्व्याप्तेऽविस्पष्टार्थवचस्यपि–विश्वः। 3. तः 5. पर्यन्तं नास्ति–अ. केसरं–इ.ग. केसरो–ह. 4. पुष्पादिष्वपीति–इ.फ.ग.। 6. पान्थस्त्रीजनः–ल.म. नास्ति–क. 7. नास्ति–ड. 8. व्यस्त्वाव्यस्तो–क. 9. सौरभस्य गन्धस्य–अ. सौरभ्यस्य गन्धस्य–ब. 10. नास्ति–ह. 11. तालाः–अ.फ.ज. नास्ति–ह. 12. नास्ति–फ. 13. युवेति–फ. 14. कामिसमूहानां–ब. कामिजनसमूहानां–इ.ह.ज.

जनसमूहानां हृदयं विदारयन्ति ये तादृशाः मनसिजस्य कामस्य ये नखास्तद्व-द्रुचिर्दीप्तिर्येषां तादृशा ये [1]किंशुकाः पलाशकुसुमानि तेषां जालानि यत्र। साधारणतरुणपुरुषहृदयविदारकाः [2]युवतिहृदयविदारकाः सुतरामिति। तासामष्टगुणकामोदयादित्यर्थः। उक्तञ्च—"कामश्चाष्टगुणः स्त्रीणाम्" इति। एतेन [3]वसन्त[4]दुःसहतोक्ता। "मृगनाभिर्मृगमदः कस्तूरी च" इत्यमरः (२.६.१२९)। "रभसो वेगहर्षयोः" इति विश्वः (१२१.१४)। "रुचिर्मयूखे [5]शोभायामभिष्वङ्गाभिलाषयोः" इति च (विश्वः–१२१.७)। "[6]पलाशः किंशुके [7]शठचाम्" इत्यपि (विश्वः–११५.२३)। "कामः पञ्चशरः [8]स्मरः, शम्बरारिर्मनसिजः [9]कुसुमेषुरनन्यजः" इत्यमरः (१.१.२५,२६)। "[10]जालं समूह आनायो गवाक्षक्षारकावपि" इत्यपि (अमरः–३.३.२००)। रूपकालङ्कारः ॥४॥

पदद्योतनिका

मृगेति। मृगमदस्य कस्तूरिकायाः [11]सौरभरभसवशं[12]वदा सुरभितोत्सा-हस्यायत्तत्ववादिनी नवा नूतना दलमाला पत्रमाला येषां ईदृशास्तमाला यत्र। [13]नूतनपत्रस्तमालो मृगमदगन्धं[14]करोति। युवजनानां तरुणजनानां हृदयं [15]विदारयति। एवंविधो यो मनसिजः कन्दर्पस्तस्य यानि नखानि तद्वत् रुचिर्दीप्तिर्येषामेवम्भूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ॥४॥

जयन्ती

मृगमदेति। मृगमदस्य कस्तूरिकायाः सौरभस्य परिमलस्य रभसः उत्कर्षः तस्य वशंवदाः तत्समपरिमलाः नवदलमालाः पल्लवसङ्घाश्च येषाम्। ते च ते तमालाः तापिञ्छवृक्षाः यस्मिन् तस्मिन्। यूनां तरुणानां जनस्य हृदयं विदारयन्तीति विदारणाः मनसिजनखाः तेषां रुचय इव कान्तयो येषां तानि किंशुकपुष्पजालानि यस्मिन् तस्मिन्। पुष्पजातिप्रभृतय इति किंशुकपदेन तत्पुष्पाणि। निदर्शनालङ्कारः पदगतः ॥४॥

---

1. नास्ति–अ. 2. नास्ति–अ.ब.ज. 3. वसन्तस्य–ब.इ.फ.ग. 4. दुःस-हत्वमुक्तम्–ग. 5. सोमायामभिछंगाभिलाषयोः–ब. सोमायामभिस्वांगाभिला-सयोः–अ. 6. पलासः किंशुके मतः–अ. पलाशः किंशुके मतः–ब.इ.फ.ह.ज. 7. नास्ति–ग. 8. स्मर इत्यपि–ज. नास्ति–ह. 9. नास्ति–ब.इ.फ.ग.ह.ज. 10. जालं गवाक्षक्षारकावपीत्यमरः–अ. जालं गवाक्ष इत्यपि–ब.इ.फ.ग.ह.ज. 11. सौरभवशंवदासु सुरभितोत्साहासु यत्कृता वादिनी–क. 12. वद–ड. 13. नूतनं पत्रं–ड. 14. करोतीति–क.ल.म. 15. विदारयतीति–क.

मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे ।
मिलितशिलीमुखपाटलपटलकृतस्मरतूणविलासे ॥५॥

सञ्जीवनी

पुनः कीदृशे ? [1]मदनेति । मदनः [2]काम एव महीपतिः सार्वभौमस्तस्य छत्रार्थं [3]धृतो यः कनकदण्डस्तस्येव रुचिर्दीप्तिर्यस्य तादृशस्य केशरस्य नागकेसरस्य कुसुमानां पुष्पाणां विकाशः प्रकाशो यत्र । पुनः कीदृशे ? मिलिताः शिलीमुखाः भ्रमरा एव बाणा यत्र तादृशं यत्पाटलपटलं पुष्पसमूहस्तेन कृतः स्मरतूणस्य कन्दर्पतूणीरस्य विलासो लीला सारूप्यं वा यत्र । ननु कामः कुसुमबाणः [4]न तु भ्रमरबाणः[5]; सत्यम्; इयन्तूत्प्रेक्षा । [6]अत्रातिव्यथोत्पादनेन भ्रमराणां बाणसाम्यम् । "[7]केसरो नागकेसरः [8]कनकाह्वयः" इत्यमरः (२.४.६५) । "[9]अलिबाणौ शिलीमुखौ" इति च (अमरः ३.३.१८) । "समूहे पटलं [10]नाले छिद्रे संरोधकेऽपि च[11]" इति त्रिलोचनः । "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः" इत्यमरः[12] (२.८.८८) । एतेन स्मराभिषेकसमर्थो वसन्तगुण उक्तः । [13]रूपक एवालङ्कारः ॥५॥

पदद्योतनिका

मदनेति । मदनमहीपतेः कामनृपस्य कनकदण्डं छत्रं तद्वद्रुचिर्यस्य; एवम्भूतः केसरकुसुमविकाशो नागकेसरपुष्पप्राचुर्यं यस्मिन् । मिलितेति । मिलिताः शिलीमुखाः भ्रमराः येषु तैः [14]पाटलिपटलैः पाटलपुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र ॥५॥

जयन्ती

मदनेति । मदन एव महीपतिः राजा तस्य कनकदण्डस्य सुवर्णदण्डस्य रुचय इव रुचयो येषां तानि कैसरकुसुमानि तेषां विकासाः व्याकोचाः यस्मिन् तस्मिन् । मिलिताः शिलीमुखाः भ्रमराः येषु ताः पाटलाः पाटलपुष्पाणि येषु ।

1. नास्ति–अ.ब.इ.ग.ह.ज. 2. कामश्च महीपतिः–फ. 3. नास्ति–इ.फ.ग.ह.ज. 4. तः 5 पर्यन्तं नास्ति–फ. 6. अत्रातिव्यथोत्पादकत्वेन–अ.इ.फ.ग.ह.ज. 7. चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः–अमरः । केसरो नागकेशो स्यात्केशरः कनकाह्वयः–अ. 8. तः 11. पर्यन्तं नास्ति–फ. 9. तः 12. पर्यन्तं नास्ति–अ.ब. 10. नास्ति–ग. 13. रूपकालङ्कार एव–ब.इ.ह.ज. 14. पाटलीपटलैः पाटलीपुष्पसमूहैः–क.

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ।
विरहिनिकृन्तनकुन्तमुखाकृतिकेतकिदन्तुरिताशे ॥६॥

तानि च तानि पटलानि समूहानि । पाटलशब्दः पुष्पवाचकोऽपि स्त्रीलिङ्ग इति एवं व्याख्यातम् । तैः कृतः स्मरतूणस्य मन्मथशराधायितूणीरस्य विलासः आकृतिर्यस्मिन् तस्मिन् । निदर्शनालङ्कार एव । अन्यधर्मस्यान्यत्रासम्भवादुपमापर्यवसायित्वात् ॥५॥

सञ्जीवनी

पुनः कीदृशे ? विगलितं [1]गतं लज्जितं लज्जा [2]यस्य तस्य जगतः प्राणिमात्रस्यावलोकनेन विशेषदर्शनेन तरुणकरुणैः नवीनकरुणवृक्षैः पुष्पविकासव्याजेन कृतो हासो यत्र । अत्र [3]हासस्य शुभ्रत्वात् पुष्पविकाससाम्यम् । उक्तञ्च—"श्वेतो हासः प्रकीर्तितः" इति । [4]अथ वा विगलितलज्जितानां वियोगिजनानां [5]जगत्यवलोकनेन तरुणैः अभियोगिभिः करुणं यथास्यात्तथा कृतो हासो यत्र तादृशे । [6]वियोगिनो लज्जां त्यक्त्वा [7]पश्यन्तीति हासस्तेषामिति भावः । तरुणा रसानभिज्ञाः । [8]एतेन वृद्धानां कृतसन्निवारणानां [9]तरुणहासो न दोष इत्युक्तम् । [10]पुनः कीदृशे ? विरहिणां वियोगिनां निकृन्तनायाऽतिशयेन विदारणाय कुन्तस्यायुधविशेषस्य भल्लस्य मुखं अग्रभागस्तस्येवाकृति[11]र्यस्य तादृशं [12]यत्केतकं तेन दन्तुरिता व्याप्ता आशा दिशो यस्मिन् । [13]केतकिरिति पाठान्तरम् । "दन्तुरं दन्तमुकुले विषमे मर्मकृन्तने । अग्रभागे च [14]तीक्ष्णे च" इति हलायुधः (?) । "[15]करुणस्तु रसे वृक्षे कृपायां करुणा" इति विश्वः (५०.३०) । "दिशश्च ककुभः काष्ठा आशाश्च" इत्यमरः (१.३.१) । [16]तारकादित्वात्[17]इतचि दन्तुरित इति । कृति च्छेदने युट्प्रत्ययः[18] ॥६॥

---

1. नास्ति–फ. 2. तस्य–अ. 3. हासरसस्य–अ.ब.फ.ह.ज. 4. यद्वा–ग. 5. जगदवलोकनेन–अ. 6. वियोगिनां–अ. 7. पश्यन्तीति च–फ.ह.ज. 8. एव वृद्धानां–अ.ब.इ.फ.ग.ह.ज. 9. तरुणहास इत्युक्तम्–अ. तरुणहासे न दोष इत्युक्तम्–फ.ह.ज. 10. नास्ति–ग. 11. यत्र–अ. 12. यत्केतनं–फ. 13. केतका इति–फ. 14. तीक्ष्णे च प्रोन्नते चेति–इ.फ.ग.ह.ज. 15. तरुणे वृक्षे कृपायां करुणा–अ.ब. करुणः करुणे वृक्षे कृपायां करुण इति विश्वः–इ.फ.ग. 16. तः 18 पर्यन्तं नास्ति–अ. 17. इतच्–ब.

माधविकापरिमलललिते नवमालिकयातिसुगन्धौ ।
मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ ।।७।।

पदद्योतनिका

विगलितेति । विगलितस्य [1]शिथिलावयवस्य अत एव लज्जितस्य जगतः अवलोकनेन [2]तरुणकरुणैः नूतनवृक्षैः [3]पुष्पविकास[4]व्याजेन कृतो हासो हास्यं यत्र । विरहीति । विरहिनिकृन्तनानि वियोगिमारकारकाणि कुन्तमुखाकृतीनि भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दन्तुरिताः व्याप्ता [5]आशा दिशो यस्मिन् ।।६।।

जयन्ती

विगलितेति । विगलितानि विगतानि लज्जितानि ह्रियः येषां जगतां यूनामवलोकनेन तरुणाः [6]वरुणाः वालवसेतुवृक्षकुसुमानि तैः कृतः हासः विकास एव परिहासः तस्मिन् । सेतुविकासस्य शुभ्रत्वात्परिहासकरणम् । विरहिणां निकृन्तने च्छेदने कुन्ताः शस्त्रविशेषाः तेषां मुखाकृतिभिः केतकैः दन्तुरिताः शूलारोपणवत्परितः कीलिताः आशाः दिशः यस्मिन् तस्मिन् । शूलवत्सर्वत्र केतकानि वर्तन्त इत्यर्थः । उत्प्रेक्षोपमालङ्कारौ पूर्वोत्तरार्धद्योत्यौ ।।६।।

सञ्जीवनी

पुनः कीदृशे ? मधोर्वसन्तस्येयं माधविका । वसन्तो नायकः माधविका [7]वासन्तीलता नायिका च । तस्याः परिमलेन सौरभेण ललिते मनोहरे । यद्वा [8]मधुर्वसन्तः श्रीराधाधरामृतं वा तत्प्रियत्वान्माधवः श्रीकृष्णः तस्य प्रिया माधविका श्रीराधा तस्याः अङ्गपरिमलेन सौरभेण [9]अङ्गपरिमलेन मुखपरिमलेन वा ललिते सुन्दर इति ध्वनिः । नान्यथेदृशी सौरभसम्पत्ति[10]र्वसन्तस्येति भावः । पुनः कीदृशे ? [11]नवमालिकया नूतनमालिकापुष्पेणातिसुगन्धौ अतिशयेन

---

1. शिथिलावयवस्यात एवं–ल.म. शिथिलावयवस्य एवं–क. 2. तरुणकरुणैः तरुणवृक्षैः–ल.म. तरुणकरणैः तरुणकरणवृक्षैः–क. 3. नास्ति–ल. 4. योजन–क. 5. नास्ति–ड. 6. "वरुण" इत्येतद्याख्यानुसारी पाठः–च. 7. वासन्ती नायिका वा–ब. वासन्ती नायिका च–इ.फ.ग.ह.ज. 8. मधुः श्रीराधाधरामृतं वा–अ. 9. अङ्गपरिमलेन वा–अ. मुखपरिमलेन वा–ब.इ.फ.ग.ह.ज. 10. वसन्त इति भावः–अ.ब.इ.फ.ग. 11. नवमालिका–पुष्पेणातिसुगन्धौ–ग.

सौरभयुक्ते । [1]अथ वा [2]मालतिजातीति पाठः । नवमालतिर्नूतना मालती जातिश्च ताभ्यां सुगन्धौ सौरभयुक्ते । गन्धस्येत्पूतिसुरभिभ्य [3]इतीत् । मालतिजातिरित्येकं पदं वा । पुनः कीदृशे ? मुनिमनसां [4]ब्रह्मानन्दयुक्तानां किं पुनरन्येषां मोहनकारिणि मोहजनके । [5]एतेन के(वल)ब्रह्मानन्दाच्छ्रीराधाकृष्ण[6]भजनमेवाधिकमिति ध्वनितम् । [7]न वेदं वसन्तसौन्दर्यसौभाग्यं [8]किन्तु विहारिणोः श्रीराधाकृष्णयोरेव । [9]पुनः कीदृशे ? तरुणानां विलासियुवजनानां स्वाभाविकमित्रे । यद्वा, कारणेन [10]बलात्कारेणेव बध्नातीति बन्धुरासक्तिकारके । पुष्पविहारः स्त्रीणां [11]नवरतिजनको भवत्येव । अत्र पुष्पाणां मनोहारित्वमुक्तमिति । [12]अथ वा जीवानामभिमतं तनोनीति [13]तनुः कल्पतरुः श्रीकृष्णस्तेन [14]तरुणा [15]श्रीकृष्णचन्द्रेणाकारणबन्धौ सहजमित्रे । "विमर्दोत्थे [16]परिमलो गन्धे जनमनोहरे" इत्यमरः (१.५.१०) ॥७॥

पदद्योतनिका

माधविकेति । माधविकायाः वासन्तीलतायाः परिमलेन गन्धेन ललिते मनोहरे । नवमालिकया [17]नवानि नवारण्यपुष्पाणि ताभिरतिसुगन्धौ । मुनि[18]मनसामपि ऋषिचित्तानामपि मोहनकारिणि मदन[19]जनके । तरुणानां यूनामकारणबन्धौ सहजमित्रे । बृन्दावनविपिने हरिः क्रीडतीत्यन्वयः ॥७॥

जयन्ती

माधविकेति । माधविकायाः मल्लिकायाः परिमलेन ललिते [20]सुरभिशालिनि नवमालत्यश्च जातयश्च ताभिः सुगन्धौ अत एव मुनिमनसां विरागिणामपि मोहनकारिणि । तरुणानां यूनां अकारणबन्धौ निर्निमित्तसख्यौ मदनोद्दीपने । मानवत्योऽनुनयं विनैव प्रियानुपगच्छन्तीति भावः ॥७॥

---

1. यद्वा–ग. 2. मालतिजातीतिभावः–ब. 3. इतिवत्–अ. 4. अखण्डब्रह्मानन्दमोदजुषां–ह. अखण्डब्रह्मानन्दजुषां सेवमानानां–इ.फ.ग.ज. 5. एतेन ब्रह्मानन्दात् श्रीराधा–इ.फ.ग.ह.ज 6. भजनानन्दोऽधिक इति–इ.फ.ग.ह.ज. 7. न चेदं–फ.ग.ह.ज. 8. नास्ति–अ. किञ्च–ग. 9. नास्ति–अ.ब.इ. 10. बलात्कारेण बध्नातीति–फ.ग. 11. रतिजनको–इ.फ.ग.ह.ज. 12. यद्वा–ग. 13. तरुः–ह. 14. तरुणेन–अ. 15. श्रीकृष्णेन–इ.फ.ग.ह.ज. 16. परिमले –फ.ग. 17. नेवारपुष्पेण नेवारपुष्पाणि नाभिरतिसुगन्धौ–ड. नवारण्यपुष्पाणि तेषां मालयातिसुगन्धौ–क. 18. मानसानामपि–ड. 19. जनकः–ड. 20. सुरभिणाशालिनि–च.

स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ।
वृन्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥८॥

सञ्जीवनी

पुनः कीदृशे ? स्फुरन्ती सात्विकोदयेन कम्पमाना, न तु वायुना; कान्त्या द्योतमाना वा या अतिमुक्तलता वासन्ती माधवी वा लता तस्याः परिरम्भणेनालिङ्गनेन मुकुलितो जातकामाङ्कुरः पुलकितः रोमाञ्चितश्चूतवदसाधारणगुणः श्रीकृष्णो यत्र चूते एवेति तादृशे । अनेन श्रीकृष्णचन्द्रस्पर्शेनैव चूतस्य पुलकोदयो न वासन्तीलतालिङ्गनेन । एवं प्रसिद्धिः–महावृक्षा महा[1]नायकाङ्गस्पर्शमात्रेणैव नवीनपल्लवपुष्पफलसम्पदो भवन्तीति । दोहदशास्त्रेऽपि दोहदं विना न तरवः पल्लवपुष्प[2]फलवन्तो भवन्तीति । [3]तस्मादेव मङ्गलं [4]तच्चरणस्पर्शमेव । एतावता वसन्तस्य [5]सरसता दुरन्तता चोक्ते । इदानीं क्रीडायाः स्थानविशेषमाह–(वृन्देति) । वृन्दावनाख्यविपिने वने परिसरे [6]समीपदेशे परितः सर्वतः गमनशीलेन [7]श्रीकृष्णातोयेन पूते [8]पवित्रिते । पूतं यमुनाजलं यस्मिन्निति वा [9]पूतः । श्रीकृष्णायाः परितः प्रसरणं वसन्ते तच्चरण-[10]स्पर्शोपचित[11]पूरत्वादेव । "वासन्ती माधवी लता" इत्यमरः (२.४.७२) । "पर्यन्तभूः परिसरः" इत्यपि (अमरः २.१.१४) । "आम्रश्चूतः" इत्यमरः (२.४.३३) । [12]मुकुलित इति तारकादित्वादितच्[13] ॥८॥

पदद्योतनिका

स्फुरदिति । स्फुरन्त्याश्चलन्त्या अतिमुक्तलतायाः वासन्तीलतायाः परिरम्भणेन आलिङ्गनेन मुकुलितः पुष्पितः पुलकितो [14]हृष्ट आम्रवृक्षो यत्र । [15]कीदृशे बृन्दावनविपिने ? परिसरपरिगतयमुनाजलपूते परिसरे पर्यन्तभुवि परिगतं व्याप्तं यद्यमुनाजलं तेन पूते पवित्रे ॥८॥

---

1. नायिका–अ.ब.फ.ग. नायिकाङ्गस्य–इ. 2. फला भवन्ति–ब.इ.फ.ग.हृ.ज. फला भवन्तीति–अ. 3. तस्मात्तदेव–इ.ग.हृ.ज. यस्मात्तदेव–फ. 4. यच्चरण–फ. तव चरण–ग. 5. सरसतां दुरन्ततां चोक्त्वेदानीं–इ. 6. समीपप्रदेशे–इ. 7. श्रीकृष्णाजलेन–इ.फ.ग.हृ.ज. 8. पवित्रे–फ.ग. 9. तेन पूते–इ.फ.ग.हृ.ज. 10. स्पर्शस्य पवित्रत्वादेव–फ. स्पर्शोपचितसरसत्वादेव–ज. 11. पुरादेव–अ. 12. तः 13. पर्यन्तं नास्ति–अ. 14. नास्ति–म. 15. कथम्भूते–क.ल.म.

श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम् ।
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥९॥

जयन्ती

स्फुरदिति । स्फुरन्त्यः अतिमुक्तलताः पुण्ड्रकवल्ल्यः तासां परिरम्भणं आश्लेषो येषां तैः मुकुलितैः कुट्मलैः पुलकिताः चूताः रसालाः यस्मिन् तस्मिन् । यद्वा तासां परिरम्भणेन आश्लेषेण मुकुलितं कुट्मलितं तदेव पुलकितं रोमाञ्चितं यैः । समासे नायकनायिकावृत्तान्तभासनात्समासोक्तिः । "समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य च" इति तल्लक्षणात् । वनं वर्णयति–परिसरे समीपे परिगतायाः प्राप्तायाः यमुनायाः जलैः पूते शुचौ वृन्दावनविपिने च क्रीडतीति वनविशेषणमेव ॥८॥

सञ्जीवनी

एवं गीतार्थवसन्तवर्णनमुपसंहरन्निव विद्वज्जनप्रवृत्त्यर्थं [1]स्वगीतोत्कर्षमाह–श्रीजयदेवेत्यादिना । श्रीजयदेवकवेरिदं भणितं गीतमुदयति विराजते । तत्र हेतुः; [2]हरिचरणयोः स्मृतिः स्मरणं तेन सारं श्रेष्ठम् । [3]अथ वा[4] [5]हरिचरणस्मृतिरेव सारो यत्र तादृशम् । नात्र हरिपदं चेलाहरणपरं [6]मनोहरपरं वा बोद्धव्यम् । न हि व्रजवासिनां माहात्म्यज्ञानाधीनो नन्दकिशोरे प्रणयः । कीदृशम् ? सरसं शृङ्गारेण सह प्रणयेन वा सह श्रीराधया वा सह इति यावत् । पुनः कीदृशम् ? तत्समयोचितं [7]यद्वनवर्णनम्; यत्र भणिते [8]वनशब्देन वृन्दावनमेव, न हि सर्ववनेषु तादृशं सौभाग्यम् । कीदृशम् ? अनुगतमदनविकारम्; अनुगतः प्राप्तः संलग्नो वा मदनस्य कामस्य विकार उदयो यत्र । विश्वक्षोभकोऽपि येन वसन्ताश्रयभणितेन कन्दर्पोऽपि मोहं प्राप्त इति भावः । न हि मदनो वसन्तेन [9]मोहमुपयाति । किन्तु श्रीवृन्दावन[10] चन्द्रिकाविहारेणेति रसिका एव [11]जानन्ति । स्वभावोक्तिरलङ्कारः ॥९॥

1. स्वगीते उत्कर्षमाह–इ.फ.ग. 2. तः 4. पर्यन्तो भागो नास्ति–इ. 3. यद्वा–ग. 5. हरिचरणयोः स्मृतिरेव–इ. 6. मनोज्ञपरं–इ. मनोहरं–ग. 7. यद्वर्णनं–ग. 8. नास्ति–फ. 9. मनोहरत्वमुपयाति–फ. 10. चन्द्रिका एव–अ. 11. जानन्तीति–व.फ.ह.ज. जानन्तीति भावः–ग.

[1]दरविदलितमल्लीवल्लिचञ्चत्पराग-
प्रकटितपटवासैर्वासयन् काननानि ।
इह हि दहति चेतः केतकीगन्धबन्धुः
प्रसरदसमबाणप्राणवद्गन्धवाहः ॥१०॥

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवकवेरिदं भणितं [2]उदयति [3]उदयं [4]प्राप्नोतीत्यर्थः । हरिचरणस्य स्मृतिः अनुचिन्तनं [5]सारो मुख्यो यत्र । सरसं [6]सुमनोहरं वसन्त[7]समयवनवर्णनं यत्र । अनुगतोऽनुकृतो मदनविकारः कामविलासो यस्मिन् ॥९॥

जयन्ती

श्रीजयदेवेति । इदमष्टपदीरूपं सरसवसन्तसमयवनवर्णनात्मकं अनुगताः मदनविकाराः यस्मिन् तत् । एतच्छ्रवणेनाऽपि मदनविकारं जनयति । श्रीजयदेवस्य भणितं हरिचरणस्य स्मृतिरेव सारम् । उदयति उत्कर्षं उत्पादयति । वीतरागिणां स्मृतिकारकं कामिनामपि उद्दीपनकारकमिति उभयोरपि श्रोतव्यमिति भावः ॥९॥

सञ्जीवनी

पूर्वं [8]वसन्तसमयस्य दुस्सहतोक्ता; सम्प्रति तद्वायोरपि वियोगिजनसन्तापकत्वमाह— [9]दरविदलितेत्यादिना । इहास्मिन् वसन्ते वने वा [10]स्वतो दुस्सहे [11]तद्गन्धवाहो वायुरपि प्रसरद्यथा भवति तथा चेतो दहतीत्यन्वयः । अर्थाद्विरहिणामिति शेषः । कीदृशः ? [12]केतकीगन्धबन्धुः केतकीगन्धो बन्धुर्यत्र तद्बन्धुर्वा । अनेन परमाधिक्यं सूचितम् । पुनः कीदृशः ? असमबाणस्य [13]कामस्य प्राणवत् [14]कामबाणसदृशः । उक्तञ्च—

---

1. विगलित–ब.इ.फ.ह. 2. उदितमुदयति–क. 3. उदितं–ड. 4. प्राप्नोतीत्यन्वयः–ल.म. 5. सारं मुख्यं यत्र–क. सारो मुख्यं यत्र–ल.म. 6. सुमनोमनोहरं–ड. 7. समयवर्णनं–ड. 8. वसन्तदुस्सहतोक्ता–अ.ब. 9. दरविगलितेत्यादिना–इ.फ.ग.ह.ज. 10. स्वतो दुस्सहतोक्ता गन्धवहो–फ. 11. तद्गन्धवाहोऽपि प्रसरत्–अ. 12. नास्ति–फ. 13. कामस्य प्राणसदृशः उक्तं च–ग. कामस्य प्राणस्य कामवत् कामप्राणसदृशः उक्तं च–फ. 14. कामप्राणसदृशः–फ.ग.ह.ज.

"[1]अपूर्वैव धनुर्विद्या मन्मथस्य [2]दुरात्मनः ।
शरीर[3]मक्षतं याति भिनत्त्यन्त[4]र्गतं मनः" ॥ इति ।

किं कुर्वन् ? [5]काननानि वासयन् [6]सुरभीकुर्वन् । कैः[7] ? दरमीषद्विगलिता मलयवायुस्पर्शेण या मल्लीवल्लिर्मल्लिकालता तस्याः चञ्चन्तः प्रसरन्तो ये परागाः पुष्परेणवः त एव प्रकटिताः पटवासाः [8]पिष्टातास्तैः । अतिसुकुमारत्वादीषद्विगलितायास्तस्याः पुष्परेणुसमूहः सम्भवतीति भावः । कामस्य अनङ्गत्वेन तद्रूपेण प्रसरत् स एव चेतो दहतीति ध्वनितम् । "ईषदर्थे दराव्ययम्" इति विश्वप्रकाशः (१००.११)। "[9]परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि" इत्यमरः (३.३.२१) "पिष्टातः [10]पटवासकः" (इत्यमरः–२.७.१३९) । "पटवासः परागेऽपि पटस्याप्यथ धूपने" इति मेदिनीकारः (?)। "[11]पृषदश्वो गन्धवहो" इत्यमरः[12] (१.१.६२) । [13]श्लेषोऽयमलङ्कारः ॥१०॥

पदद्योतनिका

[14]अथ वियोगिनां दुस्सहं वसन्तवायुं वर्णयति– [15]दरेति । इह वसन्ते गन्धवाहो वायुः चेतः अर्थाद्विरहिणां [16]दहतीत्यन्वयः । किं कुर्वन् ? दरविदलिताया ईषद्विकसिताया मल्ल्या मल्लिकाया [17]वल्लीषु लतासु चञ्चद्भिरुद्गच्छद्भिः परागैः पुष्पपरागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि [18]वनानि वासयन् सुरभीकुर्वन् । [19]पुनः केतकीपुष्पाणां गन्धस्य बन्धुः मित्रम् । प्रसरन्तो ये असमबाणाः कामबाणाः तेषां प्राणवत्प्राण इव ॥१०॥

जयन्ती

वर्णितवसन्तकालवायुं वर्णयति–दरविदलितेति । दरं ईषत् विदलिताः विकसिताः मल्ल्यः वासन्तीपुष्पाणि तासां वल्लीषु तद्भिन्नवल्लीषु वा चञ्चन् व्याप्नुवन् परागः पुष्परजः तेन प्रकटिताः पटवासाः वस्त्रोपरिक्षिप्यमाणपरिमलद्रव्यश्लक्ष्णचूर्णाः; तैः काननानि वनानि वासयन् परिमलयन् । किञ्च इतः

---

1. अपूर्वेव–ग. 2. महात्मनः–इ.फ.ग.ह्.ज. 3. मक्षयं–ब. 4. र्जनं–फ. 5. तः 7. पर्यन्तं नास्ति–फ. काननानि वनानि वासयन्–इ.ग.ह. 6. नास्ति–अ. 7. नास्ति–अ. 8. पिष्टातकाः–इ.फ.ग.ह. 9. परागः पुष्परजसीति च–इ.फ. ग.ह.ज. 10. पटवासस्यात्–अ.ब. पटवासकः इत्यमरः–इ. 11. तः 12 पर्यन्तं नास्ति–इ.फ.ग.ह.ज. 13. श्लेषोपमालङ्कारः–अ.ब.फ.ग. 14. नास्ति–क.ल.म. 15. श्लोकोऽयं सव्यख्याश्चतुर्थप्रबन्धारम्भे दृश्यते–ड. 16. वहतीत्यन्वयः–ड. 17. वल्लीपुष्पलतासु–क. 18. नास्ति–ड.क. 19. पुन कथम्भूतः–क.ल.म.

[1]अद्रयुत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं
प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ।
किञ्चित्स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया–
दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः ॥११॥

अतः केतकीगन्धबन्धुः तत्समो वा। विरहिणामिति शेषः। प्राणहृत् असुनाशकः। प्रसरन्तः असमवाणाः कामा यस्मात्सः गन्धवाहः चेतः दहति सन्तापयति। वातीति पाठे च इत इति च्छेदः। एकतः प्रसरदसमबाणं यथा स्यात्तथा वहति। वातीति योजना। मालिनी वृत्तम्। विरहिणामिति शेषे साकाङ्क्षो दोषः। तद्वारणाय तथा न योज्यम्। किन्तु राधाया विरहिणीत्वस्य प्रतिपाद्यवशेन स्वयमवगम्यते। तत्र प्रसरदसमवाणत्वं हेतुरिति काव्यलिङ्गम् ॥१०॥

सञ्जीवनी

[2]पूर्वमेव तवद्वायुवर्णनेन वसन्तस्य दुरन्तत्वमुक्तम्। सम्प्रति कोकिलकाकलीनामपि तथात्वमाह–अद्रयुत्सङ्गेत्यादिना। श्रीखण्डशैलानिलः [3]मलयपर्वतवायुः। ईशो रुद्रस्तस्याचलो हिमाचलस्तमनु[4]सरति। किमर्थम्? प्रालेये प्रलयकाले यत् [5]पवनं जीवनं तदिच्छया। कस्मादिव? अद्रेर्मलयस्योत्सङ्गे [6]वसन्तो ये भुजङ्गाः सर्पास्तेषां [7]कवलनेन [8]पानेन यः क्लेशस्तस्मादिव। अनेनास्योद्वेगावस्था कथिता। किञ्च पिकानां पुंस्कोकिलानां गिरः [9]कुहूः कुहूरित्येवं[10]रूपाः [11]पञ्चमस्वरानुवादिन्यो हर्षोदयादुन्मीलन्ति उद्भवन्ति। किं कृत्वा? स्निग्धानि रसालानामाम्राणां मौलौ [12]शिखरे यानि मुकुलानि तानि विलोक्य दृष्ट्वा। कीदृशाः? कलोत्तालाः कला मधुराश्चोत्तालाश्च। पुरुषकूजितत्वादुत्तालाः [13]राजसस्वभावोदयात्कलाः। अनेन तेषामपि स्मरः क्षोभक एव। [14]तद्विरहिणां वामत्वादेवेति भावः। एतत्सर्वं दुस्सहमिति

---

1. पद्यमिदं मुद्रिते (निर्णयसागरमुद्रणालयीये) नास्ति; च.ड.क.ल.म. मातृकासु तु सर्गान्ते दृश्यते। 2. पूर्वमेव वायुवर्णनेन–इ. 3. मलयाचलपर्वतवायुः–अ.ब.इ.फ.ग.ह.ज. 4. चरति–अ. 5. प्लवनं–अ. प्रवणं–ग. प्रवनं–फ. 6. नास्ति–ब. ये वसन्तो भुजङ्गाः–इ.फ.ग.ह.ज. 7. चलनेन यानेन–फ. 8. नास्ति–ह. 9. कुहुरित्येवंरूपाः–फ.ग. कुकूः कुकूरित्येवं रूपाः–इ. 10. भूताः–अ. 11. पञ्चमस्यानुवादिन्यो–अ. पञ्चमस्वरादिवादिन्यो–ज. 12. नास्ति–अ. 13. राजसभावोदयत्वात्कलाः–फ.ग.ह.ज़. 14. न विरहिणां–अ.फ.ग.ह.ज.

ध्वनितम् । "मौलिः पुंसि शिखायां स्यान्मुकुटे मस्तकेऽपि च" इति हलायुधः "[1]ध्वनौ तु मधुरास्फुटे कलः" इत्यमरः (१.७.२)। [2]अर्थोत्प्रेक्षाऽयमलङ्कारः ॥११॥

पदद्योतनिका

मलयानिलस्य [3]दुस्सहत्वे कारणमाह–[4]अद्रयुत्सङ्गेति । हे राधे ! अद्येदानीं वसन्तसमये [5]श्रीखण्डशलानिलः मलयजपवनः उत्सङ्गे क्रोडे वसन्तो [6]ये भुजङ्गाः सर्पास्तेषां कवलक्लेशादिव ग्रासोपतापादिव ईशाचलं हिमाचलं [7]प्रालेय[8]प्लवनेच्छया तुहिनमज्जनेच्छया अनुसरति अनुगच्छति । [9]अनुगच्छति नु वितर्के वा[10]। किञ्च पक्षान्तरे पिकानां गिरो [11]वाण्यः स्निग्ध-रसालमौलिमुकुलानि कोमलचूताग्र[12]भागस्तवककुट्मलानि आलोक्य दृष्ट्वा हर्षोदयादानन्दोदयात् उन्मीलन्ति उद्गच्छन्ति । कथम्भूताः गिरः ? कुहूः कुहूरित्याकारेणाव्यक्तमधुर[13]शब्देन उत्तालाः प्रकटाः ॥११॥

जयन्ती

[1]अभ्युत्सङ्गेति । श्रीखण्डोपलक्षितः शैलो मलयपर्वतः तस्मिन् अनिलः वातः । अभ्युत्सङ्गं अभितः उत्सङ्गं समीपं परितः समीप इत्यर्थः । तत्र वसन्तो (ये) भुजङ्गाः तेषां कवलं कवलनं ग्रसनमिति यावत् । तस्य क्लेशादिव प्रालेये हिमे प्लवनेच्छया अवगाहनाकाङ्क्षया ईशाचलं हिमवच्छिखरं कैलासाख्यं अनुसरति अनुगच्छति । कलाश्च अव्यक्तमधुराः उत्तालाः रलयोरभेदादुत्ताराः पिकानां कोकिलानां गिरः उन्मीलन्ति उद्यन्ते । वसन्तकाले रसालास्वादनात्कोकिलानां मधुरभाषित्वमिति स्पष्टोऽर्थः । पूर्वार्धनिवद्धस्य मलयानिलस्य कलासगमनं प्रति भुजङ्गविषवेगस्याहेतुत्वेऽपि तद्धेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा । एवं वायोः क्लेशाभावादसिद्धः स्याद्दक्षिणतया कृश-मन्दत्वरूपं निमित्तं गम्यम् । एवं प्रालेयप्लवनेच्छयेत्यत्रापि प्रालेयप्लवनं फलं न भवति । तस्य फलत्वेन सम्भावनात् फलोत्प्रेक्षा । अवाचकाद्गम्या । इच्छाया अभावात्कल्पिता गुणनिमित्ता हेतूत्प्रेक्षे(ति) वा । किञ्चिदिति । किञ्चिदीषत् स्निग्धानि स्नेहयुक्तानि रसालस्य मौलिमुकुलानि शिरःकोरकान् आलोक्य हर्षोदयात् मुहुः पुनः पुनः । कुहुरिति अनुकरणशब्दः ॥११॥

---

1. ध्वनौ तु मधुरास्फुट इति कलः–फ.ह. 2. अर्थोत्प्रेक्षोपमालङ्कारः–फ.ग.ह.ज. 3. दुस्सहत्वकारणमाह–ल. 4. पद्यमिदं सव्याख्यं सर्गान्ते दृश्यते–च.ड.क.ल.म. 5. शैलानिलः–ल. 6. नास्ति–ड. 7. प्रलय–ड. 8. प्लवनेच्छया नु हिममज्जनेच्छया–ल.म. प्लवनेच्छया हिमचयमज्जनेच्छया–क. 9. तः 10. पर्यन्तं नास्ति–ड. 11. वाचः–ल.म. 12. भागास्तानेव कुण्डलानि–ल.म. 13. स्वनेन–क. 14. अभ्युत्सङ्गेति–च. पुस्तकगतः पाठः ।

उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथङ्कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥१२॥

सञ्जीवनी

पूर्वं वसन्तस्य तद्वायोश्च कोकिलाकाकलीनामपि च दुस्सहत्वमुक्तम् । सम्प्रति तद्दिवसानामपि [1]विशेषदुरन्तत्वमाह–उन्मीलदित्यादिना । [2]पथिकैरमी वसन्तसम्बन्धिनो वासरा दिवसाः कथङ्कथमपि महता कष्टेन नीयन्ते समाप्यन्ते । अतिवाह्यन्त इत्यर्थः । कीदृशाः ? [3]उद्गीर्णः प्रकटीकृतः कर्णज्वरः श्रोत्रसन्तापो येषु । कैः ? उन्मीलन्ति प्रकटीभवन्ति ये मधौ वसन्ते गन्धास्तल्लम्पटा ये मधुपाः भ्रमरास्तर्व्याधूताः कम्पिता ये चूताङ्कुरा आम्रमुकुलानि तेषु [4]क्रीडतां कोकिलानां याः काकल्यः अव्यक्तमधुरा गिरस्तासां ये [5]कलकलाः कोलाहलास्तैः । कर्णस्याकाशगुणत्वात्कर्ण[6]ज्वरस्यापि दीर्घत्वम् । कर्ण इत्युपलक्षणं; सर्वेन्द्रिय[7]ज्वरा इति। तर्हि कथं नीयन्त [8]इत्यत आह–ध्यानेत्यादिना। [9]ध्याने स्वप्रियाचिन्तने केनापि भाग्योदयेन यदवधानं मनसस्तल्लीनत्वं तेन क्षणप्राप्तो यः प्राणसमायाः प्राणवत् प्रियायाः कान्तायाः समागमरूपो रसस्तस्मादुत्पन्ना ये रसोल्लासा रसोत्कर्षास्तैः। "कोलाहलः कलकलस्तिरश्चां वासितं रुतम्" इत्यमरः (१.७.२५) । "काकली तु कले [10]सूक्ष्मे ध्वनौ तु मधुरास्फुटे" इत्यमरः (१.७.२) । "आम्रश्चूतो [11]रसालोऽसौ" इत्यमरः (२.४.३३) । "मधु मद्ये पुष्परसे" इत्यपि (अमरः ३.३.१०२) । "[12]मधुपभ्रमरालयः" इत्यपि[13] (अमरः–२.५.२९ ?) । [14]स्वभावोक्तिविरोधालङ्कारौ ॥१२॥

[15]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां वसन्तवर्णनं नाम तृतीयः प्रबन्धः ॥३॥

1. च दुरन्तत्वमाह–ग.ह.ज. 2. पथिकैरमी वासरा दिवसा–अ. 3. उद्गीर्णाः–अ.व.इ.ग. 4. क्रीडन्तो ये कोकिलास्तेषां–फ. 5. कलकलास्तैः–फ. 6. द्वारस्यापि–इ. 7. द्वारा–इ. 8. इत्याह–इ.ग. 9. स्वप्ने–अ. 10. सूक्ष्मेत्यपि–इ.फ.ह.ज. सूक्ष्मेत्यमरः–ग. 11. रसालोसावित्यपि–इ.फ.ग.ह.ज. 12. तः 13. पर्यन्तं नास्ति–अ.ब. 14. विरोधी एवालङ्कारः–अ. विरोधी एवालङ्कृतिः–इ.ग.ह.फ. विरोधादेवालङ्कृतिः–ज. 15. नास्ति पुष्पिकेयम्–अ.ब.इ.फ.ग.ह.ज.

पदद्योतनिका

[1]अथ वसन्तवासराणामनङ्गोद्दीपकत्वमाह–[2]उन्मीलदिति । अमी वसन्तसम्बन्धिनो वासराः दिवसाः पथिकैर्मार्गस्थितैर्विरहिभिः कथङ्कथमपि [3]दुःखेन नीयन्ते । [4]कीदृशाः ? उन्मीलंश्चासौ मधुगन्धश्च पुष्परसगन्धस्तत्र लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूताः कम्पिता ये चूताङ्कुरा आम्राङ्कुरास्तेषु क्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेनोद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु । कथं नीयन्त इत्यत आह–ध्यानेति । ध्यानेन [5]चिन्तेनेन यदवधानं चित्तैकाग्र्यं तेन क्षणं अल्पकालं प्राप्तायाः अनुभूतायाः [6]प्राणसमायाः नायिकायाः समागमरसेन सम्बन्धस्वरूपरसेन उल्लासो हर्षो येषां ते ॥१२॥

[7]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां वसन्तवर्णनं नाम तृतीयः प्रबन्धः ॥३॥

जयन्ती

उन्मीलन्निति । उन्मीलन् उद्यन् मधुगन्धः मकरन्दपरिमलः तस्मिन् लुब्धाः लोभिनः काङ्क्षिण इति यावत् । ते च ते मधुपाः तैः व्याधूताः चूताङ्कुरा रसालमुकुलानि तत्र क्रीडतां कोकिलानां काकलीभिः सूक्ष्मध्वनिभिः । षष्ठीतत्पुरुषो वा । कलकलैः कोलाहलैः उद्गीर्णः उद्गतः कर्णज्वरः कर्णसन्तापो येषु ते अमी वासराः वसन्तदिवसा नीयन्ते कथङ्कथमपि कष्टेनेत्यर्थः । नीयन्ते विरहिसन्तापकरा इत्यर्थः । ध्यानावधानक्षणे चिन्तासमये प्राप्तायाः प्राणसमायाः प्रियायाः समागमरसः आलिङ्गनादिरसः तस्य उल्लासाः हर्षाः तैः पथिकैः ॥१२॥

[8]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां वसन्तवर्णनं नाम तृतीयः प्रबन्धः ॥३॥

---

1. नास्ति–क.ल.म. 2. पद्यमिदं सख्याख्यं चतुर्थप्रबन्धगतद्वितीयपद्यत्वेन दृश्यते–ड. 3. केनापि दुःखेन–क.ल.म. 4. कथम्भूता वासराः–क.ल.म. 5. चिन्तने अवधानं चित्तैकाग्र्यं तेन–ल. चिन्तने अवधानं चित्तैकाग्र्यं–म. 6. नास्ति–ल.म. 7. इति गीतगोविन्दे वसन्तवर्णनं नाम तृतीयः–ड. इत्यष्टपदी तृतीया–ल.म. नास्ति–क. 8. नास्तीयं पुष्पिका–च.

चतुर्थः प्रबन्धः

अनेकनारीपरिरम्भसम्भ्रम-
स्फुरन्मनोहारिविलासलालसम् ।
मुरारिमारादुपदर्शयन्त्यसौ
सखी समक्षं पुनराह राधिकाम् ॥१॥

सञ्जीवनी

एवं [1]रसार्थोद्दीपनेन वसन्तभावा वर्णिताः । इदानीं रागान्तरेण विभावानाह—अनेकेत्यादिना । या पूर्वं वासन्ती परोक्षतयोवाच साऽसौ सखी समक्षं राधिकां पुनराह इत्यन्वयः । किं कुर्वती ? आरात्समीपे मुरारिर्मुरस्य [2]मधुरससमूहस्य [3]अरिस्तद्विस्मारकः श्रीकृष्णस्तं दर्शयन्ती । मधुमुरनरकेति मुरारिशब्दार्थो दर्शितः । कीदृशम् ? अनेक[4]नारीपरिरम्भसम्भ्रमेण [5]आलिङ्गनेनादरेण स्फुरद्यो मनोहारी विलासस्तस्य [6]लालसा औत्सुक्यं यस्य तम् । [7]अथ वा अनेकनारी[8]विलासो वैदग्ध्यं [9]विद्यते यस्यां [10]श्रीराधायां सा । अन्यत्पदं पूर्ववत् । "सम्भ्रमः स्नेहहर्षयोः" इति विश्वः । "[11]आराद्दूरसमीपयोः" इति विश्वः (१४९.१५) । न च विरहे प्रत्यक्षता सम्भवति । सा पुनर्नायिकानायकयोर्न सखीनामिति ।"[12]लालसे प्रार्थनौ[13]त्सुक्ये" इत्यमरः (३.३.२२९)। अर्थान्तरन्यासोऽलङ्कारः ॥१॥

पदद्योतनिका

अनेकेति । असौ सखी राधिकां [14]पुनराहेत्यन्वयः । कथम्भूता सखी ? आरात् दूरे वर्तमानं [15]समक्षं यथा स्यात्तथा कृष्णमुपदर्शयन्ती विषयं कारयन्ती। कीदृशं हरिम् ? अनेकनारीणां परिरम्भसम्भ्रमेणालिङ्गनादरेण स्फुरन् इतस्ततो गच्छन् मनोहारी मनोज्ञो यो विलासः [16]क्रीडा तत्र लालसः[17] आदरवान् । पश्चात्कर्मधारयः ॥१॥

---

1. रसार्थमुद्दीपनेन—इ.फ.ग.ह.ज. 2. मधुरसमूहस्य—फ.ज. 3. अरिं स्वविस्मारकं श्रीकृष्णं—अ. 4. नारीणां—इ.फ.ग.ह.ज. 5. आलिङ्गनादरेण—ब. इ.फ.ग.ह.ज. 6. लालसः—अ.ब.ग. 7. यद्वा—ग. 8. विलासवैदग्ध्यम्—इ.फ. 9. नास्ति—अ. 10. श्रीराधायां लालसः—इ.ग. श्रीराधायां लालसम्—फ.ह.ज. 11. आराद्दूरसमीपयोरित्यमरः—इ.फ.ग.ह.ज. 12. लालसा—अ. 13. नास्ति—ब.इ.फ.ग.ह.ज. 14. पुनः पुनः—क. 15. समक्षं प्रत्यक्षं—क. 16. तः 17. पर्यन्तं नास्ति—क.

[1]रामकरीरागे यतिताले

चन्दनचर्चितनीलकलेबरपीतवसनवनमाली
केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली ॥२॥
हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे ॥

जयन्ती

एवं वसन्तवर्णनं कृत्वा रासक्रीडां वर्णयितुमाह–अनेकेति । असौ वसन्तवर्णयित्री सखी । अनेकासां नारीणां वल्लवीनां परिरम्भसम्भ्रमेण स्फुरन्तः उद्यन्तः मनोहारिणः रमणीया. विलासा. विब्बोकादयः चेष्टितानि वा तेषु लालसं आसक्तम् । मुरारिं आरात् नातिदूरं समक्षं प्रत्यक्षं उपदर्शयन्ती हस्तनिर्देशेन ज्ञापयन्ती राधिकां प्रति पुनः द्वितीयवारमाह वदति । ब्रुवो लट आहादेशः । वंशस्थवृत्तम् । अत्र नायकस्य दक्षिणत्वं दर्शितम् ॥१॥

सञ्जीवनी

एवं राधामाधवयो रहःकेलिं निरूप्येदानीं समुदायकेलिं गीतेनैव दर्शयति–चन्दनेत्यादिना । गीतस्यास्य रामकरीरागः यतितालश्च । तालरूपं पूर्वमेवोक्तम् । [2]रागलक्षणम्—

स्वर्णप्रभाभास्वरभूषणा च
नीलं निचोलं सुतनौ वहन्ती ।
कान्ते पदोपान्तमधिश्रितेऽपि
मानोन्नता रामकरी प्रदिष्टा ॥ इति ।

गीतार्थमाह–[3]हे विलासिनि कृष्णविहारशीले; पश्यतदिति शेषः । इह वृन्दावने वसन्ते वा मुग्धवधूनिकरे सुन्दरवधूसमूहे हरिर्मनोहरो विलसति क्रीडां करोति । त्वां विना क्रीडन्नपि न क्रीडतीत्यर्थः । कीदृशे ? केलिपरे क्रीडापरायणे । अत्र मुग्धवधूशब्देन केलिपरशब्देन च हावभावाद्यनभिज्ञता सामान्यक्रीडापरता च व्यञ्जिता । विलासिनीति सम्बुद्धया त्वय्येव सर्वकला[4]सम्प्रदर्शिता । [5]विलासिनीसामान्यक्रीडेति ध्वनिः । [6]कीदृशे ? चन्दनेन चर्चिते लिप्तेऽपि नीलकले

1. रासक्रियारागेण गीयते– च. 2. रागलक्षणं वर्णयन्नाह– अ.ब. 3. हे विहारिणि–अ. 4. सम्प्रदर्शिता–अ.ज. 5. विलसतीति सामान्यक्रीडेति ध्वनिः–इ.फ.ग.ह.ज. 6. कीदृशे निकरे–ग.

केलिकलाऽकौशलत्वे। नीलाः मलिनीभूताः कला यस्मिन्। किम्भूतो हरिः? [1]वरे पीतवसनवनमाले [2]यस्य। अथ वा त्वद्वियोगमसहमान एव चन्दनेन चर्चितः अनुलिप्तः नीलकलेबरः [3]पीतं वसनं वनमाला च यस्य सः। एतेन त्वय्येवानुराग उक्तः। उक्तं च—

अन्तर्गता मदनवह्निशिखावली या
सा बाधते किमिह चन्दनचर्चिताऽपि।
यत्कुम्भकारदहनोपरि पङ्कलेप—
स्तापाय तत्पुनरसौ न तु तापशान्त्यै॥ इत्यादि।

[4]तथा त्वमेव विलोकयेति दर्शयन्ती। कीदृशो हरिः? केलीषु क्रीडासु चलती कम्पमाने ये मणिकुण्डले ताभ्यां मण्डितमलङ्कृतं गण्डयुगं [5]यस्य स्मितेन [6]मन्दहासेन वा शाली शोभमानः। स्मितलक्षणं च भरते--

"ईषद्विकसितैर्गण्डैः कटाक्षैस्सौष्ठवान्वितैः।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्॥" इति (६.५४)।

केलिचलन्मणिकुण्डलेत्यादिना कुण्डलचलनं साकाङ्क्षम्; न ह्येतासु काचिद्वृष-भानुनन्दिनीतुल्याऽधिका च इति यत् स्मितं तेन शाली शोभमानो न तु तासां विलासेनेति भावः। मुग्धवधूरित्यत्र कर्मधारयः। एतेन मौग्ध्यमेव [7]न केलि-कुशलता [8]दर्शिता। किं क्रीडत्यपि तु चेष्टां [9]करोति। अत एव त्वया समक्षेण भवितव्यमिति मम प्रार्थना। "मुग्धः सुन्दरमूढयोः" इति विश्वः (६६.१०)। विलासो [10]हावविशेषः। "तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु" इत्यमरः (?)। "[11]कलेवरम्, गात्रं वपुः संहननम्" इत्यमरः (२.६.७०)। "[12]गण्डौ कपोलौ" इत्यमरः (२.६.९०)। स्वरूपोक्तिरलङ्कारः[13]। विलासलक्षणम्—

"[14]वासस्थानासनादीनां नेत्रवक्त्रादिकर्मणाम्।
उत्पद्यते विशेषो यः स विलासः प्रकीर्तितः॥ इति॥२॥

1. वरे श्रेष्ठे–ज. 2. यस्य तम्। यद्वा–ग. 3. पीतवसनं–अ.ब.इ. 4. तस्मात्–इ.फ.ग.ह.ज. 5. यस्य सः–ज. 6. मन्दहास्येन–अ.ब. ईषद्धसितेन–इ.ग.ह.ज. ईषद्धसनेन–फ. 7. न तु–इ.ग.ह.ज. 8. नास्ति–अ.ब. 9. करोतीति–इ.फ.ह.ज. 10. हावभावविशेषः–ज. 11. अथ कलेवरम्–इ.फ.ग.ह.ज 12. तः 13. पर्यन्तं नास्ति–ग. 14. वात–अ.ब. बाह्य–ज.

पदद्योतनिका

अमुमेव [1]श्लोकार्थं गीतेनाह कविः—चन्दनेति । [2]अस्य [3]रामकरीरागस्तल्लक्षणम्—

स्वर्णप्रभाभास्वर[4]भूषणा च
नीलं निचोलं सुतनौ [5]वहन्ती ।
कान्ते पदोपान्तमधिश्रितेऽपि
मानोन्नता रामकरी [6]प्रदिष्टा ॥

हे विलासिनि [7]राधे इह मुग्धवधूनिकरे मनोहरकामिनीसमूहे हरिर्विलसति क्रीडति । [8]कीदृशे ? केलिपरे क्रीडातत्परे । [9]कीदृशो हरिः ? चन्दनेति । चन्दनेन [10]मलयजेन चर्चितं रेखाकारेणानुलिप्तं [11]नीलं कलेवरं शरीरं यस्य, पीतं [12]सुवर्णवर्णं वसनं वस्त्रं यस्य, वनमाला यस्यास्तीति ततः प्रत्येकं कर्मधारयः । [13]पुनः कीदृशः ? केलिना क्रीडया [14]चलती ये [15]मणिकुण्डले मणियुक्ते कुण्डले ताभ्यां मण्डितं [16]शोभितं गण्डयुगं यस्य, स्मितेन ईषद्धास्येन शालते शोभते, ततः [17]कर्मधारयः ॥२॥

जयन्ती

शुद्धरासक्रियारागस्सम्पूर्णस्सङ्ग्रहोऽपि च ।
षड्जांशन्यासससम्पन्नो गेयो मध्याह्नात्परम् ॥

चन्दनेति । इह यमुनाकूले रासा एव विलासाः अस्मिन् सन्तीति विलासी तस्मिन् । केलिपरे क्रीडासक्ते । मुग्धवधूनां सुन्दरस्त्रीणां निकरे समुदाये हरिः विलससि क्रीडति । वर्तमाने लट् । लसति विलासिनीति वा पाठः । उभयत्र 'वि'कारपाठे मात्राधिक्याद्विकार एव भवति । चन्दनेन श्रीगन्धेन चर्चितं छुरितं नीलं कलेवरं शरीरं यस्यासौ; पीतवसनश्चासौ वनमाली चेति विशेषणात्कर्मधारयौ । केलौ क्रीडायां चलद्भ्यां चञ्चलाभ्यां मणिकुण्डलाभ्यां रत्न-

1. श्लोकोक्तमर्थमाह गीतेन—क. श्लोकोक्तमर्थमाह—ल.म. 2. नास्ति—क.ल.म. 3. रामकरीरागः रागलक्षणन्तु—ल.म. 4. लक्षणा च—क. 5. वसन्ती—ड. हरन्ती—क. 6. प्रसिद्धा—म. 7. नास्ति—ड. 8. कथम्भूते वधूनिकरे—क.ल.म. 9. कथम्भूतो हरिः—क.ल.म. 10. मलयजपङ्केन—क. 11. नीलकलेबरं—क.ल.म. 12. सुवर्णवर्णवसनं—क.म. सुवर्णवसनं—ल. 13. पुनः कथम्भूतः—ल.म. पुनः कथम्भूतो हरिः—क. 14. चलन्ति—ड. चलन्ती—क.ल.म. 15. नास्ति—ड. 16. नास्ति—ल.म. अलङ्कृतं—क. 17. कर्मधारयः समासः—क.

पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥३॥

खचि(त)कर्णभूषणाभ्यां मण्डितं शोभितं गण्डयुगं कपोलद्वयं यस्य सः । स्मितशाली मन्दहासवान् । हरिरिति ध्रुवायां योज्यम् ॥२॥

सञ्जीवनी

व्रजवधूनां हावभावाद्यनभिज्ञत्वं कथयन् पुनस्तामेव युवतियूथलीलामाह—पीनेत्यादिना । काचिद्गोपवधूः पीनपयोधरभारभरेणातिस्थूलस्तनगौरवाधिक्येन सरागं सस्नेहं यथा स्यात्तथा; [1]यद्वा, पीनोऽतितीक्ष्णः पयोधरयोः भारंस्तस्य भरेण [2]भारेण स्वस्यापि भारभूतेन हरिं मनोहरं परिरभ्यालिङ्ग्य हरे[3]र्गीतानन्तरं गायति । न तु स्वयं गायतीत्यवैदग्ध्यं स्फुटमेव । । [4]श्रीकृष्णस्यालिङ्गनेच्छां विनाऽपि प्रथममालिङ्ग्य शृङ्गाररसशोभामावहतीति । उक्तञ्च—

"वेषदेशक्रियालापपरिरम्भादिसेवनैः ।
स्यादानन्दप्रदो यूनोरुभयोरनुरक्तयोः" ॥ इति ।

कीदृशं हरिम् ? सरागं [5]त्वय्येव कामभावेन स्नेहेन वा सानुरागम् । न तु [6]सिन्दूरादिरागयुक्तम् । एतेन तासामवैदग्ध्यमेव ध्वनितम् । पुनः कीदृशम् ? [7]उदञ्चितपञ्चमरागम् । उदञ्चितः [8]तालालापनेन [9]ऊर्ध्वं गीतः पञ्चमस्वरो येन तम् । शृङ्गारे पञ्चमस्वराख्यस्वरो बाहुल्येन क्रियते । [10]अथ वा पञ्चमरागगानं तासां [11]परीक्षार्थाय, [12]यदि वाऽऽह्लादजननाय चेति ध्वनिः । उक्तञ्च—

"निषादं हेषते वाजी गावस्त्वृषभभाषिणः ।
अजाविकं तु गान्धारं धैवतं बृंहते गजः ॥

---

1. अथ वा–इ.फ.ह.ज. 2. नास्ति–अ.ब.फ.ज. 3. गानानन्तरं–इ.ह.फ.ज. 4. श्रीकृष्णालिङ्गनेच्छां–इ.फ.ग.ह.ज. 5. त्वय्येव सरागेण सकामेन सस्नेहेन वा सानुरागम्–अ.ब. 6. सिद्धरागयुक्तम्–ब. सिन्दूरादिरागसंयुक्तम्–इ.ग. सिन्दूररागयुक्तम्–फ. 7. नास्ति–अ.ब.इ.फ.ह.ज. 8. तालालापभेदेनात्यूर्ध्वं–ग. 9. अत्यूर्ध्वं नीतः–इ.फ.ग.ह.ज. 10. यद्वा–ग. 11. परीक्षार्थो यदि वाह्लादनाय चेति–अ. परीक्षार्थाय न चाह्लादजननाय वेति–इ. 12. तवाह्लादजननाय–फ.ग.ह. तदाह्लादजननाय–ज.

काऽपि विलासविलोलविलोचनखेलनजनितमनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥४॥

षड्जं मयूरा ब्रुवते मृगा मध्यमभाषिणः ।
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् ॥
हास्यशृङ्गारयोर्गेयौ स्वरौ पञ्चममध्यमौ ।
षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे ।
गान्धारश्च निषादश्च कर्तव्यौ करुणाश्रयौ" ॥ इति ॥३॥

पदद्योतनिका

पीनेति । हे राधे ! काचिद्गोपवधूः गोपाङ्गना पीनपयोधर[1]भारभरेण विपुलकुचगौरवातिशयेन सरागं [2]सानुरागं यथा स्यात्तथा [3]हरिं परिरभ्य आलिङ्ग्य उदञ्चितपञ्चमरागमत्युच्चीकृतपञ्चमरागस्य पश्चाद्गायति गानं करोति; कृष्णगानानन्तरं स्वयं गायतीत्यर्थः ॥३॥

जयन्ती

पीनपयोधरेति । काचित् गोपवधूः वधूनिकरस्था पीनयोः स्थूलयोः पयोधरयोः भारभरेण सरागं प्रीतियुक्तं हरिं रागं कलयन्तं परिरभ्य आलिङ्ग्य उदञ्चितः प्रकटितः पञ्चमरागः पञ्चमस्वरो यस्मिन् तथा अनुगायति ॥३॥

सञ्जीवनी

कस्याश्चिदवैदग्ध्यमाह—काऽपीत्यादिना । काऽपि मुग्धवधूः [4]मधुसूदनस्य वदनसरोजं मुखपङ्कजं ध्यायति । समक्षस्य श्रीकृष्णस्य ध्यानादवैदग्ध्यमेव विज्ञायतेऽ[5]स्याः । कीदृशम् ? विलासेन विशेषनर्तनेन विलोलयो[6]श्चञ्चलयोर्विलोचनयोर्यत् खेलनं तेन जनितः उत्पादितो मनोजः कामो येन तम् । पुनः कीदृशं मुखम् ? अधिकं [7]अनुपमं, माधुर्यविलाससारसन्दोहमित्यर्थः । क्रियापदविशेषणं वा । [8]सौगन्ध्यादिगुणमधुररसेन [9]कामोद्बोधकत्वात्ताप[10]हारकत्वाच्च वदनस्य सरोजोपमा । मधुसूदनपदं पूर्ववत् । काऽपीति सामान्य-

1. भारेण–ल.म. 2. नास्ति–ड. 3. नास्ति–ड. 4. मधुसूदनवदनसरोजं–ग. 5. तस्याः–ग. नास्ति–ज. 6. चञ्चलयोर्यत् खेलनं–ग. विलोचनयोर्यत् खेलनं–ज. 7. अनुपममाधुर्य–इ.फ.ग.ह.ज. 8. सौगन्ध्यादिगुणादिगुणमधुर–फ. 9. कामोद्बोधकत्वाच्च वदनस्य–ज. 10. हरणाच्च–ग.

काऽपि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले ।
चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ।।५।।

कथनाय । ध्यायतीत्यङ्गसङ्गाभावो दर्शितः । मातश्चास्मिन्नवसरे त्वया गन्तव्य-मिति । [1]क्रियाकौशलेनायं [2]वञ्चनीय इति भावः ।।४।।

पदद्योतनिका

(काऽपीति) [3]हे राधे ! काचिन्मुग्धवधूर्मनोहरगोपाङ्गनाऽधिकमतिशयेन मधुसूदनवदनसरोजं कृष्णमुखाम्बुजं ध्यायति चिन्तयति । विलासेन विलोलयोश्चञ्चलयोर्विलोचनयोः खेलनेन [4]सञ्चारणेन जनित [5]उत्पादितो मनोजः कामो येन ।।४।।

जयन्ती

काऽपीति । काऽपि मुग्धवधूः अन्या विलासैः विलोले चञ्चले विलोचने नयने तयोः खेलनेन कटाक्षावलोकनरूपेण जनितः उद्दीपितः मनोजः कामो येन तम् । मुग्धवधूः अन्या मधुसूदनस्य कृष्णस्य वदनमेव सरोजञ्च अधिकं ध्यायति । पूर्वदलं वदनविशेषणत्वे उद्दीपितमदनत्वम् ।।४।।

सञ्जीवनी

[6]काऽपि नितम्बवती गोपवधूः दयितं कृष्णं चारु मनोहरं[7] यथा स्यात्तथा कपोलतले [8]चुचुम्ब चुम्बनं कृतवती । कीदृशी ? किमपि लपितुं मन्त्रयितुं प्रलपितुं वा कन्दर्पवशादधैर्येण स्वचातुर्यरक्षणाय श्रुतिमूले कर्णमूले मिलिता संलग्ना व्याजेनालिङ्गनाय वा [9]नामामृतं तत्कर्णमूले [10]क्षेप्तुं वा । अत एवोक्तं—किमप्यनिर्वचनीयमिति । [11]नितम्बवतीत्यनेना[12]लिङ्गनचतुरतोक्ता । कीदृशे ? पुलकै रोमाञ्चै रनुकूले । [13]नायकाभिलाषसूचक[14]पुलकोद्गमस्तन्नामश्रवणसा—

---

1. कलाकौशलेनायं—इ.फ.ग.ह. 2. नास्ति—ज. 3. हे राधे नास्ति—ड.ल.म. 4. प्रसारणात्—ल.म. 5. नास्ति—ड. 6. तः 7. पर्यन्तं नास्ति—ज. 8. नास्ति—इ.फ.ग.ह.ज. 9. त्वन्नामामृतं—ग. 10. प्रक्षेप्तुं—ब.इ.फ.ग.ह.ज. 11. नितम्बवत्यनेन—अ.ब.इ.ह.ज. 12. आलिङ्गनाचतुरतोक्ता—इ.ह. 13. नायिका. ब. नायिकाभिलाषसूचके—इ.फ.ह.ज. नायकाभिलाषसूचके—ग. 14. पुलकोद्गमस्तु त्वन्नामश्रवणसात्त्विकोदयात्—ह.ज.

[1]करतलतालतरलवलयावलिकलितकलस्वनवंशे ।
रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ।।६।।

त्त्विकोदयात् । [2]चुम्बनेनेत्यनेनै[3]तस्या[4]अधीरत्वमुपपादितम् । औत्कण्ठ्येन सहसा कान्तमुखचुम्बनं सखीजनहास्यकरं भवतीति भावः । यदा त्वत्कथा-[5]श्रवणेन जातपुलको भवति तदा त्वय्येव [6]स्नेहप्राचुर्यम् । तस्मात्त्वया शीघ्रं तत्र गन्तव्यमिति ।।५।।

पदद्योतनिका

काऽपीति । काऽपि नितम्बवती गोपाङ्गना दयितं कृष्णं कपोलतले गण्डप्रदेशे चारु[7] मनोहरं यथा स्यात्तथा चुचुम्ब चुम्बितवती । [8]कथम्भूता ? किमपि कार्यं लपितुं वक्तुं श्रुतिमूले कर्णप्रदेशे मिलिता संलग्ना । [9]कथम्भूते कपोलतले ? पुलकैः रोमोद्गमैरनुकूले [10]प्रियकथके ।।५।।

जयन्ती

काऽपीति । काऽपि नितम्बिनी वल्लवी किमपि रहस्यं श्रुतिमूले कर्णान्ते लपितुं वक्तुं मिलिता संश्लिष्टा सती दयितं प्रियं कृष्णं पुलकैः रोमाञ्चैः उप-लक्षिते अनुकूले सन्निहिते; स्वाङ्गस्पर्शने सात्त्विकोद्रेकाद्रोमाञ्चित इत्यर्थः । कपोले गण्डप्रदेशे चारु यथा तथा चुचुम्ब । आश्लेषचुम्बनरूपबाह्यसम्भोग-शृङ्गाररसो दयिताकृतः ।।५।।

सञ्जीवनी

एवं स्नेहप्राचुर्यरीत्या सन्तुष्टां श्रीराधां सखी पुनराह—[11]करतलेत्यादिना । हे रासरसे ! आश्चर्यं सखि कलय । रासरसे गोपवधूनिकर[12]रचितेऽपि युवतिः श्रीराधैव प्रशशंसे स्तुता श्लाघितेत्यर्थः । न त्वया सह नृत्यपरा । रासरसस्तु वरस्त्रीकदम्बं विना [13]न भवतीत्यमनोहरत्वं तन्निकरस्योक्तम् । [14]अथ वा हरिणा

1. पङ्क्तिद्वयमिदं सप्तमपदत्वेन दृश्यते (नि.सा) मुद्रिते. च. ग्रन्थे च । 2. चुम्बनेनेत्यस्याः—ह.ज. 3. तस्याः—ब. 4. अधीरत्वं सम्पादितम्—इ.फ.ग.ह.ज. 5. श्रवणे सात्त्विको(दये)न—फ. 6. स्नेहचातुर्यं—ब. स्नेहचातुर्यम्—अ. 7. मनोज्ञं—क.ल.म. 8. नास्ति—क. 9. कीदृशे कपोलतले—क. कीदृशे कर्णमूल-तले—ल. 10. प्रियप्रेमकथके इति यावत्—क. प्रेमप्रियकथके—ल.म. 11. नास्ति—इ.फ.ग.ह.ज. 12. रचिते—अ.ब. 13. न भवत्येव । मनोहरत्वं—अ. 14. यद्वा—ग.

सह नृत्यपरा काचिद्युवतिस्त्वां प्रशशंसे। ननु सा कथं तथा चक्रे; उच्यते। रमणीयवस्तुनि न कस्य बहुमान इति।[1]यद्वा, रासे रासक्रीडायां रसः बहुनर्तकीनृत्यविशेषो [2]गोषु क्रीडा वा। तस्मिन् हरिणा सह नृत्यपरा नृत्यमात्रकुशला, न तु सर्वकर्मसु। एवमपि तस्या उपहासः। [3]तवैव प्रशंसेति ध्वनिः। कीदृशे? करतलयोस्तालेन परस्परं [4]वादनेन तरला चञ्चला या वलयावलिः कङ्कणपङ्क्तिस्तया कलितो मिश्रितः कलस्वनोऽव्यक्तमधुर[5]स्वनो वंशो वेणुर्यत्र तादृशे। रासरस इत्यनेन गोदुहक्रीडास्वेव सा स्तुता न तु सकलसङ्गीतकलास्विति ध्वनितम्। "द्रुमभेदे करास्फाले [6]तालम्" इति विश्वः (१०४.१७)। "तरलं चञ्चले [7]खड्गे" इति हारावली (?)। "[8]रासस्तु गोदुहक्रीडा इत्यपि च" इति विश्वप्रकाशः[9]। स्वभावोक्तिरलङ्कारः ॥६॥

पदद्योतनिका

[10]करतलेति। काचिद्युवतिर्गोपाङ्गना हरिणा कृष्णेन प्रशशंसे स्तुता। रासरसे गोपिक्रीडानुरागे सह नृत्यपरा कृष्णसमकालं [11]नृत्यन्ती। [12]कीदृशे रासरसे? करतलयो[13]र्हस्ततलयोस्तालेन चपेटध्वनिना तरलया [14]चञ्चलया वलयावल्या कङ्कणपङ्क्तया कलितो मिश्रितः कलस्वरवंशोऽव्यक्तमधुरशब्दसहितो वंशो वेणुर्यत्र ॥६॥

जयन्ती

करतलेति। करतलावेव तालं कांस्यतालम्। विना परस्परकरतलयोगेनैव तालग्रहणं सङ्गीतसम्मतकरतलस्यैव तालत्वं; तेन तरलानां युवतीनां वलयानां कङ्कणानां आवलिः समुदायः तेन कलितः युक्तः कलः अव्यक्तमधुरः स्वनो यस्य सः; तादृशो वंशो यस्मिन्। रासः रासारब्धक्रीडाविशेषः रसः स्वरसः तस्मिन्। हरिणा सह नृत्यपरा नर्तनासक्ता काऽपि युवतिः प्रशशंसे। साधुवादैस्सन्तुष्टा वेत्यर्थः। पूर्वं पञ्चमरागालापमुक्तम्। अधुना तालसहितं वंशवादं नर्तनं चेति तौर्यत्रिकमुक्तम्। तौर्यत्रिकं नृत्यगीतवाद्यमिति कथनात् ॥६॥

---

1. अथ वा–इ.फ.ह.ज. 2. गोक्रीडा वा–ब. गोष्ठेषु क्रीडा वा–ग. 3. तथैव–ग. 4. वादेन–फ.ग. 5. शब्दसहितो–इ.फ.ग.ह.ज. 6. ताले तु हरितालकः–इ.फ.ग.ह.ज. 7. खड्गे हारमध्यमणावपि–इ.फ.ग.ह.ज. 8. तः 9. पर्यन्तं नास्ति–अ.ब. 10. 'केली'ति पदस्य पश्चात् दृश्यते पदमिदम्–ड. 11. नृत्यती–क. नृत्यति–ल.म. 12. कथम्भूते रासरसे–क.ल.म. 13. हस्तयोः–ड.ल.म. 14. नास्ति–ल.म.

श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम् ।
पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम् ॥७॥

सञ्जीवनी

सखि ! रासविहारे तासां त्वदुक्तरीत्या प्राधान्यं, ताभिः केलिर्या सा त्वद्गौरवान्वेषणायास्ति । न तु तासां गौरवम् । [1]उक्तञ्चात्र—"राधामाधाय हृदये तत्याज व्रजसुन्दरीः" इति । [2]त्वद्गौरवमाह—श्लिष्यतीत्यादिना । सः श्रीकृष्णचन्द्रः कामपि रामां क्रीडा[3]स्वभावो श्लिष्यति [4]आकृष्यालिङ्गनं करोति । कामपि रामां चुम्वति चिवुकमुद्धृत्य चुम्वनं करोति । कामपि रामां कुचस्पर्शाधरपानमधुरवचनादिना रमयति । भाव[5]गर्भितस्मितेन चारुतरामतिशयेन मनोहरां पश्यत्यवलोकनं करोति । एवं [6]तास्वभिमुखं नृत्यमानासु प्रीत्या [7]श्रीकृष्णालिङ्गनादिकं दृष्ट्वा [8]ह्रियमाणामपरां वामां [9]मात्सर्यस्वभावां मनोहरस्वभावां वा तामनुगच्छति। तत्सखीमनुनयार्थमनुगतिं करोति।[10]अथ वा तद्वञ्चनमेवंप्रकारेण विधायाऽपरां, न विद्यते परा अन्या त्वत्सदृशी श्रेष्ठा तां त्वां वामां कोपवतीं स्वापराधशमनायानुगच्छति। बलात्कारेणा[11]लिङ्गनादिके कृतेऽपि ताभिर्न कृतमित्यवैदग्ध्यं सूचितं तासाम् । परस्परकृतालिङ्गनादौ शृङ्गाररसः पुष्टो भवतीति ग्राम्य[12]सुखे प्रसिद्धिः । अत एव तासामपकर्षणार्थं [13]स्वोत्कर्षशृङ्गाररसपुष्टयर्थं [14]च नायकवरान्तिके त्वया गन्तव्यमिति सूचितम् । "सुन्दरी रमणी रामा" [15]इत्यमरः (२.६.४) ॥७॥

---

1. उक्तञ्च–ग. 2. त्वद्गौरवमेवाह–इ.फ.ग.ह.ज. 3. स्वभावां–इ.फ.ग.ह.ज. 4. आश्लिष्य–फ. 5. गर्वित–अ. 6. तास्वभिनृत्यमानासु–अ.व. 7. श्रीकृष्णालिङ्गनं–अ.ब. 8. नास्ति–इ.फ.ग.ह.ज. 9. माधुर्यस्वभावां–ह. 10. यद्वा–ग. 11. आलिङ्गनादिकं कृतमपि–अ.व. 12. सुखेऽर्थसिद्धिः–अ. 13. स्वोत्कृष्ट–फ. 14. तद्वचनार्थं च–ज. 15. इति विश्वः– इ.फ.ग.ह.ज. अयं नैघण्टुकोद्धारो नास्ति–अ.ब. अतः परं–इ.फ.ग.ह.ज. पुस्तकेषु एवं दृश्यते–

मुदा सङ्क्रीडद्भिर्व्रजयुवतियूथैः परिवृतो
न तोषं प्राप्नोति क्वचिदपि मनाङ्नन्दतनयः ।
यतस्व त्वं तस्मिन् सहचरि मनागन्यविषयं
मनः कर्तुं कान्ते तव चरणपातैकशरणे ॥

केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले ।
मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले ।।८।।

पदद्योतनिका

. श्लिष्यतीति। हे राधे ! कृष्णः कामपि [1]गोपिकां श्लिष्यति आलिङ्गति। तथा कामपि चुम्बति । तथा कामपि रामां रमयति क्रीडयति । परां नायिकां सस्मितचारु सहासमनोहरं यथा स्यात्तथा पश्यति । अपरां वामां [2]सुन्दरीमनुगच्छतीत्यर्थः ।।७।।

जयन्ती

दयितकृतबाह्यसम्भोगं वर्णयति—श्लिष्यतीति । ध्रुवपदस्थं हरिपदमत्रानुषज्यते । हरिः कामपि वल्लवीं श्लिष्यति आलिङ्गति । कामपि तदन्यां चुम्बति । तदन्यां कामपि रामां सुन्दरीं रमयति । चुम्बनाश्लेषभिन्ननाभिस्पर्शादिना क्रीडति । सस्मितं स्मितयुक्तं मुखं अधरो वा । तेन [3]चारुतरां अतिशोभां स्मितसहितं यथा स्यात्तथा सस्मितं चारुतरमित्यर्थः । अपरां वामां सुन्दरीं मानिनीं तद्वक्त्रं वा अनुगच्छति अनुसरति । अत्र खेलनया सस्मितया योग्यालिङ्गनादिना सत्कारकरणात् दक्षिणो नायकः ।।७।।

सञ्जीवनी

लीलान्तरमाह—केलिकलेत्यादिना । काचिद्व्रजाङ्गना अमुं श्रीकृष्णचन्द्रं केलिकलाकुतुकेन क्रीडाविलासोत्पादकव्याजेन दुकूले पट्टवस्त्रे विषये करेण हस्तेन विचकर्ष आकृष्टवती। दुकूले गृहीत्वा [4]अमुं विचकर्षेति केचित् ब्रुवन्ति । कीदृशम् ? [5]मञ्जुलवञ्जुलकुञ्जगतं मनोज्ञवेतसमन्दिरगतं तव ध्यानाय [6]तद्वञ्चनाय वा रहःस्थितिमिति सूचितम् । कुत्राकृष्टवती ? [7]यमुनाकूले; यमुनाजले केलिविधानायाकृष्टवतीति ध्वनितम् । [8]अन्यासक्तस्य [9]श्रीकृष्णस्य [10]स्वप्रियाध्यानासक्तस्य वा वस्त्राकर्षणादस्या अधीरत्वं मुग्धत्वं च[11]स्फुटमेव ।

---

1. गोपाङ्गनां—क. 2. सुन्दराम्—ड. 3. एतद्व्याख्यानुसारी पाठः 'चारुतरा' मिति । 4. अमुं विचकर्षेति केचित् चकर्षेति केचित् ब्रुवन्ति—इ 5. नास्ति—अ.ब.इ.फ.ग.ह. 6. नास्ति—ग. 7. यमुनाजलकूले—इ.फ.ग.ह.ज. 8. अन्यत्रासक्तस्य—इ.फ.ग.ह.ज. 9. श्रीकृष्णचन्द्रस्य—इ.फ.ग.ह.ज. 10. स्वप्रियानासक्तस्य वा—ह 11. स्फुरते—अ.

श्रीजयदेवकवेरि[1]दमद्भुतकेशवकेलिरहस्यम् ।
बृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥९॥

अतः [2]तवाधरामृतपानेन त्वया सञ्जीवनीय इति मम प्रार्थना । "[3]वञ्जुलो वेतसाशोक" इति विश्वः (१०५.८५) । "मनोज्ञं [4]मञ्जु मञ्जुलम्" इत्यमरः (३.१.५२) । "कुतुकं च कुतूहलम्" इत्यपि (अमरः–१.७.३१) ; "दुकूलं पट्टवस्त्रे स्यादतिसूक्ष्मांशुकेऽपि च" इति विश्वः (१०५.११५) । पर्यायोक्तिरलङ्कारः, रसवदलङ्कारश्च ॥८॥

पदद्योतनिका

केलीति । [6]काचिद्गोपी केलिकलाकुतुकेन हेतुना शृङ्गाररसक्रीडातात्पर्येण हेतुना करेण [7]हस्तेनामुं कृष्णं दुकूले पट्टवस्त्रे विचकर्ष आकृष्टवती । [8]कीदृशममुम् ? यमुनाजलकूले यमुनाजलोपलक्षिते [9]कूले तीरे मञ्जुलो मनोहरो यो वञ्जुलकुञ्जो वेत्रलतागृहं तत्र गतं वर्तमानम् ॥८॥

जयन्ती

[10]केलिकलेति । काचित् यमुनाजलस्य कूले तटे; जलग्रहणेन अन्तर्वालुकोपलक्षिते सन्निहित इत्यर्थः । केलिषु कलाः चातुर्यविशेषाः तासां कुतुकेन कुतूहलेन मञ्जुले रमणीये वञ्जुलकुञ्जे वेतससमुदाये गतं स्थितं अमुं कृष्णं दुकूले करेण विचकर्ष । दुकूलग्रहणेन परिधानमोचनपरिहासो व्यज्यते ॥८॥

सञ्जीवनी

उक्तलीलावैभवश्रवणफलमाह–श्रीजयदेवेति । श्रीजयदेवकवेरिदं गीतं शृण्वतां [11]पठतां च शुभानि [12]श्रीकृष्णस्मरणात्मिकानि कल्याणानि वितनोतु विस्तारयतु । कीदृशम् ? [13]अद्भुतं अद्भुतार्थं अद्भुतस्वरूपं वा [14]आश्चर्यकरं वा । केशवस्य[15] [16]श्रीकृष्णचन्द्रस्य केलिरहस्यं क्रीडाहर्षः क्रीडागोप्यं वा [17]यत्र । [18]अत्राद्भुतमेतदेव गोपवधूदाक्षिण्यानुरोधेन क्रीडितं

1. भणितमिदमद्भुत–मुद्रितग्रन्थे (नि. सा.) 2. तवाधरपानेन–अ. 3. वञ्जुलो वेतसे मत इति विश्वः–इ.फ.ग.ह.ज. 4. मञ्जुलम्–इ.फ.ग.ह.ज. 5. अपि च–इ.फ.ग.ह.ज. 6. काचिद्गोपिका–क. 7. हस्तेनाकृष्य दुकूले–ल.म. 8. कथम्भूतं कृष्णम्–क. कथम्भूतममुम्–ल.म. 9. नास्ति–ड.क. 10. पदमिदं सव्याख्यं षष्ठत्वेन च. ग्रन्थे दृश्यते । 11. नास्ति–ज. 12. तः 15. पर्यन्तं नास्ति–इ. 13. नास्ति–अ.ब. 14. नास्ति–ब 16. श्रीकृष्णस्य–ग.ह. 17. नास्ति–अ.ब. 18. अद्भुतत्वमेतदेव–इ.फ.ग.ह.ज.

श्रीराधोत्कर्षख्यापनायान्यमुग्धत्वनिरूपणायेति । [1]अथ वा अद्भुतं युगपद्व्रजनारीणां रत्युत्पादनात् । [2]कश्चेशश्च वशौ यस्येतीति [3]कियद्व्रजाङ्गनावशीकरणम् । पुनः कीदृशम् ? वृन्दावननाम्नि वने [4]ललितं नानारसान्वितं वनविहारक्रीडायुक्तं वा, वने कामधेनुस्मरणात् । वनविहारव्याजेन श्रीराधान्वेषण[5]चातुर्यमुक्तम् । [6]यशस्यं यशसे हितं यशस्करं वा यशस्सहितं वा[7] ॥९॥

[8]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः ॥४॥

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवकवेरिदं गीतं शुभानि कल्याणानि वितनोतु वर्धयतु; अर्थाद्भक्तानाम् । [9]कीदृशं [10]गीतम् ? अद्भुतमाश्चर्यकरम् । केशवस्य कृष्णस्य केलिरहस्यं क्रीडाहर्षो यत्र । अद्भुतं युगपत् सर्वासां प्रीत्युत्पादनात् । बृन्दावनविपिने बृन्दावननाम्नि वने ललितं नानारसान्वितमित्यर्थः । [11]यशस्यं यशसा सहितं यशस्करमित्यर्थः ॥९॥

[12]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः ॥४॥

जयन्ती

श्रीजयदेवेति । [13]श्रीजयदेवकवेः; कविशब्देन तत्कर्तृत्वम् । अद्भुतं च तत् केशवस्य केलिरहस्यं क्रीडातत्त्वम् । वृन्दावनं चतुरशीतिक्रोशरूपं, तत्र विपिनानि मधुवनतालवनादीनि द्वादश प्रसिद्धानि । तत्र चरितं इदं वस्तु यशस्यं कीर्तिकरं शुभानि वितनोतु विस्तारयतु ॥९॥

[14]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः ॥४॥

---

1. यद्वा–ग. 2. कश्चेशश्च केशौ यस्येतीति–अ.ब. नास्तीदं वाक्यम्–ज. 3. कियदेतद्व्रजाङ्गना–इ.फ.ग.ह. व्रजाङ्गना–ज. 4. चलितं–अ.इ.फ.ग.ह.ज. 5. चातुर्यमुक्तमिति भावः–इ.फ.ग.ह.ज. 6. तः 7. पर्यन्तं नास्ति–अ.ब. यशस्ये यशस्यं यशस्करं–इ. 8. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 9. नास्ति–क. 10. नास्ति–क 11. वाक्यमिदं नास्ति–ड. 12. इति श्रीगीतगोविन्दे कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः–ड. नास्तीयं पुष्पिका–क.ल.म. 13. 'श्रीजयदेवकवेरिदमद्भुत' इति एतद्व्याख्यानुसारी पाठः । 14. नास्तीयं पुष्पिका–च.

विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-
श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम् ।
स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः
शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ॥१०॥

सञ्जीवनी

[1]सकलशृङ्गाररससकलाभिज्ञस्य श्रीकृष्णस्य श्रीराधोत्कर्षप्रतिपादनाय पूर्वगीतैर्हावभावाद्यनभिज्ञाभिर्गोपीभिर्यूथलीलैवोक्ता । इदानीं श्रीकृष्ण[2]क्रीडोत्कर्षं तदर्थमाह—विश्वेषामिति । हे सखि राधे मधौ वसन्ते हरिर्मनोहरणशीलः क्रीडतीत्यन्वयः । कीदृशः ? [3]मुग्धः त्वद्विरहेण मूढः । यद्वा, मनोहरः त्वदागमनकाङ्क्षया [4]सुन्दरः । किं कुर्वन् ? विश्वेषां व्रजवधूनां सर्वजीवानां वानुरञ्जनेनानुरागेणानन्दं सन्तोषं जनयन् उत्पादयन् । पुनः किं [5]कुर्वन् ? इन्दीवराणां नीलकमलानां श्रेणयः पङ्क्तयः [6]तद्वन्नीलैः श्यामलैः कोमलैश्च सुकुमारैः शृङ्गाराङ्गैर्वाऽनङ्गस्य [7]कामस्योत्सवं हर्षं उपनयन् उत्पादयन् । कीदृशो हरिः ? स्वच्छन्दं स्वेच्छया व्रजसुन्दरीभिरभितः सर्वतोभावेन प्रत्यङ्गं; अङ्गमङ्गं प्रति इति प्रत्यङ्गम्; आलिङ्गितः आश्रितः । कयाचित्ताम्बूलस्रक्चन्दनाद्युद्दीपनरूपं, [8]कयाचित् [9]सस्मितकटाक्षानुरूपं, कयाचिद्रोमाञ्चस्वेदादिरूपं शृङ्गारस्याङ्गमाश्रित इति भावः । क इव ? मूर्तिमान् साङ्गः [10]शृङ्गारः शृङ्गाररस [11]इव । श्रीकृष्णस्य श्यामाङ्गत्वेन शृङ्गाररस[12]साम्ये श्यामो भवति शृङ्गारः । शृङ्गारविशेषणान्यप्येतानि पदानि ॥१०॥

पदद्योतनिका

विश्वेषामिति । हे सखि राधे [13]मधौ वसन्ते मुग्धो मनोहरो हरिः कृष्णः क्रीडतीत्यन्वयः । क इव ? मूर्तिमान् शरीरधारी शृङ्गाररस इव । किं कुर्वन् ?

---

1. सकलशृङ्गारसकलाभिज्ञस्य–अ.ब. 2. क्रीडोत्कर्षमाह–फ. 3. त्वद्विरहेण मुग्धः–अ.ब. 4. नास्ति–ग. 5. नास्ति–अ.ब. 6. तद्वत् श्यामलैः नीलैः–ज. नास्ति–ड.ल. 7. कामस्योत्कर्षं उपनयन् स्थापयन्–अ.ब.फ. 8. कदाचित्–अ. 9. स्मितकटाक्षानुरूपं–ज. 10. नास्ति–अ.ब. 11. एव–अ.ब.ग. 12. साम्यं–फ.ग.ह.ज. 13. नास्ति–ड.ल.

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा–
मभ्यर्णे परिरभ्य[1] निर्भरमुरः प्रेमान्धया राधया ।

अनुरञ्जनेन अनुरागेण विश्वेषां भक्तानां आनन्दं सन्तोषं जनयन्नुत्पादयन् । पुनः किं कुर्वन् ? इन्दीवरश्रेणी नीलोत्पलमाला तद्वत् श्यामलकोमलैः कृष्ण-मनोहरैः [2]अङ्गैरवयवैरनङ्गोत्सवं कामहर्षमुपनयन्नुत्पादयन् । पुनः [3]कीदृशः ? स्वच्छन्दं स्वेच्छया [4]व्रजसुन्दरीभिर्गोपाङ्गनाभिरभितः सर्वतोभावेन प्रत्यङ्गं प्रत्यवयवं आलिङ्गितः । गोपीभिरेकदालिङ्गने यया [5]यदङ्गं प्राप्तं तया तदेवालिङ्गितमिति भावः । "श्यामो[6]भवति शृङ्गारः सितो [7]हास्यः प्रकीर्तितः" इति । शृङ्गारविशेषणान्यप्येतानि पदानि ॥१०॥

जयन्ती

अष्टपद्यर्थं श्लोकेन वर्णयति—विश्वेषामिति । हे सखि राधे ! व्रजवधू-गणानां विश्वेषां सर्वप्राणिनां अनुरञ्जनेन अप्रतिकूलतया आनन्दं हर्षं जनयन् कुर्वन्नित्यर्थः । इन्दीवराणां नीलोत्पलानां श्रेणीव पङ्क्तिरिव श्यामलानि च तानि कोमलानि सुकुमाराणि तैः अङ्गैः करचरणमुखाधरकण्ठोरस्थलादिभिः उपलक्षितः अनङ्गस्य कामस्य उत्सवं रासक्रीडारूपं उपनयन् रचयन् वधूजनानां कामोद्दीपनं कुर्वन्निति वा । तदङ्गावलोकनमात्रेण सर्वासां कामोद्दीपनं भवतीति भावः । आलम्बनविभावत्वेऽपि तदवलोकनेनोद्दीपनत्वम् । अत एव स्वच्छन्दं अविरुद्धतया यथाभिलाषं व्रजसुन्दरीभिः, व्रजो नन्दनिवासघोषः; तत्र सुन्दर्यः वल्लव्यः ताभिः अभितः, प्रत्यङ्गं अङ्गे अङ्गे प्रत्यङ्गं आलिङ्गितो हरिः । शृङ्गारः रतिस्थायिको रसः मूर्तिमानिव । मधौ वसन्ते मुग्धः । मूर्तत्वेऽपि मूर्ति-मत्त्वेन सम्भाव्यत इति वस्तूत्प्रेक्षा सिद्धास्पदा । अनेकनारीचुम्बनालिङ्गनादि-समृद्धिमत्त्वनिमित्तेन शृङ्गारस्य स्वतस्सिद्धत्वेऽपि बालकः हरिः क्रीडति । (क्रिय)माणरतिरूपत्वेन मूर्तिमत्त्वेन कल्पनान्नोपमालङ्कारः ॥१०॥

सञ्जीवनी

[8]सङ्गीतिश्रोतृभ्यः कविराशिषं ददाति—रासोल्लासेति । हरिः श्रीकृष्णः वो[9] युष्मान् पातु [10]रक्षतु । [11]कीदृशः ? स्मितमनोहारी स्मितेन[12]

---

1. निर्भरसुखं–च. 2. नास्ति–ड. 3. कथम्भूतः–क.ल.म. 4. नास्ति–क. 5. मदङ्गं–ड. 6. भवतीति–ड. 7. हासः–ल.म. 8. सङ्गीतिश्रोतृन्–अ. सङ्गीते श्रोतृन्–ब.इ. फ.ग.ह.ज. 9. युष्माकं युष्मान् वा–ज. 10. नास्ति–अ. 11. तः 12. पर्यन्तो भागो नास्ति–अ.ब.

साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुदभटचुम्बितः स्मितमनोहारी हरिः पातु वः ॥११॥

इति श्रीगीतगोविन्दे प्रथमः सर्गः

---

[1]मनोहारी। स्मितहरो [2]वा पाठः। स्मितेन ईषद्धास्येन शोकहरः। हारी हारवान्। पुनः कीदृशः[3]? प्रेमान्धया सहचरीवचनप्रेमपूरया राधया [4]निर्भरं गाढं यथा स्यात्तथा उरो वक्षःस्थलं आभीरवामभ्रुवां गोपवधूनां अभ्यर्णे समीपे परिरभ्य आलिङ्ग्य रासक्रीडायां उल्लासभरेण हर्षातिशयेन गीतस्तुतिव्याजात् गानप्रशंसाच्छलेन इति व्याहृत्योक्त्वा उद्भटं यथा स्यात्तथा चुम्बितः। इतीति किम्? साधु त्वद्वदनं सुधामयम्। किंभूतानाम्? [5]विभ्रमभृतां शृङ्गारविलासवतीनाम्। अत्रानादरे षष्ठी। ननु सा कथं तच्चक्रे? तथोक्तं प्रेमान्धयेति। उद्भटचुम्बनं कामसर्वस्वोक्तम्। तल्लक्षणम्—

"कान्तं भुजाभ्यामालिङ्ग्य प्रेयसी प्रणयान्विता।
सशब्दं चुम्बति मुखं [6]यत्तदुद्भटमुच्यते॥" इति।

सर्गान्ते टीकाकारोक्तिः —

वन्दे युवतियूथस्थं कृष्णं केलिकलानिधिम्।
कालिन्दीजलसंसिक्तं सर्वाभरणभूषितम्॥

इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंस[7]शिवदासात्मज[8]श्रीवनमालिभट्टविरचितायां [9]वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां [10]व्रजयुवतिकेलिवर्णने सामोददामोदरो नाम[11] प्रथमः सर्गः॥११॥

पदद्योतनिका

[12]कविः कथोपक्रमं [13]त्यक्त्वा लोकान् प्रत्याशिषो [14]ददाति—रासोल्लासेति। हरिः कृष्णः वो युष्मान् पातु इत्यन्वयः। [15]कीदृशः? रासोल्लास-

---

1. तः 3. पर्यन्तो भागो नास्ति–अ.ब. 2. इति वा–ज. 4. नास्ति–अ.ब.इ.फ.ह. 5. नास्ति–अ.ब.इ.फ.ग.ह. 6. यदुद्भटमुदाहृतम्–ग. 7. शिवदासपण्डितात्मज–फ.ग.ह. 8. श्रीभट्टवनमाली–अ.ब. 9. सञ्जीवन्यां–अ.ब. 10. तः 11. पर्यन्तं नास्ति–अ.ब. 12. इदानीं कविः–क. 13. त्यक्त्वाशिषं–ड. 14. ब्रूते–क. 15. कथम्भूतो हरिः–क.ल.म.

भरेण [1]गोपीक्रीडया हर्षातिशयेन विभ्रमभृतां शृङ्गारविलासधरणीनां आभीरवामभ्रुवां गोपाङ्गनानां अभ्यर्णे समीपे निर्भरं गाढं यथा स्यात्तथा उरो वक्षःस्थलं परिरभ्यालिङ्ग्य राधया [2]उद्भटं यथा स्यात्तथा गीतस्तुति-व्याजाद् [3]गीतप्रशंसाच्छलेन चुम्बितः । किं कृत्वा ? त्वद्वदनं त्वन्मुखं सुधामय-[4]ममृतमयं साधु शोभनमिति व्याहृत्योक्त्वा । [5]कीदृशो हरिः ? स्मितमनोहारी राधायाश्चुम्बनकौशलं दृष्ट्वा [6]स्मितेनेषद्धास्येन मनो हर्तुं शीलं यस्य सः ॥११॥

[7]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सामोद-दामोदरो नाम प्रथमः सर्गः ॥११॥

जयन्ती

सर्गान्ते मङ्गलं तनोति–रासोल्लासेति । रासक्रीडाविशेषे उल्लासः तदनुष्ठानोत्साहः । तस्य भरेण वेगेन प्रेम्णा हार्देन अन्धया जनसमीपे कथमालिङ्गनीय इति शङ्काशून्यया राधया । आभीराः वल्लवाः तेषां वामभ्रुवां तरुणीनां अभ्यर्णं समीपे निर्भरं अत्यन्तं सुखं यथा स्यात्तथा परिरभ्य आलिङ्ग्य त्वद्वदनं सुधामयं अमृतप्रायं साधु इति व्याहृत्य उक्त्वा गीतिः गीयमाना स्वरसन्दर्भरूपा तस्याः स्तुतिः लक्षणलक्षितत्वेन श्राव्यत्वेन गुणकीर्तनं तस्याः व्याजात् मिषात् उद्भटं यथेष्टं चुम्बितः । अत एव स्मितमनोहारी मन्दहसितरुचिरः हरिः श्रोतॄन् पातु । एतद्वाक्यं सखीप्रदर्शनसमये विप्रकृष्टत्वा-त्तात्कालिकं न भवति । परन्तु कविना राधासहितं तया रासक्रीडास्थं ध्यायतां मङ्गलं कृतमिति बोध्यम् । वर्णितरासक्रीडायान्तु तस्यामन्यत्रावस्थानं ज्ञायते पर्वोत्तराष्टपदीभ्यामिति । व्याजादित्यनेन चातुर्यम् ॥११॥

[8]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सामोददामोदरो नाम प्रथमः सर्गः ॥११॥

---

1. गोपक्रीडायाः–क. गोपक्रीडायां–ल.म. 2. उत्कटं–ल.म. 3. गान-प्रशंसा–क.ल.म. 4. अमृत–क. 5. कथम्भूतो–क.ल.म. 6. स्मितेनेषद्धासेन–ल.म. 7. इति श्रीनारायणपण्डितकृतगीतगोविन्दे प्रथमः सर्गः–ड. इति श्रीमद्गीतगोविन्दे जयदेवकृते पदद्योतिन्यां सामोददामोदरो नाम प्रथमः सर्गः–क. इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां भीषदासकारितायां प्रथमः सर्गः । इति चतुर्थाष्टपदी–ल.म. 8. इति श्रीगीतगोविन्दे सामोद-दामोदरो नाम प्रथमः सर्गः–च

द्वितीयः सर्गः

अक्लेशकेशवः

विहरति वने राधा साधारणप्रणये हरौ
विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ।
क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली–
मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ॥१॥

सञ्जीवनी

द्वितीये कथ्यते सर्गे श्रीराधाप्रणयोदयः ।
सेर्ष्या कुञ्जान्तर[1]गता सखीं राधा समब्रवीत् ॥

एवं पूर्वं गोपसीमन्तिनीयूथकेल्युत्कर्षमालोक्य विगलित[2]निजोत्कर्षेव श्रीराधा सखीमाह—विहरतीति । श्रीराधा रहः एकान्ते गोप्यमपि [3]वक्ष्यमाणं सखीमुवाचोक्तवतीत्यन्वयः । कीदृशी ? हरौ श्रीकृष्णे वने विहरति क्रीडति सति । ईर्ष्यावशेनासहिष्णुतया । [4]अन्यत [5]अन्यस्मिन् कुञ्जे गता । पुनः कीदृशी ? क्वचित्कदाचिदपि लताकुञ्जे लताच्छादिते कुञ्जे लीना तद्वचनानि श्रोतुं गाढान्धकारे कुञ्जमन्दिरे निलीय स्थिता; कुतः ? विगलितनिजोत्कर्षात् । विशेषणगतो निजः स्वीय उत्कर्षो हरेरहमेव वल्लभा इत्येवंरूपस्तस्मात् । किंभूते हरौ ? साधारणप्रणये श्रीराधायामन्यगोपीतुल्यस्नेहे । असाधारणप्रणये वेति[6]च्छेदः । श्रीराधामन्तरा नान्यासु गोपीषु प्रीतिस्तस्मिन् । कीदृशे कुञ्जे ? [7]गुञ्जन्मधुव्रतमण्डलीमुखरशिखरे शब्दायमानभ्रमरसमूहे शब्दयुक्ताग्रभागे [8]वा । अतएव दीना दुःखिता । [9]विप्रलम्भः । विभावनालङ्कारः । "शिखरन्त्वग्रभागे स्यान्माणिक्ये शेखरेऽपि च" इति धरणिः । "प्रणये प्रेम्णि विश्रम्भः" [10]इत्यमरः (३.३.१५१) । "ईर्ष्यामाहुस्समानेषु मानदानादमर्षणम्" इति भरतः ॥१॥

1. गतां–इ. 2. निजोत्कर्षेण–अ. निजोत्कर्षवशा–फ. 3. वक्ष्यमाणमुवाच–अ.ब. 4. नास्ति–ह. 5. अन्यत्कुञ्जं–ग. 6. नास्ति–अ. 7. नास्ति–अ.ब.इ.फ.ग.ह. 8. नास्ति–ह.ज. 9. विप्रलम्भोऽयम्–इ.फ.ग.ह.ज. 10. प्रणयस्त्वमी। विश्रम्भ याच्ञाप्रेमाणो-अमरः ।

पञ्चमः प्रबन्धः

गुर्जरीरागे [1]प्रतिमण्ठताले

सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम् ।
चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥

पदद्योतनिका

विहरतीति । राधा रहः एकान्ते सखीमुवाच । [2]कीदृशी ? वने बृन्दावने हरौ कृष्णे विहरति [3]क्रीडति[4]सति विगलितनिजोत्कर्षाद्[5]गतसौभाग्यादीर्ष्यावशेनासहिष्णुतया अन्यतोऽन्यस्मिन् स्थले गता । [6]कीदृशे हरौ ? साधारणप्रणये [7]अन्यगोप्यां [8]तुल्यप्रेम्णि । अत एव क्वचिदपि लताकुञ्जे लतागृहे [9]लीना गुप्ता । कथम्भूते लताकुञ्जे ? [10]गुञ्जतां गम्भीरशब्दं कुर्वतां मधुव्रतानां भ्रमराणां मण्डल्या समूहेन मुखरशिखरे शब्दायमानाग्रगे; अतएव [11]दीना दुःखिता तापिता ॥१॥

जयन्ती

देवं ध्यातुं सङ्गतिं रचयति विहरतीति । राधा [12]कर्त्री । वने असाधारणः अन्यूनः अधिकः प्रणयः स्नेहो यस्मिन् तस्मिन् हरौ विहरति सति क्रीडति सति । विगलितः गतः निजः स्वकीयः उत्कर्षः सर्वातिशयप्रेमरूपः तस्मिन् । ईर्ष्या परोत्कर्षासहनं तस्याः वशात् मानसंज्ञकात् । "स्त्रीणामीर्ष्याकृतः कोपो मान इत्यभिधीयते" इति अन्यतः प्रदेशान्तरं गता प्राप्ता । गुञ्जन्तो मधुव्रताः भ्रमराः तेषां मण्डल्या मुखरं शब्दायमानं शिखरं उच्चभागो यस्मिन् तस्मिन् । क्वचिदपि इतराज्ञाते लताकुञ्जे लताच्छादितपरितोभागे लीना गूढा दीनापि प्रियविरहाद्दैन्यं प्राप्तापि लीनेत्यर्थः । रहः सखीं श्रीकृष्णक्रीडारहस्यकथनयोग्यां उवाच । मानकृतविरहिणीयम् । कुञ्जस्य सनादत्वेन वक्ष्यमाणवचनस्य अन्याश्राव्यत्वं तेन परकीयात्वं (च) व्यज्यते । हरिणीवृत्तम् ॥१॥

सञ्जीवनी

अमर्षणेन किमुवाचेत्यतः सञ्चरदित्यादिना श्लोकोक्तमर्थं गीतेनाह । गुर्जरीरागे प्रतिमण्ठताले । रागलक्षणं पूर्वोक्तमेव । "द्रुतत्रयेण [13]गातव्यं

1. परिमठताले–अ. प्रतिमण्ठताले–ब. 2. कथम्भूता राधा–क.ल.म. 3. नास्ति–ड. 4. नास्ति–ड.क. 5. निजसौभाग्यात्–क.ल.म. 6. कथम्भूते–क.ल.म. 7. अन्यगोपी–क.ल.म. 8. तुल्यप्रेमा–ल.म. 9. नास्ति–क. 10. लतासु गुञ्जतां–क. 11. दीनाऽपि दुःखिताऽपि–क.ल.म. 12. कर्ता–च. 13. ज्ञातव्यं–फ.

रासे हरिमिह विहितविलासं
स्मरति मनो मम कृतपरिहासम् ॥२॥

कुन्दश्च प्रतिमण्ठकः" इतिताललक्षणम् । हे सखि मम [1]मनः कृतापराधमपि हरिं इह कुञ्जमन्दिरे स्मरति । तद्यथा—

"केतकीकुसुमं [2]भृङ्गो [3]बाध्यमानोऽपि सेवते ।
दोषाः किं नाम कुर्वन्ति गुणाय [4]हतचेतसे ॥ इति

कीदृशम् ? रासे रासक्रीडायां विहितः कृतः विलासः क्रीडा येन । ध्रुवपदम् । पुनः [5]कीदृशम् ? सञ्चरता नानाप्रकारेण स्फुरताऽधरसुधामधुरेण ध्वनिना शब्देन मुखरितः शब्दितो मोहनो [6]विश्वमनोहरो वंशो येन तम् । पुनः [7]कीदृशम् ? चलितः [8]कश्चिन्मूर्छाविशेषेण [9]सात्त्विकोदयेन वा दृगञ्चलः [10]कटाक्षः चञ्चलश्चपलो मौलिः [11]शिखण्डाग्रभागो यस्य । कपोलयोः विलोलौ [12]चञ्चलाववतंसौ कर्णभूषणे यस्य तम् । कर्मधारयः । "पीयूषममृतं सुधा" इत्यमरः (१.१.४८) "[13]मौलिः किरीटं [14]केशाश्च" (इत्यमरः ३.३.१९३) । "[15]अवतंसौ द्वौ कर्णपूरे" इत्यमरः (३.३.२२७) ॥२॥

पदद्योतनिका

श्लोकोक्तमर्थं गीतेनाह—सञ्चरदिति । हे सखि मम मनः हरिं कृष्णं स्मरति । कथम्भूतं हरिम् ? सञ्चरता उद्गच्छताऽधरसुधा[16]मधुरध्वनिनाऽधरामृतमनोहरेण ध्वनिना [17]शब्देन मुखरितः शब्दितो मोहननामा वंशो [18]येन । पुन कीदृशम् ? चलितेति । चलितः आवर्जितो दृगञ्चलः कटाक्षो [19]यस्य, चञ्चलमौलिः [20]शेखरं यस्य, कपोले गण्डस्थले विलोलश्चञ्चलो वतंसः

---

1. पुनः—अ. 2. भ्रमरो—अ. 3. खण्ड्यमानोऽपि—इ.फ.ग.ह.ज. 4. हृतचेतसे—ग.ह. 5. किम्भूतम्—ज. 6. विश्वमोहनो—ग. 7. किम्भूतम्—ज. 8. कस्यचित्—इ.फ.ग.ह.ज. 9. सात्त्विकरसोदयेन—इ.फ.ह.ज. 10. कटाक्षो यस्य—इ.फ.ग.ह.ज. 11. शिखाग्रभागो—ज. 12. चञ्चलावतंसौ—अ.ब.इ.फ.ग.ह. 13. चूडा—अमरः 14. केशाश्च संयता मौलय इति—इ.फ.ग.ह.ज. 15. "पुंस्युत्तावतंसौ द्वौ कर्णपूरे च शेखरे" इत्यमरः—इ.फ.ग.ह.ज. 16. मधुरेण ध्वनिना मुखरितः—क.ल.म. 17. नास्ति—ड.क. 18. यत्र—ड. 19. एतस्य—ड. 20. शिखरो—क.

चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।
प्रचुरपुरन्दरधनुरनुरञ्जितमेदुर[1]मुदिरसुवेशम् ॥३॥

कर्णाभरणं यस्य सः [2]तम्; ततः प्रत्येकं कर्मधारयः । पुनः [3]कीदृशम् ? इह रासे गोपक्रीडायां विहितविलासं कृतक्रीडम् । पुनः [4]कीदृशं [5]हरिम् ? [6]कृतपरिहासं विहितविहासम् ॥२॥

जयन्ती

(सञ्चरदिति) गुर्जरी रागयतितालयोर्लक्षणमुक्तम् । सञ्चरन् वादनकाले पूरणार्थं विचलन् अधरः अधरोष्ठः तस्य सुधा अमृतं तेन मधुरः श्राव्यः ध्वनिः तेन मुखरितः मोहनः सङ्केतसूचकत्वाच्चित्ताकर्षः वंशः मुरलीसंज्ञकः यस्य तम् । चलिते तरङ्गिते दृगञ्चले नेत्रान्तौ यस्य स चासौ चञ्चलमौलिः । शिरस्थकिरीटं कपोलौ च; प्राण्यङ्गत्वादेकवद्भावः; यस्य स चासौ विलोलः पतितः चलितं वतंसं उत्तंसितमयूरपिच्छादिकृतं यस्य स चासौ तम् । विशेषणानां समासः । विलोलवतंसत्वं वंशवादकस्वभावः । तदुक्तिः स्वभावोक्तिः ॥ ध्रुवाया व्याख्या । मम मनः कृतः परिहासो येन तम् । इह रासे विहिताः रचिताः विलासाः येन तं स्मरति । यद्यपि स्मृतिगोचरस्य षष्ठी विहिता तथापि (द्वितीया) प्रयुक्ता । अत्र स्मृतेरलङ्कारता नास्ति । सादृश्याभावात् । सञ्चारी भावः ॥२॥

सञ्जीवनी

नन्वेवम्भूतः श्रीकृष्ण[7]स्तदा व्यासङ्गादिना न स्मर्तव्यः । सत्यम्; बलाच्चेतस्यायाति [8]किं कर्तव्यम् ? [9]किम्भूतः ? चन्द्रकेण विचित्रचिह्नेन [10]चारूणां मनोहराणां [11]मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयिता वेष्टिताः केशा येन । किञ्च प्रचुरैः बहुभिः पुरन्दरस्य [12]इन्द्रस्य

---

1. मुदित–अ.ब. 2. नास्ति–क.ल.म. 3. कीदृशं हरिम्–क.ल.म. 4–5. नास्ति–ड. 6. कृतपरिहासं कृतविनोदमेकाकिनीदृशं सुखं त्यक्त्वा क्वचिदपि गर्वेण गता । अतः परममूर्खा इति मत्वा हासं कृतवानित्यर्थः–क. 7. तदान्यासङ्गादिना–ब. 8. किं कर्तव्यमित्याह–ज. 9. कीदृशम्–फ.ग.ह.ज. कीदृशः–इ. 10. चारुरागं–अ.ब. 11. नास्ति–अ.ब.इ.फ.ग.ह. 12. नास्ति–अ.

धनुर्भिरनुरञ्जितः [1]चित्रितो मेदुरः स्निग्धो मुदिरः सानन्दो जलदो मेघः तद्वत्सुवेशं सुन्दरम् । अत्र नानामणिखचितहारमुकुटकेयूरादीनामिन्द्रधनुर्भिस्साम्यमिति [2]अद्भुतोपमेयम् । श्रीकृष्णस्य [3]मेघसाम्यम् "[4]शिखण्डश्च पिच्छबर्हे नपुंसके" इत्यमरः (२.५.३१) । "वेष्टितं स्याद्वलयिम्" इत्यपि (अमरः ३.१.९०) । "मुदिरः कामुकेऽम्बुदे" इति विश्वः (१०१.१२१) । "वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके" (इत्यपि; विश्वः; ११४.९) । [5]"समौ चन्द्रकमेचकौ" इत्यमरः (२.५.३१) । "मयूरो बर्हिणो बर्ही" [6]इत्यमरः (२.५.३०) । "मण्डलं वर्तुले प्रोक्तं समूहे विग्रहे [7]रवेः । आवृत्तौ [8]देशकालेऽपि मण्डलं क्षुद्रभूमिके" इति वैजयन्ती । भावोत्प्रेक्षा रूपकोऽलङ्कारः ॥३॥

पदद्योतनिका

चन्द्रकेति । चन्द्रकेण विचित्रवर्णचिह्नेन चारूणां शोभमानानां मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयिताः वलयाकारेण वेष्टिताः केशाः यस्य; अत एव प्रचुरेण विस्तीर्णेन पुरन्दरधनुषा [9]इन्द्रधनुषाऽनुरञ्जितश्चित्रितो मेदुरो [10]निबिडः स्निग्धो [11]मुदिरो मेघस्तद्वत्सुवेषं सुन्दरम् ॥३॥

जयन्ती

(चन्द्रकेति) चन्द्रकाः चन्द्रकान्तिमण्डलविशेषाः । तैः चारु उद्रिक्तवर्णत्वात्सुन्दरम् । मयूरस्य शिखण्डकाः शीर्षस्थतुल्याग्रभागाः तेषां मण्डलं समुदायः तेन वलयिताः वेष्टिताः केशाः यस्य तम् । प्रचुरैः पुरन्दरधनुर्भिः अनुरञ्जितः संयुतः मेदुरः गाढः मुदिरः मेघस्तद्वत्सुवेशः शोभनसंवेशः तम् । पीताम्बरपरिधानीयत्वेन नीलमेघश्याम इति वर्णितम् । अत्रापि सुकेशमिति पाठे मयूरशिखण्डच्छन्नत्वेन उपमानं प्रचुरपुरन्दरादिविशेषितमिति कल्पितोपमा ॥३॥

---

1. नास्ति–अ. 2. अभूतोपमेयम्–इ.फ.ग.ज. अभूतोपमेयः–ह. 3. नास्ति–अ.ब. 4. शिखण्डः पिच्छबर्हे नपुंसक इत्यमरः–ग. शिखण्डः पिच्छबर्हे तु नपुंसक इत्यमरः–फ.ह.ज. 5. नास्ति–अ.ब. 6. इत्यपि–इ.फ.ग.ह.ज. 7. रवौ–ग. 8. देशभागेऽपि–इ.फ.ग.ह.ज. 9. नास्ति–ड. 10. इति सान्द्रो मुदिरो–क. मेघस्तद्वत्सुवेषं–ल.म. 11. मेदुरो–ड.

गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ।
बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥४॥

सञ्जीवनी

ननु श्रीकृष्ण[1]स्त्वय्यनुरागरहितः अन्ययुवतिभिः सह क्रीडति; किमर्थं तं स्मरसीति; सत्यम् स गुणवां[2]स्तत्र (इत्याह)—गोपेत्यादिना । पुनः [3]कीदृशम् ? गोपकदम्बस्याभीरसमूहस्य या नितम्बवत्यो नार्यस्तासां मुखचुम्बनेन [4]लम्भितः [5]प्रापितो लोभो यस्य तम् । [6]अथ वा [7]नितम्बिनीभिः [8]स्वमुखचुम्बने लम्भितो लोभो येन तम् । तस्य तासु स्वभावजो स्नेहो नास्ति परन्तु बलात्कारेण ताभिश्चुम्बने लोभः कारित इति [9]भावः । किञ्च [10]बन्धुजीवो [11]बन्धूकपुष्पं तद्वत् (मधुरो) मनोहरो योऽधरपल्लवः पल्लवाकृतिरधरश्रेष्ठो यस्य तम् । यद्वा बध्नातीति [12]बन्धुः प्रणयस्तं जीवयतीति; स चासौ मधुराधरपल्लवो यस्य तम् । [13]पुनः उल्लसितेन [14]देदीप्यमानेन स्मितेनेष[15]द्धासेन शोभा यस्त तम् । यदि बन्धूकपुष्परागेण [16]मधुरपल्लवाधररागरञ्जितो भवति स च स्मितकुन्दकलिकया युतो भवति; तदाधरशोभा मनो हरेदित्यभूतोपमेयम् । "[17]रक्तकस्तु बन्धूको बन्धुजीवकः" इत्यमरः (२.४.७३) । "[18]सरसो [19]मधुरः प्रोक्तो मधुरोऽथ मनोहरः" इत्यनेकार्थः । "पल्लवोऽस्त्री [20]किसलयम्" इत्यमरः (२.४.१३) । उपमारूपकालङ्कारः ॥४॥

पदद्योतनिका

गोपेति । गोपकदम्बस्य आभीरसमूहस्य नितम्बवतीनां स्त्रीणां मुखचुम्बनेन लम्भितः प्रापितो लोभो [21]येन । [22]पुनः [23]कीदृशम् ? बन्धुजीवमिव

---

1. स्त्वदनुराग–ब. 2. तत्राह–इ.फ.ग.ह.ज. 3. कीदृशी–अ.ब. 4. नास्ति–अ. 5. प्राणितः–अ.ब. 6. यद्वा–ग. 7. तन्नितम्बवतीभिः–इ.फ.ह.ज. 8. मुख–ग. 9. नास्ति–ज. 10. बन्धुजीववत् बन्धूकपुष्पवत्–इ.फ.ग.ह.ज. 11. बन्धुकपुष्पवत्–अ.ब. 12. नास्ति–अ.ब. 13. नास्ति–अ.ब. 14. नास्ति–अ.ब. 15. हास्येन–इ.फ.ग.ह.ज. 16. मधुराधरपल्लवोऽधरराग–ज. 17. रक्तवस्तुश्च बन्धूको बन्धुजीकक:–ज. रक्तस्तु–ह.इ.ग. रक्तश्च बन्धुको–फ. 18. सरसोऽथ मधुः प्रोक्तो–ज. 19. मधुः प्रोक्तो–इ.फ.ग.ह. 20. किसलयमपि–इ.फ.ग.ह. किसलयमित्यपि–ज. 21. येन तम्–क. 22.–23. नास्ति–ड.

विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम् ।
करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥५॥

---

[1]जपापुष्पमिव [2]मधुरो वल्लभोऽधरपल्लवः ओष्ठपल्लवो यस्य । वन्धुजीवं [3]'दुपरिया' भाषायाम् । उल्लासितेनोत्कटेन स्मितेन शोभा यस्य तम् ॥४॥

जयन्ती

(गोपकदम्वेति) गोपकदम्वानां वल्लवगणानां नितम्ववत्यः नितम्बिन्यः स्त्रिय इति यावत् । तासां मुखानां चुम्बने लम्भितः प्राप्तः लोभो यस्य तम् । यद्यप्यत्र गोपनितम्ववतीकदम्वेति वक्तव्यम्; तदा यथान्यानेकगोपपणतः स्त्रीत्वेनास्य वा स्त्रैणत्वं प्रकाशते इति न तथेति व्याख्यातपाठ एव सम्यक् । वन्धुजीवं जपाकुसुमं तद्वन्मधुरः आरक्तः अधरपल्लवो यस्य तम् । अत्राधरपल्लवयोः परिणाम. पश्चात् वन्धुजीवेति वाचकलुप्तोपमा । अन्यथा उपमाया अयोगात् । "परिणामः क्रियार्थश्चेद्वि(षयी वि)षयात्मना" इति परिणामलक्षणम् । अधरपल्लवयोर्नादौ रूपकम । उपमायाः पल्लवेन सह सम्बन्धप्रसङ्गात् । वन्धुजीवकपदप्रयोगे चतुर्मात्रयतिगणभङ्गो भवति । गणेनात्राष्टके तालपातैक्यं कृतम् । 'फुल्लजपामधुरे' ति पाठस्सम्यक् । उल्लसितं उद्गतं स्मितं तेन शोभा यस्य तम् ॥४॥

सञ्जीवनी

पुनः कीदृशम् ? विपुलो विस्तीर्णः [4]पुलको रोमाञ्चो यत्र [5]ताभ्यां [6]भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां वलयितं [7]वेष्टितं बल्लवयुवतीनां गोपवधूनां सहस्रं समूहो येन तम् । अत्र वलयितशब्देनावज्ञया तासां वेष्टनमात्रं न तु गाढालिङ्गनचुम्वनादिकमिति भावः । सस्नेहालिङ्गनादिकन्तु [8]तस्यैव मय्येवमेतत्तात्पर्यमिति । किञ्च करयोश्चरणयोश्चोरसि च मणिगणानां [9]रत्नसमूहानां किरणै रश्मिभिर्भिन्नं विशेषेण नाशितं तमिस्रमन्धकारो येन तम् । अनेन प्रथमाभिसारसङ्गमे [10]मदीयाङ्गालङ्कारप्रकाशेन ध्वान्तनाशेनावकुण्ठित-

---

1. बन्धुजीवपुष्पमिव—क. मधूकपुष्पमिव—ल.म. 2. अधरो रसयुक्ताधरपल्लवो यस्य—ड. 3. दुपहरिया—ल.म. 4. नास्ति—अ.ब. 5. तासां—अ.ब. 6. नास्ति—ग. 7. चेष्टितं—अ.ब. 8. एव नास्ति—इ.फ.ग.ह.ज. 9. रत्नसमूहभूषणानां—ग. रत्नसमूहानां भूषणानां—फ.ह.ज. 10. मदीयालङ्कारेण ध्वान्तनाशेनेव कुञ्चितमुखीं—इ. मदीयालङ्कारप्रवेशेन ध्वान्तनाशेन वकुण्ठितमुखीं—अ.ब.ड.क. मदीयालङ्कारेण ध्वान्तनाशेनैव कुञ्चिमुखीं—ज.

जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटम् ।
पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥६॥

मुखीं मां दृष्ट्वा बलादानीय तां चेष्टां कृतवान् । तं क्षणमपि विस्मर्तुं [1]मन्मनो नार्हतीति प्रेमपराकाष्ठा दर्शिता; [2]स्वसौभाग्यातिशयो[3]ऽपि दर्शित इति भावः । करचरणोरसीति प्राण्यङ्गत्वादे[4]कवचनम् । "वेष्टितं स्या[5]द्वलयितेऽपि च" इति कोशप्रदीपे । "अन्धकारोऽस्त्रियां ध्वान्तम्" इत्यमरः (१.८.३) । "किरणोस्र[6]मयूखांशु" इत्यपि (अमरः १.४.३३) ॥५॥

पदद्योतनिका

विपुलेति । विपुलाः बहुलाः पुलका रोमोद्गमा ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं[7]वेष्टितं वल्लवानां आभीराणां [8]युवतीनां सहस्रं गोपिकावृन्दं येन। पुनः [9]कीदृशम् ? [10]करौ चरणौ उरश्च तेषां समाहारः [11]करचरणोरः तस्मिन् वर्तमानं, मणिगणयुक्तभूषणानां [12]किरणेन कान्त्या विभिन्नं [13]विदारितं तमिस्रमन्धकारो येन ॥५॥

जयन्ती

(विपुलेति ।) विपुलाः पुलकाः प्रोद्गतरोमाञ्चाः भुजानां पल्लवाः पाणयः; मृदुत्वेन पल्लवारोपो वा भुजे बोध्यः; तैः वलयितानि मण्डलीकृतानि वल्लवयुवतीनां गोपतरुणीनां सहस्राणि येन तम् । अर्थाद्रासक्रीडारचनं दर्शितम् । प्रत्येकं परस्परपाणिधारणेन मण्डलाकारयोषिन्मण्डले मध्ये तिष्ठन्तमिति भावः । करचरणोरसि, करौ च चरणौ च उरश्चेति द्वन्द्वैकवद्भावः; प्राण्यङ्गत्वात् । मणिगणभूषणानां किरणैः कान्तिभिः विभिन्नं तमिस्रं येन तम् ॥५॥

सञ्जीवनी

[14]पुनः स्वोत्कर्षमेव [15]प्रथमं कथयन्त्याह—जलदपटलेति । जलदपटले मेघसमूहे वलतो राजमानस्य; चलदिति पाठे चलतः स्फुरतः; इन्दोश्चन्द्रस्य

---

1. मम मनो–ग. 2. सुखसौभाग्यातिशयो–ग. 3. निर्दशित–ङ. नास्ति–ज. 4. एकत्वं बहुत्वेऽपि–इ.फ.ह.ज. 5. वलयितं वलयालिङ्गनेऽपि वेति–इ.फ.ग.ह.ज. 6. मयूखांशुरश्मिरित्यपि–ज. मयूखांशुरित्यपि–इ.फ.ग.ह. 7. नास्ति–ङ.क. 8. युवतीसहस्रं–क. युवतिसहस्रं–ल.म. 9. नास्ति–ङ. 10. करौ च चरणौ च–ल.म. 11. नास्ति–ङ. 12. किरणैर्दीप्त्या–क.ल.म. 13. दारितं–ङ. 14. पुनः किम्–इ. पुनः कीदृशम्–फ.ग.ह. नास्ति–ज. 15. प्रथयन्–इ.फ.ग.ह.ज.

विनिन्दकस्तच्छोभातिशायी चन्दनतिलकः [1]चन्द्राकृतिः [2]तिलको ललाटे यस्य तम्। पुनः कीदृशम्? गोपवधूनां [3]पीनौ पीवरौ पयोधरौ स्तनौ तयोः परिसरस्य पर्यन्तभागस्य प्रसरणशीलस्य वा मर्दनेन निर्दयं दयारहितं हृदयमेव [4]कपाटं कपाटवत् विस्तीर्णं हृदयं यस्य [5]तम्। कपाटपदस्यायं भावः—कपाटं प्रियधनरक्षणार्थं अप्रियनिवारणार्थं च दीयते। अत्र श्रीकृष्णचन्द्रस्य प्रियधनं [6]राधैव। [7]सा च हृदयेऽधितिष्ठतीति [8]तद्रक्षार्थमिति। अर्थान्तर[9]न्यासोऽयमलङ्कारः। उत्प्रेक्षारूपक इत्येके। "कपाटमररं तुल्ये" (इत्यमरः २.३.१७)। "पर्यन्तभूः परिसरः" इत्यपि (अमरः २.१.१४)। कपाटं कुञ्चिकामृते नोद्घाटितं भवति यथा तथा मां विना [10]हृदयालिङ्गनरस इति सूचितम्। मद्व्यतिरिक्तानां कं सुखं पाटयतीति[11]वा ॥६॥

पदद्योतनिका

जलदेति। [12]पुनः कीदृशं हरिम्[13]? जलदपटले मेघसमूहे [14]चलतस्सञ्चरतः इन्दोश्चन्द्रस्य विनिन्दकं समानं चन्दनतिलकं [15]चन्दगन्धकृततिलकं यत्र, तादृशं ललाटं यस्य। [16]अभूतोपमेयम्। [17]पुनः कीदृशम्[18]? पीनानां मांसलानां पयोधराणां स्तनानां परिसरस्य पर्यन्तदेशस्य [19]मर्दनेन निर्दयं दयारहितं हृदयकपाटं यस्य ॥६॥

जयन्ती

(जलदेति।) जलदपटले मेघमण्डले चलन् इन्दुः चन्द्रः, तं विनिन्दतीति विनिन्दकः; तत्तुल्य इत्यर्थः। 'देशीयदेश्यरिष्टाभसोदराद्या इवार्थका' इति वचनात्। आर्थी उपमा। तादृशश्चन्दनतिलकः वर्तुलाकारविन्दुः अर्धचन्द्राकारो वा यस्मिन् तत् ललाटं यस्य सः इति पुनः बहुव्रीहिः। पीनौ पयोधरौ कुचौ तयोः परिसरे परिमर्दने पीडने निर्दयं हृदयं अन्तःकरणमेव कपाटं फलकं यस्य तम्। हृदयपदस्य वक्षोरूपार्थकत्वे गाढालिङ्गनेनापि कुचमर्दनं युक्तम् ॥६॥

---

1. नास्ति–फ.ज. चन्द्राकृति–हृ.ग. 2. नास्ति–फ.ज. 3. पीनौ पीवरौ तीक्ष्णौ पयोधरौ तयोः–इ.हृ.ग. पीवरौ तीक्ष्णौ पयोधरौ तयोः–फ.ज. 4. नास्ति–ग. 5. नास्ति–अ.ब.इ. सः–फ. 6. श्रीराधैव–इ.फ.ग.हृ.ज. 7. तच्च हृदये तिष्ठतीति–इ.फ.ग.ज. तच्च तद्धृदये तिष्ठतीति–हृ. 8. तद्रक्षार्थं हृदयं कपाटपदेन गृहीतमिति–इ.फ.ग.हृ.ज. 9. न्यासोपमालङ्कारः–अ.हृ.ज.फ.ग. 10. तद्धृदया–इ.फ.ग.हृ.ज. 11. वा कपाटशब्दार्थः–इ.फ.ग.हृ.ज. 12. तः 13. पर्यन्तं नास्ति–ड. 14. चलनसंभजतेन्दोः–ड. चलनं संभजतः–क.ल.म. 15. चन्दनकृततिलकं–क.ल.म. 16. अद्भुतोपमेयम्–क. 17. तः 18 पर्यन्तं नास्ति–ड. 19. मर्दने–ल.म.

मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ।
पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम् ॥७॥

सञ्जीवनी

पुनः स्वोत्कर्षप्राधान्यमेव वर्णयन्त्याह—मणिमयेत्यादिना । [1]पुनः कीदृशम् ? मणिमये मणिखचिते मकरवन्मनोहरे; मणिमयमकरेण रत्नमत्स्येन [2]च मनोहराभ्यां [3]कुण्डलाभ्यां मण्डितौ [4]भूषितौ [5]कपोलौ यस्य तम् । पुनः कीदृशम् ? [6]उदारं [7]स्वलावण्यगुणोदारयुक्तम् । तल्लक्षणं [8]नाटचशास्त्रे—(२२.४०)

"दानमभ्युपपत्तिश्च तथा च प्रियभाषणम् ।
स्वजने च परे वाऽपि तदौदार्यमुदाहृतम् ॥" इति ।

[9]यन्मया चिन्तितं तत्सर्वं तत्क्षणमेव [10]पूरितवानिति; सः कथं विस्मर्तव्यः । पुनः (कीदृशम् ?) पीते वसने [11]यस्य पीतवसनं वा । [12]पुनः कीदृशम् ? अनुगता आश्रिता मुनयः [13]शुकादयो मनुजाः परीक्षिदादयः सुरा ब्रह्मादयः असुराः प्रह्लादादयः, त एव वराः श्रेष्ठाः [14]वरा वृन्दावननिवासिनो वा गोपीजनाः [15]परिवाराः सेवका यस्य तम् । [16]अथवा सर्ववरः श्रीगोपीजनलक्षणः श्रीराधारूपो वा परिवारः सेवको यस्य तम् । स्वभावोक्तिरलङ्कारः; [17]रसवदलङ्कारश्च ॥७॥

पदद्योतनिका

मणिमयेति । मणिमयेन मणिरूपेण मकरेण मनोहराभ्यां कुण्डलाभ्यां मण्डितोऽलङ्कृतो [18]गण्डो गण्डस्थलं यस्य । पुनः [19]कीदृशं हरिम् ? उदारमभीष्ट दातारम् । [20]पुनः [21]कीदृशम् ? [22]कृतपीताम्वरपरिधानम् । अनुगता

1. नास्ति–अ.ब. पुनः कीदृशे–इ. 2. वा–इ.फ.ग.ह.ज. 3. नास्ति–ग. 4. नास्ति–अ.ग. 5. गण्डौ कपोलौ–ह.ज. 6. नास्ति–अ.ब. 7. स्वलावण्योदारयुक्त–ग. स्वलावण्योदारगुणयुक्तम्–इ.फ.ह.ज. 8. दशरूपके–अ.ब.इ.फ.ग.ह.ज. 9. उदारपदेनेति यन्मया–इ.फ.ग.ह.ज. 10. पूरितवानसि–अ.ब. 11. वा यस्य–अ.ब. 12. नास्ति–अ.ब.इ.फ.ग.ज. 13. नास्ति–अ.ब. 14. नास्ति–अ.ब. नरा–इ. 15. नास्ति–अ.ब. 16. यद्वा–ग. 17. नास्ति–फ. 18. नास्ति–ड. 19. नास्ति–ड. 20–21. नास्ति–ड. 22. नास्ति–ड.ल.म.

**विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम् ।
मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम् ॥८॥**

आश्रिता मुनयो [1]यतयः मनुजा लोकाः सुरा [2]देवाः [3]असुरवरास्ते परिवारा परिजना यस्य ॥७॥

जयन्ती

(मणिमयेति ।) मणिमयाभ्यां प्रचुररत्नखचिताभ्यां मकरवन्मनोहराभ्यां मकराकाराभ्यां कुण्डलाभ्यां मण्डितौ गण्डौ यस्य तम् । कर्णालम्बिकुण्डलकान्तिविशिष्टगण्डमित्यर्थः । उदारं वदान्यम् । पीतं हेमाभं वसनं परिधानीयं यस्य तम् । अनुगताः मुनयः नारदाद्याः मनुजाः सुदामादयः सुराः इन्द्रादयः असुरेषु वरः श्रेष्ठः प्रह्लादः सः परिजनो यस्येत्यनेन सर्वसुरमित्रत्वं प्रह्लादान्यदैत्यशत्रुत्वं (च) व्यज्यते । रासक्रीडावलोकनार्थमागत्य यथायोगमुपसेवन्ते हरिमिति भावः ॥७॥

सञ्जीवनी

पुनः श्रीराधास्वातन्त्र्यमेवाह—विशदेति । पुनः कीदृशम् ? [4]विशदकदम्बतले मिलितं[5] विशदस्य स्वच्छस्य कदम्बस्य तले मूले मिलितं संलग्नम् । [6]मदर्थं मदपेक्षया [7]मदग्रत एव कदम्बस्य तले मूले गत्वा [8]क्रीडायां वा निलीय स्थितमिति भावः । पुनः [9]कीदृशम् ? कलेः प्रणयकलहस्य कलियुगस्य वा [10]कलुषं साधारणव्रजवधूभजनं तत्कृत[11]मालिन्यं शमयन्तं नाशयन्तम् । "त्वय्येव मम प्रीतिर्नान्यासु" इत्यादिप्रेमवाक्यैरित्यर्थः । पुनः कीदृशम् ? किमप्यनिर्वचनीयस्तरङ्गवदुद्गच्छदनङ्गः कामो यत्र तया दृशा दृष्ट्या मनसा हृदयेन च मामपि रमयन्तम् । [12]अत [13]एव सकलाभिज्ञं [14]हरिं मे मनः स्मरतीति सूचितम् । "कलिः स्यात्कलहे शूरे [15]कलिरन्त्ययुगे युधि" इति विश्वः (१०४.४८) "[16]कलुषञ्चाविलैनसोः" इति च विश्वः (११८.१४) । विभावनालङ्कारः ॥८॥

---

1. ऋषयः–क. 2. नास्ति–ड. 3. असुरा दैत्याः–क. असुरा दैत्यवराः–ल.म. 4. तः 5. पर्यन्तं नास्ति–अ.ब.इ.फ.ह.ज. 6. नास्ति–अ.ब. 7. अग्रत एव–फ.ह.ज. अग्रत इव–ग. 8. मया सह क्रीडार्थं वा–इ.फ.ग.ह.ज. 9. नास्ति–अ.ब.इ.फ.ग.ज. 10. कलुषं भयं–ज. 11. मालिन्यं च–ह. 12–10.नास्ति–अ.ब. 14. नास्ति–ग. 15. कलिरन्त्ययुगेऽपीति–अ.ब. कलिरन्त्ययुगेष्वपीति–फ.ज.ह.ग. 16. कलुषन्त्वाविलैनसोः–ह.फ.ग.

श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ।
हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम् ।।९।।

पदद्योतनिका

विशदेति । विशदकदम्वतले विमलकदम्बतले मिलितमुपस्थितम् । पुन: [1]कीदृशम् ? [2]कलिकलुषभयं [3]कलिकालाज्जातपापाद्भयं शमयन्तं [4]नाशयन्तम् । [5]पुन: [6]कीदृशम् ? ममापि किमपि अनिर्वचनीयं यथा स्यात्तथा तरङ्गदुद्गच्छन्ननङ्गो यया तादृश्या दृष्टचा मनसा हृदयेन च [7]रमयन्तम् ।।८।।

जयन्ती

(विशदेति ।) विशदं निर्मलं च तत् कदम्बस्य तले तदध:प्रदेशे मिलितं सर्वसमुदाययतम् । कलि: चरमयुगं तत्र भवं कलुषं पापं तस्य भयं शमयन्तं नाशयन्तम् । किमपि यत्किञ्चित् तरङ्गत् चलन्ती अनङ्गदृक् कामोद्दीपनदृक्, तया । अनङ्गविशेषणं वा । मनसा मामपि रमयन्तम् । साधारणप्रणयेन क्रीडन्नपि लोचनेन मामवलोकयन्तमिति भाव: । अनेन तस्यापि सानुरागत्वं दर्शितम् । एकस्या एव अनुराग(श्चेत्) रसाभासापत्तेः ।।८।।

सञ्जीवनी

गीतोक्तं सङ्ग्रहेणाह—श्रीजयदेवेति । श्रीजयदेवकवे: भणितं गीतं [8]सम्प्रति सर्वदैव पुण्यवतां[9] श्रीराधाकृष्ण स्मरण(ङ्कुर्वतां) पुण्यजनानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं तल्लभ्यमित्यर्थ:; न चतदन्यैर्लभ्यमित्यर्थ:[10]। अतिसुन्दरं [11]मनोहरं [12]व्रजवधूमोहकारि च मधुरिपो[13]दैत्यशत्रोरमृतवसन्तशत्रोर्वा श्रीकृष्णस्य रूपं यत्र । कलौ वहूनां रागिणां शृङ्गारादि[14]प्रवृत्तानामनायासेनैव श्रीकृष्णस्मरणं जातमिति भाव: ।।९।।

[15]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालि—भट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां पञ्चम: प्रबन्ध: ।।५।।

---

1. नास्ति—ड. 2. नास्ति—ड. 3. कलिजातपापभयशमयन्तं—ड. 4. नास्ति—ड.क. 5–6. नास्ति—ड. 7. रमयन्तं इति; सम्भोगं कृतवानित्यर्थ:—क. 8. त: 9. पर्यन्तं नास्ति—अ.ब. 10. भाव:—इ.फ.ग.ह.ज. 11. मोहनं—इ.फ.ग.ह.ज. 12. नास्ति—फ. 13. दैत्यशत्रोर्वा निभृतवसन्तशत्रोर्वा—ज. 14. प्रकृतीनां—ग. 15. नास्तीयं पुष्पिका—अ.ग.इ.फ.ग.ह.ज.

षष्ठः प्रबन्धः

गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते
वहति च परितोषं दोषं विमुञ्चति दूरतः ।
युवतिषु वलत्तृष्णे कृष्णे विहारिणि मां विना
पुनरपि मनो वामं कामं करोति करोमि किम् ॥१॥

पदद्योतनिका

(श्रीजयदेवेति ।) श्री जयदेवेन भणितं गीतं भक्तानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं भवत्विति [1]शेषः । [2]कथम्भूतम् ? अतिसुन्दरं मोहनकारकं मधुरिपुरूपं कृष्णरूपं यस्मिन् ॥९॥

[3]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां पञ्चमः प्रबन्धः ॥५॥

जयन्ती

(श्री जयदेवेति ।) श्रीजयदेवस्य भणितं वचनम् । अति सुन्दरश्चासौ मोहनश्चासौ मधुरिपुः कृष्णः तस्य रूपं यस्मिन् तत् । प्रतिपाद्यप्रतिपादक-सम्वन्धेन तद्वदित्यर्थः । सम्प्रति कलिकाले पुण्यवतां सुकृतिनां हरिचरणयोः स्मरणं प्रति तदुद्दिश्य । चरणशब्दः पूजायां वा । हरिस्मरणमित्यर्थः । अनुक्त-रूपं युक्तम् । एतदष्टपदीपठनेन भगवद्ध्यानं भवतीति भावः ॥९॥

[4]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां पञ्चमः प्रबन्धः ॥५॥

सञ्जीवनी

नन्वयं त्वां विहायान्यवधूभिर्विहरति तं किमिति त्वं वारं वारं स्मरसि; सत्यम्; गुणवान् विलासी चेत्याह—[5]गणयतीति । हे सखि मम [7]मनः पुनरपि वारं वारं [7]श्रीकृष्णे काममभिलाषं [8]करोति; किमहं करो-

---

1. अध्याहारः–क.ल.म. 2. नास्ति–ड. 3. इति श्रीगीतगोविन्दे पञ्चमः प्रबन्धः–ड. नास्ति–क.ल.म. 4. नास्तीयं पुष्पिका–च. 5. गणय-तीत्यादिना–हृ.ज.इ. 6. नास्ति–अ.ब. 7. कामं श्रीकृष्णेऽभिलाषं–अ.ब. 8. करोतीत्यन्वयः–ज.

मीत्यन्वयः । अनेन मानशैथिल्यमनुग्रहश्चोक्तः । कीदृशे [1]श्रीकृष्णे ? युवतिषु व्रजवल्लवीषु वलन्ती वर्धमाना तृष्णाऽभिलाषो [2]यस्य । अत एव मां विना विहारिणि क्रीडाशीले । [3]यद्वा पूर्वं विहारिणि नेदानीं महत् दुःखमिति । कीदृशं मनः ? वामं प्रतिकूलं; विरक्तानुरागित्वात् । वामत्वे हेत्वन्तरमाह—गणयतीत्यादि । तस्य सौन्दर्यादीनां गुणानां ग्रामं समूहं गणयति परिसंख्याति । [4]न [5]तु दोष[6]लेशमपि । [7]तद्गुणस्वभावोऽयम्; वामत्वं पश्येत्यर्थः । भामं [8]क्रोधं भ्रमाद्विभ्रमादपि नेहते न गच्छति । किन्तु प्रतिदोषं [9]तद्द्रष्टुं चेष्टां करोतीत्यर्थः । एतेन श्रीकृष्णगुणसमूहगाने(ने)र्ष्याभावस्तन्मूलो मानश्च गत इति [10]ध्वनितम् । तत्र कारणमाह—तादृशेऽपि च परितोषं [11]सन्तोषं वहति । किन्तु मामृतेऽन्यनायिकाक्रीडासञ्जातं दोषं दूरतः [12]दूरात् विमुञ्चति [13]त्यजति । किन्तु तद्गुणानेव पश्यतीत्यर्थः । [14]तद्यथा—

अरतिरियमुपैति [15]सा न निन्दा
गणयति तस्य मनो गुणान् न दोषान् ।
विगलति रजनी न सङ्गमाशा
व्रजति तनुस्तनुतां न चानुरागः ।। इति ।

"[16]ग्रामः स्वरे संवसथे बन्धे शब्दादिपूर्वकः" इति विश्वः (८९.१४) । "भामः क्रोधे रवौ दीप्तौ" इति च । "वामं सव्ये प्रतीपे च" इति (विश्वः ८९.२२) । "कामः स्मरेऽभिलाषे च" इति च (विश्वः–८९.९) ।।१।।

पदद्योतनिका

इदानीं राधायाः [17]कृष्णे वसति सति चेतसोऽवशत्वमाह—गणयतीति । हे सखि मम [18]मनश्चित्तं पुनरप्यधुना कृष्णे काममिच्छां करोति किं करोमि ।

---

1. नन्दकुमारे–ग. 2. यत्र–अ.ब. 3. अथवा–इ. 4–5. नास्ति–अ.ब. 6. लेशमपि पश्यतीति–इ.फ.ग.ह.ज. 7. तत्तद्गुण–फ. 8. क्रोधः–ह.ज. 9. नास्ति–अ.ब. द्रष्टुं–ज. 10. ध्वनिः–ग. 11. नास्ति–ग. 12. दूरादपि मुञ्चति–इ.फ.ह.ज. 13. नास्ति–अ.ब. 14. नास्ति–अ.ब. 15. मां न निद्रा–अ.ब. माननिद्रा–ह.ज. 16. ग्रामः स्वरे संवसथे वृन्दे शब्दादिरूपकः–इ. ग्रामः स्वरे समूहे च बन्धे शब्दादिरूपकः–ज. 17. कृष्णे वसतश्चेतसो–क. 18. मनः पुनः कृष्णे–ड.

निवृत्तावुपायान्तरं नास्तीत्यर्थः । [1]कीदृशे [2]कृष्णे ? युवतिषु गोपीषु वलत्तृष्णे जाताभिलाषे । पुनः [3]कीदृशे ? मां विना विहारिणि क्रीडाशीले । कीदृशं मनः ? [4]वाममवशमित्यर्थः । वामत्वकारणमाह—मम मनः सापराधस्यापि कृष्णस्य गुणग्रामं गुणसमूहं गणयति । भ्रमादपि भ्रामं विस्मरणं नेहते न चेष्टते । [5]भाममिति पाठे [6]भामं क्रोधं नेहते [7]न [8]वाञ्छति । [9]तद्गुणाकर्णनेन परितोषं [10]सन्तोषं वहति, दोषं [11]मदीयावज्ञादिकं दूरतो विमुञ्चति [12]परित्यजति ॥१॥

जयन्ती

एवं साधारणप्रणयेऽपि तस्मिन् महाप्रणय इत्यतस्तत्सङ्घटनार्थं यत्नः कर्तव्य इत्यग्रिमाष्टपदीमवतारयितुमाह—गणयतीति । ममेति शेषः । मनः वामं वक्रं अनुगते सुरादिकं च । गुणग्रामं सद्गुणसमुदायं मनसा मामपि रमयन्तमित्यादि गणयति संख्यानं करोति । भ्रमादपि अविचारादपि भ्रामं भ्रमोऽत्यन्तं तदन्यत्र विहारं नेहते न काङ्क्षति । परितोषं सन्तोषं वहति । दोषं मदतिरिक्तनारीरम्भणरूपं 'श्लिष्यति कामपी' त्यादिकं प्रत्यक्षदृष्टं दूरतो विमुञ्चति । न गणयतीत्यर्थः । पुनरपि कामं अभि(लाषं) करोति; किमहं करोमि ? बुद्धया परासक्ता न सेव्या इतिरूपया बोध्यमानमपि तमेव काङ्क्ष(त)इति भावः । प्रतिकूलं युवतिषु इतरासु वलन्ती भवन्ती तृष्णा अभिलाषो यस्य तस्मिन् । मां विना मदृते, मां त्यक्त्वा विहारिणि क्रीडापरे कृष्णे । विहारिणि इति विधेयविशेषणं वा । अत्र 'कृषु न' इति प्रकृतिप्रत्यययोर्मध्ये तवर्गप्रथमागमः । 'ष्टुनेति' ष्टुत्वं; 'रषाभ्या' मिति णत्वं (च) । एवं वाक्यात्तकारसिद्धिः—

"अघोषादूष्मणो ह्यूर्ध्वं स्पर्शमात्रे समास्थिते ।
सक्तत्स्पर्शसंस्थानं तन्मध्ये प्रथमागमः ॥

हरिणीवृत्तम् ॥१॥

1–2. नास्ति–ङ.ल.म. 3. नास्ति–ङ. 4. वामत्वे कारणमाह–क.ल.म. 5–6. भ्रामम्–क.ल.म. 7–8. नास्ति–क.ल.म. 9. तद्गुणकथनेन–ल.म. 10. नास्ति–क.ल.म. 11. स्वकीयावज्ञादिकं–ल.म. तदीयावज्ञादिकं–क. 12. नास्ति–ल.म. परित्यजतीत्यर्थः–क.

गौडमालवरागे एकतालीताले

निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।
चकितविलोकितसकलदिशा रतिरभसरसेन हसन्तम् ॥
सखि हे केशिमथनमुदारं रमय मया सह मदनमनोरथ-
भावितया सविकारम् ॥२॥

सञ्जीवनी

एकतालीताले मालवरागे ।

"एकताली त्रिधा प्रोक्ता गीतशास्त्रविशारदैः ।
रामा च चन्द्रिका तद्वद्विपुलेत्यथ लक्षणम् ॥
द्रुतमेकं भवेद्यत्र स तालः [1]खण्डसंज्ञितः ।
रामा तेनैकताली तु कीर्त्यते गायकोत्तमैः ॥"

रागलक्षणन्तु पूर्ववदेव । इदानीं विरहोत्कण्ठिता राधा सखीं प्रत्याह—निभृते-त्यादिना । [2]तल्लक्षणन्तु—

उद्दाममन्मथमहाज्वरवेपमानां
रोमाञ्चकण्टकितमङ्गकमुद्वहन्तीम् ।
संवेदवेपथुघनोत्कलिकाकुलाङ्गी—
मुत्कण्ठितां वदति तां भरतो मुनीन्द्रः ॥ इति ॥

[3]गीतार्थस्तु—हे सखि मया सह केशिमथनं, प्रशस्ताः केशा यस्य सः[4]केशी कामः; तमप्यात्मसौन्दर्येण मथ्नाति क्षोभयति । केशी चासौ मथनश्च तमिति । [5]अथवा नायकसामर्थ्यख्यापनाय केशिमथनपदोपादानम् । [6]तं केशिमथनं मन्मथमथनं[7]श्रीकृष्णं रमय क्रीडां कारय । कीदृश्या मया ? निभृतनिकुञ्जगृहं गतया एकान्तनिबिडलताच्छादितमन्दिरं प्राप्तया । कीदृशम् ? निशि रात्रौ रहस्येकान्ते निलीय [8]तिरोभूय वसन्तं तिष्ठन्तम् । तदवलोकनार्थं कुञ्जमन्दिर-गतां मां दृष्ट्वा सा राधा मां मा पश्यत्विति कुतर्कमत्प्रतारणाय रहःस्थितमिति भावः । [9]चकितं सभयं यथा स्यात्तथा विलोकिता दृष्टाः [10]सकलाः समस्ता दिशो यया येन वा तया तं च श्रीकृष्णमभिसरन्तीं मां कृष्णो मार्गे मा पश्यत्विति

---

1. खण्डिसंज्ञितः–ग. 2. उत्कण्ठितालक्षणम्–इ.फ.ग.ह.ज. 3-4. नास्ति–अ.ब. 5. यद्वा–ग. 6. तः 7. पर्यन्तं नास्ति–अ.ब. तं केशिमथं श्रीकृष्णं–फ.ग. 8. तिरोवसन्तं–ग. 9. सचकितं–ज. 10. सर्वाः–इ.फ.ग.ह.

सभयं सर्वदिक्षु पश्यतीति भावः। किञ्च, [1]रत्युत्साहस्तद्रभसो वेगो रसः शृङ्गाराख्यस्तेन हसन्तं सुरतकालसमयार्थमग्रस्थितमपि मामियं न पश्यतीति हसन्तमिति भावः।

[2]ननु मयार्थितः श्रीकृष्णो नायास्यतीत्याह– [3]उदारं उदारस्वभावं; अत एव [4]त्वत्प्रार्थितमवश्यं दास्यतीति भावः[5]। कीदृश्या ? [6]मदनस्य कन्दर्पस्य मनोरथः इच्छा तद्युक्तो यो भावः रत्याख्यस्तज्जातया प्राप्तया वा। तारकादित्वादितच्। कीदृशम् ? मदनजनित[7]विकारसन्तापसहितम्। पदद्वयेनानेन परस्परानुरागजनितः शृङ्गाररसः पुष्टो भवतीति भावः। "भावितं वासिते प्राप्ते" इति विश्वः(५५.९३)। "निभृतं सम्भृते[8]गुरुः" इति यादवः। "रभसो वेग उत्साहः" इत्यमरः(?)। विभावन[9]विशेषालङ्कारौ ॥२॥

पदद्योतनिका

पुनरपि राधा [10]गीतेनाह—निभृतेति। हे सखि त्वं केशिमथनं कृष्णं मया सह रमय क्रीडां कारय। कीदृशम् ? उदारं महान्तम्। [11]कथम्भूतया ? मदने मनोरथः इच्छा तस्मिन् भावितया साभिप्रायया। [12]कीदृशम् ? सविकारं भावसहितम्। [13]पुनः कीदृश्या मया[14] ? निभृतं गूढं यन्निकुञ्जगृहं [15]लतागृहं गतया [16]तत्प्राप्तया। पुनः कथम्भूतं कृष्णम् ? निशि रात्रौ रहसि एकान्तस्थले निलीय[17]तिरोभूय वसन्तं तिष्ठन्तम्। पुनः [18]कथम्भूतया[19]मया ? चकितं सभयं यथा स्यात्तथा विलोकिता दृष्टाः सकला दिशो यया। पुनः [20]कथम्भूतं [21]कृष्णम् ? [22]रतेः रभस उत्साहस्तस्य भरेणाधिक्येन हसन्तं सस्मितमुखम्। अस्मिन् गीते पूर्वार्धं राधाविशेषणं उत्तरार्धं [23]कृष्णस्य ॥२॥

जयन्ती

(निभृतेति।) निभृतं निविष्टं निकुञ्ज एव गृहं गतया। चकितेन भयसम्भ्रमेण विलोकिताः सकलाः दिशः यया तया। अन्यशङ्कातः परितः

---

1. रतिषूत्साहः–इ. 2. तः 5. पर्यन्तं नास्ति–ज. 3. नास्ति–अ.ब. 4. त्वद्वाञ्छित–इ.फ.ग.ह. 6. नास्ति–अ.ब.इ.फ.ग.ह. 7. विकारस्सन्तापस्तेन सहितम्–ज. 8. गुप्तः–इ.ह.ग.ज. 9. विशेषावलङ्कारौ–इ.फ.ग.ह.ज. 10. गीतेन सखीमाह–क.ल.म. 11. कथम्भूतया मया–क. 12. कथम्भूतं हरिम्–क.ल.म. 13. तः 14. पर्यन्तं नास्ति–क. पुनः–ड. कीदृश्या मया–ल. म. 15. नास्ति–ड. 16. प्राप्तया–ड.ल.म. 17. तिरोहितीभूय–ल.म. 18-21. नास्ति–ड. 22. नास्ति–क. 23. कृष्णस्येति बोद्धव्यम्–क.

प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम् ।
मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम् ॥३॥

अवलोकयन्त्या प्राप्तया निशि रात्रौ रहसि इतरवधूभ्यः निलीय आच्छाद्य वसन्तं गूढतया परानविदितं [1]रतिरभसवशेन सम्भोगाभिलाषेण हसन्तम् । ध्रुवायाः क्रियान्वयः । हे सखि त्वं मया सह राधया सह । मदनमनोरथैः नानाविध-सल्लापादिभिः चुम्बनबन्धादिकरणाभिलाषरूपः भावितया उक्तया मया अत एव सविकारं मानसविकारसहितम् । उदारं केशिमथनं केशिनामकदैत्यहन्तारं रमया-योजय । अत्र कर्तृकर्मणोः तृतीयाद्वितीयायुक्तविशेषणानि क्रमेण योज्यानि । यथाक्रमं तृतीयान्तविशेषणहेतुकानि प्रायः श्रीकृष्णविशेषणानीति न व्यवहित-त्वदोषः ॥२॥

सञ्जीवनी

पुनः कीदृश्या ? [2]प्रथमसमागमलज्जितया [3]प्रथमसङ्गेन जातलज्जया । एतेनानयोर्माधुर्यातिशयः प्रत्यङ्गं नूतनत्वञ्च नायिकालज्जादिगुणोऽपि सूचितः । एनमुद्दिश्यागता कथमस्याग्रे यास्यामीति लज्जा । क्षणे क्षणे [4]पल्लवतामुपैति तदेव रूपं रमणीयताया इति [5]भावः । कीदृशम् ? पटु[6]नायिकानुग्रहरूपाणि [7]यानि चाटुशतानि मधुरप्रियवचनशतानि तैरनुकूलमनुग्रहकारकमनुनयपरं वा । [8]नेयं चतुरेति विज्ञाय [9]चतुरानुनयः कर्तव्य इति भावः । पुनः कीदृश्या ? मृदु कोमलं मधुरं कर्णामृतं [10]स्मितमीषद्धास्ययुक्तं भाषितं यस्याः तया । कीदृशम् ? स्मितवचनादिना शैथिल्यमापादितं जघनस्थितं दुकूलं पट्टवस्त्रं येन । एतेन नायकचूडामणिश्रीकृष्णदर्शनादेव दृढबद्धा नीवी स्वयमेव स्खलिता तदवलम्बितं वासस्तेनापि गृहीतमिति सूचितम् । उक्तं [11]भरतेन (अमरु-शतके)—

"कान्ते तल्पमुपागते शिथिलिता नीवी स्वयं बन्धनात्" इति । उक्तं च रतिरहस्ये—

---

1. 'रतिरभसवशेन' इति–च. पाठः । 2. नास्ति–अ.ब.इ.ग.ह. 3. प्रथमसङ्गवज्जातलज्जया–इ.ज. प्रथमसमागमजातलज्जया–ग. नास्ति–फः 4. यन्नवतामुपैति–ज. 5. माघः–इ.फ.ग.ह.ज. 6. नायिकाग्रहरूपाणि–इ.फ.ग.ह.ज. 7. नास्ति–अ.ब.ज. 8. वनेयं चरतीति–अ.ब. 9. त्वयानुनयः–ज. 10. स्मितमीषद्धास्यं तद्युक्तं–ज. 11. भारते–ग. भरते–इ.फ.ह.ज.

किसलयशयननिवेशितया चिरमुरसि ममैव शयानम् ।
कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥४॥

"ओष्ठाग्रं स्फुरतोक्षणे विचलतः कूपोदरे मत्स्यव—
द्धम्मिल्लः कुसुमाकुलो[1] विगलति प्राप्नोति बन्धं पुनः ।
प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते
नीवी च स्खलति स्थिताऽपि सुदृढं कामेङ्गिते योषिताम्" ॥

इति । "जघनं [2]कटेरधोभागः" इति हारावलिः । "चाटुभरं प्रियोक्तिः स्यात्" इति रत्नमाला । रसवदलङ्कारो विभावना वा ॥३॥

पदद्योतनिका

(प्रथमसमागमेति ।) प्रथमसमागमेन नूतनसान्निध्येन लज्जितया लज्जायुक्तया । [3]कीदृशम् ? वैलक्षण्यदूरीकरणाय पटूनि कुशलानि चटुशतानि तैरनुकूलं [4]आनुकूल्यकारकम् । मृदु कोमलं मधुरं स्मितपूर्वकं भाषितं यस्या[5]स्तया । [6]शिथिलीकृतजघनदुकूलं श्लथीकृतं जघनदुकूलं जघनस्थित-पट्टवस्त्रं येन ॥३॥

जयन्ती

(प्रथमसमागमेति ।) प्रथमसमागमेन लज्जितया लज्जापराधीन-त्वात् । अत एव पटूनि समर्थानि चाटूनि प्रियवचनानि तेषां शतैः अनुकूलं लज्जया रतिपराङ्मुखीं तत्कालोचितप्रियभाषणैः अभिमुखीकुर्वन्तमित्यर्थः । अत एव मृदूनि पेशलानि मधुराणि श्राव्याणि स्मितसहितभाषणानि यया तया । शिथिलीकृतं जघनदुकूलं येन तम् । तद्वन्मदनोद्दीपितमदनया मयैव विवस्त्रीकृतमित्यर्थः ॥३॥

सञ्जीवनी

पुनः कीदृश्या ? किसलयशयने नवपल्लवरचिततल्पे सख्या श्रीकृष्णेन वा निवेशितया । कीदृशम् ? चिरं ममैवोरसि शयानं सुप्तम् । शयानमिति

1. विगलितः–अ.ब.इ.फ.ग.ह.ज. 2. कट्यधोभागः–ज. 3. कथम्भूतं कृष्णम्–क.ल.म. 4. अनुकूल–ड. 5. तस्याः–ड. सा तया–क.ल.म. 6. शिथिलीकृतं जघनबन्धनं–ड. शिथिलीकृतं जघनबन्धनं शिथिलीकृतजघन-दुकूलं कटिस्थपट्टवस्त्रं यया–क.

बहुकालालिङ्गनापेक्षोक्ता[1]। पुनः कीदृश्या ? कृते परिरम्भचुम्बने यया। [2]एतेन जघनोप[3]श्लेषणं ओष्ठचुम्बनञ्च श्रीकृष्णस्य तया कृतमिति भावः। तद्यथा पञ्चसायके—

"जघनकलितकान्तश्रोणिरङ्गोपरिष्टात्
व्रजति यदिह नारी स्रस्तकेशोत्तरीया ॥" इति।

चुम्बनमप्युक्तम् (पञ्चसायके)–

"ओष्ठेन कान्तस्य मुखौष्ठयुग्मं
[4]निपीड्य जिह्वाञ्चिततालुभागम्" इति।

[5]कीदृशम् ? परिरभ्य आलिङ्ग्य कृतं मदीयाधरपानं [6]येन। एतेन लालाटिकमालिङ्गनादिकमप्युक्तम्। यथा–

"अन्योन्यसंसक्तमुखं कपोलं
[7]नेत्रं ललाटं हृदयं च बाहू।
सानन्दभावं श्रममीलिताक्षं
लालाटिकं तत्त्वविदो वदन्ति ॥ इति।

[8]कृतेत्यादिना सुरतप्रेमादिदाने नाथायत्तं ज्ञेयम् ॥४॥

पदद्योतनिका

किसलयेति। किसलयशयने पल्लवकृतशय्यायां निवेशितया [9]उपवेशितया। ममैवोरसि वक्षःस्थले चिरं शयानम्। कृतालिङ्गनमित्यर्थः। कृतं परिरम्भणपूर्वकमालिङ्गनपूर्वकं चुम्बनं यया [10]सा। परिरभ्यालिङ्ग्य कृतमधरपानमोष्ठपानं येन ॥४॥

जयन्ती

(किसलयेति।) किसलयशयने पल्लवशय्यायां निवेशितया मृदुतया तेन पातितया। चिरं बहुकालं ममैव उरसि शयानं मां पातयित्वा स्वयमुपरि आलिङ्गितमित्यर्थः। कृतं परिरम्भणं आलिङ्गनं चुम्बनं यया। अत एव परिरभ्य आलिङ्ग्य कृतं अधरपानं अधरोष्ठचुम्बनं येन तम्। आदौ नायिकारब्धसम्भोगशालिनमित्यर्थः ॥४॥

---

1. इति भावः इत्यधिकम्–इ.फ.ग.ह.ज. 2. नास्ति–अ.ब. 3. श्लेषेण–अ.ब. 4. निनीय जिह्वा विततास्तु भागमिति–इ.फ.ग.ह.ज. 5. पुनः कीदृशम्–ग.ह.ज. 6. येन तम्–ग. 7. नेत्रे–फ. 8. कृताधरपानमिति–इ.फ.ग.ह.ज. 9. नास्ति–क. 10. नास्ति–ङ.

अलसनिमीलितलोचनया पुलकावलिललितकपोलम् ।
श्रमजलसिक्तकलेवरया वरमदनमदादतिलोलम् ।।५।।

सञ्जीवनी

[1]पुनः कीदृश्या ? [2]अलसे आलस्ययुक्ते निमीलिते मुद्रिते लोचने यस्याः तया । एतेनाङ्गिकः कामोत्सवः कथितः । यथा—

"यत्र मूर्धानमारभ्य पादपर्यन्तिकाः क्रियाः ।
अङ्गेन विहिता यस्मात्तस्मादाङ्गिकमुच्यते" ।। इति ।

कीदृशम् ? पुलकानां रोमाञ्चानां आवल्या पङ्क्त्या ललितौ मनोहरौ कपोलौ यस्य तम् । एतेन सात्त्विकभावोदयेन शृङ्गार[3]रसस्य स्थिरता कथिता । भरतोक्ताः—

"स्मरणे सङ्गमे चैव प्रियस्यालोकने तथा ।
[4]हेतुत्रयं समासाद्य सात्त्विकः सम्प्रवर्तते ।।
स्वेदः कम्पोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विकाः [5]स्मृताः ।।"

कीदृश्या ? श्रमजलेन सुरतानन्द[6]स्वेदजलेन सिक्तं [7]युक्तं सम्पूर्णं वा कलेवरं शरीरं यस्यास्तया । एतेन सुरतानन्दपूर्तिरुक्ता । [8]कीदृशं श्रीहरिम्? [9]वरमदनमदातिलोलं उत्कृष्टकामगर्वादतिलोलं चञ्चलं [10]सतृष्णम् । "प्रचुर-श्रेष्ठयोर्वरः" इति विश्वः । "काये कलेवरम्" इत्यपि । रसवदलङ्कारः ।।५।।

पदद्योतनिका

अलेसेति । अलसेन सुरतसौख्येन निमीलिते मुद्रिते लोचने [11]नेत्रे [12]यस्याः सा । पुलकावल्या रोमाञ्चपङ्क्त्या ललितौ मनोहरौ कपोलौ यस्य तम् । श्रमजलेन [13]सुरतजनितवारिणा सिक्तं कलेवरं [14]यस्याः सा तया । वरमदन-मदादुत्तमकामजनितहर्षादतिलोलमतिचञ्चलं, सतृष्णमित्यर्थः ।।५।।

---

1. नास्ति–अ.ब.इ.ग. 2. नास्ति–ग. 3. रसास्यास्थिरता कथिता । भरतोक्तः–इ.फ.ग.ह.ज. 4. पङ्क्तिरियं नास्ति–अ.ब.इ.फ.ग.ह.ज. 5. मताः–इ.फ.ग.ह.ज. 6. खेद–फ.ग.ह.ज. 7. नास्ति–फ. 8. श्रीहरिं कीदृशम्–इ.फ.ग.ह. 9. नास्ति–अ.ब.इ.फ.ग.ह. 10. सतृष्णं वा–इ.फ.ग.ह.ज. 11. नास्ति–क.ड. 12. यया–ड. 13. वारिणा–क. 14. यस्यास्तया–ड.

कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम् ।
श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ।।६।।

जयन्ती

(अलसेति) अलसेन सुखातिशयजनितालस्येन निमीलिते लोचने यया तया । पुलकावलिभिः रोमाञ्चैः ललितौ कपोलौ यस्य तम् । कान्ताश्रमजनक-पौरुषातिशयभावना । एवं श्रमजलेन सिक्तं आर्द्रितं कलेवरं यस्यास्तया । वरमदनमदात् कामहर्षोदयादित्यर्थः । [1]वेगः संभोगातिशयः यस्य तम् ।।५।।

सञ्जीवनी

[2]पुनः [3]कीदृश्या ? कोकिलस्य कलरवोऽव्यक्तमधुरशब्दस्तद्वत्कूजितं शब्दितं यस्याः [4]तया । कोकिलपुंस्त्वं पुरुषायिताभिप्रायादिति । अनेन कूजिताख्यं [5]वाह्यरतमुक्तम्[6]। तदुक्तं पञ्चसायके—

"पिकशिखिकलहंसप्रायपक्षिव्रजानां
स्तनितमनुकरोति ह्यङ्गना मन्मथार्ता ।
[7]मुखदशनविवर्ता तत्कवीन्द्रा वदन्ति
स्तनितमिति समासाच्चित्रसम्भोगकाले[8] ।।

कीदृशम् ? [9]जितोऽवज्ञात उल्लङ्घितो वा मनसिजस्य कामस्य तन्त्राणां वात्स्यायनाद्युक्तकामशास्त्राणां विचारः सिद्धान्तो येन तम् । तत्रैवोक्तम्—

"आश्लेषं प्रथमं कुर्याद्द्वितीयं चुम्बनं तथा
तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम् ।।
पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा ।
सप्तमं कण्ठशब्दश्च [10]बन्धनं वाऽप्यनन्तरम्" ।। इति ।

तत्सर्वं विपरीतं जातमिति भावः । "[11]रतिचक्रे प्रवृत्तस्य [12]नैव शास्त्रं न च क्रमः" [13]इत्युक्तेः (का. शा. २.२.३१) । पुनः कीदृश्या मया ? श्लथाः

---

1. 'वरमदनमदादतिवेगम्' इति च पाठः 2. नास्ति–अ.ब.इ.फ 3. नास्ति–फ. 4. नास्ति–अ.ब.इ.फ.ग.ह. 5. तः 6. पर्यन्तं नास्ति–अ. 7. तः 8. पर्यन्तं नास्ति–अ.ब.इ.फ.ग.ह.ज. 9. जितो ज्ञातः–अ.ब.इ.फ.ग.ह.ज. 10. बन्धनं चात्यनन्तरम्–इ.ज. 11. उक्तं च रतिचक्रे–इ.फ.ग.ह.ज. 12. न च–अ.ब. 13. इति–इ.फ.ग.ह.ज.

चरणरणितमणिनूपुरया परिपूरितसुरतवितानम् ।
मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम् ॥७॥

शिथिलाः कुसुमैराकुलाः [1]व्याप्ताः कुन्तलाः केशा यस्याः [2]तया । कीदृशं [3]श्रीकृष्णम् ? [4]नखै[5]र्लिखितः [6]क्षतयुक्तः कृतो घनो निबिडः स्तनभरो येन । अत्र लिखितपदोपादानात्पङ्कजपत्राख्यं नखक्षतमुक्तम् । [7]यथा—

"अत्यर्धमेकस्फुरितोर्ध्वरेखं
प्राहुः क्षतं पङ्कजपत्रसंज्ञम् ॥" इति ।

"तन्त्रं प्रधानशास्त्रयोः" इति विश्वः (?) । "चिकुरः कुन्तलो बालः कचः केशश्शिरोरुहः" इत्यमरः (२.६.९५) । "भारो भारे च सिद्धान्ते भारः स्थूलेऽपि वस्तुनि" इति वैजयन्ती ॥६॥

पदद्योतनिका

कोकिलेति । कोकिलानां कलरववदव्यक्तध्वनिवत् कूजितं शब्दो [8]यस्यास्तया । जितो मनसिजतन्त्रविचारः कामशास्त्रसिद्धान्तो येन [9]तम् । [10]श्लथाः शिथिलाः [11]कुसुमाकुलाः पुष्पव्याप्ताः कुन्तलाश्चूर्णकुन्तला यस्यास्तया। नखेन विलिखितश्चिह्नितो घनो निविडः स्तनभरो येन ॥६॥

जयन्ती

(कोकिलेति ।) कोकिलस्य कलरवं कूजितं मिम्मिणिनादिकं यस्यास्तया । जितः मनसिजस्य तन्त्रविचारः वात्स्यायनशास्त्रविचारः दृढमननं [12]येन तम् । कलाभिज्ञमित्यर्थः । श्लथाः उन्मुक्तधम्मिल्लाः कुसुमैः आकुलाः कुन्तलाः यस्याः, तया । श्लथकुसुमाश्च ताः आकुलाः विकीर्णाश्च कुन्तलाः यस्यास्तया वा । नखैः लिखितौ घनौ स्तनरूपौ भारौ येन तम् ॥६॥

सञ्जीवनी

एवं सप्तधा[13]ऽऽलिङ्गनभेदादिकं बाह्यरतमुक्त्वा इदानीं बन्धाख्यमान्तरमाह—चरणेत्यादिना । कीदृश्या ? चरणयो रणितौ शब्दायमानौ

---

1. नास्ति–अ.ब. 2. नास्ति–अ.ब.इ.हृ.ज. 3. नन्दसूनुम्–ग. श्रीकृष्णं कीदृशम्–ज. 4. नखैर्विलिखितः सतो घनो निबिडः–अ.ब. 5. विलिखितः–हृ.ज. 6. नास्ति–इ.फ.ग.हृ.ज. 7. अयं श्लोकोद्धारो नास्ति–अ.ब. 8. यस्याः सा तया–क. 9. नास्ति–ड. तं तथा–ल.म. 10. नास्ति–ल. म. 11. नास्ति–ड. 12. यस्य– च. 13. आलिङ्गनादिकं–ग.फ.

मणिखचितौ नूपुरौ यस्याः। एतेन भ्रामरिको नाम विपरीतरतौ नायिकाकृत-बन्धविशेषो दर्शितः। प्रोक्तं पञ्चसायके—

"चक्रवद् भ्रमति कुञ्चिताङ्घ्रिका
भ्रामकं नृजघने समुच्छ्रिते" इति।

कीदृशम्? परिपूरितं अभिपूरितं सुरतवितानं रतिविस्तारो येन [1]तम्। एतेन भ्रामरिकाख्यो नायककर्तृको बन्ध उक्तः। पुनः कीदृश्या? [2]पूर्वं मुखरा शब्दायमाना पश्चाद्विशृङ्खला त्रुटितमणिगणा शिथिला च मेखला क्षुद्रघण्टिका यस्याः तया[3]। एतेन [4]प्रेङ्खोलिनामकं विपरीतरत (मुक्तम्। तदुक्तं पुरुषायितप्रकरणे—) "स्वजघनमेव दोलायमानं सर्वत्र भ्रामयेत् इति [5]प्रेङ्खोलितं नाम"। [6]पुनः कीदृशम्? [7]सकचग्रहचुम्बनदानम्। केशग्रहण-सहितं कृतं चुम्बनदानं येन यस्येति वा। इदमपि विपरीतरतमेव। [8]तदुक्तम्—

"शृङ्गारे चुम्बनं कार्यं पुंसाऽऽलिङ्गनपूर्वकम्।
विपरीतरते नार्या सकचग्रहचुम्बनम्" इति।

"शृङ्खला कुमुदे काञ्च्यां वस्त्रे च कचबन्धने" इति विश्वः। "मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयोः" [9]इति विश्वः (१०५.११८) ॥७॥

पदद्योतनिका

चरणेति। चरणयोः पादयोः रणितौ शब्दितौ मणिनूपुरौ मणियुक्त-नूपुरौ [10]यस्यास्तया। परिपूरितं [11]पूर्णं कृतं सुरतवितानं सुरतसमूहो [12]येन। मुखरा शब्दायमाना विशृङ्खला उन्मुक्ता मेखला काञ्ची [13]यया। सकचग्रहं केशग्रहणसहितं चुम्बनदानं [14]यस्य तम् ॥७॥

जयन्ती

(चरणेति) चरणयोः रणितौ नदन्तौ मणिनूपुरौ पदकटकौ यस्यास्तया नूपुरग्रहणेन पादभूषणत्वे प्राप्तेऽपि चरणग्रहणं तात्कालिकसम्बन्धावगमार्थम्। परिपूरितं सुरते वितानं उल्लोचो यस्य तम्। पुरुषमूर्धगतरमणीपादशालि

---

1. नास्ति–अ.ब. 2. तः 3. पर्यन्तं नास्ति–अ.ब.इ.फ.ग.ह. 4. प्रेङ्खानामकं–अ.ब. 5. प्रेङ्खा–अ.ब. 6. नास्ति–इ.फ.ग.ह.ज. 7. नास्ति–अ.ब.इ.फ.ग.ह. 8. तच्चोक्तम–इ.ग.ह.ज. 9. इति–इ.फ. 10. यस्याः सा तया–क.ल.म. 11. सम्पूर्णं–क.ल.म. 12. येन तम्–क. 13. यस्याः सा तया–क. यस्याः–ल.म. 14. यस्य सः–ल.म. येन–क.

रतिसुखसमयरसालसया दरमुकुलितनयनसरोजम् ।
निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥८॥

समपादाख्यं कङ्कणं सूचितम् । मुखरा नदन्ती विशृङ्खला वलन्ती मेखला काञ्ची यस्यास्तया । क्षुद्रघण्टा(व)न्मेखलाकलकलेन पुरुषायितं सूच्यते । कचग्रहेण चिकुरसंहतिग्रहणेन सहितं यथा स्यात्तथा चुम्बनस्य दानं येन तम् । कामातिशयः सूच्यते ॥७॥

सञ्जीवनी

एवं [1]सोत्कर्षमुक्त्वा तज्जनितरताधिक्यमाह—[2]रतीति । पुनः कीदृश्या मया ? रतिसुखसमये [3]सुरतसुखकाले यो रसोऽनुरागः सुरतश्रमेण निद्रारूपो वा उद्भटशृङ्गाररूपो वा [4]तेनालसया [5]आलस्ययुक्तया मन्थरया वा । कीदृशम् ? [6]दरमुकुलिते [7]ईषन्मुद्रितेऽर्धोद्घाटिते वा मन्थरे नेत्रकमले यस्य तम् । अनेनोभयोः सुरतानन्दावाप्तिः [8]जातेति [9]ध्वनिः । तदुक्तं रतिरहस्ये—

"मूर्च्छना मीलनं चाक्ष्णो[10]श्च्युतिकालस्य लक्षणम्" (इति)

[11]पुनः कीदृश्या [12]मया ? निःसहाऽसमर्था किसलयपुष्पशयने निपतिता तनुलता [13]शरीरलता यस्या[14]स्तया । [15]एतेन सुरतान्त[16]विरतिरुक्ता । [17]यथा [18]भारते—

"[19]अङ्गस्वेदः श्लथत्वं च केशवस्त्रादिसंवृतिः ।
जाते च्युतिसुखे नार्या विरामेच्छा च जायते" [20]इति ।

पुनः कीदृशम् ? मधुसूदने [21]ममाधरपानकर्तरि दैत्यसूदने वा[22] मुदित आनन्दं [23]प्रापितो मनोजः कन्दर्पो येन । [24]उक्तं [25]रतिरहस्ये—

---

1. स्वोत्कर्षम्–इ.फ.ग.ह.ज. 2. रतिसुखेत्यादिना–इ.फ.ग.ह.ज. 3. सुरतकाले तत्सुखसमये–ज. 4. तेनालसयुक्तया–ज. 5. नास्ति–अ.ब. आलसयुक्तया–फ.ग.ह. 6. नास्ति–अ.ब.इ.फ.ह. 7. ईषन्मुद्रिते उद्घाटिते मन्थरे–अ.ब. 8–9. नास्ति–अ.ब. 10. रति–अ.ब.इ.फ.ग.ह.ज. 11–12. नास्ति–इ.फ.ग.ह.ज. 13. नास्ति–ग. 14. नास्ति–ह. 15. नास्ति–अ.ब. एतेनैव–इ.फ.ग.ह.ज. 16. विरतेः ध्वनिः–अ.ब. 17–18. नास्ति–अ.ब. यथा भरते–ह. 19. अङ्गखेदः–ह 20. इति भारते–अ.ब. 21. मयाधर–अ. 22. नास्ति–अ.ब. 23. पोषितो–ग. 24–25. नास्ति–अ.ब.

श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ।
सुखमुत्कण्ठितगोपवधूकथितं वितनोतु [1]सुशीलम् ।।९।।

"अवसानेऽपि च प्रीति[2]रुपचारैरुपस्कृता ।
[3]सविस्रम्भकथायोगै रतिं जनयते पराम् ।।" [4]इति ।

किञ्च [5]षुञ् [6]अभिषवे इति धातुः । [7]अत्राभिषवो राधाधरामृतखण्डनमिति ज्ञेयम् । [8]मधुसूदनपदं [9]दैत्यपरत्वे सिद्धम् । रसवदलङ्कारः ।।८।।

पदद्योतनिका

रतिसुखेति। रतिसुखसमये सुरतसुखकाले [10]प्रीत्यालसया आलस्ययुक्तया दरमुकुलितनयनसरोजं ईषदुन्मीलितनेत्रकमलम् । निःसहा असमर्था निपतिता तनुलता [11]शरीरलता [12]यस्यास्तया । [13]कथम्भूतं [14]कृष्णम् ? मधुदैत्यं [15]सूदयतीति तं उदितमनोजं जातकामम् ।।८।।

जयन्ती

(रतिसुखेति) । रतिसुखस्य समये रतान्तकाले रसेन अलसतया । दरमुकुलिते ईषत्सङ्कोचिते नयनसरोजे नेत्रोत्पले यस्य तम् । एतेन समसम्भोगः उभयोरपि समकालानन्दोदयात् । निःसहं सोढुमशक्यं तया निपतिता तनुलता यस्याः तया । नानाबन्धव्यापारकरणरहितयेत्यर्थः । अतः उदितः मुदितः म्नोजो येन तम् । मधुसूदनमिति पुनर्विशेष्यग्रहणं विशेषपरम् । तादृशदैत्यनाशकशूरस्य अबलासम्भोगेऽपि वृष इव पुनः पुनः सुरतशीलमिति कामिनीभ्यो कामुकातिशयः श्लाघ्य इति (भावः) ।।८।।

सञ्जीवनी

[16]इदं जयदेवेन कविना भणितं शृण्वतां [17]पठतां सुखं वितनोतु विस्तारयतु । अतिशयेन मधुरिपुनिधुवनशीलं [18]श्रीकृष्णसुरतक्रीडास्वभावो यत्र ।

---

1. सुलीलम्–ड. 2. उपकारैः–अ.ब. 3. अयमुत्तरार्धो नास्ति–अ.ब. 4. इति रतिरहस्ये–अ.ब. 5. षुञ् अभिषवः । श्रीराधा–ह. 6. अतिषवे–अ. 7. स चात्र राधाधरामृतखण्डनम्–अ.ब. 8. मधुसूदनपदं प्रसिद्धम्–ह. 9. दैत्यपरे प्रसिद्धम्–इ.फ.ग.ज. 10. रसालसया–क. 11. नास्ति–क. 12. यस्याः सा–क.ल.म. 13. तः 14. नास्ति–ड. 15. सूदयति तम्–ड. 16. इदञ्च–अ.ब. 17. नास्ति–अ.ब.ज. 18. श्रीकृष्णक्रीडा–अ.ब. श्रीराधाकृष्णसुरतक्रीडा–ब.

कीदृशम् ? सुखं उत्कण्ठितया गोपवध्वा श्रीराधया कथितं भाषितम् । [1]पुनः [2]कीदृशम् ? सलीलं शृङ्गारविलासलीलासहितम् । अनेन व्रजवधूकदम्बैरनास्वादितं श्रीराधासुरतमिति भावः ॥९॥

श्रीकृष्णोत्कण्ठया सख्याऽऽनीतया राधया तया ।
उत्सारितवधूबृन्दो दृष्टः कृष्णो गतिर्मम ॥

[3]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां षष्ठः प्रबन्धः ॥

पदद्योतनिका

श्रीजयदेवेति । इदं श्रीजयदेवेन भणितमुक्तं गीतं [4]कर्तृ [5]पारलौकिकानि शुभानि ऐहिकानि च वितनोतु । [6]कीदृशं जयदेवभणितम् ? अतिशयमधिकं [7]मधुरिपुनिधुवनशीलं कृष्ण[8]सुरतचरितं यस्मिन् । पुनः [9]कीदृशम् ? [10]उत्कण्ठितया गोपवध्वा राधिकया कथितम् । पुनः कीदृशम् ? सलीलं [11]शृङ्गारजक्रियासहितम् ॥९॥

[12]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां षष्ठः प्रबन्धः ॥

जयन्ती

(श्रीजयदेवेति ।) श्रीजयदेवेन भणितं उक्तं इदं [13]अद्भुतं आश्चर्यकरं मधुरिपोः निधुवनस्य शीलं यस्मिन् तत् । स्वभावचरित्रमिति यावत् । सलीलं विलासयुक्तं यथा स्यात्तथा । उत्कण्ठिता कालासहिष्णुतायुक्ता गोपवधूः तया राधया कथितं सुखं वितनोतु । उक्ता नायिका ॥९॥

[14]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां षष्ठः प्रबन्धः ॥

1–2. नास्ति–अ.ब.इ.फ.ग.ह. 3. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 4. कर्तृपारलौकिकं शुभानि ऐहिकानि च वितनोति–ड. 5. पारलौकिकशुभानि –क.ल.म. 6. कथम्भूतं–क.ल.म. 7. पुनःकथम्भूतम् ? मधुरिपुनिधुवनशीलम्–क. 8. रतचरितं–क. 9. कीदृशं गीतम्–क. 10. उत्कण्ठितगोपवध्वा–क. 11. शृङ्गारक्रियासहितम्–ल.म. 12. नास्तीयं पुष्पिका–ड.क.ल.म. 13. "श्रीजयदेवभणितमिदमद्भुतमधुरिपुनिधुवनशीलम्" इति च ग्रन्थानुसारी पाठः 14. नास्तीयं पुष्पिका–च.

सप्तमः प्रबन्धः

हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी-
वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ।
मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने
गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च ॥१०॥

सञ्जीवनी

इदानीं सख्यानीयमाना राधा युवतिगणवृतं श्रीकृष्णं दृष्ट्वा परावृत्य [1]आगतां सखीमाह—हस्तेति । हे सखि [2]गोविन्दं कानने पश्यामि हृष्यामि च दृष्ट्वा हर्षं करोमि । कीदृशम् ? [4]व्रजसुन्दरीगणवृतम् । नन्वन्यस्त्रीगणवृतं [5]दृष्ट्वा कथं ते हर्ष इत्यत आह-मामुद्वीक्ष्य दृष्ट्वा विलज्जितं अन्यगोपीगण-वृतोऽहमनया दृष्ट इति [6]जातलज्जम् । [7]अथ वा लज्जासहितं यत्स्मितं तदेव सुधामृतमुज्ज्वलत्वात् स्पृहणीयत्वाद्वा । [8]तथा मुग्धं सुन्दरमाननं मुखं यस्य तम् । ललाटत्रिवलीं [9]कृत्वाऽङ्गभङ्गमाह । [10]तादृशाननं पश्यन्त्याः कस्या मन्दभाग्याया नानन्दो भवेत् [11]इति [12]भावः । किञ्च युवतिगण[13]परि-वृतोऽप्यात्मानं सापराधमिव मन्यमानो मत्तो बिभेति इति मे हर्ष इति भावः । पुनः कीदृशम् ? [14]हस्तान्मर्दनेन मद्भयेन वा स्रस्तः स्खलितो विलासवंशः क्रीडा-वेणुर्यस्य तम् । अधरामृत[15]पानापराधी वंशोऽपि मद्भयात्पतित इति ध्वनिः । पुनः कीदृशम् ? अनृजुः कुटिला भ्रूलता यासां व्रजबल्लवीनां गोपस्त्रीणां वृन्दमुत्सारयत्यपसारयति [16]दृगन्तं नेत्रप्रान्तं वीक्षितमवलोकितं यस्य तम् । मामागतां दृष्ट्वा मद्भयाद्[17]दृगन्तचेष्टयाऽन्यगोपीरपसारयतीत्यर्थः । पुनः कीदृशम् ? अतिशयेन [18]प्रस्वेदैरार्द्रे गण्डस्थले यस्य तम् । अनेन मद्दर्श-नादेवा[19]ङ्गो सानन्दो जात [20]इति ध्वनिः । सानुकूलश्च नायकः । [21]प्रेयो नामायमलङ्कारः । तल्लक्षणम्—

1. स्वगतं—अ.ब.इ.फ.ह.ज. 2. अहं गोविन्दं—इ.फ.ग.ह.ज. 3. नास्ति—अ.ब. 4. व्रजसुन्दरीणां गणवृतं—अ.ब. 5. नास्ति—अ.ब. 6. सञ्जात-लज्जम्—इ.फ.ग.ह.ज. 7. यद्वा—ग. 8. यथा—अ. 9. कृत्वाऽऽलिङ्गनं भङ्ग-माह—इ. कृत्वाङ्गुलिभङ्गमाह—फ.ग.ह. कृत्वाऽङ्गुलीकृतं भङ्गमाह—ज. 10. तादृगाननं—इ.फ.ग.ह.ज. 11–12. नास्ति—अ.ब. 13. वृतो—ग. 14. हस्तान्मद्दर्शनेन—ह.ज. 15. पानापराधात्—ग. 16. तद्दृगन्तं—अ.ब.ह.ज. 17. नास्ति—ग. तदङ्गचेष्टया—ज. 18. स्वेदैः—ज. 19. अङ्गे—ग.ह.ज. 20. इति ध्वनिः नास्ति—अ.ब. 21. प्रेषो—अ.ब.फ. प्रेह्णो—इ.ग.ह.ज.

[1]"प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यते"

इति दण्डी (२.२७९)।

लज्जितमिति [2]भावे क्तः। मामुद्वीक्ष्येति सर्वत्र (सम्बध्यते) ॥१०॥

पदद्योतनिका

हस्तेति। हे सखि गोविन्दं कृष्णं पश्यामि दर्शनेन हृष्यामि च [3]हर्षं प्राप्नोमि। [4]कीदृशं गोविन्दम्? [5]कानने वृन्दावने व्रजसुन्दरीगणवृतं [6]गोपीवेष्टितम्। [7]कीदृशम्? मामुद्वीक्ष्य मां दृष्ट्वा हस्तस्रस्तविलासवंशः हस्तात् स्रस्तो विगलितो विलासवंशः क्रीडावंशो यस्य [8]तम्। पुनः कीदृशम्? अनृजु-[9]भ्रूवल्लिमतीनां कुटिलभ्रूलतायुक्तानां [10]वल्लवीनां [11]गोपीनां वृन्दे समूहे उत्सारि ऊर्ध्वतिर्यग्गामि दृगन्तवीक्षितं कटाक्षेक्षणं यस्य [12]तम्। पुनः कीदृशम्? अतिस्वेदेनातिघर्मेणार्द्रं गण्डस्थलं यस्य। [13]विलज्जितस्मितं सलज्जाहास्यं तदेव सुधाऽमृतं तेन मुग्धाननं मनोहरमुखम् ॥१०॥

जयन्ती

(हस्तस्रस्तेति)। हस्तात् स्रस्तः च्युतः विलासवंशः खेलनवेणुः (यस्य) तम्। अनृजवः वक्राश्च ताः भ्रूवल्लयः आसां सन्तीति (अनृजुभ्रू)वल्लिमत्यः ताश्च ताः वल्लव्यः तासां वृन्देन गणेन उत्सारितं प्रत्युक्तं दृगन्तवीक्षितं कटाक्षलोचनं यस्मिन् तम्। अतिस्वेदेन क्रीडाश्रमजनितेन आर्द्रं सिक्तं गण्डस्थलं यस्य तम्। मां राधां उद्वीक्ष्य अवलोक्य [14]विलक्षितं लज्जितम्। अनुरक्तं विहाय क्रीडारब्धे(ति) ह्रीणम्। स्मितमेव अमृतं तया मुग्धं मनोहरं आननं यस्य तम्। व्रजसुन्दरीणां गणेन वृतं परितो व्याप्तम्। [15]वधूगणातिक्रमणकथनेन राधानुनयकरणप्रतिबन्धक[16]विशेषणमेतत्। गोविन्दं कानने वने पश्यामि; दूरादिति। मनसा ध्यानलयेन वा द्रक्ष्ये। अत एव हृष्यामि; एतादृशकृष्णो दृग्गोचरोऽभूदिति हर्षं [17]प्राप्ताऽस्मीति (भावः) ॥१०॥

---

1. प्रतिप्रकाशनं तत्प्रेषमभिधीयते—अ. प्रतिप्रकाशनं यत्र प्रेङ्खमभिधीयते—इ. प्रतिप्रकाशनं यत्र तत्प्रेषमभिधीयते—फ. प्रीतिप्रकाशनं यत्र तत्प्रेङ्खमभिधीयते—ग. प्रीतिप्रकाशं यत्र तत्प्रेङ्खमभिधीयते—ह.ज. 2. भावोक्तिः—ज. 3. हर्षमाप्नोमि—ल.म. हर्षं प्राप्नोति—क. 4. कथम्भूतं—क.ल.म. 5. नास्ति—क. 6. गोपीसमूहेन वेष्टितम्—क.ल.म. 7. पुनः कीदृशम्—क. 8. नास्ति—क. 9. भ्रूवल्लीवतीनां—क. 10–11. नास्ति—क. 12. नास्ति—ल.म. 13. विलक्षितं—ड.ल.म. 14. 'मामुद्वीक्ष्य विलक्षितं' इति च. ग्रन्थानुसारी पाठः 15. वधूगणातिक्रमणेन राधा—च. 16. विशेषणम्—च. 17. प्राप्तोस्मीति—च.

दुरालोकस्तोकस्तबकनवकाशोकलतिका-
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि शिखरिणां सुखयति ॥११॥

सञ्जीवनी

सखि धैर्यमावह; मिलिष्यत्येव श्रीकृष्ण इत्याश्वासयन्तीं सखीं प्रत्याह-दुरालोकेति । हे सखि दुरालोको दुःखेन आलोकयितुं शक्यः स्वभावेनाऽपि स्तोकोऽल्पः [1]स्तबको गुच्छो यस्याः [2]सा, [3]नवकाशोकलतिका अशोकशाखा तस्या विकासः [4]प्रकाशः । किञ्च कासारः सरसी उपवनञ्च तयोः पवनोऽपि कमलाकर[5]चरो वायुरपि व्यथयति पीडां करोति । मामिति शेषः । [6]कासारोपवनशब्दाभ्यां शैत्यसौ[7]गन्ध्यमान्द्यादीनां ध्वनिः । [8]किञ्च चूतानामाम्राणां श्रीगोवर्धन[9]गिरिस्थितानां मुकुलप्रसूतिः कुड्मलोऽपि न सुखयति न सुखं [10]करोति । किं प्रकाशदशायां करिष्यति [11]न वेद्मि । [12]कीदृशी ? शिखरे [13]मौलौ वर्तमाना; दूरादेव दुस्सहेत्यर्थः । पुनः कीदृशी ? भ्राम्यन्तीनां भृङ्गीणां [14]भ्रमराङ्गनानां रणितैर्गु[15]ञ्जितै रमणीया मनोहरा । "[16]स्तोकोऽल्पे" इति विश्वः (३.२९) । "[17]स्याद्गुत्सकस्तु स्तवकः" इत्यमरः (२.४.१६) । "कासारः सरसी सरः" इत्यपि (अमरः १.१०.२८) "[18]स्त्रीरत्ने मल्लिकायाञ्च प्रोक्ता शिखरिणी बुधैः" (इति विश्वः ५१.१०३) । "[19]आम्रश्चूतो रसालः" [20]इत्यमरः (२.४.३३) । कुट्मलो मुकुलोऽस्त्रियाम्" (इत्यमरः २.४.१६) । हेतूक्तिरलङ्कारः ॥११॥

---

1. स्तबकोऽङ्गुष्ठो-अ. 2. नास्ति-अ. 3. नवा अशोकलतिका-अ.ब. नवका नवाऽशोकलतिका-इ.ह. 4. नास्ति-फ. 5. सरो-इ.ह.ग.ज. 6. कासारोपवनाभ्यां-इ.फ.ग.ह.ज. 7. सौगन्ध्यमान्द्यादीनि-अ.ब. सौगन्ध्यमान्द्यानीति-ह.ज. 8. किञ्चेयं-इ.फ.ग.ह.ज. 9. गिरौ-इ.फ.ग.ह.ज. 10. कारयति-अ.ब.फ. 11. नवेति-अ.ब. 12. कीदृशी प्रसूतिः-ग. 13. मूलौ-अ.ब. 14. भ्रमराणां-ग. 15. नास्ति-फ. 16. स्तोकोऽल्पक इति-ब.ह. स्तोकोऽल्प इति-फ. स्तोकोऽल्पकस्वल्प इति-ज. 17. तः 20. पर्यन्तो भागो नास्ति-अ.ब. 17. गुच्छः स्तबकः-इ.फ.ग.ह.ज. 18. स्त्रीरत्ने मल्लिकायां शिखरिणीति-इ.ग.ह.ज. 19. अयं नैघण्टुकोद्धारो नास्ति-फ.

[1]साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित—
भ्रूवल्लीकमलीकदर्शितभुजामूलोर्ध्वहस्तस्तनम् ।

पदद्योतनिका

दुरालोकेति । हे सखि दुरालोको दुःखेनालोक्यते वियोगिनीनामुद्वेगजन-(क)त्वात् दुरालोकः । स्तोकोऽल्पः स्तबको गुच्छो यस्याः । नवाशोकलतिकाया विकास उद्योतः मां व्यथयति पीडयति । किञ्च कासरोपवनपवनोऽपि सरोवर-[2]निकटवनपवनोऽपि मां व्यथयति । अपि च चूतानामाम्राणामियं मुकुलप्रसूतिः कलिकोद्भवः मां न सुखंयति । [3]कीदृशो ? भ्राम्यन्तीनां भृङ्गीणां [4]भ्रमरीणां रणितैः [5]शब्दितैः रमणीया मनोज्ञा[6]ऽपीत्यर्थः । शिखरिणी प्रशस्ताग्रभागवती ॥११॥

जयन्ती

(दुरालोकेति ।) हे सखि [7]अस्तोकैः अनल्पकैः स्तवकः गुच्छैः नमितानां अशोकस्य लतिकानां शाखानां विकासः दुरालोकः आलोकितुमशक्यः । उद्दीपकत्वात् । कासारस्य सरसः उपवनं क्रीडावनं तस्य पवनोऽपि वायुरपि व्यथयति पीडयति । इयं पुरोवर्तिनी शिखरिणी चूतानां रसालानां भ्राम्यन्त्यश्च ताः भृङ्ग्यः तासां रणितेन कूजितेन [8]रमणीयानि मुकुलानि कोरकाः तेषां प्रसूतिः उत्पत्तिः । उत्पत्तिमन्मुकुलानीत्यर्थः । सुखयति । एतदालोकनोद्दीपितमदनत्वान् माधवः स्वयमायास्यतीति भावः ॥११॥

[9]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां अक्लेशकेशवो नाम द्वितीयसर्गः ।

सञ्जीवनी

[10]सर्गान्ते श्रोतॄन् प्रति कविराशिषमाशास्ते—साकूत इत्यादिना । [11]स हरिः केशवो वो युष्माकं क्लेशं दुःखं हरतु । कीदृशः ? [12]नवस्तरुणो नूतनो वा

1. पद्यमिदं नास्ति–च. 2. निकटपवनोऽपि–क.ल. 3. कथम्भूतानां–क. कथम्भूतम्–ल.म. 4. नास्ति–ड. 5. नास्ति–क. 6. अपि नास्ति–क. 7. च ग्रन्थानुसारं पाठस्त्वेवं—"दुरालोकोऽस्तोकस्तबकनमिताशोकलतिका"। 8. च ग्रन्थानुसारं "अपि भ्राम्यद्भृङ्गीरणितरमणीयातिमुकुल" इति तृतीयं चरणम् 9. इति गीतगोविन्दे अक्लेशकेशवो नाम द्वितीयः सर्गः–च. 10. सम्प्रति–इ. 11. नास्ति–इ. 12. नास्ति–ज.

गोपीनां निभृतं निरीक्ष्य गमिताकाङ्क्षश्चिरं चिन्तय-
न्नन्तर्मुग्धमनोहरं हरतु वः क्लेशं नवः केशवः ॥१२॥

इति श्रीगीतगोविन्दे द्वितीयः सर्गः

नानामाधुर्योदयात् । पुनः[1] मुग्धमनोहरः [2]सुन्दरसुन्दरः । [3]मुग्धाया राधाया मनो[4]हरणक्षम इति वा । पुनः कीदृशः ? गमिताकाङ्क्षः गमिता नीता श्रीराधायां काङ्क्षा [5]अभिलाषो येन । किं कृत्वा ? किं कुर्वन् ? गोपीनां निभृतं गुप्ताभिप्रायं निरीक्ष्य काञ्चिद्वल्लभामन्तर्मनसि चिरं चिन्तयन् । कीदृशम् ? निभृतं साकूतं [6]स्मितं साभिप्रायं स्मितमीषद्धास्यं यत्र । [7]पुनः [8]कीदृशम् ? आकुलाकुलो अस्तव्यस्तो गलद्धम्मिल्लः केशपाशो यत्र तम् । [9]तथा उल्लासितभ्रूवल्लीकं [10]उत्क्षिप्तभ्रूवल्लीकं; जृम्भमाणव्याजेनेत्यर्थः । [11]तथा अलीकेनानिमित्तेन दर्शिता [12]भुजामूलोर्ध्वहस्तस्तना यत्र । वालोर्ध्वं इति पाठः । भुजाश्च वालाश्च हस्ताश्च स्तनाश्चेति द्वन्द्वः । "[13]साकूतं भाव-वीक्षणे" इति मेदिनीकारः । "निभृतं तु रहस्ये स्यान्निभृतं गुप्तमुच्यते" इति धरणिः । "[14]अलीकं कपटे प्रोक्तमलीकं गुप्तभावकम्[15]। अलीकमनिमित्तं च वृथाभाषणक" इति हलायुधः। "धम्मिल्लः केश[16]पाशः स्यात्" इति वैजयन्ती। रसवदलङ्कारः ॥१२॥

श्रीराधादर्शनादेव गतक्लेशोऽधिमानसम् ।
पुलकोल्लासरुचिरः क्लेशं हरतु केशवः ॥
वन्दे व्रजपतिं देवं माधवं वल्लवीप्रियम् ।
यमुनातीरनिकुञ्जेषु वृषभानुसुतारतम् ॥

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[17]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायाम् [18]अक्लेशकेशवो नाम द्वितीयः सर्गः ॥

---

1. नास्ति–ज. 2. सुन्दरः–ग. 3. नास्ति–अ.ब. 4. हरणे–फ. 5. नास्ति–अ.ब. 6. नास्ति–इ.फ.ग.ह. 7–8. नास्ति–अ.ब.इ.फ.ह.ग. 9. नास्ति–अ. ब.इ.फ.ग.ह. 10. नास्ति–अ.ब.ज. 11. नास्ति–अ.ब.इ.फ.ग.ह. 12. मूलार्ध्ववालार्ध्व इति पाठः–अ.ब. 13. साकूतं समये प्रोक्तं साकूतं भाव-वीक्षणे–इ.फ.ग. ह.ज. 14. तः 15. पर्यन्तं नास्ति–ग. 16. पाशे–इ.फ.ग.ह.ज. 17. श्रीशिवदासपण्डितात्मज-ह. 18. केशवो नाम–फ.

पदद्योतनिका

अधुना कविर्लोकान् प्रत्याशिषं ब्रूते—साकूतेति । [1]नवः शृङ्गारस्तरुणो वा केशवो वो युष्माकं भक्तानां क्लेशं दुःखं हरतु [2]दूरीकरोतु । [3]कथम्भूतः केशवः ? गोपीनां निभृतं गोप्यभावं निरीक्ष्य दृष्ट्वा काञ्चिद्दयितां वल्लभां अन्तर्मनसि चिरं चिन्तयन् । पुनः [4]कीदृशः ? मुग्धमनोहरः मोहयुक्तसुन्दरः । कीदृशम् ? निभृतम् । साकूतं साभिप्रायं स्मितमीषद्धास्यं यत्र; आकुलाकुलोऽस्तव्यस्तो गलन्मुक्तीभवन् धम्मिल्लः केशपाशो यत्र । उल्लासिता उच्चैः कृता [5]भ्रूवल्ली यत्र । अलीकेन छलेन दर्शिता भुजाबालार्धहस्तस्तना [6]यस्मिन् । भुजाश्च बालाश्च अर्धहस्तस्तना[7]श्चेति [8]द्वन्द्वः ॥१२॥

[9]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां (अक्लेशकेशवो नाम) द्वितीयः सर्गः ॥

---

1. नवशृङ्गाररसः केशवः–क. नवशृङ्गारस्तरुणो–ल.म. 2. नास्ति–क. 3. कीदृशः–क.ल.म. 4. नास्ति–ड. कीदृशः केशवः–क. 5. भ्रूवल्लिलता–क.ल.म. 6. तः 7. पर्यन्तं नास्ति–ड. 8. समासः–क. एतदनन्तरमेवं दृश्यते–क. ग्रन्थे—"दयितं प्रियं दृष्ट्वा कुचोदरप्रकटीकरणपूर्वकं सङ्केतीकरणं यस्मिन् क्रियायां यथास्या मोहनकारकं शीलं यत्र तादृशं निभृतम्" 9. इति गीतगोविन्दटीकायां नारायणपण्डितकृतायां भीषदासकारितायां पदद्योतनिकायां द्वितीयः सर्गः–ल.म. नास्ति–क.

तृतीयः सर्गः

मुग्धमधुसूदनः

कंसारिरपि संसार[1]वासनाबन्धशृङ्खलाम् ।
राधामाधाय हृदये तत्याज व्रजसुन्दरीः ॥१॥

सञ्जीवनी

एवं सर्ग[2]द्वये प्रोक्ता श्रीराधोक्ति[3]र्हरौ परा ।
तृतीये त्वथ कृष्णेन तस्यां गुर्वी निरूप्यते ॥

श्रीराधायाः श्रीकृष्णस्यापि श्रीराधायां [4]गुर्वीं रतिमाह-कंसारिरित्यादिना । कं सुखं विषयजन्यमपसारयति [5]निजानन्दप्रदानेन [6]निजस्वच्छस्वरूपप्रदर्शनेन वा स कंसारिः [7]श्रीकृष्णः; संसारजन्यसकलसुखविस्मारक इत्यर्थः । ईदृशोऽपि श्रीराधां हृदये आधाय आरोप्य । व्रजन्तीति व्रजाः युवतिसमूहाः [8]ता एव सुन्दरीः सौन्दर्यवतीरपि तत्याज त्यक्तवान् । [9]कीदृशीम् ? संसरतीति संसारः कारागृहरूप[10]स्तस्य [11]बन्धाय शृङ्खलामिव शृङ्खलाम् । यथा कश्चिदवरुद्धः कारागृहे [12]राधायादवसिद्धिं प्राप्य तां हृदये आधाय तद्बलेन [13]शृङ्खलां निगडं त्यजति तद्वत् । [14]अथ वा संसारवासना भोगसंस्काररूपा तस्या बन्धस्तस्य कामपूर्तिकर्त्रीमिव । बहिः कश्चिद्वासनापूर्तावभिलाषं करोति । [15]अथ वा सम्यक् सारः [16]संसारः प्रणयरसः [17]श्रीकृष्णो वा तस्मिन् वासना-बन्धाय शृङ्खला वेणी इव, परमानन्दप्रदत्वात् । "शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च" इति विश्वः (१०५.११९) । "संसारः स्यात्तु जगति तथा संसारः सारभूतेऽपि च" इति क्षेमेन्द्रः । "[18]संस्कारे वासना[19]बन्धे वासना त्ववरोधनः" इति हलायुधः (५.९५) । "सुन्दरी रमणी रामा" इत्यमरः (२.६.४) । "शृङ्खला कुमुदे काञ्च्यां वस्त्रे च कचबन्धने" इति विश्वः ॥१॥

1. वासनाबद्ध–अ.ब. 2. द्वयेनोक्ता–व.इ.फ.ग.ह.ज. 3. हरिप्रिया–फ. 4. गुर्वीमाह–अ.ब.फ. 5. निजानन्दनिजस्वच्छं–ग. 6. निजस्वरूप–अ.ब.ज. 7. नास्ति–अ.ब.इ.फ.ग. 8. तः 10 पर्यन्तं नास्ति–ज. 9. नास्ति–अ.ब.फ. 11. वासनाबन्धाय–ज. 12. राधां सिद्धिं प्राप्य–इ.फ.ग.ह.ज. 13. नास्ति–अ.ब. 14,15. यद्वा–ग. 16. नास्ति–ज. 17. नास्ति–अ.ब. 81. संस्कारो वासना स्मृता–हला. 19. प्रोक्ता–ग.ह.ज.

इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः ।
कृतानुतापस्स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद माधवः ॥२॥

पदद्योतनिका

इति [1]राधाया विरहव्यथामुक्त्वा कृष्णस्य विरहव्यथामाह-कंसारिरिति । कंसारिरपि [2]कृष्णोऽपि राधां हृदये मनसि आधाय संस्थाप्य व्रजसुन्दरीः गोपीस्तत्याज त्यक्तवान् । कीदृशीं [3]राधाम् ? संसारे वासनाबन्धस्तस्य शृङ्खलां निगडरूपाम् ॥१॥

जयन्ती

कृष्णालम्बनराधाप्रीतिवर्णनं कृतं; राधालम्बनकृष्णरत्यप्रतिपादनेन परस्परानुरागाभावाच्छ्रोतॄणां भावाभासप्रतीतिः स्यादिति भगवतोऽपि कामावस्थां वर्णयितुमाह--(कंसारिरिति ।) कंसारिः कृष्णोऽपि संसारस्य वासनया काङ्क्षया बद्धा शृङ्खला निगडाख्या यस्य सः । वासनायाः मोक्षप्रतिबन्धकत्वे परिणामालङ्कारः । कंसारिरित्यत्र नित्यमुक्तत्वरूपार्थान्तरसङ्क्रमितवाच्यध्वनिः । राधां हृदये आधाय धृत्वा व्रजसुन्दरीं तदितरसर्वगोपीं तत्याज त्यक्तवान् । सर्वपरित्यागेन राधायां अतिशयरागत्वात् ज्येष्ठत्वम् ॥१॥

सञ्जीवनी

व्रजसुन्दरीः तत्याजेति यदुक्तं तदेव श्रीकृष्णचेष्टितं सन्तापमाह— इतस्तत इति । स माधवो मधुप्रियः कलिन्दनन्दिन्याः यमुनायाः तटान्तकुञ्जे तीरसमीपलता[4]पिहितोदरमन्दिरे विषसाद क्लेशभरेण [5]प्रणयभरेण वा विषण्णो बभूव । [6]किं कृत्वा ? इतस्ततस्तेषु कुञ्जेषु तां श्रीराधां अनुसृत्य अन्वेष्य; तत्र हेतुः—अनङ्गस्य कामस्य ये बाणाः सम्मोहनादयः तेषां व्रणैः क्षतैः [7]खिन्नं विषादयुक्तं मानसं [8]यस्य सः । कीदृशः ? कृतोऽनुतापः कथं मया पूर्वमेव न स्तुतेत्येवं पश्चात्तापो येन सः । [9]श्लोकद्वयेनानेनोभयोस्तुल्योऽनुरागः [10]प्रदर्शितः । "कन्दर्पो दर्पकोऽनङ्गः" इत्यमरः (१.१.२५) । [11]स्वभावोक्तिरलङ्कारः ॥२॥

1. राधाविरहव्यथामुक्त्वा अथ कृष्णविरह–क. 2. नास्ति–ङ. 3. नास्ति–ङ. 4. पिहितोदरे–अ.ब.ग. 5. तत्प्रणय–इ.ह. 6. किं कृत्वा नास्ति–अ.ब. 7. विपन्नं–इ.फ.ज. विषण्णं–ग.ह. 8. नास्ति–अ.ब. 9. श्लोकद्वयेनोभयोः–अ.ब. 10. नास्ति–अ.ब. प्रदर्शित इति–इ.फ.ग.ह.ज. 11. प्रेङ्खस्वभावोक्तिरलङ्कारः–इ.फ.ग.ह.ज.

गुर्जरीरागे मठताले

मामियं चलिता विलोक्य वृतं वधूनिचयेन ।
सापराधतया मया न निवारितातिभयेन ।।
हरि हरि हतादरतया गता सा कुपितेव ।।ध्रुवपदम् ।।३।।

पदद्योतनिका

इतस्तत इति । स माधवः कलिन्दनन्दिनीतटान्तकुञ्जे [1]यमुनातीर-लतागृहे [2]निषसाद स्थितवानित्यर्थः । किं कृत्वा ? इतस्ततोऽनेकस्थलेषु [3]तां राधां अनुसृत्यान्विष्य । कीदृशः[4]कृष्णः ? अनङ्गबाणव्रणेन कामबाणक्षतेन खिन्नं दीनं मानसं यस्य । कृतानुतापः कृतपश्चात्तापः ।।२।।

जयन्ती

(इतस्तत इति ।) स माधवः अनङ्गबाणस्य व्रणेन कामोद्रेकेण खिन्न-मानसं अन्तःकरणं यस्य, तादृशस्सन् तां राधिकां इतस्ततः परितः कुञ्जादौ अनुसृत्य गवेषयित्वा अप्राप्नुवन् कृतानुतापः तां विना कथं मया रासक्रीडा कृतेति पश्चात्तप्तस्सन् कलिन्दनन्दिन्याः यमुनायाः तटान्तकुञ्जे तीरस्य कुञ्जे निषसाद श्रमेणावसन्नगतित्वादुपविष्टः । वंशस्थं वृत्तम् ।।२।।

सञ्जीवनी

[5]श्रीकृष्णानुतापमेव दर्शयति—[6]मामियमित्यादिना । गुज्जरीरागे मठताले । ध्रुवपदम् । तल्लक्षणं पूर्ववत् । हरि हरीति महत्कष्टम् । [7]"हरि हरि कष्टेऽद्भुते च" इति यादवः[8] । [9]श्रीराधा हतादरतयाऽनादरेण कुपितेव गता । ननु कुपितेव गता इति त्वया कथं ज्ञातमित्यत आह—(वधूनिचयेनेति ।) वधूनिचयेन गोपस्त्रीसमूहेन वृतं वेष्टितं मां विलोक्य दृष्ट्वा इयं [10]चलिता ।

1. यमुनाकूललतागृहे—क. यमुनाकूले लतागृहे—ल.म. 2. विषसाद इति—ड. 3. गतां—क. 4. नास्ति—ड,ल.म. 5. श्रीकृष्णानुनयमेव गीतेन दर्शयति—इ.फ.ग.ह.ज. 6. मामिति—इ.फ.ग.ह.ज. 7. तः 8. पर्यन्तं नास्ति—अ.ब. एतत्पदव्याख्यान्ते दृश्यते—फ.ग-ह.ज. 8. इत आरभ्य एतत्पदसमाप्ति यावत् व्याख्या नोपलभ्यते—इ. सा राधा—फ.ग.ह.ज. 10. ज्वलिता—ब.

किं करिष्यति किं वदिष्यति सा चिरं विरहेण ।
किं जनेन धनेन किं मम किं गृहेण सुखेन ।।४।।

ननु सा गच्छन्ती किमिति त्वया[1] न निवारिता ? सापराधतया अपराधो राधां विहायान्यवधूक्रीडारूपः तद्युक्त(त)या मया अतिभयेनातिशयभीत्या न निवारिता । मात्राच्युतिरलङ्कारः ।।३।।

पदद्योतनिका

कृतानु[2]तापत्वमेवाह गीतेन—मामियमिति । हरि हरि इति खेदानुकारे । सा राधा हृतादरतया हृतबहुमानत्वेन कुपितेव कोपं प्राप्तेव अन्यस्थाने गता । मां कृष्णं वधूनिचयेन गोपीसमूहेन वृतं वेष्टितं [3]विलोक्य चलिता इतो गता इति भिन्नैव वाक्यरचना । मयापि कृष्णेनापि सापराधतया कृतापराधत्वेन हेतुनाऽतिभयेन न निवारिता । यद्वा किम्भूतेन मया ? अतिभयेन अतिशयितं भयं यस्येति ।।३।।

जयन्ती

(मामियमिति ।) चलिता रासक्रीडारम्भकाले क्रीडास्थलान्निर्गता; इयं मनस्सन्निकृष्टा राधा, वधूनिचयेन सुन्दरीकदम्बेन वृतं वेष्टितं (मां) विलोक्य कुपितेव गतेति योजना । किमर्थं नानुनीतेत्यत आह—(सापराधतयेति) सापराधतया तदितराङ्गनाक्रीडनरूपागसा सहिततया; अतिभयेन साध्वसेन मया न निवारिता प्रणयानुवचनैर्न निरुद्धा । ध्रुवाया व्याख्यानम् । हृतः विनष्टः आदरो यस्याः सा तस्याः भावः तया । 'अवमानेनेत्यर्थः । कुपितेव सा राधा गता । 'हरि हरि' इति खेदे ।।३।।

सञ्जीवनी

किञ्च [4]सा राधा चिरं चिरकालं विरहेण वियोगेन किं करिष्यति किं वदिष्यति । [5]किं [6]वदिष्यति ? मम दोषमदोषं वा वदिष्यति । नन्वन्यगोपवधूनिकरं विहाय कोऽयं तस्यामाग्रहः ? [7]तत्राह—किं जनेनेति । श्रीराधां विना मम गोपवधूनिचयेनान्यजनसमूहेन [8]वाऽपि किम् ? तद्विरहे धनेन

---

1. न निवारिता इत्यत आह—ज. 2. तापत्वमाह—क. 3. दृष्ट्वा सापराधतया कृतापराधत्वेन हेतुना भयेन वा न निवारिता—क. 4. नास्ति—अ.ब. 5. 6. नास्ति—अ.ब.फ.ग.ह.ज. 7. नास्ति—अ.ब. 8. वाऽपि जनेन—ग.ह.ज.

चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण ।
शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण ॥५॥

तज्जनितविचित्रभोगाभरणादिना वा किम् ? ननु [1]गृहमन्तरा गृहसौख्यं न स्या[2]त्तदाह—गृहेण किम् ? [3]मम गृहेण किम् ? [4]तद्विरहे । सैव गृहमित्यर्थः । ननु गृहं विना सुखं कथं स्यात्तत्राह—(सुखेनेति ।) तद्विरहे गृहसुखेन किम् ? सैव मम सुखरूपेति भावः । इयं स्मृत्याख्यावस्थोक्ता ॥४॥

पदद्योतनिका

किं करिष्यतीति । सा राधा चिरं विरहेण बहुकालवियोगेन किं करिष्यति ? [5]किं [6]वदिष्यति ? तां राधां विना मम जनेन लोकेन किम् ? [7]धनेन जीवितेन च किम् ? [8]गृहेण किम् ? [9]तां विना सर्वं विफलमित्यर्थः ॥४॥

जयन्ती

(किं करिष्यतीति ।) सा चिरं विरहेण बहुकालवियोगेन । किमित्यत्र काकुः । किं वा वदिष्यति ? अत्रापि काक्वा मौनम् । काक्वाक्षिप्तमिति मध्यमं काव्यम् । काक्वभावे सापराधं मां किं वदिष्यति निन्दां करिष्यतीति, किं करिष्यति आत्मव्यापादनादिकं विरहेण करिष्यति किमिति शङ्का स्वदुर्नयभावा व्यज्यते । मम जनेन परिजनेन तदतिरिक्तवधूगणेन वा किम् ? व्यर्थमिति । धनेन गृहधान्यादिना किम् ? भोगोपयोगिस्रक्चन्दनताम्बूलादिना किम् ? गृहेण सङ्केतयोग्यकुञ्जकुटीरादिना किम् ? भवेन संसारेण जन्मना किम् ? सुखेनेति पाठः स्पष्टः । अत्र भोगसाधनानां वैयर्थ्यप्रतिपादनान्निर्वेदाख्यसञ्चारीभावो व्यज्यते ॥४॥

सञ्जीवनी

एवं तां विना [10]धनादीनां दुःखप्रदत्वमुक्त्वा इदानीं कुपितायास्तस्या [11]आननचिन्तनं मे जीवनमिति [12]दर्शयति—चिन्तयामीति । अहं तदाननं

---

1. धर्ममन्तरा–इ. धनमन्तरा–फ.ग.ह.ज. 2. तत्राह–इ.फ.ग.ह.ज. 3. गृहेण किं मम न किञ्चित्–फ. 4. तद्वियोगे–इ.फ.ग.ह.ज. 5. 6. नास्ति–क. 7. धनेन च किम्–क.ल.म. 8. गृहेण च किम्–क. 9. तया विना–क. 10. धनादिना–अ.ब. 11. आननचिन्तनमेव–फ.ग. 12. तद्दर्शयति–ज.

तामहं हृदि संगतामनिशं भृशं रमयामि ।
किं वनेऽनुसरामि तामिह किं वृथा विलपामि ॥६॥

चिन्तयामि [1]स्मरामि । कीदृक् ? रोषभरेण कोपातिशयेन कुटिले वक्रे भ्रुवौ यत्र । किमिव ? उपरिभ्रमता [2]सञ्चरता भ्रमरेणाकुलं [3]व्याकुलं शोणपद्म-मिवा[4]रक्तकमलमिव । अनेन [5]कोपारक्तं मुखं [6]पद्मसदृशं [7]भ्रुवोर्भ्रमरोपमा चेति । "[8]शोणः कोकनदच्छविः" इत्यमरः[9] (१.५.१५) । एतेन माधुर्य-मुक्तम् ॥५॥

पदद्योतनिका

चिन्तयामीति । अहं तदाननं [10]राधामुखं चिन्तयामि [11]स्मरामि । कीदृशं [12]तदाननम् ? रोषभरेण क्रोधातिशयेन कुटिले वक्रे भ्रुवौ यस्मिन् । किमिव ? शोणपद्ममिव रक्तोत्पलमिव । कीदृशं शोणपद्मम् ? उपरिभ्रमता भ्रमरेणाकुलम् ॥५॥

जयन्ती

(चिन्तयामीति ।) रोषभरेण ईर्ष्याकृतरोषेण कुटिले भ्रुवौ यस्मिन् तत् । तस्या राधायाः आननं उपरिभ्रमता सञ्चरता भ्रमरेण आकुलं आच्छादितविकासभावं शोणपद्ममिव रक्तकमलमिव; कोकनदस्य उत्पलत्वात् कमलत्वं नास्तीति तादृशकमलस्य स्वतस्सिद्धत्वादुत्प्रेक्षैव । तादृशं चिन्तयामि । क्वचिदपि रक्तकमलस्य सद्भावत उपमैव; तयाऽपि मुखारुण्यं व्यज्यत इति अलङ्कारेण वस्तुध्वनि ॥५॥

सञ्जीवनी

तामेव [13]मधुरतामाह—[14]तामिति । अहं तां राधां अनिशं वारं वारं भृशमतिशयेन रमयामि [15]क्रीडयामि । कीदृशीम् ? हृदि हृदये संगतां सन्निहि-ताम् । किमिह वनेऽनुसरामि [16]इह तस्या अनुसरणं करोमि । इह वने वा

---

1. नास्ति–ज. 2. नास्ति–ग. 3. नास्ति–अ.ब.ज. 4. रक्त–फ. आरक्तकमिव–ज. 5. कोपात्तन्मुखं–फ. 6. पद्मसादृश्यं भ्रमरोपमा चेति–अ.ब.इ.ग.ह.ज. 7. नास्ति–अ.ब. 8. त 9. पर्यन्तं नास्ति–अ.ब. 10. राधाननं–क. 11. नास्ति–क. 12. नास्ति–ड. 13. माधुर्यतामाह–अ.ब. इ.फ.ग.ह.ज. 14. नास्ति–अ.ब.इ.फ.ग.ह. 15. क्रीडामि–ग. क्रीडयामीतिं–फ. 16. नास्ति–फ.ग.ह.ज.

तन्वि खिन्नमसूयया हृदयं तवाकलयामि ।
तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ॥७॥

किं वृथा विलपामि, किमिति वृथाविलापं करोमि। [1]हृदि सन्निहितत्वात् । न हि गृहे नष्टं वने [2]मृग्यते ॥६॥

पद्द्योतनिका

तामिति। अहं हृदि संगतां राधां अनिशं वारं वारं भृशमतिशयेन रमयामि क्रीडयामीति भावना। इह वने तां राधां किमनुसरामि किं हृदि संगतत्वादेव वृथा व्यर्थमेव किं विलपामि, विलापं करोमि ॥६॥

जयन्ती

(तामहमिति।) मनस्संग उक्तः। अहं तां अनिशं निरन्तरं हृदि चित्ते संगतां हृदि ध्येयत्वेन स्थिताम्। भृशं अत्यर्थं रमयामि लालयामि। अविच्छिन्नधारावाहिज्ञानगोचरामित्यर्थः। अत एव तां वने किमनुसरामि ? तदन्वेषणार्थं पर्यटामि। इह कुन्जवने किं वृथा विलपामि श्रोतृरहिततया व्यर्थं प्रलापं करोमि । वृथेति वैयर्थ्यं उद्देशकोटौ सत्त्वात्पुनः किमितिपदेन वैयर्थ्यविधानात् ॥६॥

सञ्जीवनी

तां हृदि विभाव्य स्वापराधं क्षमापयति—तन्वीति। हे तन्वि विरहकृशाङ्गि ! तव हृदयमसूयया मयि [3]दोषारोपेण खिन्नमाकलयामि जानामि। सहजापराध[4]मये मयि किमेतत् ? खिन्नमित्युद्वेगावस्थोक्ता। [5]यथा-

"यस्मिन् रम्यमरम्यं वा [6]स्यान्न हर्षाय किञ्चन" इत्युद्वेग इति। किञ्च सापराधेन मया तव प्रार्थना युक्ता। तन्न वेद्मि इति। त्वं कुतो हृदयान्निर्गताऽसि तन्न वेद्मि। तेन हेतुना ते तुभ्यं नाऽनुनयामि [7]नान्वेषणं करोमि। यद्वा नु [8]तर्के। ते सम्बन्धे षष्ठी। एतेन विलापावस्थोक्ता[9] ॥७॥

पद्द्योतनिका

हृदि संगतां प्रत्याह—तन्वीति। हे तन्वि असूयया असहिष्णुत्वेन खिन्नं दुःखितं तव हृदयमाकलयामि तर्कयामि। तत्तस्मादहं न वेद्मि न जाने

1. हृदय–इ. फ.ग.ह.ज. 2. मृग्येत–अ.ब. मृग्यत इति–ज. 3. दोषरूपेण–ब. 4. भये–ब.इ.फ.ग. 5. नास्ति–अ.व. 6. नास्ति–ग 7. अन्वेषणं न करोमि–इ.फ.ह.ज. 8. वितर्के–इ.फ.ग.ह.ज 9. एतदनन्तरं "उक्तं शृङ्गारे वभ्रमीति मनो यस्मिन्निति" इत्ययं भागो दृश्यते–इ.फ.ग.ह.ज.

दृश्यसे पुरतो गतागतमेव विदधासि ।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि ॥८॥

---

[1]कुतः कुत्र गतासि; तेन कारणेन ते तुभ्यं नाऽनुनयामि। "क्रिया यमभिप्रैति" (पा. २.३.१३ वा.) इति सम्प्रदानत्वम् ॥७॥

जयन्ती

अथोन्मादावस्थामाह—(तन्वीति।) हे तन्वि तव हृदयं अन्तःकरणं असूयया परोत्सवासहिष्णुतया खिन्नं खेदयुक्तं आकलयामि जाने। कुतो वा नानुनीयत इत्यत आह—(कुत इति।) कुतः क्व त्वं गतासि तत्तत्स्थलं न वेद्मि न जानेऽहम्। तेन कारणेन स्थानाज्ञानरूपेण ते त्वामिति कर्मणि षष्ठी। नानुनयामि प्रियवचनप्रणिपातादिना न प्रसादयामि ॥७॥

सञ्जीवनी

सम्प्रति भावनया लक्ष्यीकृत्य तां प्रत्याह—दृश्यस इति। पुरतोऽग्रे गतागतं यातायातमेव [2]विदधासीति दृश्यसे। हे सुन्दरि! पुरेव पूर्वमिव मे[3]मम ससम्भ्रमं सादरं परिरम्भणमालिङ्गनं [4]किमिति न ददासि? [5]पुरा [6]अग्रे। अयं भावः। अन्तर्बहिर्वर्तमाना सहसैवादृश्या कथं भवेदिति ॥८॥

पदद्योतनिका

दृश्यस इति। हे राधे! त्वं मम पुरतः अग्रे गतागतं गमनागमनमेव विदधासि करोषीति [7]दृश्यसे। तर्हि [8]पुरेव पूर्ववत्ससम्भ्रमं [9]सवेगं परिरम्भणमालिङ्गनं किं केन कारणेन न ददासि? ॥८॥

जयन्ती

(दृश्यस इति।) पुरतः अग्रे दृश्यसे। गतागतं यातायातं विदधासि। पुरेव प्रागिव ससम्भ्रमं सानन्दं परिरम्भं आलिङ्गनं न ददासि न यच्छसि। दृक्संगवशात् सञ्चरन्तीव दृश्यसे इति भावः। किमिति प्रश्नः कोऽपराधो ममेत्यर्थः। मद्विरहितरासक्रीडाकरणमेव अपराध इति चेदुत्तराष्टपदी पदम्। अत्र कालावच्छेदोपमा ॥८॥

---

1. नास्ति–ड. 2. विततासीति–अ.ब. 3. नास्ति–अ.ब. 4. नास्ति–अ.ब. 5,6. नास्ति–अ.ब. 7. दृश्यते–ड. 8. पूर्वमिव–क. 9. सर्वाङ्गे–क.

क्षम्यतामपरं कदापि तवेदृशं न करोमि ।
देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ॥९॥

सञ्जीवनी

पुनश्च ध्यानेन प्राप्तामिव ज्ञात्वा क्षमापयति—[1]क्षम्यतामिति । [2]हे सुन्दरि ! क्षम्यताम्[3] । [4]कदापि तव ईदृशं अपरं अपराधं (न) करोमि । [5]मम दर्शनं देहि । यतोऽहं[6] मन्मथेन [7]कामेन दुनोमि सन्तप्तो भवामि । अपराधबाहुल्यान्ममेति षष्ठी । [8]अथ वा मन्मथश्च मामेव दहतु, न तु त्वामिति [9]त्वदर्थमेव जीवनमिति[10] स्नेहपराकाष्ठा दर्शिता । [11]अत्राप्युन्मादावस्थोक्ता । "अन्यस्मिंस्तदिति भ्रान्तिरुन्मादो विरहोद्भवः" इति । भ्रमोऽत्रालङ्कारः । " [12]सम्भ्रमः स्नेहहर्षयोः" इति विश्वः ॥९॥

पदद्योतनिका

क्षम्यतामिति । हे सुन्दरि ! पूर्वकृतापराधः क्षम्यताम्, अपरमीदृशं तवापराधं कदापि न करोमि । अत एव मम दर्शनं देहि यतोऽहं मन्मथेन कामेन दुनोमि पीडामनुभवामि ॥९॥

जयन्ती

(क्षम्यतामिति ।) हे राधे ! इदं प्रथमागः क्षम्यतां त्वया । ईदृशं अपरं अपराधं कदा(पि) भविष्यत्काले न करोमि न करिष्ये । हे सुन्दरि ! मम दर्शनं देहि । मन्मथेन दुनोमि सन्तापमाप्नोमि । मयि दयां विधेहीत्यर्थः । तवापि मयि प्रीतिर्वर्तते मम विषादेन तवाप्यसुखमिति भावः । एवं विलापवर्णनेन उन्मादरूपावस्था द्योत्यते ॥९॥

---

1. नास्ति–इ.फ.ग.ह.ज. 2. तः 3. पर्यन्तं नास्ति–अ.ब.इ.फ.ग. 4. तवेदृशं विप्रियं कदापि कदाचिदपि न करोमि न करिष्यामि इति, अपरमपराधं क्षम्यतां क्षमस्व । इयमुन्मादावस्थोक्ता । पुनर्जातिविवेकः कथयति–इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तं नास्ति–अ.ब. 7. नास्ति–अ.ब. 8. यद्वा मन्मथो–ग. अथवा मन्मथो–इ.फ.ह.ज. 9. तः 10. पर्यन्तं नास्ति–ग. 11. अत्रोन्मादा–ज. 12. नास्ति विश्वकोशे. नास्ति–फ.

वर्णितं जयदेवकेन हरेरिदं प्रवणेन ।
किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ॥१०॥

सञ्जीवनी

गीतार्थं सङ्ग्रहेणाह—वर्णितमिति । स्वार्थे कः । जयदेवकेन इदं हरेश्चरितं वर्णितम् । कीदृशेन ? [1]प्रवणेन हरिप्रवणेन । पुनः कीदृशेन ? किन्दुबिल्वं नाम जयदेवगोत्रं कुलं ग्रामो वा; स एव समुद्रस्तत्र सम्भवो यस्य तादृशेन । रोहिण्याः पद्मावत्याः रमणेन चन्द्रेणेव । यथा [2]समुद्रादुत्पन्नः रोहिणीरमणश्चन्द्रः तथा किन्दुबिल्वोत्पन्नो जयदेव इति । चन्द्रपक्षे रोहिणी प्रसिद्धा । "सुन्दरी रोहिणी प्रोक्ता चन्द्रभार्या च रोहिणी । रोहिणी नन्दभार्या च वसुदेवाङ्गनाऽपि च ।" इति [3]विश्वप्रकाशः । उत्प्रेक्षारूपोऽलङ्कारः ॥१०॥

[4]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां सप्तमः प्रबन्धः ॥

पदद्योतनिका

वर्णितमिति । जयदेवकेनेदं गीतं वर्णितम् । [5]कीदृशेन जयदेवेन ? हरिप्रवणेन श्रीकृष्णस्याधीनेन । पुनः कीदृशेन जयदेवेन[6] ? किन्दुबिल्वं [7]जयदेवकुलं तदेव समुद्रः तस्मात्सम्भवो यस्य तादृशो रोहिणीरमणश्चन्द्र इव । यथा सागरा[8]दुत्पन्नश्चन्द्रस्तथा किन्दुबिल्वोत्पन्नो जयदेव इति ॥१०॥

[9]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सप्तमः प्रबन्धः ॥

जयन्ती

(वर्णितमिति ।) हरेः प्रवणेन भक्तेन । [10]तिन्दुः स्फूर्जवृक्षः, बिल्वः श्रीवृक्षः । तदुभयेन किञ्चित् कुलं तिन्दुबिल्वाख्यम् । तदेव समुद्रः । तत्सम्भवो रोहिणीरमणः चन्द्रः । तेन जयदेवकेन इदं राधाऽवस्थावर्णनरूपं वर्णितं रचितमित्यर्थः । अत्रात्मनश्चन्द्रत्वारोपात्कुलस्य समुद्रत्वारोपेण परम्परितरूपकमलङ्कारः ॥१०॥

[11]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सप्तमः प्रबन्धः ॥

---

1. प्रणतेन हरिपरायणेन–इ.फ.ग.ह.ज. 2. समुद्र इत्यत्र–इ. 3. नास्ति विश्वप्रकाशे 4. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तो भागो नास्ति–ड. 7. जयदेवस्य कुलम्–क. 8. उत्थितः–ल.म. 9. नास्तीयं पुष्पिका–ड.क.ल.म. 10. तिन्दुबिल्वेति इ पाठः 11. नास्तीयं पुष्पिका–इ.

अष्टमः प्रबन्धः

हृदि बिसलताहारो नायं भुजङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरभ्रान्त्याऽनङ्ग क्रुधा किमु धावसि ॥११॥

सञ्जीवनी

श्रीराधां (प्रति) स्वापराधमुक्त्वा मदनं प्रत्याह—[1]हृदीति । हे अनङ्ग ! अङ्गक्लेशानभिज्ञ ! हरभ्रान्त्या श्रीरुद्रभ्रमेण मयि न प्रहर मा प्रहारं कुरु । किञ्च क्रुधा क्रोधेन किमिति धावसि । कीदृशे मयि ? प्रियारहिते [2]श्रीराधाविरहिते । तद्विरहादेवाहं सन्तप्तः । त्वं मृतमारणं किमिति करोषीति भावः । [3]हरभ्रमोऽपि न; स प्रियासहितोऽहं प्रियारहित इति [4]भ्रमबीजमपि निरस्यति । [5]हृदि बिसलताहारो [6]मृणालस्य [7]हारस्तद्विरहशान्त्यै धृतो न भुजङ्गमनायकः सर्पराजो वासुकिः । किञ्चेयं कुवलयदलानां [8]श्रेणी नील-कमलपत्राणां पङ्क्तिस्तापशान्त्यै [9]धृता, [10]सा गरलद्युतिर्न [11]विषकान्तिर्न । [12]किञ्च मलयजरजश्चन्दनरेणुः, नेदं भस्म विभूतिः । तद्विरहवशात्सर्वेषां वैपरीत्यं जातमिति भावः । भ्रान्तिनामायमलङ्कारः । स एवायमित्युन्मादः ॥११॥

पदद्योतनिका

हृदीति । हे अनङ्ग ! त्वं मयि हरभ्रान्त्या महादेवभ्रमेण [13]न प्रहर [14]प्रहारं मा कुरु । क्रुधा कोपेन किमु किमिति धावसि । मारयितुं धावनं करोषि । हरभ्रान्तिं परिहरति—[15]हृदीति । हे काम ! मम हृदि हृदये बिसलताहारो मृणाललताहारो वर्तते नायं भुजङ्गमनायकः शेषः । [16]मम कण्ठे

1. हृदीत्यादि–इ.ग.ह. हृदीत्यादिना–ज. हृदि बिसेति–फ. 2. श्रीवृषभानुसुताविरहिते–ग. श्रीराधारहिते–ज. 3. तः 4. पर्यन्तं नास्ति–अ.ब. 5. हृदि हृदये बिसलतायाः मृणालस्य हारः–फ. हृदि अयं बिसलतायाः मृणालस्य हारः–ग.ह.ज. 6, 7. नास्ति–अ.ब. 8. नास्ति–अ.ब.इ.फ.ह. 9. कण्ठे धृता–ज. 10. न सा गरलद्युतिः विषकान्तिः–ज. गरलद्युतिर्विषकान्तिर्न–इ.फ.ह. 11. नास्ति–अ.ब. 12. किञ्चायं–इ.फ.ग.ह.ज. 13. न प्रहारं कुरु–क. 14. मां प्रहारं मा कुरु–ड. मा प्रहारं कुरु–ल.म. 15. नास्ति–क. 16. नास्ति–ल.म.

पाणौ मा कुरु चूतसायकममुं मा चापमारोपय
क्रीडानिर्जितविश्व मूर्छितजनाघातेन किं पौरुषम् ।
तस्या एव मृगीदृशो मनसिज प्रेङ्खत्कटाक्षाशुग–
श्रेणीजर्जरितं मनागपि मनो नाद्यापि सन्धुक्षते ॥१२॥

कुवलयदलश्रेणी गले नीलोत्पलपङ्क्तिः [1]वर्तते; न सा गरलद्युतिर्हालाहल-दीप्तिः । इदं मलयजरजो वर्तते [2]चन्दनालेपो वर्तते नेदं[3] भस्म । कीदृशे मयि ? प्रियारहिते राधावियोगिनि ॥११॥

जयन्ती

इदञ्च समरसगलरूपवर्णनियतत्वाद्वर्गैलारूपं गीतम् । मन्मथमुपालभते—हृदीति । हे अनङ्ग काम ! मम हृदि वक्षसि बिसमेव कमलनालतन्तुः मृणाललताकृतः हारः विरहसन्तापशान्त्यर्थं धृतः । अयमिति हस्तनिर्देशः । भुजङ्गमनायकः सर्पाधिपो वासुकिः महादेवभूषणं न । कण्ठे कुवलयस्य नीलोत्पलस्य श्रेणी आवलिः, सा प्रसिद्धा गरलद्युतिः विषप्रभा कालिमा न । इदं मलयजस्य चन्दनस्य रजः, शुष्कत्वाच्चर्चितस्यापि चूर्णत्वव्यपदेशः । भस्मोद्धूलितं विभूतिर्न । प्रियारहिते राधावियुक्ते मयि न प्रहर । निमित्तसप्तमी मयीति । पूर्वेण विरलतादिकं वर्तते । मयि हरभ्रान्त्या महादेव इति बुद्धया भुजङ्गभूषणः नीलकण्ठः शुभ्राङ्ग इति व्याप्यभ्रमैः व्यापकशिवभ्रमेण मा प्रहर मा पीडय । क्रुधा स्वाङ्गदाहजरुषा मा प्रहर । किमु व्यर्थं धावसि । प्रहर्तुं वेगेन धावसि । अत्र भ्रममूलकभुजङ्गाद्यपह्नवादपह्नवालङ्कारः । भ्रान्तापह्नुतिरिति नवीनाः । हरिणीवृत्तम् ॥११॥

सञ्जीवनी

पुनः कामो मां [4]तापयिष्यति इति भयेन कुसुमविशिखायैव दैन्यं करोति—पाणाविति । हे मनसिज मदन ! अमुं चूतसायकमाम्रमञ्जरीं पाणौ मा कुरु । किञ्च चापं धनुर्मा आरोपय । क्रीडया [5]लीलया नितरां जितं विश्वं येन, तत्सम्बुद्धिः । मूर्छितानां जनानां घातेन [6]मारणतो [7]किं पौरुषं पुरुषार्थः । कुत्सितं वा [8]पौरुषम् । अपि तु [9]तस्याः श्रीराधाया एव मृगीदृशः

1. नास्ति–ड. 2. तः 3. पर्यन्तं नास्ति–क. 4. ताडयिष्यति–इ.फ.ग.ह.ज. 5. नास्ति–ज. 6. मारणेन–इ.फ.ग.ह.ज. 7. किं पौरुषमपि तु न–ज. 8. पौरुषमपि तु न–इ.फ.ग.ह. 9. तस्या एव–ज.

हरिणीदृशः प्रेङ्खन्तः प्रसरन्तो ये कटाक्षा(स्त) एवाशुगा बाणास्तेषां श्रेणीभिः पङ्क्तिभिर्जर्जरितं [1]खण्डं खण्डं कृतं मम मनोऽद्यापि मनागीषदपि न सन्धुक्षते न स्वस्थं भवति। किञ्च पिष्ट[2]पेषवन्मनसिजस्यैतदनुचितमिति भावः। किञ्च [3]लीलया [4]जितं विश्वं येन तस्य जनेषु प्रहरणं यशोहानिर्न च पुरुषार्थं इति ध्वनिः। "सायकः शरखड्गयोः" इति विश्वः [6](४.७३)। "[7]अथास्त्रियौ धनुश्चापौ" इत्यमरः (२.८.८३)। "[8]आशुगो मारुते बाणे" इति विश्वः (१५.३१)। प्रेङ्खनामालङ्कारः ॥१२॥

पदद्योतनिका

पाणाविति। हे क्रीडानिर्जितविश्व लीलाविजितभुवन काम! अमुं चूतसायकं आम्रपुष्पबाणं पाणौ हस्ते मा कुरु। चापञ्च धनुः मा आरोपय सशरं [9]मा कुरुष्वेत्यर्थः। यतो मूर्छितजनाघातेन [10]किं [11]पौरुषम्। मूर्छितजनपीडया किं ते पौरुषं कस्तवपुरुषार्थः। मूर्छितत्वे कारणमाह—तस्या इति। तस्या एव राधाया मृगीदृशो हरिणनयनायाः मनसिजेन कामेन प्रेङ्खतां चलतां [12]कटाक्षानलानां कटाक्षवह्नीनां श्रेण्या पङ्क्त्या जर्जरितं [13]जर्जरं [14]जातं खण्डीभूतं मम मनः मनागपि स्वल्पमपि नाद्यापि सन्धुक्षते अङ्कुरितं [15]न भवति। क्वचित्कटाक्षाशुगेति पाठः। तदा कटाक्षा एवाशुगाः बाणाः ॥१२॥

जयन्ती

(पाणाविति।) हे मनसिज मदन। क्रीडया निर्जितं विश्वं येन तत्सम्बुद्धिः। त्रिजगद्विजयेन, अमुं वसन्तकालोद्गतं, चूतो रसालः तत्कुसुमरूपं सायकं पाणौ मा कुरु मा गृहाण। चापञ्च माऽऽरोपय। हस्तेन धृतञ्चेदमपि धनुषि सन्धानमस्य मा कुरु। तदपेक्षया विलतत्वात् (?) मूर्छितानां इन्द्रियव्यापारशून्यानां जनानां आघातेन संहारेण पौरुषं पराक्रमः किम्? उत्कर्षो नास्तीति भावः। स्वस्य मूर्छितत्वे हेतुमाह—तस्या इति। मृग्याः हरिण्याः दृशाविव दृशौ यस्याः तस्या राधायाः। अत्र विस्तृतचञ्चलत्वादिधर्मस्य तद्वाचकेवादेश्च उपमानीभूतदृक्पदस्य लोपात् त्रिलुप्तोपमा। तस्या एव प्रेङ्खन्तः

---

1. खण्डं नीतं मम मनः—इ.फ.ग.ह. 2. पेषण—ग.ह.ज. 3. क्रीडया लीलया निर्जितं—ज. 4. विश्वं जितं—इ.ह.ग. 5. तः 6. पर्यन्तं नास्ति—अ.ब. 7. अथास्त्रियां—इ.फ.ग.ह.ज. 8. आशुगो मारुतो बाणः—इ.फ.ग.ह.ज. 9. मा कुरु—क. मा कुर्वित्यर्थः—ल.म. 10, 11. नास्ति—क.ल.म. 12. नास्ति—क. 13, 14. नास्ति—ड. 15. नास्ति—ड.ल.म.

भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि
बाणा गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवताया-
मस्त्राणि निर्जितजगन्ति किमर्पितानि[1] ॥१३॥

चलन्तः कटाक्षाः प्रान्तवीक्षणान्येव आशुगाः बाणाः तेषां श्रेण्या परम्परया जर्जरितं कीलितं मम मनः मनागपि ईषदपि अद्यापि अधुनाऽपि न सन्धुक्षते न सन्दधाति, न सन्धितं भवतीति भावः । यद्यप्यत्रोत्तरार्घे मनसिजेति पदम-स्थानस्थं, तथापि सम्बोधनमाभिमुख्यार्थं वाक्यमध्येऽपि लोके प्रयुज्यत इति न दोषः । यद्वा मनसिजस्य प्रेङ्खत इति वा विग्रहे कृते नास्थानपदत्वम् । कटाक्षा-शुगेति ॥१२॥

सञ्जीवनी

ननु श्रीराधाकटाक्षादिस्मरणादेव तव दुःखम् । को वै कामस्यापराध-स्तत्राह—भ्रूपल्लवमिति । किमित्यव्ययं सन्देहे आक्षेपे वा । तस्यां श्रीराधायां स्मरेण कामेनास्त्राणि [2]अर्पितानि स्थापितानि इति तर्कयामि । किं वा व्यर्थ-मर्पितानि तत्कटाक्षैरेव जगज्जितमिति ध्वनिः । कीदृशानि ? निर्जितानि जगन्ति यै[3]स्तादृशानि । किञ्च तैरेवास्त्रैर्जगत्त्रयं जित्वा तस्यामेव दत्तानीति भावः । किमित्यन्यत्र न स्थापितानि ? तत्राह—अनङ्गेति । अनङ्गस्य कामस्य जयाय गमनशीलदेवतायां तद्वशीकरणाधिष्ठात्र्यामिति सूचितम् । तानि कानीत्यपेक्षायामाह—(भ्रूपल्लवमिति ।) भ्रूपल्लवमेव धनुः नीलस्निग्धत्वात् । अपाङ्गतरङ्गितानि गतागतकटाक्षा बाणाः । श्रवणपालिः कर्णप्रान्त एव गुणः [4]मौर्वी चेति । रूपकोऽयमलङ्कारः ॥१३॥

पदद्योतनिका

भ्रूपल्लवमिति । इति पूर्वोक्तप्रकारेण [1]स्मरेण कामेन तस्यां [2]राधायां अस्त्राणि किमर्पितानि स्थापितानि । कीदृश्यां तस्याम् ? अनङ्गस्य कामस्य जये त्रैलोक्यविजये जङ्गमदेवतायां जङ्गमदेवतारूपायाम् । कीदृशान्यस्त्राणि ? निर्जितजगन्ति जितत्रैलोक्यानि । इतीति किम् ? भ्रूपल्लवं भ्रूलता धनुः ।

---

1. पद्यमिदं 'भ्रूचाप' 'तानीमानि' इति पद्यद्वयानन्तरं सव्याख्यं दृश्यते–इ. 2. अर्पितानीति तर्कयामि–ह.ज. 3. तानि–इ.फ.ग.ह.ज. 4. प्रत्यञ्चेति–अ.ब. इ.फ.ग.ह.ज. 5. नास्ति–ड. 6. राधायां गमनदेवतारूपायां कीदृशान्यस्त्राणि–ड.

भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्
सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ।।१४।।

अपाङ्गतरङ्गितानि कटाक्षनिरीक्षणानि बाणाः । श्रवणपालिः कर्ण(प्रदे)शः [1]गुणः [2]पतञ्चिका ।।१३।।

जयन्ती

([3]भ्रूवल्लरीति ।) स्मरेण मदनेन भ्रुवौ वल्लरी लता धनुः, अपाङ्गानां तरङ्गितानि सङ्कुचितनेत्रप्रेक्षितानि बाणाः, श्रवणपालिः प्रदेशः गुणः मौर्वी, कर्णपालिस्थरेखाणां संवेष्टितगुणाकृतित्वाद् गुणत्वारोपः । इति एतानि स्मरेण तस्यामेवानङ्गस्य जयजङ्गमदेवता जयलक्ष्मीः, प्रायः देवतायाः अप्रत्यक्षत्वेन प्रतिमाः क्रियन्ते स्थावराः सुवर्णादिमय्यः । इयन्तु चलतीति जङ्गमत्वविशिष्ट-देवतात्वमारोपितम् । निर्जितानि जगन्ति यैस्तानि धनुर्बाणगुणाः अस्त्राणि अर्पितानि स्थापितानि। यद्वा अर्पितानि त्यागपूर्वकतया दत्तानि । अत्र जगज्जय-कार्ये जाते कालान्तरे सापेक्षाणीति तस्यां निहितत्वेनोत्प्रेक्षा । जगन्मात्रस्य जितत्वात् । त्यक्तानीत्युत्प्रेक्षान्तरेण विकल्पः । श्रवणपालिमुद्दिश्य गुणत्वं विधीयत इति उद्देश्यविधेययोः पौर्वापर्यव्यतिक्रमादविमृष्टविधेयांशो नाश-ङ्कनीयः । छन्दोऽनुसारात्पाठे कृते नार्थो भवतीति न दोषः । भ्रूवल्लर्यादीनां जगद्वशीकरणक्रियानिमित्तेन तस्यां जयनक्रियोत्प्रेक्षा समर्पणोत्प्रेक्षा वा । अत्रास्त्रसंयोगे सति दुःखोत्पत्तिर्भवति । तदभावेऽतिदुःखोत्पत्तेः कारणाभावे कार्योत्पत्तिरूपो विभावनालङ्कारः वक्तृवशादुत्प्रेक्षया व्यज्यते । इत्यलङ्कारेणा-लङ्कारध्वनिः ।।१३।।

सञ्जीवनी

इदानीं श्रीराधाङ्गविलसितान्येव स्मरबाणरूपाणि मां व्यथयन्ति; कामस्तु निमित्तमात्रमेव, तमपि विहाय भावनयाऽग्र स्थितामिव श्रीराधां सम्बोध्याह–भ्रूचाप इति । हे तन्वि कृशाङ्गि, तव भ्रूचापे भ्रूरूपे धनुषि निहितोऽर्पितः [4]कटाक्षविशिखः कटाक्षरूपो बाणो मम मर्मव्यथां मर्मपीडां

---

1. नास्ति–क.ल.म. 3. प्रत्यञ्चा–क.ल.म.ड. 3. 'भ्रूवल्लरीधनुरपाङ्गे' ति इ. पाठः 4. नास्ति–ग.

तावत्प्रथमं निर्मातु करोतु। वाणस्य प्राणापहरणमेवोचितमिति भावः। किञ्च कवरीभारोऽपि वेणीसञ्चयोऽपि कन्दर्पनिवासत्वात् मारोद्यमं [1]वियोगिनां मारणाय [2]मारस्य चोद्यममुपायं मत्प्राणहरणे वा करोतु। तत्र हेतुः श्यामात्मा [3]कुटिलश्च। योऽन्तर्मलिनः[4] कुटिलश्च भवति [5]सोऽन्य[6]वधाय प्रवर्तत इत्युचितमेवाङ्गव्यथाजनकत्वात्। किञ्च अयं विम्बाधरो बिम्बफलद्युतिरधरोऽपि मोह मूर्च्छां तनुतां विस्तारयतु। बिम्बायाः बुद्धिहारित्वं प्रसिद्धमेव, "सद्यो बुद्धिहरा बिम्बा" इति। एतदपि युक्तम्। तत्राप्ययं रागवान्। राग आरक्तता उद्वेगो वा तद्वान्। यो रागवान् सः परप्रतारणायाहङ्करोत्येव। किञ्च सद्वृत्तः साधुः वर्तुलः स्तनमण्डलः कुचाग्रो मम प्राणैः कथं किमिति क्रीडति। प्राणनाशं करोति। सद्वृत्तस्य [7]परप्राणपीडनमनुचितमिति। विरोधनामाऽयमलङ्कारः। "[8]विशिखस्तोमरे शरे" इति विश्वः[9] (१०.१०)। "श्यामं[10]निन्दितकृष्णयोः" इति धरणिः। "आत्मा देहमनोब्रह्मस्वभाव[11]वृत्तिबुद्धिषु" इति विश्वप्रकाशः (७१.११५)। "कबरी केश[12]पाशोऽथ" इत्यमरः (२.७.९७)। "मारो[13]मृत्यौ विषेऽनङ्गे च" इति (विश्वः १००.२१)। "[14]बिम्बं फलेऽपि विम्बायाः प्रतिबिम्बे च मण्डले" इति च (विश्वः ८०.२)। [15]रागोऽनुरक्तौ मात्सर्ये" इति च (विश्वः १४.९)। "चरिते वर्तुले वृत्तम्" इति शाश्वतः ॥१४॥

पदद्योतनिका

[16]अधुना मनोविषयीकृतां राधां प्रति [17]स्वीयदुःखमाह—भ्रूचाप इति। हे तन्वि कृशाङ्गि, भ्रूचापे भ्रुवावेव चापो धनुस्तत्र निहितोऽर्पितः [18]कटाक्षविशिखः कटाक्षबाणः मर्मव्यथां मर्मपीडां [19]तावन्निर्मातु करोतु। विशिखस्य मर्मव्यथाजनकत्वं युज्यत एवेति भावः। अनु च श्यामात्मा श्यामवर्णः कुटिलो वक्राकारः कबरीभारोऽपि केशसमूहोऽपि मारोद्यमं कामोद्यमं तावत्करोतु। मलिनस्य कुटिलस्य च [20]मारणोद्यमो युज्यत एव। अयञ्च बिम्बाधरः

---

1. विरागिणां—ग. 2. कामस्य—इ.फ.ग.ह. 3. तः 4. पर्यन्तं नास्ति—अ.ब. 5. सोऽपि—अ.ब. 6. वधायैव—ज. 7. प्राणपीडन—ग. 8. तः 9. पर्यन्तं नास्ति—अ.व. 10. निशित—अ.ब. 11. धृति-विश्वप्रकाशः। 12. वेशोऽथ-अमरः। 13. मृतो—इ.फ.ग.ह.ज. 14. बिम्बं फले बिम्बिकायाम्—वि. प्र. 15. रागो तु—अ. 16. अथ वा—ल. 17. स्वदुःखमाह—क. 18. नास्ति—क. 19. तापं निर्मातु करोतु—क. 20. मारोद्यमो—ल.म. मारणोद्यमं—ड.

तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा ।
सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं
तस्यां लग्नसमाधि हन्त विरहव्याधिः कथं वर्धते ॥१५॥

बिम्बोष्ठः मोहं तनुतां [1]विस्तारयताम् । कथम्भूतो [2]बिम्बाधरः ? रागवान् लोहितवर्णः । रागिणो [3]विषयिणो [4]मोहो ममत्वं युज्यत एव । सद्वृत्तः साधुवर्तुलः स्तनमण्डलः मम प्राणैः कथं क्रीडति ? सद्वृत्तस्तु प्राणघातको [5]न भवति ॥१४॥

जयन्ती

राधां प्रत्याह-(भ्रूचापेति ।) हे तन्वि ! तव भ्रुवावेव चापः तस्मिन् । द्वयोरेव चापाकृतित्वात् । निहितः सन्धितः कटाक्ष एव विशिखः शरः मर्मसु प्राणपतनसन्धिषु मांसाश्रितेषु व्यथां निर्मातु । मर्मस्य सम्यक्सन्धितशरस्य व्यथाजनकत्वं युक्तमिति समालङ्कारः । श्यामात्मा मलिनस्वभावः कुटिलः अर्धचन्द्राकृतित्वात् । कबरीभारः केशपाशः मारः मारणशीलः तस्य उद्यमं मारणं करोतु । कुटिलमलिनान्तःकरणस्य मारकत्वं अतियुक्तमिति भावः । रागवान् आरक्तः अयं पूर्वानुभूतत्वेन सन्निहितः बिम्बोपमानः अधरः तावत्प्रथमं मोहं जनयत्वित्यर्थः । सद्वृत्तः सम्यग्वर्तुलः स्तनमण्डलः मम प्राणैः कथं क्रीडति । प्राणापहारेण खेलति । सद्वृत्तानां सच्चरितानां प्राणापहारो न युक्तः । विषमालङ्कारः विरुद्धकार्योत्पत्तिरूपः । अत्र भ्रूयुगस्य चापत्वाय निमित्तकटाक्षविशिखत्वारोपरूपपरम्परितरूपकेणोत्थापितः समालङ्कारोऽङ्गाङ्गिभावेन सङ्कीर्णः । रागवत्त्वविशेषणस्य प्रीतिरूपाभिप्रायकत्वात्परिकरालङ्कारः । (तेन) सङ्कीर्णः समालङ्कारः । मलिनान्तःकरणाभिप्रायककौटिल्यं भयकरविशेषणत्वात्परिकरः । (तेन) सङ्कीर्णः समालङ्कारः । सद्वृत्तश्च सच्चरिताभिप्रायः । विषमालङ्कारः । चतुर्णां निरपेक्षत्वात्संसृष्टिः ॥१४॥

सञ्जीवनी

इदानीं [1]तस्याः स्मरस्य च [2]कोऽपराधः ? तदङ्गसङ्गाभावान्मे चेतसि दुःखमिति भावनयाऽग्रे स्थितां दृष्ट्वा तामाह-तानीति । स्पर्शसुखानि

---

1. नास्ति-क. 2. नास्ति-क. 3. विषयैषिणो-क. 4. मोहं-ड. 5. न भवतीति-क.ल.म. 6. न तस्याः-ह.ग.फ. 7. कोऽप्यपराधः-अ.ब.फ.ग.ह.ज.

[1]तदङ्गस्पर्शसम्भवानि [2]सुखानि तानि पूर्वमनुभूतान्येव। एतेन त्वगिन्द्रिय-सुखमुक्तम्। किञ्च दृशोश्चक्षुषोर्विभ्रमाः विलासाः तरलाः चञ्चलाः स्निग्धाः [3]प्रेमगर्भितास्त एव मया नायिकायामनुभूताः पूर्वं ये। एतेन [4]चक्षुरिन्द्रियसुख-मुक्तम्। किञ्च [5]तद्वक्त्राम्बुजसौरभं मुखपद्मामृतसौगन्ध्यं तदेव यत्पूर्वमनु-भूतम्। एतेन घ्राणलाभ उक्तः। किञ्च गिरां वचसां [6]वक्रिमा वक्रभावः स एव। कीदृशः ? सुधास्यन्दी अमृत इव युक्तः। एतेन नायिकायाः शब्द[7]-माधुर्यमुक्तम्। किञ्च [8]सा बिम्बाधरमाधुरी बिम्बसदृशस्यौष्ठस्य [9]माधुरी मधुरता [10]सैव या पूर्वमनुभूता तस्याः। [11]अनेन लावण्यमुक्तम्। इत्येवं-प्रकारेण स्पर्शादिपञ्चानां विषयासङ्गेऽपि सान्निध्येऽपि तस्यां श्रीराधायां मानसं [12]मम मनः लग्नसमाधि प्राप्तैकाग्र्यं [13]चेत्तस्याम्। [14]हन्तेति खेदे; महत्कष्टे वा। विरहव्याधि [15]वियोगरोगः कथं किमिति वर्धते। भ्रमश्चाय-मलङ्कारः। "[16]रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी" इत्यमरः (१.५.७) ॥१५॥

पदद्योतनिका

तानीति। तान्येव स्पर्शसुखानि यानि पुरा [17]नायिकासङ्गमेऽनुभूतानि ते च तरलाः चञ्चलाः स्निग्धाः प्रेमान्विताः दृशोश्चक्षुषोर्विभ्रमा विलासाः। एतेन रूपम्। तदेव वक्त्राम्बुजसौरभं वदनकमलसुरभित्वम्। एतेन [18]गन्धवत्त्वम्। स च सुधारसस्यन्दी अमृतद्रवयुक्तः गिरां वचसां वक्रिमा वक्रत्वम्। एतेन शब्दः। सा च बिम्बाधरमाधुरी [19]बिम्बवत् ओष्ठमाधुर्यं तदेव। एतेन रसः। इति विषयासङ्गेऽपि तस्याः [20]रूपगन्धशब्दस्पर्शादीनां पञ्चानां सान्निध्येऽपि मम

---

1. स्पर्शसम्भवानि–अ.ब. 2. नास्ति–इ.फ.ग.ह.ज. 3. प्रेमगर्विता–अ.ब. 4. त्वगिन्द्रियसुखमुक्तम्–अ.ब. चक्षुर्विषयसुखमप्युक्तम्–इ.फ.ग.ह. चक्षुर्विषये सुखमप्युक्तम्–ज. 5. तस्याः वक्त्राम्बुज–इ.फ.ग.ह.ज. 6. वक्रीभाव–इ.फ.ग.ह.ज. 7. माधुर्यादिकम्–ग. 8. नास्ति–अ.ब. 9. नास्ति–अ.ब. 10. मयैव पूर्व–अ.ब. 11. एतेन लावण्यमाधुर्यमुक्तम्–इ.फ.ग.ह.ज. 12. नास्ति–अ.ब. 13. चेत्तथापि–इ.फ.ग.ह.ज. 14. हन्त खेदे–इ. 15. वियोगः–ग. 16. नास्त्ययं नैघण्टुकोद्धारः–अ.ब. रूपरसगन्धस्पर्शशब्दाश्च विषया इत्यमरः–इ.फ.ग.ह.ज. 17. नायिकासङ्गे–इ.फ.ग.ह.ज. 18. गन्धः–क. 19. बिम्बोष्ठ-माधुरी–क. 20. रूपरसस्पर्शादीनां–क.ल.म.

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिताः ।
संमुग्धे मधूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्यन्दं कन्दलिताश्चिरं ददतु वः क्षेमं कटाक्षोर्मयः ॥१६॥

इति श्रीगीतगोविन्दे महाकाव्ये जयदेवकृतौ मुग्धमधूसूदनो नाम तृतीयः सर्गः

मानसं मनः तस्यां राधायां लग्नसमाधि प्राप्तध्यानं [1]वर्तते तथापि [2]हन्त खेदे, विरहव्याधिः कथं [3]वर्धते । ध्यानयुक्तस्य योगिनो व्याधिनाशात् ॥१५॥

जयन्ती

(तानीति ।) स्पर्शस्य आलिङ्गनकालिकस्य सुखानि शर्माणि । तच्छव्दः सर्वत्रानुभूतार्थक इति न मच्छव्दाकाङ्क्षा । ते च अनुभूताः तरलाः चञ्चलाः स्निग्धाः प्रीतियुक्ताः दृशः विभ्रमाः प्रेक्षणरूपविलासाः । तत् वक्त्राम्बुजस्य सौरभं परिमलः; पद्मिनीत्वात्सहजसुगन्धः । सुधास्यन्दी माधुर्य-रूपामृतस्रग्वी गिरां वाचां वक्रिमा व्यङ्ग्याभिप्रायवचनानीत्यर्थः । सा विम्बाधरस्य माधुरी मिष्टत्वम् । [4]मुखैकदेशत्वेऽपि पृथगुपादानं अधरस्य रदाभ्यां खण्डनव्यापारोपयोगार्थम् । मुखस्य चुम्बनाश्रययोग्यत्वात्पृथगानन्द-भेदात्पृथगुक्तः अधरविम्ब इति । उक्तप्रकारेण विषयस्य आसङ्गेऽपि अत्यन्त-मानससम्बन्धेऽपि तस्यां राधायां मानसं लग्नसमाधि । तदितरवृत्तिनिरोधेन तदैकाग्रवृत्तिरूपसम्प्रज्ञानसमाधिमच्चेत् विरहव्याधिः कथं वर्तते । हन्तेत्याश्चर्यम् । तदीयालिङ्गनमनस्सम्बन्धवियोगः कथमिति भावः । तच्छव्दग्रहणेन स्मृतिर्व्यभि-चार्युपात्तः ॥१५॥

सञ्जीवनी

सम्प्रति आशिषमाशास्ते—तिर्यक्कण्ठेति । मधुसूदनस्य दैत्यनाशकस्य मधुपानकर्तुर्वा कटाक्षोर्मयः कटाक्षसिन्धुतरङ्गाः वो युष्माकं [5]क्षेमं मङ्गलं ददतु प्रयच्छन्तु । कीदृशाः ? राधामुखेन्दौ राधामुखचन्द्रे मृदु ईषत् स्यन्दं चलनं तेन प्रेम्णा च कन्दलिताः प्रवृद्धाः । [6]कीदृशे ? [7]सुमुग्धमधुरे सुष्ठु मुग्धं तन्मधुरं

1. नास्ति–ड. 2. हन्त इति खेदे–क. 3. वर्तते–ड.क.ल.म. 4. मुखैक-देशत्वात्–इ. 5. क्षेममभीष्टं–इ.फ.ग.ह.ज. 6. कीदृशे राधामुखेन्दौ–ज. 7. व्याख्या चेयं 'प्रेम्णा कन्दलिताः सुमुग्धमधुरे राधाननेन्दौ सुधासारे' इति पाठपक्षे; मूलपाठस्तु न तथा दृश्यते।

तत्र। कीदृशाः? [1]वंशादुच्चरत्सु वेणोर्निर्गच्छत्सु गीतिस्थानेषु गानपदेषु कृतावधानैर्दत्तचेतोभिः ललनालक्षैः[2]र्गोपीसमूहैः [3]न संलक्षिताः न ज्ञाता [4]दृष्टा वा। [5]कीदृशस्य? तिर्यक् त्रिभङ्गं लालितः कण्ठो यस्य, विशेषेण लोलश्चपलो मौलिः शिखासमूहो मुकुटीकृतो यत्र। तरलौ चञ्चलौ उत्तंसौ यस्य; कर्मधारयः। रूपकालङ्कारः। [6]"गीतं[7]गानमिमे समे" इत्यमरः (१.६.२६)। "उत्तंसः कर्णपूरेऽपि सुन्दरे नायकेऽपि च" इति धरणिः। "कन्दलन्तु नवाङ्कुरः"; ऊर्मिः पीडा लवोत्कण्ठा" इति च[8] ॥१६॥

श्रीराधिकावियोगाधिव्याकुलं व्रजमोहनम्।
भजामि परमानन्दं वल्लवीगणसंवृतम् ॥

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[9]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां मुग्धमधुसूदनो नाम तृतीयः सर्गः ॥

पदद्योतनिका

अधुना कविर्भक्तान् प्रत्याशिषं ब्रूते--तिर्यगिति। मधुसूदनस्य कृष्णस्य कटाक्षोर्मयः कटाक्षदर्शन[10]तरङ्गाः वः युष्माकं भक्तानां क्षेमं कल्याणं चिरं ददतु [11]प्रयच्छन्तु। कीदृशाः? मधुरे सुन्दरे राधामुखचन्द्रे संमुग्धं अव्यक्तमृदुस्यन्दं च किञ्चिच्चलं च यथा स्यात्तथा कन्दलिताः पल्लविताः। पुनः [12]कीदृशाः? वंशादुच्चरत्सु वेणोर्निर्गच्छत्सु गीतस्थानेषु गानपदेषु कृतावधानैर्दत्तमनोभिर्ललनालक्षैर्गोपाङ्गनासहस्रैर्न संलक्षिताः ज्ञाता न दृष्टा इत्यर्थः। कीदृशस्य मधुसूदनस्य? तिर्यक् वक्रः कण्ठो यस्य, विलोलश्चञ्चलो मौलिर्मस्तकः, किरीटो वा यस्य; तरलश्चल उत्तंसः अवतंसो यस्य सः; पश्चात्कर्मधारयः। लक्षपदञ्च बहुत्वोपलक्षकम्। मुग्धो हरिर्विहरतीत्यर्थः ॥१६॥

[13]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां (मुग्धमधुसूदनो नाम) तृतीयः सर्गः ॥

---

1. वंशादुच्चरत्सुनिर्गच्छत्मु–अ.ब. वंशादुद्वलत्सु वेणोर्निर्गच्छत्सु–इ.फ.ग. वंशादुच्चलत्सु वेणोर्निर्गच्छत्सु–ह.ज. 2. गोपसमूहैः–अ.ब. गोपवधूसमूहैः–इ. फ.ग.ह.ज. 3. न संलक्षिता ज्ञाता–ज. 4. नास्ति–अ.ब. 5. कीदृशस्य मधुसूदनस्य–ज. 6. तः 8. पर्यन्तो भागो नास्ति–अ.ब. 7. ज्ञानमुभे समे–इ. गीतिर्गानमुभे समे–फ.ग.ह.ज. 9. शिवदासपण्डितात्मज–ह. 10. तरङ्गभावः–ड. 11. नास्ति–क. 12. नास्ति–ड. कथम्भूताः–क. 13. नास्तीयं पुष्पिका–क.

जयन्ती

(तिर्यक्कण्ठेति ।) तिर्यक् साचीकृतः कण्ठः स चासौ विलोलमौलिश्च चञ्चलमूर्धा । अत एव तरलोत्तंस इति विशेषणम् यस्य तस्य मधुसूदनस्य वंशोच्चरत् । निर्गच्छन्ति दीप्तिस्थानानि तारस्थानानि । स्वराणां मन्द्रमध्यतारत्वेन त्रेधा विभागः । तारः दीप्तिरित्युच्यते । तेषु कृतं अवधानं तदेकाग्रचित्तत्वं यासां ताश्च ललनाः गोप्यः तासां लक्षाः शतसहस्रं तैः । संख्यायाः संख्येयपरत्वेन लक्षललनाभिरित्यर्थः । न संलक्षिताः नोहिताः इति नशब्देन 'सह सुपे'ति केवलसमासः । नञा कृते नलोपप्रसङ्गात् । यथा नैकधासमासः । अलक्षित इत्यर्थः । [1]प्रेम्णा स्नेहेन कन्दलितः वर्धितः सुमुग्धः शोभनः सुन्दरश्चासौ मधुरः रमणीयः तस्मिन् । राधामुखमेव इन्दुः चन्द्रः तस्मिन् सुधायाः अमृतस्य आसाराः धारासम्पातरूपाः । अत्यन्तस्नेहकृताः । कटाक्षानां प्रान्तावलोकितानां ऊर्मयः तरङ्गाः नः अस्माकं क्षेमं सर्वमपि अनाशकतया कुशलं ददतु यच्छन्तु । अत्र तिर्यक्कण्ठत्वं दीप्तिस्थानकृतावधानत्वं च परार्थतया अलक्षितत्वे हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः; "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति काव्यप्रकाशलक्षणात् । किञ्च वंशीवादनातिशयभरसकण्ठसाचीकरणव्याजेन ललनादाक्षिण्यकृतत्राससञ्चारी व्यज्यते । कटाक्षानुभावाः । राधाललनाश्च आलम्बनविभावः । एवमेतैर्विभावानुभावव्यभिचारिसंयोगाद्रतिरभिव्यज्यत इति शृङ्गारो रसः । स चाशीर्वादरूपालङ्कारस्याङ्गत्वाद्रसवदलङ्कारः । भानुकरेणाशिषोऽप्यलङ्कारत्वमुक्तम् । भावाङ्गो वा । रतिर्देवादिविषया भाव इत्यभिधीयते ॥६॥

इति [2]श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां मुग्धमधुसूदनो नाम तृतीयः सर्गः ।

---

1. "प्रेम्णा कन्दलिते सुमुग्धमधुरे राधामुखेन्दौ सुधासारा वो मधुसूदनस्य ददतु क्षेमं कटाक्षोर्मयः" इति इ. पाठः 2. गीतगोविन्दे मुग्धमधुसूदनो नाम—इ.

चतुर्थः सर्गः

स्निग्धमधुसूदनः

यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम् ।
प्राह प्रेमभरोद्भ्रान्तं माधव राधिकासखी ॥१॥

सञ्जीवनी

तृतीये विरहावस्था कृष्णस्योक्ता प्रियां प्रति ।
चतुर्थे विरहावस्था [1]तस्यास्तं प्रति वर्ण्यते[2] ॥

[3]रः कामोऽधिको यस्याः सा राधिका तत्सखी वासन्ती माधवं [4]श्रीकृष्णं प्रत्याह । वक्ष्यमाणमूचे । कीदृशम् ? प्रेमभरेण [5]स्नेहाधिक्येन उद्भ्रान्तं चेष्टाशून्यं; तद्ध्यानिष्ठं वा; उद्विग्नं वा । एतेनोद्वेगावस्थाऽन्यक्रियामन्दचेष्टा च सानुरागता चोक्ता । कीदृशम् ? यमुनायाः तीरवानीरनिकुञ्जे [6]वेत्रलतागृहे मन्दं स्वैरं, अमन्दं सवेगं वा आसीनम् । कथं मदनुग्रहं करिष्यतीति भावः । यमुनातीरवानीरनिकुञ्जपदैः कृतान्तभगिनीदाहाधिकान्वेषणकामाधिकताः क्रमेण सूचिताः । "मन्दः खले [7]मन्दगते मूर्खे" इति विश्वः (६३.१०) । "वानीरं वेतसे प्रोक्तं जाम्बुक" इति शाश्वतः । रसवदलङ्कारः [8] ॥१॥

पदद्योतनिका

इदानीं राधासखी कृष्णं प्राह—यमुनेति । राधिकासखी माधवं कृष्णं प्राह वक्ष्यमाणमुक्तवती । कीदृशं [9]माधवम् ? यमुनातीरे यो वानीरनिकुञ्जो वेतसो[10]पलक्षितलतागृहं तत्र मन्दं तूष्णीं आस्थितमासीनम् । पुनः [11]कीदृशम् ? प्रेमभरेण राधायां प्रेमातिशयेन उद्भ्रान्तं उद्विग्नचित्तम् । [12]कथं मयि प्रसादं [13]प्रिया यास्यतीति ॥१॥

---

1. सम्प्रति–इ. 2. पद्यमिदं नास्ति–ज. 3. रहः–अ.ब.इ.फ.ग.ह.ज. 4. नास्ति–अ.ब. 5. प्रेमाधिक्येन–इ. 6. वेतसलतागृहे–ज. 7. मन्दरते–विश्व: । मन्दगजे–इ. 8. एतदनन्तरं "प्रशंसायां कः" इति दृश्यते–इ.फ.ग.ह.ज. 9. कृष्णम्–क. 10. उपलक्षितं–क.ल.म. 11. कथम्भूतम्–क. 12. कथमपि–ड.ल.म. 13. नास्ति–ड.ल.म.

[1]कर्णाटरागे एकतालीताले

निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम् ।
व्यालनिलयमिलनेन गरलमिव मलयसमीरम् ।।
सा विरहे तव दीना
माधव मनसिजविशिखभयादिव
भावनया त्वयि लीना ।। ध्रुवपदम् ।।२।।

जयन्ती

इत्थं माधवविलासमुक्त्वा चतुर्थसर्गे राधाया विरहावस्थामष्टपदीमय्या वर्णयितुमाह—यमुनेति । राधिकायाः सखी नैर्मसहचरी यमुनायाः कालिन्द्याः तीरे वानीरनिकुञ्जः तस्मिन् आस्थितं प्रेमभरेण प्रीत्यतिशयेन उद्भ्रान्तं उन्मादावस्थं; इदमिदमितिकर्तव्यताविचारशून्यं माधवं प्राह ।।१।।

सञ्जीवनी

कर्णाटरागे एकतालीताले । रागलक्षणम्—

"कृपाणपाणिर्गजदन्तपत्र-
मेकं वहन् दक्षिणकर्णपूरे ।
संस्तूयमान[2]स्सुरचारणाद्यैः
कर्णाटराग[3]शिशखिकण्ठनीलः ।।"

काललक्षणं [4]पूर्वमेवोक्तम् । अत्र च नायिकालक्षणम्—

वासकसज्जा समुत्कण्ठा स्वाधीन[5]पतिका तथा ।
कलहान्तरिता वाऽपि विप्रलब्धाऽभिसारिका ।।
[6]खण्डिता प्रोषिता चैव नायिकाश्चाष्ट सम्मताः ।।

तत्र समुत्कण्ठितालक्षणं भरते—

[7]यस्यास्समुचितेऽप्यह्नि [8]प्रवासी नैति वल्लभः ।
सा स्मरानलसन्तप्ता विरहोत्कठिता [9]मता ।। इति ।

1. कानडगौड़—इ. 2. सुरचारणोच्चैः—फ.ग.ह.ज. 3. सखिकण्ठनीलः-ज. 4. पूर्ववत्—ग. 5. भर्तृका—इ.फ.ग.ह.ज. 6. खण्डिता प्रोषिताऽपि वा नायिकाष्टविधा मताः—अ.ब. 7. अनेककार्यव्यासङ्गाद्यस्या नागच्छति प्रियः। तदनागतदुःखार्ता विरहोत्कण्ठिता तु सा ।। (ना. शा. २२.२१४) 8. प्रवासैः—अ. 9. तु सा—ग.

सख्युक्तं गीतेन दर्शयति—निन्दतीत्यादिना। हे माधव !. मधुप्रिय ! सा तव विरहे विश्लेषे दीना दुःखिता। अत एव दाहकत्वात् चन्दनं इन्दुकिरणञ्च निन्दति। अधीरं बहुखेदं कष्टमनुविन्दति [1]प्राप्नोति। [2]त्वद्विरहे अदाहकोऽपि [3]दाहकस्सञ्जात इति ध्वनिः। किञ्च चन्दनपर्वतवायुं सर्पनिवाससंसर्गेण [4]आशीविषमिव कलयति मन्यते। कीदृशी ? कामवाणभयात्तत्त्रासत इव। भावं च प्रियं प्रति नयतीति भावना ध्यानं तेन त्वयि लीना लग्ना। कामवाणा मामेव दहन्तु न मत्प्रियमिति ध्यानं कवचत्वेन करोतीति भावः। "[5]शम्बरारिर्मनसिजः" इत्यमरः (१.१.२६)। "धीरस्तु कुङ्कुमे स्वल्पे बुधे धैर्यवति" इति विश्वः। "गरलं विषे माने गरलं तृणपूलके" इत्यपि (विश्वः १०५.५७)। "व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि" इति विश्वः[6] (१०४.१९)। [7]उत्प्रेक्षोपमालङ्कारः ॥२॥

पदद्योतनिका

उक्तश्लोकार्थं गीतेनाह–[8]'निन्दतीति।[9]अस्य [10]गीतस्य कर्णाटकरागः। तल्लक्षणम्—

"कृपाणपाणि[11]र्गजदन्तपत्रमेकं वहन् दक्षिण[12]कर्णपूरे।
[13]संस्तूयमानस्सुरचारणौघैः कर्णाटरागश्शिखिनीलकण्ठः ॥ इति।

अत्र गीते विरहोत्कण्ठिता वर्णनीया। तत्र [14]काव्यादावष्टौ नायिका वर्ण्यन्ते।—

वासकसज्जा सोत्कण्ठा स्वाधीनभर्तृका तथा।
कलहान्तरिता चापि विप्रलब्धाऽभिसारिका ॥
खण्डिता प्रोषिता चैव नायिकाश्चाष्ट सम्मताः।

तत्र [15]समुत्कण्ठालक्षणं भरतोक्तम्—

यस्याः समुचिते चाह्नि [16]प्रवासी [17]नैति वल्लभः।
सा स्मरानलसन्तप्ता विरहोत्कण्ठिता मता ॥ इति।

---

1. नास्ति–अ.ब. 2. तद्विरहे–अ.ब. 3. दाहकत्वे जातः–अ.ब.इ.फ.ग.ह.ज. 4. सा विषमिव–इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तो भागो नास्ति–अ.ब. 7. उत्प्रेक्षालङ्कारः–इ. उत्प्रेक्षोपमालङ्कृती–फ.ह.ज. 8. नास्ति–ड.ल.म. 9. कर्णाटरागेण गीयते एकतालताले। कर्णाटरागलक्षणम्–ल.म. 10. नास्ति–क. 11. जगदण्डतन्त्र–ड. 12. कर्णपूरम्–ड. 13. संस्तूयमानस्तु सुविचारणैर्यः–क. 14. काव्यादावष्ट–ड. 15. विरहसमुत्कण्ठालक्षणम्–क. 16. प्रवासे–ड. 17. नैव–क.

गीतार्थस्तु —हे माधव कृष्ण, सा राधा तव विरहे सीदति; दीना [1]दुःखिता। त्वयि त्वद्विषये भावनया अनुचिन्तनेन कामबाणः [2]कृष्णविरहे प्रविश्य स्थितां मां न पीडयिष्यतीति भावनता लीना प्रविष्टा। कस्मादिव ? मनसिजविशिख-भयादिव कामबाणभयादिव। केन प्रकारेण तिष्ठतीत्याह—हे कृष्ण ! सा राधा चन्दनं निन्दति। इन्दुकिरणं चन्द्रदीप्तिमनु लक्ष्यीकृत्य अधीरं महान्तं खेदं अनुतापं विन्दति। अनु च मलयसमीरं [3]मलयाचलजवायुं व्यालनिलयमिलनेन सर्पस्थानयुक्तेन गरलमिव विषमिव कलयति मन्यते ॥२॥

जयन्ती

कानडगौडरागेण गीयते एकतालीतालेन। तल्लक्षणम्—

"निन्यासांशग्रहोपेतो रागः कन्नडगौडकः।
सम्पूर्णोऽपि कदाचित्स्यादारोहे त्यक्तधैवतः॥
गोयज्ञः पश्चिमे यामे उत्कलानामतिप्रियः॥" इति।

(निन्दतीति।) 'सा विरहे' इति ध्रुवपदे कर्तृपदम्; अन्यत्र क्रिया-कर्मणी। हे कृष्ण ! तव विरहे दीना सा राधिका। अतिविरहसन्तापद्योतनार्थं [4]द्विवारं पाठः विरहे तव दीनेति। सङ्गीतरत्नाकरे गीतलक्षणे द्विर्गनिरञ्ज-नार्थमुक्तम्। तथा च चन्दनर्चार्चितं निन्दति दूषयति, सन्तापकत्वात्। अधीरं चपलतया युक्तं तथा स्यात्तथा इन्दुकिरणं चन्द्रचन्द्रिकां खेदं दुःखसाधनत्वात् दुःखं अनुविन्दति जानाति। मलयसमीरं दक्षिणवायुं व्यालाः सर्पाः तेषां निलयेन मलयाचलेन मिलनेन सम्बन्धेन गरलमिव सन्तापकत्वाद्विषमिव कलयति जानाति। समीरस्य विषत्वेन सम्भावनाद्वस्तूत्प्रेक्षा। सन्तापकत्वादेव वायोर्विषत्वसम्भाव-नस्योचितत्वं व्यालनिलयमिलनेनेति हेतोः कथनात्प्रौढोक्तिः। "प्रौढोक्ति-रुत्कर्षहेतौ चेद्धेतुत्वप्रकल्पनम्" (चन्द्रालो—१२५) इति तल्लक्षणात्। ध्रुवायाः व्याख्यानम्। हे माधव ! मनसिजस्य विशिखात् बाणात् भयं तस्मादिव त्वयि लीना गूढा त्वय्येव ध्यानान्तःकरणा। अत्र विशिखभयस्य लयनाहेतोर्हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा। भयस्य सत्त्वादुक्तास्पदा। वस्तुतस्तु लीनेवेति औत्कण्ठ्येन रहसि स्थितायाः निगूढत्वनिमित्तत्वेन धर्मोत्प्रेक्षा ॥२॥

---

1. दुःखिता वर्तते—क. 2. कृष्णविषये—क. 3. मलयजवायुं—क.ल.म. 4. "सा विरहे तव दीना कृष्ण सा विरहे तव दीना" इति इ. पाठः।

अविरलनिपतितमदनशरादिव भवदवनाय विशालम् ।
स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम् ॥३॥

सञ्जीवनी

(अविरलेति) हे कृष्ण ! भवतो रक्षणाय [1]जलसहितकमलिनीपत्रसमूहं स्वस्य [2]मर्मरूपे हृदये विशालं विस्तीर्णं वर्म कवचं करोति । कस्मादिव ? [3]अविरलं निरन्तरं यो निपतितो [4]मदनशरः कामबाणः तस्मादिव[5] । पूर्वं त्वयि [6]लीनाऽपि शान्तिमलभमाना हृदये [7]त्वद्रक्षणार्थं कवचं करोतीति भावः । अनेन स्नेहाधिक्यं दौत्यनिपुणता चोक्ता । "अवनं रक्षणे प्रीतौ" इति विश्वः (७१.२५) । उत्प्रेक्षालङ्कारः ॥३॥

पदद्योतनिका

अविरलेति । हे कृष्ण ! सा राधा स्वहृदयमर्मणि सजलनलि(नी)-दलजालं [8]सोदककमलिनीपत्रसमूहमेव वर्म कवचं करोति । कस्मै प्रयोजनाय ? [9]भवदवनाय [10]हृदि स्थितस्य भवतो रक्षणाय । कस्मादिव ? अविरलं निरन्तरं निपतितः यो मदनशरः [11]कामबाणः तस्मादिव । कीदृशं [12]वर्म ? विशालं [13]विस्तीर्णम् । त्वं तस्या हृदये सर्वदा तिष्ठसीति भावः ॥३॥

जयन्ती

(अविरलेति ।) अविरलं सान्द्रं निपतितात् मदनशरात् कामबाणादिति जातावेकवचनम् । तस्माद्भवतः तव अवनाय रक्षणायैव विशालं महत् सजलनलिनीदलानां जलसहितकमलच्छदानां समुदायमेव स्वहृदयध्यानवदाश्रये मर्मणि जीविताश्रये वर्म कवचं करोति तनोति । अत्र विरहतापशान्त्यर्थं धृतसजलनलिनीदलस्य भवदवननाम्फलसम्भवत्वेनोत्प्रेक्षणात् फलोत्प्रेक्षा । असिद्धस्य अवनस्याभावात् ॥३॥

---

1. जलसह्रितं–इ.फ.ग.ह.ज. 2. हृदयरूपे मर्मस्थाने–इ.फ.ग.ह. 3. तः 5. पर्यन्तो भागो नास्ति–अ.ब. 4. मनसिजशरः–ग. 6. लीनाऽप्यशान्ति–अ.ब.फ.ग.ह.ज. लीनाऽथ शान्ति–इ. 7. त्वद्रक्षणार्थे–इ.फ.ग.ह.ज. 8. सजल–क.ल.म. 9. नास्ति–क. 10. स्वहृदयस्थितस्य–ल.म. स्वहृदयस्थितस्य रक्षणाय–क. 11–13. नास्ति–ड. 12. नास्ति–ल.

कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ।
व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम् ॥४॥

सञ्जीवनी

(कुसुमेति ।) [1]किञ्च कुसुमशय्यां तव परिरम्भसुखाया[2]लिङ्गनाय व्रतमिव करोति । कीदृशम् ? [3]कुसुमविशिखस्य कामस्य शराणां तल्पमास्तरो यत्र । अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरम् । व्रतफलपरिपाकेन [4]त्वयाऽवश्यं गन्तव्यमिति [5]भावः । "[6]तल्पं तु [7]शयनीयं स्यात्तल्पं [8]कामकलत्रयोः" इति विश्वः (७५.८) । "[9]नियमो व्रतमस्त्री[10]" इत्यमरः[11] (२.७.३७) । दीपकालङ्कारः ॥४॥

पदद्योतनिका

कुसुमेति । कुसुमशयनीयं पुष्पशय्यां [12]करोतीत्यर्थः । अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयं सुन्दरम् । पुष्पशय्या स्वयमेव मनोज्ञा इयन्तु विरचनाकुशला शय्याभावे पुष्पशय्यामेव करोतीत्यर्थः । किमिव ? [13]कुसुमविशिखः कामस्तस्य शराः पुष्पाणि तान्येव तल्पं शय्या तादृशं [14]व्रतमिव । शरशय्याशयनरूपं दारुणं व्रतमिति भावः । किमर्थं व्रतमित्यत आह—तव परिरम्भसुखाय आलिङ्गनसुखं प्राप्तुमित्यर्थः ॥४॥

जयन्ती

(कुसुमेति ।) अनल्पाः बहवश्चेतसि विलासकलाः पद्माद्यनेकसंवेशविशेषाः तैः कमनीयं रमणीयम् । कुसुमानां शयनीयं तद्युक्तशय्या तव परिरम्भस्य आलिङ्गनस्य सुखाय सौख्याय आलिङ्गनानन्दरूपफलार्थं कुसुमविशिखस्य मदनस्य शरतल्पं सायकशयनं व्रतमिव करोति । त्वां विना शतनास्तृतकुसुमानि निन्दति । तथाऽपि सज्जत्वात् मार्गं परीक्षते इति भावः । अत्र कुसुमशयनस्य व्रतत्वेनोत्प्रेक्षणाद्वस्तूत्प्रेक्षा ॥४॥

---

1. नास्ति—अ.ब. 2. आलिङ्गनसुखाय—ह. 3. कुसुमविशिखशराणां—ग. 4. त्वया गन्तव्यमिति—ग. 5. ध्वनिः—इ.फ.ग.ह.ज. 6. तल्पं तु शयनीये स्यात्तल्पमट्टकलत्रयोः—विश्वः । 7. कमनीयं—अ.ब. 8. मदनकलत्रयोः—इ.फ.ग.ह.ज. 9. तः 11. पर्यन्तं नास्ति—अ.ब. 10. स्त्रियाम्—ग.ज. 12. करोति—क.ल.म. निद्रां करोतीत्यर्थः—ड. 13. कुसुमविशिखस्य शराः—क. 14. व्रतमेव—ड.

वहति च वलितविलोचनजलधरमाननकमलमुदारम् ।
विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम् ।।५।।

सञ्जीवनी

व्रतमुक्त्वेदानी[1]मपि साहसमाचरतीति कथयति—वहतीत्यादिना। सा उदारं मुखकमलं वहति धारयति। प्रेमाश्रुणा सहजशीतलेन च। कीदृशम्? वलिते त्वन्मार्गावलोकनाय प्रसारिते[2]लोचने जलधरौ जलदौ [3]मेघौ यत्र। एते-नेर्ष्यादयो मृदुत्वं च [4]सूचितानि। [5]कमिव? विधुं [6]चन्द्रमिव। कीदृशं चन्द्रमिव? विकटैः करालैर्विधुन्तुदस्य राहोर्दन्तैर्दलनेन खण्डनेन गलिता प्रच्युता अमृतस्य धारा यत्र। अत्र मुखं विधुना नेत्रजलममृतधारया सहोपमम्। अत्र विधुन्तुद इव कामः [7]क्षीणबलः दन्तैस्तन्मुखं दलतीति ध्वनिः। "विकटः सुन्दरे प्रोक्तो विशालविकरालयोः" इति विश्वः (३७.३०)।" "तमस्तु राहुः स्वर्भा-नुस्सैंहिकेयो विधुन्तुदः" इत्यमरः (१.३.२६) ।।५।।

पदद्योतनिका

वहतीति। सा राधा उदारं मनोज्ञं आननकमलं वहति धारयति। कीदृशम्? [8]चलितमुच्छ्वसितं यद्विलोचनजलं नेत्राश्रु तद्धारयतीति। [9]कमिव? विधुमिव। [10]कीदृशं विधुमिव? विकटेन दारुणेन महता विधुन्दस्य राहोर्दन्तेन दलनात् खण्डनात् गलिता अमृतधारा यस्मात् ।।५।।

जयन्ती

(वहतीति।) वलिताभ्यां विवर्तिताभ्यां विलोचनाभ्यां [11]जलभरः अश्रु-प्रवाहो यस्मिन् तत्। आननमेव कमलम्। विकटाः निम्नोन्नताः विधुन्तुदस्य राहोः दन्ताः तैः दलनेन भेदनेन गलितामृतधारा सुधासृतियस्मिन् तम्। विधु-मिव चन्द्रमिव वहति। गलदश्रुमुखकमलोपमासिद्ध्यर्थं विकटेत्यादिविशेषणं विधोर्दत्तम्। तच्च स्वतस्सिद्धं न भवतीत्युत्प्रेक्षैव। न कल्पितोपमा। तया च रूपकं सङ्कीर्णम् ।।५।।

---

1. अतिसाहसम्–इ.फ.ग.ह.ज. 2. लोचनजलधरौ–अ.ब. लोचने एव जलधरौ जलदौ–इ.फ.ग.ह.ज. 3. नास्ति–अ.ब. 4. सूचितम्–अ.ब.इ.फ. ग.ह.ज. 5. किमिव–अ.ब.इ.फ.ग.ह.ज. 6. चन्द्रं–अ.ब.इ.फ.ग.ह.ज. 7. नास्ति–अ.ब. 8. 'चलितविलोचन' इति–ड. मूलपाठोऽपि। 9. किमिव–क.ल.म. 10. कीदृशम्–ड. कीदृशं विधुम्–क.ल.म. 11. 'जलभर' इति इ. मूलपाठः।

विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम् ।
प्रणमति मकरमधो विनिधाय करे शरं नवचूतम् ॥६॥

सञ्जीवनी

(विलिखतीति।) किञ्च हे कृष्ण ! सा राधा रहस्येकान्ते कुरङ्गमदेन कस्तूर्या भवन्तं विलिखति। एतेनानुरागमालिन्यमुक्तम्। कीदृशम् ? [1]असमशरभूतं कामरूपम्। किञ्च तव करे शरं धृत्वाऽधो मकरं मत्स्यं कन्दर्पवाहनं [2]विनिधाय [3]प्रणमति नमस्करोति। कीदृशम् ? नवचूतं नूतनाम्राङ्कुरम्। तव पूजनं कृत्वा त्वामेव याचत इति भावः। यथा—

देवतापूजनं कुर्याद्दद्याद्बलिभुजे बलिम्।
लिखेत्कान्तप्रतिकृतिं पाठयेच्छुकशारिकाम् ॥ इति वचनम्।

[4]अथ वा कोप एव प्रणामः। श्रीकृष्ण एव प्रणामं करोत्विति [5]सम्प्रेरयतीति भावः। "मृगनाभिर्मृगमदः [6]कस्तूरी गन्धशेखरः" इति हारावली (२.३८९) ॥६॥

पदद्योतनिका

विलिखतीति। हे कृष्ण। सा राधा असमशरभूतं कन्दर्पस्वरूपं [7]भवन्तं [8]त्वां रहसि एकान्ते कुरङ्गमदेन कस्तूरिकया विलिखति। अधः कामरूपस्य भवतः [9]अधस्तात् मकरं कामवाहनं विनिधाय कृत्वा करे हस्ते नवचूतं नूतनाम्ररूपं शरं बाणं च विधाय संस्थाप्य प्रणमति। पूजानन्तरं प्रणामो युज्यत एव। मकरस्य ध्वजत्वे प्रसिद्धेऽपि [10]वाहनत्वेऽपि न दोषः ॥६॥

जयन्ती

(विलिखतीति।) रहसि एकान्ते कुरङ्गमदेन कस्तूर्या असमशरभूत कामस्वरूपं भवन्तं विलिखति। चित्रलिखितत्वात्प्र(ति)रूपकाधःप्रदेशे च मकरं मत्स्यं विनिधाय वाहनत्वेन लिखित्वा करे च नूतनरसालकुसुममञ्जरीशरं च निधाय प्रणमति। त्वामेव मन्मथजनकत्वान्मदनत्वेन उपासत इत्यर्थः। एतेन विलेखनरूपानुभावः। अत्र कन्दर्पहेतोः कृष्णस्य कन्दर्पस्य चैक्यवर्णनाद्धेतुहेतुमतोरैक्यम्। "हेतुं केचित्प्रचक्षते" इति लक्षणात् ॥६॥

---

1. नास्ति–अ.ब.इ.फ.ग.ह 2. निधाय–ग. विधाय–फ. 3. नास्ति–अ.ब. 4. यद्वा–ग. 5. तं प्रेरयतीति–इ. 6. प्रोक्ता कस्तूरिका बुधैः–हारावली। 7. नास्ति–क. 8, 9. नास्ति–ड. 10. वाहनत्वे–ड.

[1]प्रतिपदमिदमपि निगदति माधव तव चरणे पतिताहम् ।
त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥७॥

सञ्जीवनी

किञ्च [2]उन्मादावस्थामेवाह—प्रतिपदमिति । सा प्रतिपदं [3]प्रतिचरण क्षणं क्षणं वा; इदं निगदति अतिशयेन विलपति । हे माधव मधुप्रिय ! तव चरणेऽहं पतिता । त्वामेव [4]नमस्करोमीति भावः । [5]किञ्च सुधानिधिश्चन्द्रोऽपि त्वयि विमुखे पराङ्मुखे सति [6]मयि सपदि शीघ्रं तनुदाहं शरीरतापं तनुते विस्तारयति । विरोधोऽलङ्कारः ॥७॥

पदद्योतनिका

प्रतिपदमिति । हे कृष्ण ! सा राधा प्रतिपदं प्रतिक्षणमिदमपि निगदति [7]वदति । हे माधव [8]कृष्ण, तव चरणेऽहं पतिता । [9]किमिदमितीत्यत आह— [10]त्वयि विमुखे पराङ्मुखे सति मयि सपदि तत्क्षणं सुधानिधिरपि चन्द्रोऽपि तनुदाहं शरीरपीडां तनुते विस्तारयति । यतश्चन्द्रोऽप्येवं कुरुते अतस्तव चरणे पतिताऽहम् । [11]कायमनोभावेन शरणं प्राप्तेत्यर्थः । शरणागतस्य कदाचित्पीडा न भवतीति मत्वा[12] ॥७॥

जयन्ती

प्रार्थनामाह–(प्रतिपदमिति ।) हे माधव ! प्रतिपदं वचने वचने इदं अनुपदमेव वक्ष्यमाणं निगदति । तदेवाह–तव चरणे अहं पतिता । नमस्करोमीत्यर्थः । त्वयि कृष्णे विमुखे सति मयि विषये सुधानिधिः अमृतकरोऽपि तनुदाहं तनुते विस्तारयति । सुधाकरस्य दाहशामकत्वेऽपि त्वद्वैमुख्याद्विपरीतमाचरतीति विरूपकार्योत्पत्तिरूपविषमालङ्कारः । त्वयि विमुखे इति पदार्थहेतुककाव्यलिङ्गमूलक इत्यनयोरङ्गाङ्गिभावेन सङ्करः ॥७॥

1. पदमिदं 'ध्यानलयेन' इत्यस्मात्पदात्पश्चात् दृश्यते मुद्रिते (नि. सा.) । 2. उन्मादावस्थोक्तमेवाह–ग. 3. प्रतिचरणं क्षणं चेदं–इ.ग. प्रतिचरणं क्षणं वेदं–फ.ह. 4. नमस्करोमीत्यर्थः–इ.फ.ग.ह.ज. 5. किञ्चेति –अ.ब.इ.फ.ग.ह.ज. 6. नास्ति–अ.ब. 7–8. नास्ति–ड. 9. किमित्यत आह–अ.म. किमितीत्यत आह–ल. 10. अहं त्वयि–ड. 11. तः 12. पर्यन्तं नास्ति–ड.ल.म.

ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम् ।
विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् ॥८॥

सञ्जीवनी

किञ्च, उन्मादावस्थामुक्त्वा किलिकिञ्चितेनाह—ध्यानेत्यादिना । ध्यानलयेन चिन्तनपरत्वेन भवन्तमतीव दुरापं अतिशयेन दुष्प्रापं [1]भवन्तं पुरोऽग्रो परिकल्प्य कृत्वा शोकेन विलपति प्रेम्णा हसति स्नेहाधिक्येन विषीदति रोदिति विरहेण चञ्चति गच्छति त्वदन्वेषणाय अनुरञ्जनेन तापं दुःखं मुञ्चति त्यजति । शोकरोषाश्रुहर्षादे[2]स्सङ्करः किलिकिञ्चितमिति । दीपकालङ्कारः ॥८॥

पदद्योतनिका

ध्यानेति । हे कृष्ण ! अतीव दुरापं [3]दूतीद्वाराऽपि दुर्लभं भवन्तं ध्यानलयेन चित्तैकाग्र्येण पुरोऽग्रे परिकल्प्य कल्पनां कृत्वा मयि स्नेहमिदानीमपि न करोतीति [4]विलापं [5]करोति; हसति; भवद्दर्शनेन विषीदति हास्यानन्तरमानर्थक्यात् । अत एव रोदिति [6]चञ्चति स्थानान्तरं गच्छति स्थानान्तरे आलिङ्गनादिकं करिष्यतीति । अत एव तापं मुञ्चति मनस्तापं त्यजति ॥८॥

जयन्ती

(ध्यानलयेनेति ।) ध्यानलयेन कतीव अत्यन्तं दुरापं समये प्राप्तुमशक्यं भवन्तं माधवं ध्यानविषयैकतानतारूपं तेन लयः बहिरिन्द्रियव्यापारशून्यतया दृढीभावः । तेन पुरः स्वसमक्षं परिकल्प्य मनसा स्थापयित्वा विलपति तव चरणे पतिताऽहमित्यादिकं प्रलपति । श्रोतुर्निकटेऽभावात् । हसति सन्निहित इति हास्यं तनोति । विषीदति दुःखं विषादं प्राप्नोति । रोदिति रोदनं करोति । [7]चुम्बति भ्रान्त्या चुम्बनं करोति । अत एव तापं मुञ्चति हृष्यति । अत्र ध्रुवपदस्थसेति कारकस्यानेकतिङन्तान्वयेन दीपनात्कारकदीपकालङ्कारः । तेनानेकसञ्चारीभावाः गम्यन्त इति भावः ॥८॥

---

1. नास्ति–इ.फ.ग.ह.ज. 2. सङ्करः नास्ति–ग. 3. नास्ति–क. 4–5. नास्ति–ड. 6. चलति स्थानान्तरं आलिङ्गनादिकं–ड. चञ्चति स्थानान्तरं आलिङ्गनादिकं–ल.म. 7. 'चुम्बति मुञ्चति तापम्' इति इ. पाठः

श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम् ।
हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम् ॥९॥

सञ्जीवनी

गीतार्थं सङ्ग्रहेणाह—श्रीजयदेवेत्यादिना । श्रीजयदेवभणितं कथितमिदमधिकमतिशयेन [1]यदि [2]यदा मनसा चित्तेन नटनीयं [3]तदा हरिविरहेण श्रीकृष्णविरहेण व्याकुला या वल्लवयुवतिः गोपयुवतिः श्रीराधा तत्सखीवचनं पठनीयम् । [4]गीतिरेव सर्वं विधास्यतीति भावः ॥९॥

[5]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां अष्टमः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवेन भणितं [6]कथितमिदं गीतं मनसा [7]चित्तेनाधिकं सातिशयं यदि नटनीयं नर्तनीयं तदा हरिविरहेण कृष्णवियोगेन आकुलाकुलाया वल्लवयुवत्या राधायास्सखीवचनं गीतं [8]पठनीयम् । जयदेवगीतेषु इदमतिशयमिति भावः ॥९॥

[9]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां अष्टमः प्रबन्धः ।

जयन्ती

(श्रीजयदेवेति ।) श्रीजयदेवेन भणितं इदं हरेः विरहेण वियोगेन आकुला विह्वला वल्लवयुवतिः राधा तत्सख्याः वचनं अधिकं मनसा नटनीयं यदि चिन्तनीयं चेत् पठनीयं तदेति शेषः । बहुपाठानन्तरं तदर्थः भवतीति भावः ॥९॥

[10]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामष्टमः प्रबन्धः ।

1–2. नास्ति–अ.ब. 3. तदाह–अ.ब. 4. गीतमेव–इ.फ.ग.ह.ज. 5. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 6. कथितं–ड. 7. चिन्तनादिकं यदि नटनीयं नर्तयितव्यं तदा कृष्णवियोगेन–ड. 8. तदेव पठनीयम्–ल.म. तत्पठनीयम्–क. 9. नास्तीयं पुष्पिका–ड.क.ल.म. 10. नास्तीयं पुष्पिका–इ.

नवमः प्रबन्धः

आवासो विपिनायते प्रियसखीमालाऽपि जालायते
तापो निःश्वसितेन दावदहनज्वालाकलापायते ।

सञ्जीवनी

एवं सा त्वां विना [1]कुत्रापि नानन्दं लभत इति प्रलपति—आवासेति। हे कृष्ण ! त्वद्विरहेण आवासो [2]गृहं विपिनायते अरण्यमिवाचरति। किञ्च प्रियसखीमाला वल्लभ[3]सहचरीसमूहोऽपि जालव[4]द्बन्धनत्वेन प्रतीयते। तापोऽपि विरहोद्भवसन्तापोऽपि निःश्वसितेन श्वासेन दावदहनज्वालावलीवाचरति। किञ्च [5]हन्तेति कष्टे; त्वद्विरहेण साऽपि हरिणीरूपायते [6]कामशार्दूलत्रस्ता मृगीवाचरति परिभ्रमति। [7]हा कष्टे। कथं वा कन्दर्पोऽपि [8]कामोऽपि यमायते त्वद्विरहेण कृतान्तवदाचरति। एतेन कामस्य सन्तापकर्तृत्वमुक्तम्। किं कुर्वन्? शार्दूलस्य व्याघ्रस्य विक्रीडितं [9]क्रीडां विरचयन् कुर्वन् मृगीमरणं व्याघ्रादेव भवति; तद्वदत्रापि। एतेनोद्वेगावस्था [10]व्याध्यवस्था चोक्ता। तल्लक्षणम्—

"अभीष्टसङ्गमाभावात् व्याधिस्सन्तापलक्षणः"।
"[11]शार्दूलो राक्षसे व्याघ्रे पशुभेदे च" इति विश्वः (१०५.११३) ॥१॥

पदद्योतनिका

गीतोक्तमर्थं श्लोकेनाह—आवास इति। हे कृष्ण ! हन्तेति खेदे; सा राधाऽपि त्वद्विरहेण [12]भवद्वियोगेन हरिणीरूपायते मृगीरूपमिवाचरति। कथमित्यत आह—आवासो गृहं विपिनायते वनमिवाचरति। त्वद्विरहा[13]त्प्रियसखी-

1. नास्ति–ग. 2. गृहमपि–फ. 3. सहचरोऽपि–इ. 4. बन्धनं प्रतीयते–अ.ब. 5. हन्त कष्टम्–इ.ह.फ.ज. 6. कामशर्दूलविक्रीडितत्रस्ता–ग. 7. हा कष्टम्–इ.फ.ग.ह.ज. 8. नास्ति–ग. 9. नास्ति–अ.ब. 10. नास्ति–ज. 11. लाङ्गूलं मेहने पुच्छे शार्दूलो राक्षसान्तरे। व्याघ्रे च पशुभेदे च सत्तमे तूत्तरस्थितः ॥—विश्वः। 12. नास्ति–ड. 13. सखीमूहोऽपि–ड.

साऽपि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥१॥

समूहोऽपि स्वेच्छागमननिवारकतया जालायते जालमिवा[1]चरति। तापोऽपि देहदाहोऽपि श्वसितेन श्वासोच्छ्वासेन दावदहनज्वालाकलापायते अरण्यवह्निज्वालापरम्परेवाचरति। कन्दर्पोऽपि कथं [2]यमायते यमइवाचरति। हाशब्दः स्वात्मनो दुःखाधिक्यसूचनार्थः। कीदृशः कन्दर्पः? शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् [3]कुर्वन् मृगीमरणं शार्दूलदेव [4]भवति ॥१॥

जयन्ती

(आवास इति।) आवासः निवासगृहं विपिनायते शून्यवनमिवाचरति। प्रियसखी नर्मसहचरीतुल्या सम्भोगकाले साक्षित्वात्सखीत्वारोपः। माला स्रक् कुसुममालाऽपि जालायते रज्जुकृतवागुरायते। तापोऽपि विरहज्वरोऽपि श्वसितेन निःश्वासरूपवायुना सहायेन दावदहनस्य ज्वालानां शिखानां कलापायते समुदाय इवाचरति। साऽपि राधिकाऽपि हरिणीरूपायते मृगीस्वरूपेवाचरति। हन्तेति खेदे। कन्दर्पोऽपि शार्दूलविक्रीडितं व्याघ्रचरितं विरचयन् कुर्वन् यमायते अन्तक इवाचरति। हा कथं कष्टं कथं जीविष्यति। अत्र व्यङ्गताः पञ्च लुप्तोपमाः। एतासां संसृष्टया दशम्यवस्थारूपं वस्तु व्यज्यते। अष्टपद्यामस्यामुत्तरस्याञ्च विरहोत्कण्ठिता नायिका। "चिरयत्यधिकं कान्ते विरहोत्कण्ठितोन्मनाः" (प्रता—ना.प्र. ४६)। शार्दूलविक्रीडितेति वृत्तनामकथनात् मुद्रालङ्कारः। "सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" इति तल्लक्षणात् (चन्द्रा—१३९) ॥१॥

---

1. आचरतीति–ड. 2. नास्ति–ल.म. 3. नास्ति–क. 4. नास्ति–ड. भवतीत्यर्थः–क.

[1]देशाखरागे एकतालीताले

स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरिव भारम् ॥
राधिका विरहे तव केशव ! ॥२॥ ध्रुवपदम् ॥

सञ्जीवनी

तदेव गीतेनाह—(स्तनेति ।) देशाखरागे एकतालीताले । राग-लक्षणम्—

आस्फोटनाविष्कृतरोमहर्षो
नियुद्धसम्बद्धविशाल[2]वाहुः ।
प्रांशुः प्रचण्डद्युतिरिन्दुगौरो
देशाखरागः[3]खलु मल्लमूर्तिः ॥ इति ।

ताल[4]लक्षणमुक्तमेव । ध्रुवपदम् । हे केशव ! सा [5]राधा तव विरहे सति कृशतनुरिति हेतोः स्तनविनिहितं [6]कुचधृतमपि उदारं मनोहरं सुन्दरमपि त्वया दत्तमपि हारं भारं मनुते [7]भारसदृशं मनुते[8] । तद्धारणसमर्था त्वया कर्तव्येति भावः ॥२॥

पदद्योतनिका

इदानीं सखी पुनरपि राधायाः [9]दुःखचेष्टितं गीतेनाह—स्तनेति । [10]देशाखरागस्तल्लक्षणम्—

आस्फोटनाविष्कृतरोमहर्षो
नियुद्धसन्नद्धविशालबाहुः ।
प्रांशुः प्रचण्डद्युतिरिन्दुगौरो
देशाखरागः [11]किल [12]मल्लमूर्तिः ॥

---

1. देशाकरागेण यतितालेन–इ. 2. चारुः–इ. 3. किल–इ.फ.ग.ह्.ज. 4. लक्षणं पूर्ववत्–ग. 5. राधिका–इ.फ.ग.ह्.ज. 6. स्तनधृतमपि–इ.फ.ग.ह्.ज. 7. तः 8. पर्यन्तं नास्ति–इ.फ.ग.ह्.ज. 9. दुःखिताचेष्टितं–ल.म. 10. देशाक–ड. देशाङ्क–क. 11. नास्ति–ड. 12. खिल्लमूर्तिः–ड.

सरसमसृणमपि मलयजपङ्कम् ।
पश्यति विषमिव वपुषि सशङ्कम् ॥३॥

हे केशव कृष्ण ! तव विरहे जाते सति राधिका एवं चेष्टते । कीदृशमित्यत आह—कृशतनुः विरहकृशशरीरा [1]सा राधा स्तनविनिहितमपि स्तनयोः [2]स्थापितमुदारं बहुमूल्यं हारमपि [3]मुक्ताहारमपि भारमिव मनुते ॥२॥

जयन्ती

पुनरपि सखीवचनमेव देशाखरागेण यतितालेन गीयते । (स्तनेति ।) स्तनयोर्विनिहितं पिनद्धं उदारं अमौल्यं हारमपि मुक्ताहारस्रजमपि कृशतनुरिव क्षीणेव भारं मनुते जानाति । अतिभारमिति पाठः साधुः । अत्र कृशतनोर्हारासहनं युक्तमिति । ध्रुवाया व्याख्यानम् । हे केशव तव विरहे राधिका ॥२॥

सञ्जीवनी

विरहजनितव्याधिमाह—(सरसेति ।) सा [4]मलयजपङ्कं चन्दनलेपं सरसमसृणमार्द्रं[5]मसृणमपि [6]कर्पूरसहितं वा देहे सशङ्कं शङ्कासहितं विषमिव [7]पश्यति [8]गरलमिव पश्यति[9] । एतेन जीविताऽप्यतिसाहसं करोतीति ध्वनिः । "[10]मसृणोऽकर्कशे स्निग्धे" इति मेदिनीकारः (१५.७०) । "पङ्कः कर्दमपापयोः" इति विश्वः (३.४१) ॥३॥

पदद्योतनिका

सरसेति । सा राधा [11]सरसमसृणं [13]सान्द्रचिक्कणं मलयजपङ्कमपि चन्दनलेपमपि वपुषि सशङ्कं विषमिव पश्यति तव विरहात् ॥३॥

जयन्ती

(सरसेति ।) सरसः आर्द्रश्चासौ मसृणः श्लक्ष्ण च तम् । मलयजपङ्कः श्रीगन्धः यक्षकर्दमाद्यङ्गरागः तम् । वपुषि सशङ्कं (स)सम्भ्रमं विषमिव पश्यति । सन्तापजनकत्वरूपधर्मलुप्तोपमा ॥३॥

---

1. नास्ति–क. 2. स्थितं–ड. 3. नास्ति–क. 4. नास्ति–अ.ब.इ.फ.ग.ह. 5. चिक्कणमपि–इ.फ.ग.ह.ज. 6. कर्पूरादिसहितं–इ.फ.ग.ह.ज. 7. नास्ति–इ.फ.ग.ह.ज. 8. तः 9. पर्यन्तं नास्ति–अ.ब. 10. मसृणेऽकर्कशे–अ.ब. 11. नास्ति–ड. 12. सान्द्रं चिक्कणं–ड. सार्धचन्दनं–ल. सार्द्रचन्दनं–म.

श्वसितपवनमनुपमपरिणाहम् ।
मदनदहनमिव वहति सदाहम् ॥४॥
दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ॥५॥

सञ्जीवनी

(श्वसितेति ।) किञ्च सा तव विरहे श्वसितपवनं श्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति । विरहवायोरतिदाहकत्वात् । कीदृशम् ? अनुपमपरिणाहं उपमारहितः परिणाहो दैर्घ्यं यत्र । (पुनः) कीदृशम् ? सदाहं दाहसहितम् । पदद्वयेन दाहः श्वासाधिक्यं च सूचितम् ॥४॥

(दिशि दिशीति ।) किञ्च, हे कृष्ण ! सा नयननलिनं नेत्रपद्मं जलं वा दिशि दिशि [1]गत्वा त्वदागमनकाङ्क्षया किरति क्षिपति । कीदृशम् ? [2]सजलकणजालं अश्रुसमूहैः सहितम् । पुनः [3]कीदृशम् ? विगलितनालमिव [4]गलितदण्डमिव । तापबाहुल्यादश्रुसंशोषणाभावः सूचित इति । किञ्च भवदागमनेच्छया [5]नयनपद्माभ्यां दिङ्मण्डनं करोतीति भावः । विरोधालङ्कारः । उद्वेगावस्थेयम् ॥५॥

पदद्योतनिका

श्वसितेति । सा राधा श्वसितपवनं [6]निःश्वासवायुं मदनदहनमिव कामाग्निमिव वहति धारयति । वायोरपि दाहकत्वात् । कीदृशम् ? अनुपमः उपमारहितः परिणाहो विशालता यस्य; सदाहमुष्णत्वात् दाहयुक्तम् ॥४॥

दिशि दिशीति । [7]सा [8]राधा सजलकणजालं अश्रुबिन्दुसमूहसहितं [9]नयननलिनं नेत्रपद्मं दिशि दिशि भवद्दर्शनवाञ्छया [10]किरति क्षिपति । कीदृशमिव ? [11]विगलितनालमिव [12]विगलितदण्डमिव ॥५॥

---

1. नास्ति–इ.फ.ग.ह.ज. 2. नास्ति–अ.ब.इ.फ.ग.ह. 3. कमिव–ग. 4. दण्डमिव–ज. 5. नयनपद्मैः–इ.फ.ग.ह. 6. अल्पवायुं–ड. 7–8. नास्ति–ड. 9. नास्ति–ड. 10. विकरति–ड.ल.म. 11. गलितनालमिव–ड. गलितमिव–ल. दलितमिव–म. 12. नास्ति–ड. विगलितदण्डमिव पद्मं कमलम्–क. गलितदण्डमिव–ल.म.

[1]नयनविषयमपि किसलयतल्पम् ।
[2]कलयति [3]विहितहुताशविकल्पम् ॥६॥

जयन्ती

(श्वसितेति ।) अनुपमः सादृश्यरहितः परिणाहः दीर्घतारूपः विस्तारो यस्य तम् । श्वसितपवनं निःश्वासवायुं मदनदहनमिव मन्मथानलमिव सदाहं उष्णतायुक्तं वहति । दीर्घमुष्णं श्वसितीति भावः । तेन चिन्ता व्यज्यते ॥४॥

(दिशि दिशीति ।) जलकणानां बिन्दूनां जालेन सहितं नयनमेव नलिनं कमलं विगलितं च्युतं नालमिव दिशि दिशि किरति । प्रतिदिशं त्वद्रूपविषयाभावान्निरालम्बनतया चक्षुर्भ्रमतीति गलितनालत्वधर्मोत्प्रेक्षा ॥५॥

सञ्जीवनी

(नयनेति ।) किञ्च, सा नयनविषयं नेत्रगोचरमपि किसलयतल्पं पल्लवशय्यां [4]विहितहुताशविकल्पं कृताग्निसन्देहं कलयति; स्पर्शेन जानातीत्यर्थः । एतेन [5]दृष्टस्पृष्टसद्वस्त्वपि शरीरं त्वद्विदहे सा सुखप्रदं न जानातीति ध्वनिः । उद्वेगावस्था विरोधालङ्कारश्च ॥६॥

पदद्योतनिका

नयनेति । सा [6]राधा नयनविषयमपि नेत्रगोचरमपि [7]किसलयतल्पं पल्लवशयनीयं [8]विहितहुताशविकल्पं विहितः कृतः हुताशविकल्पः अग्नितर्को यत्र तादृशं गणयति मनुते ॥६॥

जयन्ती

(नयनेति ।) नयनविषयं दृश्यतया रमणीयं प्रत्यक्षं वा । किसलयतल्पं पल्लवशयनमपि । विहुतः सन्धुक्षितः हुताशनो वह्निः तस्य कल्पः सदृशं कलयति जानाति । विपरीततया जानाति ॥६॥

---

1. पदमिदं 'त्यजनि न पाणितले' इति पदानन्तरं दृश्यते मुद्रिते (नि. सा.) । 2. गणयति–ड.क.ल.म. 3. विहुतहुताशविकल्पम्–इ. 4. विहितसविकृताग्नि–अ.ब. 5. दृष्टं स्पृष्टं च सद्वस्त्वपि शरीरे–इ.फ.ग.ह.ज. 6. नास्ति–ड. 7. नास्ति–ड. 8. कृताग्नितर्को यत्र तादृशं–ड.

त्यजति न पाणितलेन कपोलम् ।
बालशशिनमिव सायमलोलम् ॥७॥
हरिरिति हरिरिति जपति सकामम् ।
विरहविहितमरणेव निकामम् ॥८॥

सञ्जीवनी

(त्यजतीति ।) किञ्च, सा सायं सन्ध्यासमये करतलेन कपोलं गण्डस्थलं न त्यजति । कीदृशम् ? अलोलं निश्चलम् । दिवसस्तु महता कष्टेन नीतः । रात्रिः युगशतोपमा; कथं नेतव्येति भावः । कमिव ? [1]प्रतिपच्चन्द्रमिव । अर्धकरतलाच्छादने मुखस्य बालचन्द्रसाम्यं सूचितम् । सायमित्युभयत्र । [2]जडतावस्थेयम् ।

'यत्र ध्यायति निस्सङ्गं जडता सा प्रकीर्तिता' इति ॥७॥

(हरिरितीति ।) [3]किञ्च, सा निकाममतिशयेन सकामं सातिशयं हरिरिति [4]हरिरिति वारं वारं जपति आवर्तयति । न तु त्वां हरिं मत्वा स्मरति किन्तु त्वां नन्दसूनुमेव जानाति; [5]केवलं विरहेणेति । एतेन गुणकीर्तनाद्यवस्थोक्ता ॥८॥

पदद्योतनिका

त्यजतीति । सा [6]राधा पाणितलेन हस्ततलेन कपोलं गण्डस्थलं [7]न त्यजति; सचिन्तत्वात् । कमिव ? सायं सन्ध्याकाले अलोलं निश्चलं बालशशिनमिव [8]द्वितीयाचन्द्रमिव । हस्तेनाच्छादितत्वात् अल्पदृश्यतया च बालचन्द्रसाम्यम्; हस्तस्य लोहितत्वात्सन्ध्या[9]साम्यम् ॥७॥

हरिरितीति । सा [10]राधा [11]निकाममतिशयेन सकामं साभिलाषं हरिरिति जपति । कथम्भूतेव ? विरहविहितमरणेव वियोगेन विहितं कृतं मरणं यस्याः सा । अन्योऽपि[12]मरणे हरिरिति मन्त्रं [13]जपति ॥८॥

---

1. नास्ति–अ. 2. जडतावस्थेयम् । सा च–इ. 3. नास्ति–अ.ब. 4. नास्ति–इ.फ.ह. 5. नास्ति–अ.ब. 6. नास्ति–ड.ल.म. 7. नास्ति–क. 8. नास्ति–क. 9. साम्यमिति–क. 10. नास्ति–ड.ल.म. 11. निकामं साभिलाषं –ल.म. 12. मरणसमये–क. 13. जपतीति भावः–क.

श्रीजयदेवभणितमिति गीतम् ।
सुखयतु केशवपदमुपनीतम् ॥९॥

जयन्ती

(त्यजतीति ।) अलोलं निश्चलं बालशशिनमिव निश्चलं कपोलं सायं सायङ्काले पाणितलेन न त्यजति । सायमनागत इति चिन्तयति । चिन्ताऽनुभावः । पाणितलन्यस्तकपोलत्वादिति ॥७॥

(हरिरितीति ।) विरहेण विहितं प्राप्तं; [1]आसन्ना मरणदशा अवस्था यस्याः सा इव । सकामं साभिलाषं निकामं अत्यन्तम् । हरिरिति वीप्सया सततं जपति संसारमोचकहरिस्मरणमेव करोतीति । विरहप्रलापस्य सम्भावनाज्जपतीति योजना स्पष्टा ॥८॥

सञ्जीवनी

गीतार्थं सङ्ग्रहेणाह—श्रीजयदेवेत्यादिना । इत्यनेन प्रकारेण श्रीजयदेवेन भणितमुक्तं श्रीराधासखीगीतं श्रोत्रादीन् केशवपदं प्रति सुखयतु । कीदृशम् ? केशवपदं वैकुण्ठं श्रीबृन्दावनं वा प्रत्युपनीतं प्रापितमुपनीयमान वा । केशवस्य पदं [2]वैकुण्ठस्य वा स्थानं निकुञ्जगृहं वा । "[3]पदं स्थानेऽपि वाक्येऽपि सन्निधिव्यवसाययोः" इति विश्वः (६३.३) ॥९॥

[4]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां नवमः प्रबन्धः

पदद्योतनिका

श्रीजयदेवेति । [5]श्रीजयदेवेन भणितं [6]उक्तं इति पूर्वोक्तं गीतं [7]केशव एव पदं विश्रान्तिस्थानं यस्य तं भक्तं [8]सुखयतु । कीदृशम् ? उपनीतं [9]उपढौकितं समर्पितमिति भावः[10] ॥९॥

[11]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां नवमः प्रबन्धः

---

1. आसन्नं मरणं दशा अवस्था—इ. 2. वैष्णवं वा स्थानं—इ.फ.ग.ह.ज. 3. पदं शब्दे च वाक्यं च व्यवसायापदेशयोः—विश्वः । पदं स्थानोपवाक्येऽपि सन्निधिव्यवसाययोः—इ.फ.ग.ह.ज. 4. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज. 5. श्रीजयदेवभणितं—क. 6. नास्ति—क. कृतं—ल.म. 7. केशवपदं—ड. केशव एवेदं—ल.म. 8. सुखयति—ड.ल.म. 9. तः 10. पर्यन्तं नास्ति—ड.ल.म. 11. नास्तीयं पुष्पिका—ड.क.ल.म.

दशमः प्रबन्धः

[1]सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति
ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।
[2]एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसा-
त्स्ववैंद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ।। १ ।।

जयन्ती

(श्रीजयदेवेति ।) श्रीजयदेवभणितं जयदेवकविवचनं इति गीतं गीतरूपं केशवस्य पदमुपनीतं प्रापितं निवेदितं सुखयतु मोदं जनयतु ।।९।।

[3]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां नवमः प्रबन्धः

सञ्जीवनी

इदानीं त्वद्विरहव्याधिसन्तप्ता ध्रुवं मरिष्यतीति सूचयन्नाह—सेति । [4]सा राधा [5]रोमाञ्चति रोमाञ्चितदेहा भवति; सीत्करोति सीत्कारं करोति; विलपति विलापं करोति; उत्कम्पते सकम्पा भवति; ताम्यति ग्लानियुक्ता भवति; ध्यायति ध्यानं करोति; उद्भ्रमति शान्तिं न प्राप्नोति; प्रमीलति नेत्रप्रमीलनं कृत्वा सुखमनुभवति; पतति शय्यायां गच्छति; उद्याति अभ्युद्गमनं करोति; मूर्च्छति मूर्च्छां प्राप्नोति । एतैः क्रियापदैरभिलाषदुःखगुणकीर्तनवियोगग्लानिसुखभ्रान्तिसमागमाभ्युपगमनोद्वेगमूर्छाः क्रमेणोक्ताः । हे स्ववैंद्यप्रतिम अश्विनीकुमारतुल्य ! एतावत्येतावन्मात्रे [6]अतनुज्वरे [7]कामज्वरे [8]यदि त्वं वरतनुः सुकुमाराङ्गः [9]प्रसीदसि [10]प्रसन्नो [11]भवसि [12]तर्त्तहि ते नवरसात् [13]शृङ्गाररसात् औषधाद्वा [14]किं न जीवेत्? अपि तु जीवेदेव । अन्यथा प्रकारान्तरेण[15] तस्या हस्तकः वैद्यानां कृपाविशेषकः [16]यदि त्यक्तः तर्हि न

1. "स्मरातुरां" इति पद्यादनन्तरं पद्यमिदं दृश्यते–इ. 2. एतावन्त्यतनु–इ. 3. नास्तीयं पुष्पिका–इ. 4. सा रोमाञ्चितदेहा भवति–ग. 5. नास्ति–अ.ब.इ.ग.ह. 6. अनङ्गज्वरे–इ. 7. कामे–अ.इ.फ.ग.ह.ज. नास्ति–ब. 8. तः 15. पर्यन्तो भागो नास्ति–अ.ब. 9. प्रसीदति–इ. 10. नास्ति–फ. 11. भवति–इ. 12. तर्हि–ग. 13. नास्ति–ग.फ. 14. किं न न जीवेत्–ग. किं जीवेत–ज. 16. त्यक्तः न जीवेदेव–इ.फ.ग.ह.ज.

जीवेत्। यथा त्यक्तकृपाविशेषे रोगिणोऽन्तकस्तथाऽस्यास्त्वमित्यर्थः। "हस्तकः [1]कृतनृत्ययोः" इति वैजयन्ती। हेतूक्तिरलङ्कारः ॥१॥

पदद्योतनिका

अधुना सा [2]राधा तव विरहेणावश्यं म्रियत इति सूचयन्नाह-सा रोमाञ्चतीति। हे स्ववैद्यप्रतिम अश्विनीकुमारतुल्य, [3]यदि त्वं प्रसीदसि प्रसन्नो भवसि [4]तर्हि वरतनुः सुकुमाराङ्गी सा राधा एतावति अतनुज्वरे [5]कामज्वरे सति तव रसात् किं न जीवेत्; अपि तु जीवेदेव। रसः शृङ्गार औषधश्च। अन्यथा [6]प्रसन्नताभावे हस्तकः हस्तावलम्बः त्यक्तः। ज्वरे सत्येते व्याधयो भवन्ति; ते तस्यां वर्तन्त इत्याह। सा राधा रोमाञ्चति[7]रोमान् अञ्चति प्राप्नोति सरोमाञ्चा भवतीत्यर्थः। सीत्करोति सीत्कारं करोति। विलपति विलापं करोति। उत्कम्पते सकम्पा भवति। ताम्यति ग्लानियुक्ता भवति। ध्यायति चिन्तयति। उद्भ्रमति [8]उच्चैर्भ्रान्ता भवति[9]। प्रमीलति [10]नेत्रनिमीलनं करोति। पतति शय्यादौ गच्छति। उद्याति उच्चैर्गच्छति। [11]मूर्च्छति [12]मूर्च्छां प्राप्नोति। ज्वरिणः पुरुषस्यैतावद् भवति [13]इति ॥१॥

जयन्ती

(सा रोमाञ्चतीति।) सा राधिका रोमाञ्चति ध्यानलयेन पुलकं करोति हर्षं प्राप्नोति। सीत्करोति सीत्कारं करोति। विलपति प्रलापं करोति। उत्कम्पते वेपते। ताम्यति ग्लाना भवति। ध्यायति चिन्तयते। उद्भ्रमति उत्कृष्टतया घूर्णति। प्रमीलति इन्द्रियप्रलयं प्राप्नोति। पतति। उद्याति अभिमुखं गच्छति। मूर्च्छति। अपिस्समुच्चायकः। एतेषामप्येकादशतिङां सेति कारकस्यान्वयः। अनेकप्रकाशकत्वाद्दीपकालङ्कारः। एतावन्तीति। हे स्ववैद्यप्रतिम दस्रतुल्य। अत्रोपमायां रूपातिशयवत्त्वं असाध्यज्वरचिकित्सितत्वं च। त्वं प्रसीदसि यदि प्रसन्नश्चेत् वरतनुः अत्यन्तमृद्वी राधा एतावति रोमाञ्चादिकारिणि अतनुज्वरे कामज्वर एव। अतनुज्वरे महाज्वरे सत्यपि ते रस एव स्नेह एव रसः। रसायनात् किं न जीवेत्? अपि (तु) जीवेदेव। अन्यथा त्वदनुग्रहदत्तरसाभावे [14]अन्तकः मरणमिति यावत्; न त्यक्त एव मरणं

---

1. कृत्यवृत्ययोः—इ.ग.फ.ह.ज. 2. नास्ति—ङ.ल.म. 3. यदि प्रसन्नो भवसि—ड. यदि त्वं प्रसीदसि प्रसन्नोऽसि—क. 4. नास्ति—ड.ल.म. 5. नास्ति—क. 6. प्रसन्नत्वाभावे—क. प्रफुल्लताभावे—ल.म. 7. रोमं—क. 8 तः 9. पर्यन्तं नास्ति—ड. 10. नेत्रोन्मीलनं—क. 11. नास्ति—ङ. 12. अतिशयेन मूर्च्छां—क. 13. इति भावः—क. 14. "त्यक्तोऽन्यथा नान्तकः" इति—इ. पाठः

[1]स्मरातुरां दैवतवैद्यहृद्य
त्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तबाधां कुरुषे न राधा-
मुपेन्द्र वज्रादपि दारुणोऽसि ।।२।।

भविष्यत्येव । अत्र स्ववैद्यप्रतिमेत्यत्र समासगा आर्थी धर्मलुप्तोपमा । अश्विनी-कुमारतुल्यसौन्दर्यं तदसाध्यज्वरनिवर्तकत्वं चानुपात्तमिति । रस इव रसः, रस एव रस इत्यत्र श्लिष्टरूपकम् । श्लिष्टोपमायाश्च वैद्यप्रतिमेत्युपमाप्रतिपादक-वचनस्य सत्त्वादुपमैवालङ्कारः । जीवेदेवेत्यस्य प्रसीदसि यदीति वाक्यार्थः, रसादिति पदार्थश्च हेतुरिति पदवाक्यार्थोभयहेतुकं काव्यलिङ्गमलङ्कारः । "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्" इति लक्षणस्य वाक्यार्थहेतुकं अनेकपदार्थकं एकपदार्थकं चेति द्वैविध्यं दर्शितं प्राचीनैः । नवीनास्तु पदावयवार्थ-हेतुकमपि दृष्ट्वा प्राहुरिति ।।१।।

सञ्जीवनी

(स्मरातुरामिति ।) सम्प्रति शिथिल[2]प्रयत्नमुन्नयन्त्याह । हे दैवतवैद्य-हृद्य मनोहर, त्वं स्मरातुरां कामसन्तप्तां राधां विमुक्तबाधां [3]त्यक्तपीडां न कुरुषे न करोषि यदा तदोपेन्द्र ! वज्रादपि कठिनोऽसि । यथेन्द्रो वज्रेण वृत्रं हतवांस्तथा त्वं वल्लभामिति ध्वनिः । ननु [4]औषधाद्वा धनदानादपि [5]व्याधीनां प्रतीकारः कर्तव्यः [6]किं [7]मयेत्यत आह—(हृद्येति) । हृद्यं सुन्दरं त्वदङ्गसङ्ग एवामृतं [8]जीवनोपायस्तेन साध्यां प्रतीकार्याम् । हृद्यमुभयत्र । "हृद्यं मनोहरं प्रोक्तं [9]हृद्यं च हृदयप्रियम्" इति[10] ।।२।।

पदद्योतनिका

[11]स्मरातुरामिति । हे दैवतवैद्यवत् [12]अश्विनीकुमारवत् हृद्य सुन्दर, हे उपेन्द्र इन्द्रानुज, त्वं राधां विमुक्तबाधां त्यक्तपीडां न कुरुषे अतो

---

1. "सा रोमाञ्चति" इति पद्यात्पूर्वं दृश्यते पद्यमिदम्–इ. 2. प्रयत्न-मुन्नयन्ती स्मरेत्याह–फ.ग.ह. प्रयत्नमुन्नयन्ती स्मरतीत्याह–ज. 3. नास्ति–अ.ब. 4. औषधाद्वाधनादानादपि–इ. औषधाद्वा धनादपि–ग. 5. नास्ति–अ.ब. 6. तः 10. पर्यन्तो भागो नास्ति–फ. 7. मयेत्याह–अ.ब.इ.ह. 8. जीवितो-पायः–ज. 9. हृद्यं स्वहृदयप्रियम्–इ. 11. नास्ति–ड.ल.म. 12. अश्विन-कुमारवत्–ड. कुमारवत्–क.

कन्दर्पज्वरसञ्ज्वरातुरतनोराश्चर्यमस्याश्चिरं
चेतश्चन्दनचन्द्रमःकमलिनीचिन्तासु सन्ताम्यति ।
किन्तु क्लान्तिरसेन शीतलतनुं त्वामेकमेव प्रियं
ध्यायन्ती रहसि स्थिता क्षणमपि क्षीणा क्षणं प्राणिति ।।११।।

वज्रादपि दारुणोऽसि [1]कुलिशादधिकविषमोऽसि । स्मरातुरां कामार्ताम् । पुनः [2]कीदृशीम् ? त्वदङ्गसङ्गस्तव [3]शरीरसम्बन्ध एवामृतं तन्मात्रेण साध्यां प्रतीकार्याम् ।।२।।

जयन्ती

(स्मरातुरामिति ।) दैवतानां देवानां वैद्यो अश्विनीकुमारौ तयोः [4]कृत्यं चिकित्सितं च तत् त्वदङ्गसङ्गामृतं त्वदालिङ्गनादिकं तन्मात्रसाध्यां [5]तदतिरिक्ताचिकित्स्यां स्मरातुरां राधां विमुक्तबाधां न कुरुषे; अङ्गसङ्गमात्रदानेन राधायाः रोगनिवृत्तिर्भवतीति भावः । दैवतवैद्यकृत्येति सम्बोधनं वा । [6]औषधमात्रापेक्षाराहित्यादिना अर्थव्ययोऽपि न भवति । अङ्गसङ्ग एव अमृतमात्रं यच्छसीति भावः । अत एव ह्युपेन्द्र वज्रादपि कृष्ण कुलिशादपि दारुणोऽसि निर्दयोऽसि । स्वसन्निधानाकरणेन हिंससीति वज्राधिकः । अत्र उपेन्द्रवज्रेति वृत्तनामापि सूचितमिति मुद्रालङ्कारः ।।२।।

सञ्जीवनी

नन्वन्यैः शीतलोपचारैः कामशान्तिः कर्तव्या; किं मदनुग्रहेण, तत्राह वैपरीत्यं–कन्दर्पेति । आश्चर्यमहोऽस्याश्चेत[7]श्चित्तं चिरं चिरकालं चन्दनादीनां चिन्तासु स्मरणेष्वपि, किं पुनर्दृष्टेषु [8]सन्ताम्यति ग्लानिं [9]सन्तापं वा प्राप्नोति । [10]त्वद्विरहे अदाहकोऽपि दाहकत्वे(न) प्रतीयत इति भावः । नन्वीदृशी सा कथं जीवतीत्यत आह–[11]किन्त्विति । हे [12]क्लान्तिरस सन्तप्तावलोकनरस, हे इन हे विष्णो, किन्तु त्वामेवैकं प्रियं वल्लभं ध्यायन्ती

---

1. कुलिशादधिकविषमतरोऽसि–क. अधिकविषमोऽसि–ड. 2. नास्ति –ड. 3. शरीरसम्बन्धस्यामृतं–ड. 4. "दैवतवैद्यकृत्य" इति इ. मूलपाठः 5. तदतिरिक्तचिकित्स्यां–इ. 6. औषधमात्रादिना अर्थव्ययो न भवति–इ. 7. नास्ति–अ.ब. 8. नास्ति–ग. 9. तापं–इ.ग. 10. तद्विरहे अदादकं दाहकेन प्रतीयते–ग.ह.ज. 11. नास्ति–अ.ब.इ.फ.ग.ह. 12. क्लान्तिरसेन कामसन्तप्तरसेन मनसा त्वामेकमेव प्रियं ध्यायन्ती जीवत्येवेत्यर्थः–ज.

क्षणं क्षणमात्रं [1]प्राणिति जीवति । कीदृशी ? रहस्येकान्ते क्षणमपि स्थिता । पुनः कीदृशी ? क्षीणा [2]कृशाङ्गी । कीदृशं त्वाम् ? [3]शीतला तनुर्यस्य तम् । क्षान्तिवशेनेति क्वचित्पाठः । "इनः सूर्ये प्रभौ" [4]इत्यमरः (३.३.१११) । "[5]सन्तापः सञ्ज्वरः" इत्यमरः[6] (१.१.५७) । [7]विरोधोऽयमलङ्कारः ॥३॥

पदद्योतनिका

एवंविधाऽपि राधा [8]त्वच्चिन्तनेनैव जीवतीत्याह—कन्दर्पेति । हे कृष्ण ! अस्या राधायाश्चेतो मनश्चिरं चिरकालं चन्दनस्य [9]चन्द्रमसः कमलिन्याश्च चिन्तासु [10]स्मरणेष्वपि ताम्यति म्लानं भवति; इदं महदाश्चर्यम् । कीदृश्या अस्याः ? कन्दर्पज्वरेण कामतापेन यः सञ्ज्वरः पीडा तेनाकुला चञ्चला तनुः शरीरं यस्यास्तस्याः । किन्तु रहसि एकान्ते [11]स्थिताऽसौ राधा त्वामेवैकं असाधारणप्रियं वल्लभं ध्यायन्ती क्षणं मुहूर्तं क्षान्तिवशेन क्षान्त्यायत्ततया । त्वत्कान्तिवशेनेति पाठः । तदा तस्मिन् क्षणे [12]नायातः क्षणान्तरे आगमिष्यतीति अनुरागेण कथं प्राणिति [13]जीवतीति; कथमिति प्रश्ने । कीदृशी ? क्षीणा [14]कृशाङ्गी ॥३॥

जयन्ती

(कन्दर्पेति ।) कन्दर्पज्वरः तेन [15]सज्वरा तापसहिता आतुरा रुग्णा तनुः शरीरं यस्यास्तस्या अस्याः राधायाः चेतः चन्दनं मलयजं चन्द्रमाः कर्पूरं इन्दुश्च कमलिनी च तासां चिन्तासु स्मरणेषु सन्ताम्यति क्लेशं प्राप्नोति । ज्वरातुरस्य चन्द्रचन्दनकमलानां शीतलत्वात्सन्तापजनकत्वं (न); राधा तु [16]तानि निन्दतीत्याश्चर्यम् । किन्तु [17]क्लान्तिवशेन क्षीणा रहसि स्थिता शीतलतनुं एकमेव प्रियं वल्लभं एकं पूर्वोक्तप्रकारेण ध्यानलयेन कृष्णं त्वां ध्यायन्ती कथमपि कृच्छ्रेण क्षणं प्राणिति जीवति । त्वद्ध्यानवशेन जीवतीति कथनात् त्वदेकचिकित्सितसाध्यत्वं पूर्वश्लोकोक्तचिकित्सितस्य दृष्टप्रत्ययत्वम् । अत्र चन्द्रचन्दनकमलानामप्राकरणिकानां असहनरूपधर्मैक्यप्रतिपादनात्तुल्ययोगितालङ्कारः ॥३॥

---

1. नास्ति—अ.ब. 2. क्षीणाङ्गा—ज. 3. शीतलतनुं विरहिजनस्य अन्तःकृपालुतया शीतला शान्ता प्रेमास्पदा तनुर्यस्य तम्—ज. 4. इति विश्वः—इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तो भागो नास्ति—अ.ब. 7. विशेषोयमलङ्कारः—ज. 8. त्वच्चिन्तनेन—क. 9. चन्द्रस्य—ड. 10. स्मरणे यद्यपि—क. 11. स्थिता सा—क.म. 12. नागतः—क. 13. जीवति—क.ल.म. 14. कृशाङ्गीत्यर्थः—क. 15. "कन्दर्पज्वरसज्वर" इति—इ. मूलपाठः 16. तान्निन्दतीति—इ. 17. 'क्लान्तिवशेन' इति—इ. पाठः

क्षणमपि विरहः पुरा न सेहे
नयननिमीलनखिन्नया यया ते ।
श्वसिति कथमसौ रसालशाखां
चिरविरहेण विलोक्य पुष्पिताग्राम् ॥४॥

सञ्जीवनी

नन्वेतावत्कालं जीविताऽग्रेऽपि न [1]मरिष्यतीति किं [2]मदनुग्रहेणेत्यत्राह —क्षणमिति । [3]यया श्रीराधया पुरा सङ्गदशायां[4]रहः एकान्ते ते तव विरहः[5]क्षणमपि न सेहे न सोढः । कीदृश्या ? [6]नेत्रनिमेषेण खिन्नया प्राप्तदुःखया । असावेवं[7]भूता श्रीराधा रसालशाखां [8]रसालस्याम्रस्य शाखां पुष्पिताग्रां पुष्पितशिखरां विलोक्य [9]चिरविरहेण चिरकालवियोगेन कथं केन[10]प्रकारेण श्वसिति [11]जीवति । श्वासमात्रेण जीवनं नत्ववयवादिप्रचलनमिति भावः । पुष्पिताग्रामिति [12]वसन्तागमनेन [13]हृत्कामोदयोत्पन्न इति ध्वनिः । श्वसितीति परम[14]साहसमिति सूचितम् । विरोधालङ्कारः ॥४॥

पदद्योतनिका

क्षणमिति । हे कृष्ण ! यया राधया ते विरहो [15]वियोगः पुरा पूर्वं क्षणमपि न सेहे न सोढः । कीदृश्या राधया ? नयनयोर्नेत्रयोर्निमीलनात् निरन्तरदर्शननाशाच्चक्षुर्निमेषे खिन्नया दुःखितया । असौ राधा विरहेण तव चिरवियोगेन कथं श्वसिति न ज्ञायते । किं कृत्वा ? पुष्पिताग्रां रसालशाखां आम्रशाखां विलोक्य ॥४॥

जयन्ती

(क्षणमिति ।) नयननिमीलनेन निमेषेण खिन्नया यया राधया ते तव विरहः क्षणमपि पुरा प्राक् न सेहे असौ राधा पुष्पितानि अग्राणि यस्यां तां

---

1. मरिष्यति–इ.फ.ग.हृ.ज. 2. मदनुग्रहेणेति तत्राह–इ.फ.ग.हृ.ज. 3 तः 5. पर्यन्तो भागो नास्ति–इ. 4. रहसि–ग. 6. नेत्रनिमेषेणावसन्नया–इ. नेत्रनिमीलनेन निमिषेण उन्मेषरहितेन अवसन्नया प्राप्तदुःखया–ज. 7. गता–ज. 8. रसालशाखां आम्रशाखां–इ.फ.हृ.ज. रसालशाखां–ग. 9. नास्ति–अ.ब. 10. करणेन–ग. 11. नास्ति–अ.ब. 12. वसन्तोद्गमेन–फ. 13. हृत्कामोदयोत्पत्तिरिति–ज. 14. साहसाचरणमिति–इ.फ.ग. 15. नास्ति–क.

वृष्टिव्याकुलगोकुलावनरसादुध्दृत्य गोवर्धनं
बिभ्रद्वल्लववल्लभाभिरधिकानन्दाच्चिरं चुम्बितः ।
दर्पेणैव तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
बाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विषः ।।५।।

इति श्री गीतगोविन्दे महाकाव्ये जयदेवकृतौ स्निग्धमधुसूदनो नाम चतुर्थः सर्गः

रसालशाखां चूतलतां विलोक्य चिरविरहेण बहुकालवियोगेन कथं श्वसिति जीवति । क्षणविरहमसहमानायाः रसालोद्दीपितविरहायाः जीवनं न स्यादिति भावः । पुष्पिताग्रामिति वृत्तनाम कथितमिति मुद्रालङ्कारः ।।४।।

सञ्जीवनी

सम्प्रति श्री राधावलम्बनाय [1]भक्तावलम्बनाय वा कविवाक्येन सखी श्रीकृष्ण[2]वाहुं स्तौति—[3]वृष्टीति । गोपतनोः श्रीकृष्णस्य बाहुर्भवतः श्रीराधा-लक्षणस्य [4]जनस्य च शुश्रूषोः—[5]सखी [6]ब्रूते—श्रेयांसि विरहव्याधि[7]नाशकानि कल्याणाति तनोतु [8]विस्तारयतु । कीदृशस्य ? [9]कंसद्विषः [10]कंसस्य दैत्यस्य द्विषः शत्रोः । सखीपक्षे श्रीराधाविरहेण सुखवैरिण इति वा । बाहुपदं श्रीराधाऽऽलिङ्गनार्थमिति भावः । कीदृशः ? वृष्ट्या व्याकुलस्य [11]दुःखितस्य गोकुलस्य [12]गोसमूहस्यावनं पालनं स एव रसो रागो वीर्यं वा तस्माद्[13]गो-वर्धनाचलमुद्धृत्य चिरं सप्ताहं बिभ्रत् दधत् । कीदृशो बाहुः ? वल्लववल्ल-भाभिर्गोप[14]वधूभिरधिकानन्ददादतिहर्षात् [15]रासरसादौ गोवर्धनोद्धरणसमये वा चुम्वितः । पुनः कीदृशः ? दर्पेण कन्दर्पगर्वेणैव ताभिरर्पिता दत्ता अधर-[16]तटच्य एव [17]सिन्दूरमुद्राः सिन्दूरचिह्नानि तैरङ्कितः । [18]अधरतटघा

---

1. नास्ति–अ.ब. 2. वाक्यं–अ.ब. 3. नास्ति–फ.ग. 4. नास्ति–इ.फ.ग.ह.ज. 5, 6. नास्ति–ज. 7. नाशनानि–इ. 8. विस्तारयतु इति सखी ब्रूते–ज. 9. नास्ति–अ.ब. 10. दैत्यवैरिणः–इ.फ.ग.ह.ज. 11. नास्ति–अ.ब. 12. गोपसमूहस्य–ग.ज. 13. गोवर्धनपर्वतमुद्धृत्य–इ.फ.ह.ज. गोवर्धनमुद्धृत्य–ग. 14. सुन्दरीभिः–इ.फ.ग.ह.ज. 15. रासरक्तेः–इ. 16. नद्य–इ. 17. सिन्दूरस्य मुद्राः–इ.फ.ग.ह.ज. 18. अधरलोहितत्वात्–इ. फ.ग.ह.ज.

लोहितत्वात् सम्भोगचिह्नाङ्कित इत्यर्थः । [1]तथा श्रीराधानुरागेण चिह्नित इति वा सखीपक्षे ।।५।।

तं वन्दे परमानन्दं माधवं भक्तवल्लभम् ।
श्रीराधा[2]सखिवाक्येन प्रेम्णा च परिपूरितम् ।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[3]शिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां स्निग्धमधुसूदनो नाम

चतुर्थः सर्गः ।।

पदद्योतनिका

इदानीं कथोपक्रमं त्यक्त्वा [4]कविः भक्तान् प्रत्याशिषं ब्रूते—वृष्टीति । गोपतनोर्गोपशरीरस्य कंसद्विषः श्रीकृष्णस्य बाहुर्हस्तः [5]भवतां युष्माकं; भक्तानामित्यर्थः; श्रेयांसि कल्याणानि तनोतु । कीदृशो बाहुः ? [6]वृष्टचा जलवर्षेण व्याकुलस्य दुःखितस्य गोकुलस्य गोपसमूहस्यावनवशाद्रक्षणानुरागात् गोवर्धनं पर्वतं उद्धृत्य चिरं सप्ताहं बिभ्रत् । पुनः कीदृशो बाहुः ? वल्लवसुन्दरीभि[7]र्गोपाङ्गनाभिरधिकानन्दादतिहर्षाच्चुम्बितः । पुनः [8]कीदृशः ? कन्दर्पेण कामवशात्ताभिः [9]स्त्रीभिरर्पिताः स्थापिता दत्ता अधरतटच एव सिन्दूरमुद्राः सिन्दूरचिह्नानि लोहितत्वात्तै रङ्कितश्चिह्नितः । [10]स्निग्धः स्नेहवात् ।।५।।

[11]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां (स्निग्धमधुसूदनो नाम) चतुर्थः सर्गः ।।

जयन्ती

(वृष्टीति ।) वृष्टिभिः व्याकुलं गवां कुलं यत्र गोकुलं तत्र व्रजाख्यघोषञ्चास्ति प्राणिमात्रं तस्य अवनं रक्षणं तस्य वशात् अधीनतः । गोवर्धनः गाः वर्धयति संरक्षतीति भाविसंज्ञावन्तं पर्वतं बिभ्रत् धरन् । वल्लववल्लभाभिः

1. तथा श्रीराधाया अनुरागेण–इ. तया श्रीराधयानुरागेण–फ.ग.हृ.ज. 2. सखी–इ.फ.ग.हृ.ज. 3. श्रीशिवदासपण्डितात्मज–फ.ग.हृ. 4. नास्ति–ड.ल.म. 5. भवतस्तव भक्तस्येत्यर्थः–ड. 6. वृष्टचा व्याकुलं यद् गोकुलं तस्यावनवशाद्रक्षणवशाद् गोवर्धनाख्यं गिरिमुद्धृत्य सप्ताहं बिभ्रत् धारयत्–क. 7. गोपीभिः–क. 8. नास्ति–ड. 9. गोपीभिः–क. 10. नास्तीदं पदद्वयम्–क. 11. इति नारायणपण्डितकृते पदद्योतनिके चतुर्थः–ड. इति गीतगोविन्दटीकायां चतुर्थः सर्गः–क.

गोपाङ्गनाभिः अधिकः उद्रिक्तः आनन्दो यस्मिन् कर्मणि [1]तथा चिरं चुम्बितः । अत एव तदर्पिताः तदधरतटचः तासां सिन्दूरः आरुण्यार्थं धृतः तन्मुद्रया अङ्कितः । यद्वा अधरतटच एव सिन्दूरमुद्रा तया अङ्कितः । बह्वीभिश्चुम्बने ताम्बूलरागारुणितः । गोपतनोः गोपवेषस्य कंसद्विषः विष्णोः बाहुः भवतः तव श्रोतुः श्रेयांसि मङ्गलानि तनोतु । अत्र यद्यपि कंसवैरित्वेन विष्णुत्वं न प्राप्तम् तथापि गोवर्धनधारणाश्चर्यंकरत्वेनोपात्तम् । गोपतनोरित्यत्रापि तनुशब्देन तन्व्यञ्जनात् । गोवर्धनधारणेन गोकुलरक्षणाद्दयावीरत्वम् । गोपीचुम्बनाङ्कितत्वेन शृङ्गारित्वम् । गोपतनुत्वेन हास्यालम्बनत्वम् । कंसवैरित्वेन पर्वतधारणेनाद्भुतत्वमिति बहुरसाश्रयत्वाद् भगवत्त्वम् । अत एव तस्य मङ्गलदानसामर्थ्यम् ॥५॥

[2]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां स्निग्धमधुसूदनो नाम चतुर्थं सर्गः ॥

---

1. यथा तथा–इ. 2. इति गीतगोविन्दे स्निग्धमधुसूदनो नाम चतुर्थः सर्गः–इ.

पञ्चमः सर्गः

साकाङ्क्षपुण्डरीकाक्षः

अहमिह निवसामि याहि राधा-
मनुनय मद्वचनेन चानयेथाः ।
इति मधुरिपुणा सखी नियुक्ता
स्वयमिदमेत्य पुनर्जगाद राधाम् ॥१॥

सञ्जीवनी

पञ्चमे प्रेम[1]जनितं तद्विश्लेषविचेष्टितम् ।
निशम्य प्रेषयामास तत्सखीं च [2]तदन्तिकम् ॥

सम्प्रति श्रीकृष्णनियुक्ता सखी राधामाह। अहमिति। इत्येवं मधुरिपुणा [3]श्रीकृष्णेन नियुक्ता प्रेरिता सखी पुनः राधां स्वयमेत्य गत्वा इति वक्ष्यमाणं जगादोवाच। इति किम् ? हे सखि ! त्वं याहि गच्छ इह कुञ्जे दुःखश्रवणाद् गन्तुमशक्तोऽहं निवसामि तत्प्रतीक्षां करिष्यामि। ननु सा मानवती स्वयमेव गत्वा [4]प्रार्थ्यताम्; कृतापराधेन मया [5]समक्षं वक्तुं न शक्यते; अत एव त्वं मद्वचनेनानुनय [6]शान्तय। मत्समीपञ्चानयेथाः [7]आनय च। विभावनालङ्कारः ॥१॥

पदद्योतनिका

इदानीं कृष्णप्रेरिता सखी राधामाह। अहमिति। इति मधुरिपुणा कृष्णेन [8]नियुक्ता प्रेरिता सखी स्वयमेवैत्यागत्य इदं वक्ष्यमाणं राधां पुनर्जगाद ऊचे। इतीति किम् ? हे सखि ! अहं [9]इह [10]निकुञ्जे निवसामि स्थितोऽस्मि त्वं राधां प्रति याहि अनुनय वशं नय मद्वचनेन मम वचसा राधामानयेथाः आनयस्वेति ॥१॥

---

1. जनित–फ.ज. 2. तदन्तिके–ज. 3. श्रीराधाकृष्णेन–ग. 4. प्रार्थिता–इ. प्रार्थ्यतामिति चेत्–ज. 5. नास्ति–अ.ब. 6. सान्त्वय–फ. 7. आनयस्व–इ.फ.ग.ह.ज. 8. युक्ता–ड. 9, 10. नास्ति–ड.

[1]वराडीरागे रूपकताले

वहति मलयसमीरे मदनमुपनिधाय ।
स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ।।२।।
तव विरहे वनमाली [2]सखि सीदति ।।ध्रुवपदम्।।

जयन्ती

एवं चतुर्थसर्गे राधावस्थां वर्णयित्वा कृष्णावस्थां वर्णयितुं राधासखीं प्रति कृष्णवाक्यं रचयति–अहमिति। हे सखि! अहं इह कुञ्जे निवसामि, त्वं याहि; मद्वचनेन मद्वाक्येन राधां अनुनय। प्रणिपातादिना मां निशामय। किञ्च राधां आनयेथाः आनयस्व। इति उक्तप्रकारेण मधुरिपुणा माधवेन नियुक्ता आज्ञापिता प्रेषिता सखी राधां एत्य प्राप्य राधां पुनर्जगाद उवाच। पुनरिति सखीवचने एकवारं कृष्णं प्रत्युक्तं पुना राधां प्रतीति। यद्वा पुनरित्यावृत्यागत्य जगाद। पुष्पिताग्रवृत्तम्। अत्रापि कारकदीपोऽलङ्कारः। याहि अनुनय आनयेति त्रयाणां तिङां त्वमित्यनेन सम्बन्धात् ।।१।।

सञ्जीवनी

ध्रुवपदम्। वराडीरागे रूपकताले। अत्राभिसारिकेयम्। तस्या लक्षणम्—

"लज्जां हित्वा [3]समाकृष्य यौवनेन मदेन वा।
अभिसारयते कान्तं कीर्तिता साऽभिसारिका ।।इति।

रागलक्षणम्—

"[4]विनोदयन्ती दयितं सुकेशी
सुकङ्कणा चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं
वाराङ्गनेयं कथिता वराडी ।।" इति।

काललक्षणं [5]प्रागेवोक्तम्। श्रीकृष्णस्य विरहोद्रेकमाह—[6]वहतीत्यादि(ना)। हे सखि राधे! तव विरहे वियोगे वनमाली सीदति [7]दुःखी भवति। वनस्य

---

1. वरालीरागेण रूपकतालेन गीयते—इ. 2. सखि हे सीदति राधे–इ.
3. समाकृष्टा–इ. समाहृष्य—ह. 4. निनादयन्ती–अ.ब. निनोदयन्ती–फ.
5. पूर्ववत्–ग. 6. वहतीति–ग. 7. दुःखितो–इ.फ.ग.ह.ज.

जलस्य वा मालाऽस्तीति [1]वनमाली। अनेन त्वां विनोद्वेगावस्थेति ध्वनिः। [2]कस्मिन् सति? मदनं कामं उपनिधाय समीपवर्तिनं कृत्वा मलयसमीरे मलयानिले वहति सति। किञ्च विरहिणां वियोगिनां हृदयदलनाय मर्मपीडनाय कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति सति [3]त्वयाऽधरामृतेन [4]स जीवनीय इति मम प्रार्थना। विशेषोक्तिरलङ्कारः ॥२॥

पदद्योतनिका

अस्य (गीतस्य) [5]वरालीरागस्तल्लक्षणम्—

विनोदयन्ती दयितं सुकेशी
सुकङ्कणा चामरचालनेन।
कर्णे दधाना सुरपुष्पगुच्छं
वाराङ्गनेयं कथिता [6]वराली ॥ इति।

अत्राभिसारिका नायिका वर्णनीया। तदुक्तं रसिकसर्वस्वे—

"संस्कृतात्प्राकृतं [7]त्विष्टं ततोऽपभ्रंशभाषणम्।
ततः प्रियतरा वेश्या सर्वतश्चाभिसारिका ॥ इति।

[8]तत्रैव लक्षणम्—

"लज्जां हित्वा समाकृष्टा यौवनेन मदेन वा।
अभिसारयते कान्तं कीर्तिता साऽभिसारिका ॥ इति।

वहतीति। हे सखि राधे! तव विरहे वियोगे वनमाली कृष्णः सीदति दुःखितो भवति। कस्मिन् सति? मदनं काममुप(नि)धाय [9]सहायं कृत्वा मलयसमीरे दक्षिणपवने वहति सति। पुनः [10]कस्मिन् [11]सति? वियोगिनां हृदयदलनाय हृदयस्फोटनाय कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति [12]सति ॥२॥

जयन्ती

(वहतीति।) मदनं मन्मथं उपनिधाय आदाय मलयसमीरे दक्षिणवाते वहति सति विरहिणां हृदयदलनाय हृदयस्फोटाय कुसुमानां निकरे समुदाये स्फुटति ध्रुवास्थेनान्वयः। तवेति। हे सखि राधे! तव विरहे त्वद्वियोगे वनमाली माधवः सीदति दुःखं प्राप्नोति ॥२॥

---

1. नास्ति–अ.ब.इ.फ.ह.ज. 2. कस्मिन् प्रति–इ. 3. त्वयाऽधरामृतपाने–ग. 4. सञ्जीवनीय–इ.फ.ज. 5, 6. वरारी–ड. 7. इष्टं–क. 8. नास्तीयं पङ्क्तिः कारिका च–क. 9. साहाय्यं–ड. सहयं–क. 10, 11. नास्ति–ड. 12. नास्ति–ड.

दहति शिशिरमयूखे मरणमनुकरोति ।
पतति मदनविशिखे [1]विलपति विकलतरोऽति ॥३॥
ध्वनति मधुपसमूहे श्रवणमपिदधाति ।
मनसि वलितविरहे निशि (निशि) रुजमुपयाति ॥४॥

सञ्जीवनी

[2]नन्दकिशोरस्यावस्थान्तरं [3]राधां प्रत्याह-दहतीत्यादिना । [4]हे राधे ! श्रीकृष्णः शिशिरमयूखे चन्द्रे दहति सति मरणमनुकरोति मरणवद्दुःखमनुभवति; अनु मरणमपि तुच्छीकरोति इति वा । किञ्च मदनविशिखे कामबाणे पतति सति अतिशयेन विकलतरो [5]व्याकुलोऽति[6]विलपति अतिविलापं करोति । त्वद्विरहे कामोऽपि तस्य बाणैः प्रहरतीति [7]ध्वनिः ॥३॥

किञ्च मधुपसमूहे भ्रमर[8]समूहे [9]ध्वनति सति गुञ्जति सति [10]श्रवणमपिदधाति[11] हस्ताभ्यां कर्णावाच्छादयति । [12]एतच्छ्रवणायाऽति धैर्यं (न) करोति । किञ्च वलितविरहे सन्दीप्त[13]वियोगाग्नौ निशि निशि रात्रौ [14]रात्रौ मनसि हृदये रुजं तत्कृतां पीडा[1] मुपयाति [16]प्राप्नोति । दिवसस्तु त्वन्मार्गावलोकनेन कथञ्चिन्नीतो; रात्रिर्नैव गच्छतीति [17]दीर्घपीडा [18]ध्वनिता ॥४॥

पदद्योतनिका

दहतीति । हे राधे ! [19]सः कृष्णः शिशिरमयूखे [20]चन्द्रे दहति सति मरणमनुकरोति [21]मरणानुकारं करोति । मदनविशिखे कामबाणे पतति सति विलपति अतिशयेन विलापं करोति । कीदृशः कृष्णः ? विकलतरो विह्वलतरः ॥३॥

---

1. मनसिजमनुदुनोति–इ. 2. नन्दकिशोरस्यान्तरं–इ. 3. सखी राधां–इ.फ.ग.ह.ज. 4. नास्ति–ग. 5. व्याकुलोऽपि विलपति विलापं करोति–इ.फ.ग.ह.ज. 6. नास्ति–ज. 7. नास्ति–ग. 8. निकरे–इ.फ.ग.ह.ज. 9. ध्वनति गुञ्जति सति–इ.फ.ह.ग.ज. 10 तः 11. पर्यन्तं नास्ति–ग. 12. एतेन श्रवणायातिधैर्यं करोति–फ.ग.ह.ज. 13. विरहाग्नौ–इ. 14. नास्ति–फ.ह.ज. 15. अनुभवति–अ.ब. 16. नास्ति–ग. 17. नास्ति–अ.ब. 18. ध्वनिः–अ.ब. 19. नास्ति–क. 20. चन्द्रमसि–क. 21. नास्तीदं पदद्वयम्–क.

वसति विपिनविताने त्यजति ललितधाम ।
लुठति धरणिशयने बहु विलपति तव नाम ॥५॥

ध्वनतीति । मधुपसमूहे भ्रमर[1]समुदाये ध्वनति शब्दं [2]कुर्वति सति श्रवणं कर्णं [3]अपिदधाति [4]अङ्गुल्यग्रेणाच्छादयति । मनसि वलितविरहे सति निशि निशि प्रतिरात्रं रुजं पीडां उपयाति अनुभवति ॥४॥

जयन्ती

(दहतीति ।) शिशिराः मयूखाः यस्मिन् तस्मिन् शीतरश्मौ दहति सति सन्तापयति सति मरणं अनुकरोति मूर्छां प्राप्नोति । अत्र शीतरश्मेर्दाहकत्वम्; गुणक्रियाविरोधालङ्कारः । "विरोधस्सोऽविरुद्धत्वे विरुद्धत्वेन यद्वचः" इति काव्यप्रकाशकारेण (उल्लासः–१०. सू. १६६) गुणक्रियाजातिद्रव्याणां परस्परविरोधकथनात् । मदनस्य विशिखे बाणे पतति सति मनसिजं मन्मथं अनुदुनोति दुःखमाप्नोति । उपालभते ॥३॥

(ध्वनतीति ।) मधुपानां भ्रमराणां समूहे ध्वनति कूजति श्रवणं अपिदधाति आच्छादयति । मनसि [5]कलितः विरहः येन तस्मिन् । निशि निशि रात्रौ रात्रौ रुजं व्यथां उपयाति ॥४॥

सञ्जीवनी

किञ्च विपिनविताने वनविस्तारे समूहे वा वसति तिष्ठति ललितं सुन्दरं धाम [6]गृहं त्यजति । नैतादृशस्य त्वामन्तरा सुखलेश इति भावः । धामशब्द[7]वाच्यानर्थान् त्यजतीति ध्वनिः । किञ्च [8]शय्यादिकं विहाय धरणिशयने [9]भूमितल्पे लुठति । [10]बहु वारं वारं तव नामाऽऽवर्तयति च[11] । [12]त्वच्चरणालङ्कृतभूमौ सर्वाङ्गैश्चेष्टत इति भावः । "[13]धाम देहे गृहे [14]रश्मौ स्थाने जन्मप्रभावयोः" इति विश्वः (७१.१२१) ॥५॥

---

1. समूहे–क. 2. कुर्वाणे सति–क. 3. अति–ड. 4. अङ्गुल्येनाच्छादयति–ड. 5. 'कलितविरहे' इति इ मूलपाठः 6. नास्ति–अ.ब. 7. वाच्यान् सर्वान्–इ.फ.ग.ह.ज 8. सर्पादिकं–अ.ब. 9. नास्ति–अ.ब. 10. तः 11. पर्यन्तं नास्ति–अ.ब. 11. बहुवारं–इ. वारं वारं–ग.ह. 12. तच्चरण–अ.ब. 13. धामं देहे गृहे वस्त्रे चेति विश्वः–अ.ब. 14. वस्त्रे वेति–इ. वस्त्रे चेति–फ.ग.ह.ज.

भणति कविजयदेवे विरहविलसितेन ।
मनसि रभसविभवे हरिरुदयतु सुकृतेन ॥६॥

पदद्योतनिका

वसतीति । सः विपिनविताने [1]अरण्यविस्तारे वसति [2]तिष्ठति । अपरं ललितं धाम सुन्दरं गृहं त्यजति । धरणीशयने पृथ्वीशयने लुठति विचेष्टते । तव नाम बहु अनेकवारं विलपति ॥५॥

जयन्ती

(वसतीति ।) विहितविताने कलितोल्लोचे गेहे वसति विद्यमाने सति ललितं धाम गृहं त्यजति । धरणौ क्षितावेव शयने लुठति परिवर्तते । तव नाम बहु विलपति ॥५॥

सञ्जीवनी

[3]कविजयदेवे विरहिणां वियोगिनां विलसितेन [4]विलासेनैवं भणति सति हरिः श्रोतॄणां [5]मनस्युदयतु उदयं प्राप्नोतु । कीदृशे मनसि ? सुकृतेन पुण्यनिचयेन सुष्ठु कृतेन गीतेन वा । रभसस्य हर्षस्य विभवे पूरे । "उत्साह-वेगयोः प्रोक्तो रभसः" इति [6]हलायुधः । स्वभावोक्तिरलङ्कारः । [7]परमप्रेष्ठ-दुःखश्रवणासहिष्णुतया व्याकुलचित्तां श्रीराधां दृष्ट्वा सखी स्थगितवाग्बभूवेति पञ्चपदीयं दशमी[8] ॥६॥

पदद्योतनिका

भणतीति । कविजयदेवे विरहिणां वियोगिनां विलसितेन [9]विलासेन भणति सति वियोगिचेष्टितं कथयति सतीत्यर्थः । हरिः कृष्णः मनसि जयदेव-मनसि [10]सुकृतेन पूर्वोपार्जित[11]पुण्येन [12]हेतुना उदयं प्राप्नोतु । कीदृशे मनसि ? रभसस्य हर्षस्य विभवः आधिक्यं यस्मिन् ॥६॥

जयन्ती

(भणतीति ।) कविजयदेवे भणति सति रभस एव विभवो यस्मिन् तस्मिन् मनसि विरहेण विलसितेन विरहचरित्रेण सुकृतेन करणेन हरिः उदयतु ॥ ध्रुवायाभोगाभ्यां षट्पदी ॥५॥

---

1. विस्तारे–ड. 2. नास्ति–ड. 3. कविः जयदेवो–अ.ब. 4. विला-सेनेव–अ.ब. 5. मनस्युदयतु हृदयं प्राप्नोतु–फ.ग.ह.ज. 6. नास्ति हलायुधे 7. तः 8. पर्यन्तो भागो नास्ति–अ.ब.इ.ग.ह. 9. विलासितेन–क. 10. कृतेन–ड. 11. पुण्यौघेन–क. 12. नास्ति–क.

पूर्वं यत्र समं त्वया रतिपतेरासादितास्सिद्धय-
स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः ।
ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति ॥७॥

सञ्जीवनी

[1]किञ्च त्वत्प्राप्तये [2]तस्योत्कण्ठामाह— पूर्वमिति । हे सखि हे राधे ! माधवः श्रीहरिस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे [3]निकुञ्जवरकामतीर्थे भूयो वारं वारं त्वत्कुचकुम्भयोः परिरम्भो [4]गाढालिङ्गनं वाञ्छति । कुम्भपदं रतिजलधितरणायेति भावः । [5]किं कुर्वन् ? पुनस्त्वामेव नान्यां इह [6]तीर्थे ध्यायन् । अनिशं निरन्तरं तव आलापा एव मन्त्राः परमसिद्धिप्रदा मन्त्रास्तेषामावलिं परम्परां जयन्नावर्तयन् त्वामिष्ट[7]देवतारूपेणावर्तयन्नि (ति) स्नेहातिशयः सूचितः । तीर्थप्रभावमाह–यत्र निकुञ्जसिद्धतीर्थे पूर्वं [8]प्रथमं समं सार्धं रतिपतेः कामस्य सिद्धयः [9]कामसुखानि [10]त्वया आसादिताः प्राप्ताः । एतेनात्र सङ्गः कामो [11]दृष्टप्रयत्नेन सेव्यत इति ध्वनिः । स्वभावोक्तिरलङ्कारः ॥७॥

[12]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां दशमः प्रबन्धः ।

पदद्योतनिका

[13]किञ्च त्वत्प्राप्त्यर्थं तपः करोति (इत्याह–) पूर्वमिति । हे राधे ! माधवः श्रीकृष्णस्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे [14]निकुञ्जमेव लतागृहमेव मन्मथमहातीर्थं[15] कामतीर्थं तत्र पुनस्त्वामनिशं ध्यायंस्तवैवालापमन्त्रावलीं [16]सम्भाषणमेव मन्त्राक्षरसमूहं [17]जपन्नपि जपन्नेव भूयः पुनरपि त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं [18]त्वदीयस्तनकलशयोर्गाढालिङ्गनं पीयूषमिवामृतमिव

---

1. नास्ति–ग. 2. तस्यौत्कण्ठचमाह–ग. 3. निकुञ्जवरे कामतीर्थे–अ.ब. 4. गाढालिङ्गनामृतं–इ.फ.ग.ज. 5. किञ्च पुनस्त्वामेव–अ.ब. 6. नास्ति–अ.ब. 7. देवतात्वेन–इ.फ.ग. देवत्वेन–ज.ह. 8. प्रथमं सार्धं–इ.ग.ह. 9. सुखानि–ग. 10. तया–अ.ब. 11. दृढप्रयत्नेन–अ.ब. 12. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 13. किञ्च पूर्वमिति–क. 14. तः 15. पर्यन्तं नास्ति–क. 16. नास्ति –क. 17. नास्ति–क. 18. त्वदीयस्तनकलशगाढालिङ्गनामृतं–क.

एकादशः प्रबन्धः

गुर्जरीरागे एकतालीताले

रतिसुखसारे गतमभिसारे मदनमनोहरवेशम् ।
न कुरु नितम्बिनि गमनविलम्बनमनुसर तं हृदयेशम् ॥१॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ।
गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली ॥ ध्रुवपदम् ॥

वाञ्छति। [1]तस्मिन् कस्मिन् ? यस्मिन् महातीर्थे त्वया समं पूर्वं रतिपतेः कामस्य सिद्धया मनोरथा आसादिताः प्राप्ताः। तपस्यता सिद्धिप्राप्त्यनन्तरं मोक्षामृतं प्राप्यते तद्वत् ॥७॥

[2]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां दशमः प्रबन्धः।

जयन्ती

(पूर्वमिति।) यत्र निकुञ्जे त्वया समं रतिपतेः कामस्य सिद्धयः आन्तरबाह्यसम्भोगरूपाः आसादिताः अनुभूताः तस्मिन्नेव निकुञ्ज एव मन्मथस्य महातीर्थं तस्मिन् पुण्यक्षेत्रे माधवः पुनः अनिशं अविच्छिन्नं त्वां ध्यायन् तवैव आलापा एव शब्दा एव मन्त्रावलि मन्त्रग्रामं जपन् भूयः त्वत्कुचकुम्भयोर्निर्भरः गाढः परीरम्भः आलिङ्गनमेव अमृतं वाञ्छति काङ्क्षते। अत्र निकुञ्जादीनां तीर्थत्वाद्यारोपणात्तदङ्गानां तीर्थाङ्गत्वारोपणात्सावयवरूपकालङ्कारः। तत्र तीर्थे तन्माधवस्य योगित्वारोपादेकदेशविवर्ति। शाब्दाः आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तदिति लक्षणात् ॥७॥

[3]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां दशमः प्रबन्धः।

सञ्जीवनी

एवं स्वानुरागश्रवण[4]प्रसन्नां तां श्रीकृष्णं प्रति सखी प्रेरयति—रतिसुखेत्यादिना। [5]गीतस्य गुर्जरीरागः रूपकतालश्चोभयोर्लक्षणं पूर्वमेवोक्तम्। [6]ध्रुवपदस्यापि। हे [7]नितम्बिनि [8]नितम्बवति पृथुनितम्बयुक्ते। तस्या उत्कर्ष-

---

1. नास्ति—क. 2. नास्तीयं पुष्पिका—ड.क.ल.म. 3. नास्तीयं पुष्पिका—इ. 4. प्रसन्नं श्रीकृष्णं प्रति—ग. 5. गीतस्यास्य—फ.ज. 6. ध्रुवस्यापि—ग.ह. 7. नास्ति—ग.इ. 8. नास्ति—अ.ब.ह.

दर्शनाय नितम्बवतीति ध्वनिः । हृदयेशं तव हृदयानुवर्तिनं तं श्रीकृष्णं अनुसर अनुगच्छ । गमनायाभिसाराय [1]विलम्बितं न कुरु [2]मा कुरु । यावद्वनमाली यमुना[3]तीरे तिष्ठति तावदेवानुसर । कीदृशे ? रतिसुखसारे रतिसुखं सुरत-सुखमेव सारो यत्र । [4]त्वदागमनकाङ्क्षयाऽभिसारे [5]तिष्ठन्तम्[6] । कीदृशं तम् ? मदनमनोहरवेशं कामस्य मनोहरो वेशः शरीराकारो यत्र । कीदृशे ? धीरो मन्दः [7]समीरो वायुर्यत्र । त्वद्विरहनिवारणाय धृता वनमालेति ध्वनिः । यमुनातीरधीरसमीराभ्यां शैत्यमान्द्यसौगन्ध्यान्युक्तानि । "[8]धीरो मन्दगते धीर" इति यादवः[9] । प्रेङ्खो नामालङ्कारः । कीदृशो वनमाली ? गोपीनां पीनपयो-धराणां वर्तुलस्तनानां मर्दनेन चञ्चलं चपलं यत् करयुगं हस्तयुगलं तेन शाली शोभमानः । वशीकृतयुवतिसमूहो [10]वा ॥१॥

पदद्योतनिका

इदानीं सखी राधां कृष्णं प्रति गन्तुं प्रेरयति [11]गीतेन–रतीति । हे नितम्बिनि महन्नितम्बयुक्ते राधे ! यमुनातीरे यद्वनं [12]तस्मिन् वनमाली कृष्णो वसति तिष्ठति । कीदृशे तीरे ? धीरसमीरे मन्दमारुते । हे सखि ! गमन-विलम्बं अभिसारे गमनविलम्बनं न कुरु [13]मा [14]कुरु । तं हृदयेशं कृष्णं प्रति अनुसर अनुगच्छ । कीदृशम् ? [15]हृदयेशं मनस ईश्वरं, त्वन्मनस्तदधीनमित्यर्थः । कथम्भूते अभिसारे[16] ? रतिसुखसारे सुरतसुखमेव सारो मुख्यं यस्मिन् । एता-दृशे अभिसारे सङ्केतस्थाने गतं स्थितं मदनवत्कामवन्मनोहरवेषः शरीराकारो यस्य [17]तम् ॥१॥

जयन्ती

गुर्जरीरागेण एकतालीतालेन गीयते इति ।

पर्वजिता रिग्रहांशन्यासा षाडविका मता ।
कदाचिदवरोहेऽपि [18]सपयुग्गुर्जरी भवेत् ॥

(रतिसुखेति ।) रतिसुखमेव सम्भोगानन्द एव सारः उत्कर्षो यस्मिन् । अभिसरत्यस्मिन् जन इत्यभिसारः । कुञ्जादिसंज्ञकं तत्स्थलं तस्मिन् गतं

1. विलम्बनं–इ.ग.फ.ह.ज. 2. मा कुरु नास्ति–अ.ब.ह. 3. तीरे वने–इ.फ.ग.ह.ज. 4. तः 6. पर्यन्तं नास्ति–अ.ब. 5. तिष्ठति–ग. 7. समीरो यत्र–ग. 8. तः 9. पर्यन्तं नास्ति–अ.ब. 10. इत्यर्थः–ग. नास्ति–फ.ज. 11. गीतेनाह–क. 12. तस्मिन्वने–ड. 13–14. नास्ति–ड. 15. तः 16. पर्यन्तं नास्ति–ड. 17. नास्ति–ड. सः–क. 18. सपयुता–इ.

नामसमेतं कृतसङ्केतं वादयते मृदुवेणुम् ।
बहुमनुतेऽतनु ते तनुसङ्गतपवनचलितमपि रेणुम् ॥२॥

स्थितं, मदन इव मनोहरः वेशः आकृतिरित्यर्थः । तं हृदयेशं प्राणनाथं माधवं अनुसर तं प्रति याहि । गमनविलम्ब गमने आलस्यं न कुरु मा विधेहि । शीघ्रं याहीत्यर्थः । हे नितम्बिनि बृहन्नितम्बवति ! राधासम्बोधनम् । तं हृदयेशं प्राणनाथं समनुसर आर्जवं कुरु । तेन नितम्बभारेणालस्यं स्यादिति विशेष्यस्य साभिप्रायत्वात्परिकराङ्कुरालङ्कारः ॥ ध्रुवा (या व्याख्या) । क्व तिष्ठतीत्यत आह—(धीरेति ।) धीरो गम्भीरः मन्द इत्यर्थः; समीरः यस्मिन् तस्मिन् । यमुनायास्तीरे वने । गोपीनां पीनौ पयोधरौ तयोः मर्दनं पीडनं तस्मिन् चञ्चलौ चपलौ करौ हस्तौ तयोः युगेन शालत इति शोभत इति शाली वनमाली आपदप्रसृतस्रग्वी वसति ॥१॥

सञ्जीवनी

(नामेति ।) [1]मृदुवेणुं मृदुशब्दयुक्तवेणुं वादयते । कीदृशम् ? नामसमेतं हे राधे ! हे वल्लभे ! हे प्राणेश्वरि ! इति यत्त्वन्नाम तद्युक्तम् । वाद्यमानाद्वेणोस्त्वन्नामैवाविर्भवतीति [2]भावः । रामकरी असावरी धनाश्री इति [3]नामरागत्रयं तद्युक्तं वा । कीदृशं नाम ? कृतः सङ्केतो यत्र तादृशम् । [4]यर्हि त्वन्नामसमेतो वेणुर्वाद्यते [5]मया तर्ह्येव [6]त्वयाऽऽगन्तव्यमिति सूचितम् । किञ्च [7]हे तनु ! "अम्बार्थनद्योर्ह्रस्वः" [8](पा. सू.७.३.१०३) । ते तव तनुसङ्गतपवनचलितमपि रेणुं बहु मनुतेऽत्यादरेण धत्ते । बहुश्लाघ्यं आत्मानं मनुते मन्यते वा । यदा वायुना प्राप्तं रेणुमपि धृत्वा धन्योऽहमिति [9]भावं मन्यमानस्तदा त्वदङ्ग[10]सङ्गेनानन्दो [11]भवतीति [12]किन्ते वक्तव्यमिति भावः ॥२॥

पदद्योतनिका

नामेति । हे राधे ! [13]सः कृष्ण[14]स्तव नाम्ना समेतं युक्तं मुदुवेणुं मृदुशब्दयुक्तं वेणुं कृतसङ्केतं यथा स्यात्तथाऽहमिहाभिसारे तिष्ठामि त्वमत्रैवा-

1. नास्ति–अ.ब. 2. ध्वनिः–ग 3. नामत्रयं–ग. 4. यदि–ग. 5. नास्ति–ग. 6. तया–अ. 7. तः 8. पर्यन्तं नास्ति–अ.ब. 9. नास्ति–ग.फ. 10. सङ्गमेन–इ.फ. सङ्गादेव–ग. 11. भवितेति–इ.हृ.फ. 12. कि–इ.फ.ग.हृ. 13. नास्ति–क. 14. त्वन्नाम्ना–क.

पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम् ।
रचयति शयनं सचकितनयनं पश्यति तव पन्थानम् ॥३॥

गच्छेति कृतः सङ्केतो यस्यां क्रियायाम् । [1]वादयते । तन्वीति सम्बोधने । ते तव तनूसङ्गतपवनचलितं शरीरसम्बन्धि [2]वायुप्रेरितरेणुमपि बहु साधु [3]मनुते ॥२॥

जयन्ती

(नामेति ।) नाम्ना वा राधेति वाऽभिधानेन समेतं युक्तं स्यात्तथेति कृतसङ्केतविशेषणं तदपि कृतं सङ्केतितं अहमत्र वसामीति सूचनं यस्मिन् कर्मणि तद्यथा । मृदु मन्दं इतरासां अश्रवणं यथा स्यात्तथा वेणुं मुरलीसंज्ञं वादयते । वेणुविशेषणत्वेन सङ्केतं प्रतिदृक्त्वेन क्लिष्टं न तु अभिमुखीकरणम् । ते तनुसङ्गतः त्वद्दिश्यः पवनः वायुः तेन चलितं उत्क्षिप्तं रेणुं धूलिमपि तनु सूक्ष्ममपि बहु मनुते सत्करोति ॥२॥

सञ्जीवनी

किञ्च सर्वकरणवृत्तिरपि त्वय्यर्पिता तेनेत्याह–प(त)तीत्यादिना । पतत्रे पक्षिणि पतति वृक्षाद्वृक्षान्तरं गच्छति सति; किञ्च वृक्षात् [4]पत्रे विचलति सति कम्पमाने सति सः श्रीकृष्णः [5]शयनं शय्यां रचयति; [6]त्वत्सुरतसम्भोगार्थं निर्मातीत्यर्थः । तव पन्थानं मार्गञ्च सचकितनयनं कदाऽऽगमिष्यतीति सभयनेत्रं यथा स्यात्तथा दिशः प्रति पश्यति । कीदृशं पन्थानम् ? [7]शङ्कितभवदुपयानं शङ्कितं भवत्या उपयानं समीपागमनं यत्र तादृशम् । "सर्वनाम्नः" [8]इति (सि. कौ. ७२८) पुंवद्भाव इति । प्रेङ्खगर्भितो भ्रमालङ्कारः ॥३॥

पदद्योतनिका

पततीति । सः कृष्णः शयनं शय्यां रचयति [9]निर्माति । तव पन्थानं मार्गं सचकितनयनं यथा स्यात्तथा पश्यति । कीदृशं [10]मार्गम् ? पतत्रे पक्षिणि [11]पतति [12]सति गच्छति [13]सति; [14]पत्रे पर्णे विचलति कम्पमाने सति शङ्कितं सम्भावितं भवत्या उपयानं समीपगमनं यस्मिन् सः । राधा प्रायः समागच्छतीति[15] । पतत्रं पक्षिणं; पतत्रं पक्षस्तद्विद्यते यस्येति अर्श आदित्वात् अच् ॥३॥

1. तथा वादयते–क 2. वायुना प्रेरितं रेणुमपि धूलिं–क. 3. मन्यते–क. 4. पतत्रे–फ.ज. 5. नास्ति–अ.व. 6. त्वत्सम्भोगार्थं–ग. त्वत्सुखसम्भोगार्थं–फ.ज. 7. नास्ति–ग. 8. नास्ति–अ.ब. 9. नास्ति–ड. 10–12. नास्ति–ड. 13. इति–ड. 14. तः 15. पर्यन्तं नास्ति–ड.

**मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम् ।
चल सखि कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम् ॥४॥**

जयन्ती

(पततीति ।) विचलितपत्रे विचलनशीले पतत्रे पक्षिणि । "पतत्र-पत्रिपतगपतत्पत्रिरथाण्डजाः" इत्यमरः (२.५.३३१ ।) पतति उड्डयनं कुर्वति शङ्कितं भवत्याः उपयानं आगमनं यथा तथा । शयनं पल्लवास्तरणं रचयति । शङ्कितविशेषणं विप्रकृष्टहृदयेशविशेषणत्वे शयनानुपयोगः स्यात् । चकितं भयसम्भ्रमस्तेन सहिते नयने नेत्रे यथा तथा तव पन्थानं पश्यति । उड्डयनानु-मितत्वदागमनमदृष्ट्वा मार्गमालोकत इत्यर्थः ॥३॥

सञ्जीवनी

सुप्रसन्नामालक्ष्याह—मुखरेत्यादिना । हे सखि हे राधे ! मञ्जीरं नूपुरं त्यज । कीदृशम् ? मुखरं शब्दयुक्तं अधीरञ्च गमनसूचकमित्यर्थः । पुनः कीदृशम् ? केलिषु सुरतक्रीडासु लोलं चञ्चलम् । कमिव ? रिपुमिव । किञ्च कुञ्जं कुञ्जमन्दिरं चल गच्छ । कीदृशम् ? सतिमिरपुञ्जं अन्धकार-समूहयुक्तम् । साहसमालक्ष्य गमनोपायमाह—नीलनिचोलं नीलवस्त्रं शीलय परिधेहि । एवं [1]मदनुशिक्षितमतेन; सखी राधामशिक्षयदिति भावः । "मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः (२.६.१०९) । "निचोलः प्रच्छदपटः" इत्यपि (अमरः २.६.११६) ॥४॥

पदद्योतनिका

मुखरमिति । हे सखि राधे ! मुखरं शब्दयुक्तं मञ्जीरं नूपुरं त्यज । कीदृशं मञ्जीरम् ? अधीरं शब्दादिकरणत्वात् गमनसूचकमित्यर्थः । केलौ क्रीडायां सुलोलमतिचञ्चलं; [2]अतः रिपुमिव शत्रुसमम्; [3]रिपुरपि मुखरोऽधी-रश्चञ्चलश्च भवति । मञ्जीरं त्यक्त्वा सतिमिरपुञ्जं अन्धकारसमूह[4]युक्तं कुञ्जं लतागृहं चल गच्छ । नीलनिचोलं श्यामवस्त्रं शीलय परिधेहि । अभि-सारस्य अदर्शनार्थं नीलवस्त्रपरिधानं [5]क्रियते ॥४॥

---

1. महत्शिक्षितकौशलेन—इ.फ.ग.ह.ज. 2. अतश्च—क. 3. रति-सुखरोधि अधीरं चञ्चलं च भवति—क. 4. सहितं—क. 5. क्रियते इति भावः—क.

उरसि मुरारेरुपहितहारे घन इव तरलबलाके ।
तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके ॥५॥

जयन्ती

(मुखरेति ।) अधीरं चञ्चलं अत एव मुखरं केलिषु लोलं चञ्चलं रिपुमिव नादेन सुरतप्रकाशकत्वात् । मञ्जीरं त्यज मुञ्च । हे सखि राधे ! (स)तिमिरपुञ्जं अन्धकारसहितं कुञ्जं प्रति चल आगच्छ । नीलनिचोलं कृष्णप्रावरणाम्बरं शीलय प्रावरणं कुरु । अन्धकारे नीलवस्त्रस्याप्रकाशात् । कृष्णाभिसारप्रकारोपदेशः ॥४॥

सञ्जीवनी

नन्वलङ्कारत्यागेन शोभा न स्यादित्यलौकिकीं शोभासम्पत्तिमाह—उरसीत्यादिना । हे पीते दाहोत्तीर्णकनकगौराङ्गि ! हे सुकृतविपाके पूर्वजन्मार्जितपुण्यफले ! मुरारेः श्रीकृष्णस्य उरसि वक्षसि राजसि राजिष्यसि; [1]वर्तमानसमीप इतिवत् । कदा ? रतिविपरीते पुरुषायितनायिकारतिकाले सुरतान्ते वा । कीदृशे उरसि ? उपहितहारे समर्पितमुक्ताहारे आलिङ्गनायापसारित[2]मुक्ताहारे वा । पुनः [3]कीदृशे ? [4]घव [5]इन मेघसदृशे । कीदृशे घने ? तरलाश्चञ्चला बलाका बकपङ्क्तयो यत्र । केव ? [6]तडिदिव । यथा नानावर्णविचित्रचमत्कारवती तडिद् घनस्योपर्यधः [7]स्फुरति राजते तथा त्वमपीति ध्वनिः । तत्र हारोरोराधानां बलाकमेघ[8]तडितां च क्रमेण साम्यम् । "बलाका बकपङ्क्तौ स्यात्" इति विश्वः । "[9]पाकः कीर्त्यते स्वादौ परिणामे च दुर्गतौ" इति विश्वः। "पीतो गौरो हरिद्राभः" इत्यमरः[10] (१.५.१४)॥५॥

पदद्योतनिका

उरसीति । हे पीते गौराङ्गि ! हे सुकृतविपाके ! [11]पूर्वजन्मार्जितस्य सुकृतस्य विपाकः फलं यस्यां तत्सम्बोधनम् । अन्यथा श्रीकृष्णविपरीतसुरतं कथं प्राप्यते ? कृष्णस्योरसि वक्षसि त्वं रतिविपरीते [12]पुरुषायितना-

---

1. वर्तमानसामीप्ये वर्तमानवद्वा निर्देशः—फ.ज. 2. हारे—इ.फ.ग. 3. कीदृशे उरसि—इ.फ.ग. 4–5. नास्ति—अ.ब. 6. नास्ति—ब. 7. स्फुरन्ती राजते—फ.ह्.ज. 8. तडितामनुक्रमेण—इ.फ.ह्.ज. 9. तः 10. पर्यन्तो भागो नास्ति—अ.ब. 11. पूर्वजन्मार्जितसुकृतस्य विपाकः—क. पूर्वजन्मार्जितस्य सुकृतविपाकः—ड. 12. पुरुष इव नायिका—ड.

विगलितवसनं परिहृतरसनं घटय जघनमपिधानम् ।
किसलयशयने पङ्कजनयने निधिमिव हर्षनिधानम् ॥६॥

यिकारतिकाले तडिदिव [1]विद्युदिव राजसि [2]शोभसे; वर्तमानसामीप्य इति लट् । कथम्भूते उरसि ? उपहित आरोपितो हारो मुक्ताहारो यस्मिन् । [3]पुनः कीदृशे ? घन इव मेघसदृशे । कीदृशे घने ? तरलबलाके चञ्चल-बलाकसमूहे । हारस्य बलाकासाम्यम्; उरसो मेघसाम्यम्; राधायास्तडित्सा-म्यम् ॥५॥

जयन्ती

(उरसीति ।) सुकृतस्य पूर्वजन्मकृतशुभकर्मणः विपाकः कृष्णसम्भोग-रूपः यस्या(स्त)त्सम्बोधनम् । हे पीते गौरवर्णे ! उपहितः पिनद्धः हारो मुक्तागुम्फितमाला यस्मिन् तस्मिन् मुरारेः उरसि वक्षसि तरलाः बलाकाः पङ्क्तिरूपा यस्मिन् तस्मिन् घन इव मेघ इव । रतिविपरीते पुरुषायिते काले तडिदिव विद्युदिव राजसि प्रकाशसे । अत्र घन इवेति उपमालङ्कारः तडिदिवे-त्युपमायाः अङ्गमिति सङ्कर ॥५॥

सञ्जीवनी

एवं [4]नायकार्पितरतोत्कण्ठां कारयित्वा पुनस्तस्या उत्कण्ठां जनयितु-माह—विगलितेत्यादिना । हे पङ्कजनयने कमलाक्षि ! [5]किसलयशयने नव-पल्लवतल्पे जघनं घटय आरोपय । कीदृशम् ? विशेषरसावेशेन गलितं स्खलितं वसनं [6]नीलवस्त्रं यत्र । पुनः कीदृशम् ? परिहृता दूरीकृता रसना क्षुद्रघण्टिका यत्र । नीलाम्बुदसुन्दरश्रीनन्दकिशोरदर्शनेन स्खलित[7]वसनरसनमिति ध्वनिः । अत एवापिधानं आवरणशून्यम् । किञ्च हर्षनिधानं परानन्दस्थानम् । कमिव ? निधिमिव [8]नायकस्याभीष्टनिधिमिव । यथा निधिरुद्घाटितस्सुखाय भवति तद्वत् । "जघनं कटेरधोभागे" इति हारावली । [9]"निधानं निधिगेहयोः" इति हैमे[10] ॥६॥

---

1. नास्ति–क. 2. शोभिष्यसे–क. 3. पुनः कथम्भूते उरसि–क. 4. नायिकां रतोत्कण्ठां–अ.ब. 5. किसलयतल्पे शयने नवपल्लवतल्पे–अ. 6. नास्ति–अ.ब. 7. वसनमिति–ग. 8. नायकस्याभीष्टं निधिमिव–अ.ब.फ. ह.ज. 9. तः 10. पर्यन्तं नास्ति–अ.ब. 10. हैमः–ग.

हरिरभिमानी रजनिरिदानीमियमपि याति विरामम् ।
कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥७॥

पदद्योतनिका

विगलितेति । हे राधे ! त्वं किसलयशयने पल्लवशय्यायां पङ्कज-नयने [1]पुण्डरीकाक्षे कृष्णे जघनं पूर्वभागं घटय सङ्गमयेति विपरीतसुरतं सूचितम् । कीदृशं [2]जघनम् ? विगलितवसनं [3]त्यक्तवस्त्रम्; परिहृतरसनं त्यक्ता क्षुद्रघण्टिका येन । अत एव अपिधानं आवरणरहितं, हर्षनिधानं आनन्द-स्थानं निधिमिव निधिसदृशं, उद्घाटितमुखो निधिरपि हर्षाय [4]भवति ॥६॥

जयन्ती

(विगलितेति ।) हे पङ्कजवन्नयने यस्याः तत्सम्बोधनम् । विकसित-शब्दाभावाद्धर्मलुप्तोपमा । किसलयानां शयने पल्लवास्तरणे परिहृतरशनं त्यक्त-काञ्चीकं अत एव विगलितवसनं विमुक्ताम्बरम् । अत एव निधिमिव हर्षस्य निदानं आनन्दकारणं माधवं प्रति जघनं स्वीयनाभेरधोभागं अपिधानं आच्छादनं घटय । पुरुषायिते जघनमेव आच्छादकं भवतीति भावः । अत्र निधिरुपमानं, हर्षकारणत्वं साधारणधर्मः, इवशब्दो वाचकः, माधवः उपमेयमिति चतुर्णा-मुपादानात्पूर्णोपमालङ्कारः । यद्वा, जघनं नाभेरधोभागं अपिधानं आच्छादनरहितं घटय कुरु हर्षकारणं निधिमिव । निधेराच्छादनेन कार्पण्यं भवेत् तदनाच्छादनेन उदारता ॥६॥

सञ्जीवनी

एवं शिथिलप्रयत्नां राधां प्रति [5]रजनीभेदमुपपादयन्ती आह—हरि-रित्यादिना । हरिः कामतापहरोऽभितस्सर्वतः सर्वभावेन वा त्वामेव मानयति नान्यामित्यभिमानी यतस्त्वय्येवातिशयेन प्रेम्णाऽभिमानवानतः मधुर्वसन्तो रिपुः क्षोभकत्वेन यस्य तस्य मधुरिपोः कामं कामाभिलाषं [6]पूरय पूर्णं कारय । रिपुपीडितः [7]प्रियस्त्वत्सहायेन वशीकृतो भविष्यतीति भावः । किञ्च सम्प्रति इयं रजनी रात्रिः विराममवसानं याति यास्यति । अपि यावद्याति तावन्मम

---

1. नास्ति–ङ. 2. नास्ति–ङ. 3. नास्ति–ङ. 4. भवतीति भावः–क. 5. भेदमुपपादयन्ती–ब. रजनीभेदमुपादायाह–ग.फ.ह.ज. 6. नास्ति–ग. 7. प्रियस्त्वया सहायेन–अ.ब.ग.ह. प्रियेण–इ.फ.ज.

श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।
प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥८॥

वचनं सत्वररचनं त्वराशीघ्रं प्रगमनसहितं कुरु । 'रतिमानी' इति क्वचित्पाठस्तदा श्रीराधारतिपूर्णः । अत्रा[1]भिसारिका नायिका । तल्लक्षणम्—(रसार्णवे)—

"मदनानलसन्तप्ता याऽभिसारयति प्रियम्" इति ।

एवं सुरतसमये समुपस्थिते गमनविलम्बनमयुक्तमिति भावः । रसवदलङ्कारः ॥७॥

पदद्योतनिका

हरिरिति । हे राधे ! हरिरपि अभिमानी लघुत्वं न सहत इत्यर्थः । इदानीमधुना रजनिरपि विराममवसानं [2]उपयाति । वर्तमाने लट् । मम वचनं कुरु । शीघ्रमागच्छेत्यर्थः । कीदृशं मम वचनम् ? सत्वरा शीघ्रा रचना यस्मिन् । गत्वा च मधुरिपुकामं श्रीकृष्णाभिलाषं पूरय [3]पूर्णं कुर्वित्यर्थ [4] ॥७॥

जयन्ती

एवं सुरतकथाकर्णनविदितभावां त्वरयितुं बिभीषयति (हरिरिति ।) हरिः अभिमानी त्वया अनागतं चेदन्यां गमिष्यतीति भावः । इदानीमियं रजनिरपि रात्रिरपि विरामं याति । प्रातःकालसमय इत्यर्थः । इदानीं न यास्यसि चेत्साभिमानत्वात् हरिस्त्वां न प्रेक्षिष्यतीति भावः । त्वरासहितरचनं अनुष्ठानं यथा तथा मम वचनं कुरु । मधुरिपुकामं माधवमनोरथं पूरय मम इत्यलं सकलं भवति । तदभीष्टपूर्तिरिति [5]परोपकारार्थं गच्छेति भावः ॥७॥

सञ्जीवनी

गीतार्थसङ्ग्रहं [6]मङ्गलेन योजयति—श्रीजयदेवेत्यादिना । हे हरिभक्ताः ! श्रीजयदेवे परमरमणीयं [7]निरुपममनोहरं भणति कथयति सति हरिं नमत नमस्कुरुत । कीदृशे ? (कृतहरिसेवे) कृता हरिसेवा चिन्तनादिरूपा येन । कीदृशं हरिम् ? प्रमुदितं प्रहर्षेणानन्दितं हृदयं यस्य तम् । पुनः (कीदशम् ? अतिसदयं) अतिशयेन [8]भक्तेषु दयायुक्तम् । पुनः कीदृशम् ? [9]सुकृतैः [10]पुण्यराशिभिः सुकविभिर्वा प्रार्थनीयं सुन्दरं वा । प्रस्तुतोक्तिरलङ्कारः ॥८॥

---

1. अभिसारिकेयं–ग. 2. याति यास्यति–क.ल.म. 3. तः 4. पर्यन्तं नास्ति–ड.ल.म. 5. परोपकारार्थायागच्छ–इ. 6. मङ्गलत्वेन–इ.फ.ग.ह.ज. 7. निरूपणमनोहरं–ग. 8. नास्ति–अ.ब. 9, 10. नास्ति–अ.ब.

द्वादशः प्रबन्धः

विकिरति मुहुः [1]श्वासानाशाः पुरो मुहुरीक्षते
प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति ।
रचयति मुहुश्शय्यां पर्याकुलं मुहुरीक्षते
मदनकदनक्लान्तः कान्ते प्रियस्तव वर्तते ॥१॥

इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामेकादशः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेव इति । कृतहरिसेवे कृता हरिसेवा कृष्ण[2]चिन्तनादिर्येन; तस्मिन् जयदेवे । परमरमणीयं अतिशयमनोहरं इदं गीतं भणति [3]कथयति सति; प्रमुदितहृदयं सन्तुष्टचित्तं [4]नमत नमस्कुरुतेति भक्तान् प्रत्युक्तिः । कीदृशम् ? [5]अतिसदयमतिकरुणासहितम् । प्रसन्नहृदयो [6]दयावांश्च शीघ्रं [7]प्रसीदतीति नमनं कर्तव्यमिति भावः । पुनः कीदृशम् ? सुकृतकमनीयं [8]पुण्येन वाञ्छनीयम् ॥८॥

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामेकादशः प्रबन्धः ।

जयन्ती

(श्रीजयदेव इति ।) श्रीजयदेवे कृतहरिसेवैकपूजके परमरमणीयं अतिमधुरं भणति सति प्रमुदितं सत् हृदयं अन्तःकरणं यस्य तम् । अतिसदयं बहुकृपालुं सुकृतैः कमनीय अभिलषणीयम् । सुकृतं चैतस्मिन् भावो भवती(ति) भावः । हरिं नमत हे भक्ताः ! य(श)स्यमिति शेषः ॥८॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकादशः प्रबन्धः ।

सञ्जीवनी

एवं नानोपायैरनभिसरन्तीं श्रीराधां पुनः [9]प्रत्याह-विकिरतीत्यादिना । हे कान्ते स्वप्रदीप्त्या वशीकृतवल्लभे ! तव प्रियो वल्लभः श्रीकृष्णो मदनस्य

---

1. श्वासान्नासां–इ. श्वासान्नासापुरो–ड. 2. चिन्तनं–क. 3. नास्ति–क. 4. नास्ति–क. 5. अतिदयायुक्तं–क.ल.म. 6. दयां करोतीति–क. 7. प्रसीदतीति भावः । अतः अत एव नमनं कर्तव्यमिति खल–क. 8. अतिपुण्येन वाञ्छनीयमित्यर्थः–क. 9. सख्याह–इ.फ.ग.ह.

[1]कामस्य त्वद्विरहेण कदनं पीडनं तेन क्लान्तः सन्तप्तो वर्तते । सन्तप्ततामेवाह-मुहुर्वारं वारं त्वदागमनचिन्तया श्वासान् सन्तापनिःश्वासान् विकिरति विक्षिपति। मुहुः पुरोऽग्रे [2]आशाः दिशः ईक्षते पश्यति । केनापि मार्गेण कुञ्जं गताऽऽगमिष्यतीति मुहुर्वारं वारं कुञ्जं [3]लतामन्दिरं प्रविशति । कीदृशं कुञ्जम् ? गुञ्जन्तो भ्रमरा यत्र तत् गुञ्जत् । [4]तत्राऽप्यलब्धमनोरथो मुहुस्ताम्यति अतिग्लानिसन्तप्तो भवतीत्येवंविधोऽपि त्वदालिङ्गनाय शय्यां विविध[5]किसलयैस्तल्पं रचयति । तल्पं कृत्वा नागतेयमिति विज्ञाय त्वदागमनाय मुहुः परित आकुलं व्याकुलमीक्षते । एतेन त्वय्यनुरागातिशयः प्रोक्तः । दीपकालङ्कारः ॥१॥

पदद्योतनिका

अधुना शीघ्रं गन्तुं प्रेरयति—विकिरतीति । हे कान्ते ! तव प्रियः कृष्णः मदनकदनक्लान्तः कामपीडोपतप्तो वर्तते तिष्ठति । केन प्रकारेणेत्यत आह—विकिरतीत्यादि । इदानीमपि नागतेति श्वासान्मुहुर्वारं वारं विकिरति विक्षिपति । एकाग्रचित्ततया त्वामेव ध्यातुं नासापुरो नासाग्रं मुहुरीक्षते पश्यति । ध्याने अदृष्ट्वा मुहुः कुञ्जं लतागृहं प्रविशति अत्र भविष्यतीति; अत्राप्यदृष्ट्वा मुहुः गुञ्जन् हे राधे [6]क्वासीत्यादि जल्पन् [7]बहु ताम्यति दुःखितो भवति । त्वामागतां दृष्ट्वैव मुहुः [8]शय्यां शयनीयं रचयति; शय्यां कृत्वा त्वामनागतां विज्ञाय मुहुः[9] पर्याकुलमीक्षते दिशः पश्यति । इदानीमेव दृष्टा पुनः कुत्र गतेति [10]मत्वाऽतिशयेन चिन्तातुरो भवतीति भावः[11] ॥१॥

जयन्ती

अष्टपद्यर्थं सङ्गृह्णाति—(विकिरतीत्यादिना ।) हे कान्ते राधे ! तव प्रियः माधवः मुहुः श्वासान् विकिरति मुञ्चति । मुहुः पुनः नासां वीक्षते । दशमावस्थाप्राप्तिशङ्कया नासाग्रावलोकनं कुरुते । तदर्शनं मृत्युसूचकमिति । मुहुः कुञ्जं प्रविशति मुहुः प्रवेशान्निर्गत्य विशतीत्यर्थः । कूजन् विलासेन पक्षिरुतं कुर्वन् मुहुः बहु ताम्यति । कालस्याक्रमणात् मुहुः शय्यां रचयति । मुहुः पर्याकुलं व्याकुलतया ईक्षते पश्यति । एवं मदनकदननिमित्तसम्भोगार्थं क्लान्तः आतुरः वर्तते । ईक्षत इत्यस्य पुनरुक्तदोषो नाशङ्कनीयः सख्या विरहनिवेदनेन पर्याकुलत्वात् । कारकदीपकम् । हरिणीवृत्तम् ॥१॥

---

1. नास्ति—फ.ग.ह.जः 2. आशां दिशं—ग. 3. नास्ति—अ.ब. 4. तत्राप्यलब्धमानो—फ.ग.ह.ज. 5. किसलयतल्पं—ब. किसलयपुष्पतल्पं—इ.फ.ग.ह.ज. 6. क्वासीति—ड. 7. नास्ति—क. 8. तः 9. पर्यन्तं नास्ति—ड. 10. तः 11. पर्यन्तं नास्ति—ड.ल.म.

[1]त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तं गतो
गोविन्दस्य मनोरथेन च समं प्राप्तं तमस्सान्द्रताम् ।
कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना
तन्मुग्धे विफलं विलम्बनमसौ रम्योऽभिसारक्षणः ॥२॥

सञ्जीवनी

(त्वद्वाक्येनेति ।) हे मुग्धे ! [2]स्वकार्यविदिनि अधुना सम्प्रति त्वद्वाक्येन समं सार्धं तिग्मांशुः सूर्यः [3]समग्रं सामस्त्येन अस्तङ्गतोऽदर्शनं प्राप्तः । [4]अथ वा समग्रमधुनाऽखिलमधुसमूहेनेति [5]वाक्येन । किञ्च गोविन्दस्य श्रीकृष्णस्य मनोरथेन श्रीराधा गमिष्यतीति वाञ्छया [6]समं सार्धं तमः अन्धकारः सान्द्रतां स्निग्धतां प्राप्तम् । [7]निविडान्धकारमनोरथयोस्साम्यमित्यर्थः । एषा दीर्घा मदभ्यर्थना शीघ्रं गम्यतामिति मदीयप्रार्थना । कीदृशी ? कोकानां चक्रवाकानां करुणस्वनेन करुणरसाश्रयविरहकूजितेन सदृशी । यथा चक्रवाकानां करुणस्वनो नानाप्रकारः श्रूयते तथा मदीया [8]उक्तयस्तवाग्रे [9]भवन्तीत्येकान्तवैदग्ध्यमिति भावः । तत्ततो विलम्बनं गमनाय विफलं हस्तगतसौख्यप्रतिबन्धकमित्यर्थः । अतोऽसावभिसारक्षणः अभिसरणसमयो रम्यो गमनाय मनोहरोऽयमिति । सहोक्तिरलङ्कारः [10]यथा :—

"सह दीर्घा मम श्वासैरिमाः सन्त्यतिरात्रयः" इति दण्डी[11] ॥२॥

पदद्योतनिका

त्वद्वाक्येनेति । हे [12]मूढे मुग्धे ! त्वद्वाक्येन असूयामानसहितेन [13]समं [14]सह समग्रं सामस्त्येनाधुना इदानीं तिग्मांशुः सूर्योऽस्तङ्गतः । असूयामानसहितस्सूर्योऽस्तं [15]प्राप्तोऽभिसारकालोऽयमित्यर्थः । गोविन्दस्य कृष्णस्य मनोरथेनेदानीं राधा आगमिष्यतीति [16]बुद्धया समं सह तमोऽन्धकारस्सान्द्रतां निविडत्वं प्राप्तम् । तमस्यभिचरणं योग्यमित्यर्थः । दीर्घा मदभ्यर्थना शीघ्रं गम्यतामिति

1. त्वद्वाष्पेण–इ. 2. स्वकार्यार्थविदिनि–फ.ह.ज. 3. नास्ति–अ.व. 4. यद्वा–ग. 5. त्वद्वाक्येन–फ.ज. 6. समर्थितः–अ.व. 7. निविडान्धकाराभिसरणं योग्यमित्यर्थः–इ.फ.ग.ह.ज. 8. युक्तयः–ग.फ.ह.ज. 9. भवन्तीत्यवैदग्ध्यमिति–इ.ग.ह.ज.फ. 10. तः 11. पर्यन्तं नास्ति–अ.ब.. 12. मुग्धे मूढे–क. 13. नास्ति–क.ल.म. 14. नास्ति–ल.म. 15. गतः अभिसरणं–क.ल.म. 16. वाञ्छया–क.ल.म.

आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-
प्रोद्बोधादनु सम्भ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोस्सम्भाषणैर्जानतो-
र्दम्पत्योरिह को [1]न को न तमसि व्रीडाविमिश्रो रसः ॥३॥

मदीया प्रार्थना कोकानां चक्रवाकानां करुणस्वनेन विरहदयाशब्देन सदृशी। यथा कोकानां करुणस्वनो नानाप्रकारः श्रूयते तथा मदीयाः काकूक्तयः सम्प्रति तवाग्रे भवन्तीत्यर्थः। तत्तस्माद्धेतोर्विलम्बनं [2]विफलम्। असौ अभिसारलक्षणोऽभिसरणकालो रम्यो गमनयोग्य इत्यर्थः ॥२॥

जयन्ती

(त्वद्बाष्पेति।) त्वत् तव बाष्पेण अश्रुणा समं सह अधुना इदानीं तिग्मांशुः भानुः अस्तं पर्वतं गतः। न दृश्यत इत्यर्थः। सहार्थेन बाष्पमपि अत्यन्तं अस्तं गतं तव अद्यापि करुणा नोदेतीति भावः। यद्वा तव बाष्पेण ऊष्मणा दाहे(ने)त्यर्थः। गोविन्दस्य मनोरथेन त्वदालिङ्गनकामेन समं तमः सान्द्रतां प्राप्तम्। गोविन्दमनोरथ इव निबिडोऽन्धकार इति भावः। कोकानां चक्रवाकपक्षिणां करुणस्वनेन दैन्यध्वनिना सदृशी दीर्घा पूर्वकृता मदभ्यर्थना मत्कृतप्रार्थना दीर्घा जातेति शेषः। सहसेति पाठे तृतीययैव सहार्थता। तस्मात्कारणात् हे मुग्धे स्वहितानभिज्ञे विलम्बनं झडित्यनिर्गमनं विफलं व्यर्थम्। असौ अभिसारक्षणः प्रियनिकट(गमन)कालः सूक्ष्मत्वात्क्षणः। क्षणान्तरे नैतावत्सुक(र)मित्यर्थः। अत्र सहोक्त्यलङ्कारत्रयम्। निरपेक्षत्वात्त्रयाणां संसृष्टिः ॥२॥

सञ्जीवनी

अभिसार[3]रम्यत्वमेवाह— (आश्लेषादिति)। इह निबिडे तमसि दम्पत्यो[4]र्जायापत्योर्व्रीडाविमिश्रो लज्जासमन्वितः [5]को न रसः [6]शृङ्गाररसैरभिसाररम्यतां प्रथयति ? अपि तु सर्वोऽपि रसो भवत्येव। कीदृशयोः ? अन्यार्थं सुरतमुद्दिश्य व्याजेन सुरतं प्रति गतयोः। कीदृशयोः ? भ्रमात् भ्रमतः परिभ्रमणतो वा सान्द्रे तमसि मिलितयोः सङ्गतयोः। परस्परालापैः स्वरभङ्गाद्यालापैर्वा सुरताभिप्रायं जानतोः। [7]कीदृशयोः ? आलिङ्गनचुम्बननखक्षतकामो-

1. नु—इ. 2. विफलमिति जानीहि—क. 3. रसत्वमेवाह—अ.ब. रम्यत्वमेव सख्याह—इ.फ.ग.ह.ज. 4. नास्ति—अ.ब.ग. 5. को न को न रसः—फ.ग.ह.ज. 6. शृङ्गाररसोऽभिसाररम्यतां—इ.फ.ग.ह.ज. 7. नास्ति—ग.

द्बोधककामोद्रेकसुरतारम्भैः क्रमादेतैरनु पश्चात् प्रीतयोर्लब्धानन्दयोस्तृप्तयोरित्यर्थः । आश्लेषादिक्रमं विनैव प्रीतयोरिति वा ॥३॥

पदद्योतनिका

अभिसारे रसाधिक्यं भवतीत्याह—आश्लेषादिति । दम्पत्योर्जायापत्योस्तमसि अन्धकारे [1]कः व्रीडामिश्रो लज्जायुक्तः [2]रसो न भवेत् । अपि तु सव्रीडस्सर्व एव [3]शृङ्गाररसो भवत्येव । कथम्भूतयोर्दम्पत्योः ? अन्यार्थं परस्त्रीपुरुषार्थं गतयोः सङ्केतस्थानं प्राप्तयोः । [4]पुनः [5]कीदृशयोः ? भ्रमात् भ्रान्त्या गाढान्धकारे रसात् मिलितयोः [6]सङ्गतयोः । अनन्तरं 'आश्लेषादि'ति विशेषणानि योजनीयानि । तत्रैवं सम्भोगक्रमः—प्रथममालिङ्गनं ततश्चुम्बनं ततो नखक्षतं ततः [7]कामोद्बोधस्ततस्सम्भ्रमस्ततस्त्वरा ततो मैथुनं ततः प्रीतिस्ततो भावनमिति । [8]तं क्रममाह-आश्लेषादिति । पुनः कीदृशयोः ? आश्लेषादालिङ्गनादनु पश्चात् चुम्बनादनु पश्चान्नखोल्लेखादनु नखक्षतात्पश्चात्स्वान्तजप्रोद्बोधादनु कामबोधात्पश्चात्सम्भ्रमादनु वेगात्पश्चाद्रतारम्भादनु सुरतोद्योगात्पश्चात्प्रीतयोस्तृप्तयोः । पुनः कीदृशयोः ? सम्भाषणै रालापै र्जानतो [9]र्ममेयं चेति ॥३॥

जयन्ती

एवं गूढतयागतं चेद्विनोदः स्यादिति प्रलोभयति—आश्लेषादित्यादिना । आदावाश्लेषः तस्मादनन्तरं अनु चुम्बनम् । तस्मादनु पश्चात् नखैः उल्लेखः । तल्लक्षणं रतिरहस्ये द्रष्टव्यम् । तस्मात् अनु सम्भ्रमः सन्तोषविशेषः । इतरविस्मारकत्वाद्भ्रमः । तस्मात् अनु रतारम्भः सुरतस्योपक्रमः । तस्मात् अनु प्रीतयोः सुरतजनित[10]परस्परानुरागयुक्तयोः, अन्यार्थं गतयोः रमणमुद्दिश्य यातयोः, भ्रमात् मार्गच्युतेः मिलितयोः सङ्घटितयोः सम्भाषणैः 'त्वं कः' इति प्रश्नपूर्वकवाक्यैः जानतोः 'सा त्वं' इति प्रत्यभिज्ञातयोः दम्पत्योः स्त्रीपुंसोः इह वने तमसि व्रीडाविमिश्रः लज्जया मिलितः कः को नु रसः हास्याद्भुतादिर्न भवेत् । अनेकरसो भवतीत्यर्थः । अत्र एवम्प्रकारं गमनार्थवस्तुना कुञ्जे एव न गन्तव्यं, तस्मिन्वने किञ्चिदुद्देशेन गमने तमसि तत्सङ्गो भविष्यतीति वस्तु व्यज्यते इति वस्तुना वस्तुध्वनिः । अत्र 'प्रियमभिसारयति स्वयं वाऽभिसरति साऽभिसारिका' इति लक्षणादभिसारिका नायिका ॥३॥

---

1. नास्ति–क.ल.म. 2. रसः कः–क. 3. शृङ्गारादि–क.ल.म. 4, 5. नास्ति–ल.म. 6. नास्ति–क. 7. कामोद्बोधः ततस्त्वरा–ड. कामोद्बोधस्ततो मैथुनं–ल.म. 8. तत्क्रममाह–ल.म. 9. मग्नायमिति–क. ममेयमिति–ल.म. 10. परस्परानुरक्तयोः इ.

सभयचकितं विन्यस्यन्तीं [1]दृशौ तिमिरे पथि
प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम् ।
कथमपि रहःप्राप्तामङ्गैरनङ्गतरङ्गिभिः
सुमुखि सुभगः पश्यन् स त्वा[2]मुपैति कृतार्थताम् ॥४॥

सञ्जीवनी

पुनरपि तां त्वरयितुं श्रीकृष्णोत्कण्ठामाह—सभयेति । हे सुमुखि सुन्दरि ! सुभगः सुन्दरावधिः सः श्रीकृष्णस्त्वां पश्यन् कृतार्थतां जन्मसफलत्वं [3]समुपैति [4]प्राप्नोति । कीदृशीं त्वाम् ? तिमिरेऽन्धकारसहिते पथि मार्गे सभयचकितं भयसहितं चकितं यथा स्यात्तथा शृङ्गाररससम्भ्रमेण दृशौ नेत्रे विन्यस्यन्तीं [5]क्षिपन्तीम् । अनेन दृशोरलौकिकसौन्दर्यमुक्तम् । पुनः कीदृशीम् ? मुहुर्वारं वारं [6]प्रतितरु प्रतिवृक्षं स्थित्वा [7]स्थित्वा वृक्षव्याजेन प्रियागमनं [8]समीक्षमाणा पदानि मन्दं शनैर्वितन्वतीं [9]दधतीम् । पुनः कीदृशीम् ? कामतरङ्गैः कथमपि महता कष्टेनाङ्गै रह एकान्त[10]गृहे प्राप्ताम् । सुमुखीत्यन्धकारे प्रकाशबहुलत्वमुक्तम् । रसवदलङ्कारः ॥४॥

पदद्योतनिका

[11]त्वल्लाभा[12]त्कृष्णः कृतार्थो भवत्वित्याह—सभयेति । हे सुमुखि सुवदने राधे ! सुभगः सौभाग्यवान् स कृष्णः त्वां पश्यन् कृतार्थतां समुपैतु प्राप्नोतु । कीदृशीं त्वाम् ? [13]तिमिरेऽन्धकारसहिते पथि मार्गे सभयचकितं [14]भयविस्मयाभ्यां सहितं यथा स्यात्तथा दृशं नेत्रं न्यस्यन्तीं [15]क्षिपन्तीम् । [16]निविडान्धकारदर्शनाद्भयं, अन्धकारे निश्शङ्कगमनाद्विस्मयः । पुनः कीदृशीम् ? प्रतितरु वृक्षे [17]वृक्षे मुहुः पुनः पुनः स्थित्वा मन्दं शनैः पदानि चरणव्यापारान्

---

1. दृशं–इ.क.ल.म. 2. उपैतु–इ.फ.ह.ज. 3. समुपैतु प्राप्नोतु–इ.फ.ग.ह.ज. 4. नास्ति–अ.ब. 5. नास्ति–अ.ब. 6. प्रतितरुं–ब.इ.ग.ह.ज. नास्ति–फ. 7. नास्ति–फ.ग.ह.ज. 8. समीक्ष्यमाणा–अ.ब.ग. 9. नास्ति–अ.ब. 10. गृहं–इ.फ.ह.ज. गृहप्राप्ताम्–ग. 11. त्वल्लोभात्–ल.म. 12. कृष्णोऽपि कृतार्थो भवतीत्याह–क.ल.म. 13. तिमिरेऽन्धकारे–ड. सतिमिरेऽन्धकारसहिते–क. 14. भयविस्मयसहितं–क.ल.म. 15. नास्ति–क. 16. निविडान्धकारे निश्शङ्कगमनाद्विस्मयः–ड. 17. नास्ति–ड.

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली-
नेपथ्योचितनीलरत्नमवनीभारावतारान्तकः ।
स्वच्छन्दं व्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः ।।५।।

इति श्रीगीतगोविन्दे साकाङ्क्षपुण्डरीकाक्षो नाम
पञ्चमः सर्गः

वितवन्तीं, वृक्षे कृष्णभ्रान्त्या [1]स्वचरणापातभयात्। [2]पुनः कीदृशीम्? कथमपि अन्धकारस्य निबिडत्वात् केनापि प्रकारेण रह एकान्तस्थलं प्राप्ताम्[3]। [4]पुनः [5]कीदृशीम्? अनङ्गतरङ्गिभिः कामस्य यस्तरङ्गः पुनः पुनरुद्बोध-स्तद्युक्तै रङ्गैर्हस्तपादिदिभिरुपलक्षिताम् ।।४।।

जयन्ती

(सभयेति।) हे सुमुखि! भयचकिताभ्यां सहितं यथा तथा तिमिरे अन्धकारे दृशं दृष्टिं विन्यस्यन्ती विक्षिपन्ती पथि मार्गे प्रतितरु तरौ तरौ प्रतितरु, मुहुः स्थित्वा पदानि पादप्रक्षेपस्थलानि वितन्वती कुर्वन्ती कथमपि अतिकष्टेन रहःप्राप्तां मिलितां, अनङ्गस्य तरङ्गा इव तरङ्गाः विलासाः एषु सन्तीति अनङ्गतरङ्गिभिः अङ्गैः युक्तामिति शेषः। त्वां पश्यन् अवलोकयन् सुभगः सुन्दरः माधवः कृतार्थतां धन्यतां उपैतु प्राप्नोतु। अभिसरणक्रियोपदेश-वर्णनादभिसरणोद्योगादभिसारिका ।।४।।

सञ्जीवनी

इदानीं [6]कविराशिषमाशास्ते—[7]राधेति। देवकीनन्दनः त्वां चिरं चिरकालमवतु रक्षतु। देवकीति यशोदानाम। तद्यथा—"द्वे नाम्नी नन्द-भार्याया यशोदा देवकी तथा" इति पद्मपुराणे। कीदृशः? राधामुग्ध[8]मुखार-विन्दस्य मधुपस्तदधरामृतपानकर्ता। पुनः कीदृशः? [9]त्रैलोक्यमौलिस्थली

---

1. स्वचरणपातभयादिति भावः—क. स्वचरणापातिभयादिति भावः—ल.म. 2. तः 3. पर्यन्तं नास्ति—ड.क. 4, 5. नास्ति—ड. 6. कविराशीः समाशास्ते—फ.ज. 7. श्रीराधेति—अ.ब. 8. मुखारविन्दमधुपः—ग. 9. त्रैलोक्यस्य मौलिस्थली—इ.

मुकुटस्थानं [1]वृन्दावनं तस्य नेपथ्योचितं अलङ्कारयोग्यं नीलरत्नं इन्द्रनीलमिव श्यामरूपम् । [2]यद्वा त्रैलोक्यमौलिस्थली राधा तदलङ्करणमिति। पुनः कीदृशः ? [3]भूभारावतारेऽन्तकस्समर्थः । अवनी भूस्तद्भाराय अवतारा ये राजानस्तेषां अन्तको नाशक इति वा । पुनः कीदृशः ? स्वच्छन्दं स्वाधीनानां व्रजसुन्दरी-जनानां मनस्तोषे चित्तप्रीतौ प्रदोषो [4]रात्रेर्मुखम् । व्रजवधूमनोरञ्जकश्चन्द्रः । रात्रिमुखे नार्यः प्रहृष्टा भवन्ति । पुनः कीदृशः ? कंसस्य ध्वंसने मारणे धूमकेतुः पिशुनग्रहः । कंसं सुखं ध्वंसयति स्वसौन्दर्यादिना स कंसध्वंसन एव । धूमकेतुरिति वा । अनेन नायकस्य वीरादयो गुणाः सूचिताः । [5]"कंसोऽसुरे सुखध्वंसनकारकेऽपी"ति यादवः[6] । "धूमकेतुः स्मृतो वह्नौ विनाशस्यापि सूचकः" इति हलायुधः[7] । "अलङ्कारेऽपि नेपथ्यं [8]नटावरणकेऽपि च" इति त्रिलोचनः । "मुग्धः सुन्दरमूढयोः" इति [9]विश्वः (६६.१०) ।।५।।

श्रान्ताऽसि त्वं कमलनयने दूरमभ्यागताऽसि
[10]स्निग्धच्छायं कलय सुभगे माधवीनां निकुञ्जम् ।
इत्थं राधां मधुरवचनैः श्रोत्रपीयूषपूरै—
राश्वासार्थं चिरपरिधृतः प्राप्तवान्नन्दसूनुः ।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[11]शिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ।

पदद्योतनिका

इदानीं कवि[12]र्भक्तान् प्रत्याशिषं ब्रूते — राधेति । देवकीनन्दनः श्रीकृष्ण-स्त्वां [13]भक्तं चिरमवतु दुरिताद्रक्षतु । कीदृशः कृष्णः ? राधायाः मुग्धसुन्दरं यन्मुखारविन्दं मुखकमलं तस्य मधुपो भ्रमर इव नीलत्वात् [14]अधरपान-

---

1. नास्ति—अ.ब. 2. अथवा—इ.ग.फ.ह्.ज. 3. भूभारावतारान्तकः—ग. अवनीभारावतारे भूभारावतारे अन्तकः—फ. अवनीभारावतारे अन्तकः—ज. 4. रात्रिमुखं—इ.फ.ग.ह्.ज. 5. तः 6. पर्यन्तं नास्ति—अ.ब. कंसोऽसुरे ध्वंसनके सुखकोरकयोरपीति—फ.ज. 7. अग्न्युत्पातौ धूमकेतू—(हलायुधः ५.५४) धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः—(विश्वः—५६.२०३) 8. नटाचरणकेऽपि—फ.ज. 9. इत्यमरः—अ.ब.फ.ग.ह्.ज. 10. स्निग्धच्छाये कमलसुभगे माधवीनां निकुञ्जे—अ.ब. 11. शिवदासपण्डितात्मज—ग.ह्. 12. भक्तं प्रति—ल.म. भक्तजनं प्रति—क. 13. नास्ति—ड. 14. मुखपानकर्तृत्वाच्च—क.ल.म.

कर्तृत्वाच्च । पुनः कीदृशः ? त्रैलोक्यस्य लोकत्रयस्य [1]या मौलिस्थली मुकुटस्थानं तस्य नेपथ्योचितं अलङ्कारयोग्यं नीलरत्नमिव [2]इन्द्रनीलमिव [3]स्थितम् । [4]पुनः कीदृशः ? अवनीभारावतारे भूभारावतारणे क्षमः समर्थः[5] । पुनः कीदृशः ? स्वच्छन्दानां स्वाधीनानां व्रजसुन्दरीजनानां [6]गोपिकानां मनस्तोषे चित्तप्रीतौ प्रदोषो [7]रात्रिमुखमिव । रात्रिमुखे हि नार्यस्तुष्यन्ति । [8]पुनः कीदृशः ? कंसस्य [9]मातुलस्य ध्वंसने मारणे धूमकेतुरिव स्थितः ।। राधागमने साकाङ्क्ष इत्यर्थः ।।५।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डित[10]विरचितायां (साकाङ्क्षपुण्डरीकाक्षो नाम) पञ्चमः सर्गः ।

जयन्ती

(राधेति ।) राधायाः मुग्धं सुन्दरं मुखमेव [11]अरविन्दं तस्य पद्मस्य मधुपः भ्रमरः । परम्परितरूपकेण तदीयाधररसपायित्वं व्यज्यते । त्रैलोक्यस्य जगत्त्रयस्य मौलिस्थलीनां नेपथ्याय अलङ्करणाय उचितं योग्यं नीलरत्नं इन्द्रनीलमणिः, परम्परितरूकेण सर्वजगदभिवन्द्यत्वं व्यज्यते । अवनीभारस्य पृथ्वीपीडककंसादिरूपस्य अवतारे अन्तकः । परम्परितरूपकेण दुष्टनिग्रहो व्यज्यते । स्वच्छन्दं यथाभिलाषं व्रजसुन्दरीजनमनस्तोषः सन्तोषः प्रदोषः रजनीमुखं सन्तोषप्रदः कामप्रपूरकः, कंसध्वंसने धूमकेतुः देवकीनन्दनः वासुदेवः त्वां चिरं अवतु । अत्र एकक्कृष्णस्य मधुपत्वरत्नत्वान्तकत्वप्रदोषत्वधूमकेतुत्वानामनेकरूपारोपान्मालापरम्परितरूपकमलङ्कारः ।।५।।

[12]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः ।

---

1. नास्ति–ड. 2. नास्ति–क. 3. नास्ति–ड. 4. तः 5. पर्यन्तं नास्ति–ड. 6. गोपीनां–क. 7. नास्ति–क. 8. तः 9. पर्यन्तं नास्ति–ल.म. 10. कृतायां पदद्योतनिकायां–ड. 11. अरविन्दस्य पद्मस्य–इ. 12. इति गीतगोविन्दे साकाङ्क्षपुण्डरीको नाम पञ्चमः सर्गः–इ.

षष्ठः सर्गः

धन्यवैकुण्ठः

अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ।
तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ॥१॥

सञ्जीवनी

षष्ठे कामशर[1]त्रासखिन्नां राधां विलोक्य [2]सा ।
न्यवेदयत्सहचरी श्रीकृष्णं [3]गमनाक्षमाम् ॥

एवं कृष्णाभिसरणं निरूप्य तां लतामन्दिरे स्थापयित्वा तच्चरितं श्रीकृष्णं प्रत्याह--अथेति । अथेत्यनन्तरं मङ्गलं वा । सखी श्रीगोविन्दं विषयीकृत्य तच्चरितं [4]राधाचरितं प्राहोवाच । किं कृत्वा ? लतामन्दिरे चिरकालम[5]नुरक्तां[6]तां दृष्ट्वा । कीदृशीम् ? [7]गन्तुमशक्तां चलितुमसमर्थाम् । कीदृशे ? मनसिजेन कामेन मन्दे व्यथितहृदये । मनसिजो मन्दः तुच्छो यस्मादिति वा । "[8]मन्दः खले [9]मन्दरते मूर्खे[10]स्वैरेऽल्परागिणोः" इति विश्वः[11] (६३.१०) । हेतूक्तिरलङ्कारः ॥१॥

पदद्योतनिका

अथेति । अथाऽनन्तरं सखी गोविन्दे कृष्णविषये कृष्णान्तिक[12]मागत्येत्यर्थः । तच्चरितं राधाचरितं प्राह उक्तवती । किं कृत्वा ? लतागृहे तां राधां गन्तुमशक्तां दृष्ट्वा । कीदृशीम् ? चिरमनुरक्तामनुरागिणीम् । कीदृशे गोविन्दे ? [13]मनसिजेन कामेन मन्दे विह्वले ॥१॥

जयन्ती

एवं माधवस्य सङ्केतस्थत्वं परिकल्प्याभिसारोपायं प्रदर्श्य वासकसज्जात्वं राधाया वक्तुमाह—अयेति । सखी गन्तुं सङ्केतस्थलं यातुं अशक्तां चिरं

---

1. त्रासां खिन्नां–इ. 2. ताम्–इ.फ.ग.ह.ज. 3. गमनाक्षमम्–इ.फ.ग.ह.ज. 4. नास्ति–ग.ज. 5. अनुरक्तामासक्तां–ग. 6. नास्ति–अ.ब. 7. अनङ्गेन गन्तुमशक्तां–इ.ग.ह.ज. 8 तः 11. पर्यन्तो भागो नास्ति–अ.ब. 9. मन्दगतौ–इ.फ.ग.ह.ज. 10. स्वैरालपरागिणोः–इ.फ.ग.ह.ज. 12. आगतेत्यर्थः–ड.ल.म. 13. मनसिजमन्दे कामविह्वले–क. मनसिजेन मन्दे विह्वले–ल.म.

गुणकरीरागे रूपकताले

पश्यति दिशि दिशि रहसि भवन्तम् ।
[1]तदधरमधुरमधूनि पिबन्तम् ।।
नाथ हरे सीदति राधाऽऽवासगृहे ।। ध्रुवपदम् ।।२।।

अनुरक्तां लतागृहे कुञ्जे दृष्ट्वा तस्याः राधायाः चरितं अवस्थां गोविन्दे मनसिजेन मन्दे अलसे सति प्राह । आर्यासंज्ञकमात्रागणच्छन्दः । (तल्लक्षणञ्च—)

लक्ष्मैतत्सप्तगणा गोपेता नेह भवति विषमे जः ।
षष्ठोऽयं नलघू वा प्रथमेऽर्धे नियतमार्यायाः ।।१।।

सञ्जीवनी

सख्युक्तं गीतेन प्रथयति—पश्यतीत्यादि । गुणकरीरागे रूपकताले । रागलक्षणम्—

रतोत्सुकां कान्तकृतप्रतीक्षामालापयन्तीं मृदुपुष्पतल्पाम् ।
इतस्ततः प्रेरितदृष्टिमात्रां गुणाकरीं तां [2]कवयो वदन्ति ।। [3]इति । [4]काललक्षणं पूर्ववत् । [5]ध्रुवस्यापि । [6]अत्र वासकसज्जेयं (नायिका) । तस्या लक्षणम्—

वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना ।
[7]पश्यति प्रियसमागमलज्जा तामिहाकलय वासकसज्जाम् ।। इति । हे नाथ ! हे हरे ! राधाऽऽवासगृहे निकुञ्जमन्दिरे त्वद्विरहात्सीदति [8]दुःखिता [9]भवति । [10]दुःखमेवाह—सा रहस्येकान्ते भवन्तं त्वामेव दिशि दिशि सर्वदिशासु पश्यति विलोकयति । कीदृशं त्वाम् ? तत्तस्या योऽधरस्तदेव मधुरं स्वादु मधु तानि मधून्यमृतानि पिबन्तं धन्योऽहमिति सादरेण पानं कुर्वन्तम् । एतेन अन्याधरमधुपानममधुरत्वादपानमेवेति भावः । 'त्वदधर' इति पाठे त्वच्छब्दोऽन्यवाचकः ।।२।।

---

1. सदधर—इ. त्वदधर—ड. 2. मनुयो—इ.फ.ग.हृ.ज. 3. नास्ति—इ.ग.हृ. 4. तालः पूर्ववत्—इ.ग.हृ. 5. नास्ति—अ.ब. 6. नास्ति—इ.फ.ग.हृ.ज. 7. वसति—इ.फ.ग.हृ.ज. 8–9. नास्ति—अ.ब. 10. दुःखमाह—ग.

पदद्योतनिका

[1]गुणकरीरागः । रागलक्षणन्तु—

रतोत्सुका कान्तपथप्रतीक्षा[2]मापालयन्ती मृदुपुष्पतल्पे ।

इतस्ततः प्रेरितदृष्टिरार्ता श्यामातनुर्गौणकरी [3]प्रदिष्टा ।। इति । अस्मिन् वासकसज्जा [4]वर्णनीया । [5](तल्लक्षणन्तु—)

[6]वासवेश्मनि सुकल्पिततल्पे या समागमविधिं विदधाना ।

पश्यति प्रियसमागमसज्जा तामिहाकलय वासकसज्जाम् ।। इति[7] । पश्यतीति । हे नाथ ! हे हरे ! आदरे द्विरुक्तिः । राधा तव वासगृहे वासस्थाने [8]त्वद्धेतोः सीदति अवसन्ना भवति । कथमित्यत आह—सा राधा रहसि एकान्ते स्थिता सती दिशि दिशि भवन्तं त्वां पश्यति अवलोकयति । कीदृशं त्वाम् ? [9]त्वदधरवत् अन्यस्या अपि नायिकाया अधरामृतवन्मधुराणि मधूनि [10]माध्वीकानि पिबन्तम् ।।२।।

जयन्ती

गुण्डक्रीरागेण यतिताली गीयते । गुण्डक्रीरागस्तु मालवगौडमेलनेन निष्पद्यते । मालवगौडमेलनलक्षणम्—

शुद्धास्सरिमपाश्शुद्धो धैवतः स्यात्ततः परम् ।
च्युतषड्जो निन्दकः ………………।।
एतैस्सप्तस्वरैर्युक्तः सम्मतो गानवेदिनः ।

सौराष्ट्रीगुर्जरीसेवा बहुफलकरी सिन्धुरामक्री छायागौडक तस्याः सपत्न्याः (?) पश्यतीति । सदधरः समीचीनाधर एव मधुरमधूनि अत्यास्वाद्यमधूनि आनन्देन चित्तस्य मोहकत्वेन मधुरमधूनि मिष्टमद्यानि पिवन्तम् । अत्र बहु पाठं पठन्ति । तदधरेति पाठे तस्याः अन्यस्याः गोप्या इति । स चासौ अधरः, तच्छब्दस्य पूर्वपरामर्शित्वेन सक्षतः तादृशाधर इति वा । 'त्वदधर' इति पाठे त्वत् इति निजार्थकम् । स्वाधरमधुरेति युक्तपाठः । माधवं भवन्तं रहसि एकान्ते दिशि दिशि पश्यति । दृक्सङ्ग उक्तः । ध्रुवाया व्याख्यानम्—नाथ ! स्वामिन् हरे ! नास्माकमेव नाथः अपि तु जगन्नाथः । सर्वलोकापदुद्धारकर्ता राधावासगृहे सीदति क्लिश्यति ।।२।।

---

1. गुणकरीरागः रूपकतालः तल्लक्षणन्तु—क. 2. आलापयन्ती—क. 3. प्रसिद्धा—क. 4. वर्ण्यते—क.ल.म. 5. तः 7. पर्यन्तं नास्ति—ड. 6. वासके—क. 8. त्वत्तः हेतोः—क. 9. अधरवत् नायिकाधरामृतवन्मधुराणि—क.ल.म. 10. नास्ति—क.

त्वदभिसरणरभसेन वलन्ती ।
पतति पदानि कियन्ति चलन्ती ॥३॥
विहितविशदबिसकिसलयवलया ।
जीवति परमिह तव रतिकलया ॥४॥

सञ्जीवनी

ननु सा कुतोऽत्र नायाति तत्राह—(त्वदिति ।) त्वदभिसरणरभसेन रासोत्साहवेगेन वलन्ती कियद्गन्तव्यमिति वारं वारं गच्छन्ती पतति मूर्च्छया। अनेन त्वयैव [1]तत्र गन्तव्यमिति भावः । कीदृशी ? [2]कियन्ति पदानि [3]चलन्ती तव [4]दर्शनार्थं नाधिकं गन्तुं पारयन्तीत्यर्थः ॥३॥

[5]तर्हि कथं जीवति तत्राह—(विहितेति ।) सा तवानुरागलेशेन [6]इह तव गुणानुकथनेन वा परं केवलं जीवति । जीवनहेतुरन्यो नास्तीत्यर्थः । कीदृशी ? विहिताः कृताः विशदाः शुभ्राः बिसकिसलय(स्य) मृणालसूत्रस्य वलयाः कङ्कणानि [7]यया । "[8]वलयं कङ्कणेऽपि च" इति विश्वः (९५.६५) । "पल्लवोऽस्त्री किसलयम्" इत्यमरः (२.४.१४) । "मृणालं बिसम्" इत्यपि (अमरः १.१०.४२) । "कला लेशकलासु च" इति त्रिलोचनः[9] ॥४॥

पदद्योतनिका

त्वदभिसरणेति । [10]सा राधा कियन्ति द्वित्राणि पदानि चलन्ती पतति; अधिकं गन्तुं न पारयतीत्यर्थः । कीदृशी ? त्वदभिसरणरभसेन तवाभिसरणोत्साहेन वलन्ती सज्जमाना ॥३॥

विहितेति । हे कृष्ण सा राधा तव रतिकलया [11]तव सुरतलेशचिन्तनेन इह समये परं केवलं जीवति । जीवनहेतुरन्यो नास्तीत्यर्थः । कीदृशी ? विहिताः

1. नास्ति–अ.ब. 2. नास्तीदं वाक्यम्–ज. 3. वलन्ति–अ.ब. 4. दर्शनार्थे–इ.फ.ग.ह. 5. तः 6. पर्यन्तं नास्ति–ज. 7. ययेत्यर्थः–अ.ब. 8. तः 9. पर्यन्तं नास्ति–अ.ब. 10. सा राधा त्वत् त्वदीयाभिसरणतः रतिसुखं प्राप्तुं रभसेन प्रीत्या चलन्ती गच्छन्ती । कीदृशी ? कामार्ता नान्तःकरणेन देहविस्मृत्या पदानि चलन्ती गन्तुं अशक्ता भवतीत्यर्थः । सा राधा कियन्ति द्वित्राणि चलन्ती गच्छन्ती पतति पथि अधिकं गन्तुं न पारयतीत्यर्थः । कीदृशी ? त्वदभिसरणोत्साहेन वलन्ती सज्जमाना–क. 11. नास्ति–ड.

मुहुरवलोकितमण्डनलीला ।
मधुरिपुरहमिति भावनशीला ।।५।।

कृता विशदाः शुभ्रा बिसकिसलया एव [1]मृणालाङ्कुरा एव [2](व)लयानि कङ्कणानि यस्याः सा ।।४।।

जयन्ती

किमर्थं नागतेत्यत आह—त्वदभिसरणं त्वां प्रति अभिसरणं अनुगमनं तस्मात् रभसो वेगः तेन वलन्ती सती निर्यान्ती कियन्ति कानिचित् अन्यानि पदानि पादप्रक्षेपान् चलन्ती व्रजन्ती पतति । पतिताऽभूदित्यर्थः ।।३।।

विहितेति । अत एव विहितानि विशदानां बिसानां कमलतन्तूनां किसलयानां पल्लवानाञ्च वलयानि कङ्कणानि यया सा । परं तव रतिः प्रीतिः तस्याः कलया लेशेन सुरतचातुर्याभिलाषेण वा परं जीवति । शरीरे बलं नास्ति; वासनावशात श्वसितीति भावः ।।४।।

सञ्जीवनी

(मुहुरिति ।) [3]किञ्च मुहुर्वारं वारं वीक्षितो वर्हावतंसकुण्डलकङ्कणादीनां मण्डनस्य अलङ्कारस्य लीला विलासो यया । तामेवाह—मधुरिपुरहमिति भावने ध्याने शीलं स्वभावो यस्याः । भ्रान्तिनामायमलङ्कारः ।।५।।

पदद्योतनिका

मुहुरिति । [4]सा कीदृशी ? [5]पूर्वोक्तेनान्वयः । मुहुः पुनः अवलोकिता [6]ईक्षिता मण्डनलीला अलङ्कारविलासो यया [7]सा; तेन विना निरर्थकं मण्डनमिति । पुनः कीदृशी ? अहं मधुरिपु(रि)ति कृष्ण इति भावनं ध्यानमेव शीलं स्वभावः सद्वृत्तं यस्याः [8]सा ।।५।।

जयन्ती

महुरिति । मुहुः वारं वारं अवलोकिता मण्डनायाः मकरिकादिकस्य वेणीरचनादेः भूषणादेश्च लीला चातुर्यविशेषा । अहं राधिका मधुरिपुः कृष्णः इति भावनशीला चिन्तनस्वभावा । तव ध्यानादेव त्वत्स्वरूपाऽभूदिति । मम तस्य च भेद एव नास्ति । औपचारिकोपचारादिकं किमर्थमिति वा । मयागतं चेत् किमपि नास्ति, तेन मन्निकटे आगतं चेत् किमपि नास्तीति तत्रैवावस्थितेति भावः ।।५।।

1. तः 2. पर्यन्तं नास्ति—क. 3. नास्ति—इ.फ.ग.ह.ज. 4. नास्ति—क. 5. पूर्वश्लोकेनान्वयः—क.ल.म. 6. वीक्षिता—क.ल.म. 7. नास्ति—ड.ल.म. 8. नास्ति—ड.

त्वरितमुपैति न कथमभिसारम् ।
हरिरिति वदति सखीमनुवारम् ॥६॥
श्लिष्यति चुम्बति जलधरकल्पम् ।
हरिरुपगत इति तिमिरमनल्पम् ॥७॥

सञ्जीवनी

(त्वरितमिति ।) एवं त्वत्सङ्गं विना न तस्या [1]विरहोपहानिरित्याह । हरिः कामतापहरोऽपि त्वरितं शीघ्रं [2]अभिसारं सुरतस्थानं कथं नोपति[3] स्वयमेव कुतो नागच्छति [4]इति [5]सखीं [6]प्रति अनुवारं [7]वारं(वारं)वदति ॥६॥

(श्लिष्यतीति ।) अनुलक्षीकृत्य भ्रमेण स्वयमेवाह । हरिः उपगतः प्राप्तः इति अनल्पं गाढं तिमिरमन्धकारं मेघतुल्यं श्लिष्यति आलिङ्गति चुम्बति च । स्निग्धनीलत्वाच्च श्रीकृष्ण[8]साम्यमित्यर्थः । "[9]कल्पं समूहे सदृशे शक्ते श्रेष्ठेऽपि" (इति) मेदिनीकारः[10] (१०२.२) ॥७॥

पदद्योतनिका

त्वरितमिति । सा सखीं [11]इति अनुवारं पुनः पुनर्वदति । इतीति किम् ? हरिः कृष्णः त्वरितं शीघ्रं [12]अभिसारं [13]अभिसरणस्थानं कथं नोपैति नागच्छति ॥६॥

श्लिष्यतीति । सा राधा हरिः कृष्ण उपगतः प्राप्त इति अनल्पं बहु तिमिरं अन्धकारं श्लिष्यति [14]चुम्वति च । कीदृशं तिमिरम् ? जलधरकल्पं [15]मेघसदृशं; स्निग्धत्वान्नीलत्वाच्च कृष्णसाम्यं तिमिरस्य ॥७॥

जयन्ती

त्वरितमिति । हरिः अभिसरत्यस्मिन्निति अभिसारः सङ्केतीभूतकुञ्जः तं कथं किमर्थं त्वरितं नोपैति इति सखीं अनुवारं वदति गमनविलम्वहेतुं पृच्छति इति प्रलापः ॥६॥

---

1. विरहतापशान्तिरित्याह–इ.फ.ग.ह.ज. 2. तः 3. पर्यन्तं नास्ति–अ.ब. 4, 5, 6. न सन्ति–अ. 7. नास्ति–इ.फ.ग.ह.ज. 8. साम्यमिति–इ.फ.ग.ह.ज. 9. तः 10. पर्यन्तं नास्ति–अ.ब. 'कल्पः शास्त्रे विधौ न्यासे संवर्ते ब्रह्मणो दिने'–मे.को. 11. नास्ति–क. 12. नास्ति–क. 13. अभिसारस्थानं–क. 14. चुम्वतीत्यर्थः–क. 15. मेघसदृशमित्यर्थः–क.

भवति विलम्बिनि विगलितलज्जा ।
विलपति रोदिति वासकसज्जा ॥८॥
श्रीजयदेवकवेरिदमुदितम् ।
रसिकजनं तनुतामतिमुदितम् ॥९॥

श्लिष्यतीति । जलधरस्य मेघस्य कल्पं सदृशं अनल्पं गाढं तिमिरं अन्धकारं श्लिष्यति चुम्बति । किमिति ? हरिः कृष्णः उपगत इति । कृष्णस्य नीलत्वसाम्यादन्धकारे तद्भ्रान्तिवर्णनात् भ्रान्तिमदलङ्कारः ॥७॥

सञ्जीवनी

(भवतीति ।) [1]भवति त्वयि विलम्बिनि विलम्बं कुर्वति सति गत-लज्जा [2]सा विलपति [3]विलापं करोति । [4]रोदिति रोदनं [5]करोति । कीदृशी ? वासकसज्जा सुरतकृत[6]सन्धाना ॥८॥

पदद्योतनिका

भवतीति । [7]भवति त्वयि विलम्बिनि विलम्बनं कुर्वति सति विगलित-लज्जा सा राधा विलपति विलापं करोति रोदिति । कीदृशी [8]राधा ? वासकसज्जा[9] विहितसन्धानेत्यर्थः । [10]लक्षणं तूक्तमेव[11] ॥८॥

जयन्ती

भवतीति । भवति त्वयि विलम्बिनि त्वरितमनागच्छति सति विगलिता लज्जा ह्रीः यस्याः सा वासकं निवासस्थानं सज्जं स्रक्चन्दनताम्बूलाङ्ग-रागादिभिः सन्नद्धं यस्याः सा सती विलपति रोदिति च । वासकसज्जेति नायिकाभिधानञ्च । तल्लक्षणम्—

"प्रियागमनवेलायां मण्डयन्ती मुहुर्मुहुः ।
केलीगृहमथात्मानं सा स्याद्वासकसज्जिका ॥
(प्रतापरुद्रीये–नायक प्र···श्लो–४४)

कैश्चित् द्वारनियतत्वमुक्तम्; तदपेक्षया वेलाग्रहणमेव सम्यक् ॥८॥

---

1. किं वा भवति–इ. किञ्च भवति–फ.ग.ह.ज. 2. साऽपि–ग. 3. रोदिति–इ.फ.ग.ह.ज. 4. तः 5. पर्यन्तं नास्ति–इ. 6. सन्धानेत्यर्थः–अ.ब. 7. तः 9. पर्यन्तं नास्ति–म. 8. नास्ति–क.ख. 10. तः 11. पर्यन्तं नास्ति–ड.

त्रयोदशः प्रबन्धः

विपुलपुलकपालिः स्फीतसीत्कारमन्त-
र्जनितजडिम काकुव्याकुलं व्याहरन्ती ।
तव कितव [1]विधत्तेऽमन्दकन्दर्पचिन्तां
रसजलनिधिमग्ना ध्यानलग्ना मृगाक्षी ॥१॥

सञ्जीवनी

[1]गीतार्थसङ्ग्रहमाह—[2]श्रीजयदेवेति । श्रीजयदेवकवे[3]रुदितं भणितं इदं गीतं रसिकजनं श्रीराधाकृष्णशृङ्गार[4]रसास्वादमुदितान्तःकरणं [5]अतिशयेन मुदितमानन्दितं तनुतां विस्तारयतु ॥९॥

[6]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां द्वादशः प्रबन्धः ।

गीतार्थं सङ्ग्रहेणाह—विपुलेति । हे कितव धूर्त वञ्चकेति वा । सा मृगाक्षी [2]मृगनयना ध्यानेनाशक्ता सती [3]तवामन्दकन्दर्पचिन्तां [4]करोति; कामस्मरणं विधाय कृत्वा रसजलनिधौ शृङ्गाररससागरे मग्ना बभूवेति शेषः । रस[5]सागरे निमग्नायाः चेष्टितमाह । विपुलानां बहूनां [6]पुलकानां रोमाञ्चानां पालिः पङ्क्तिर्यस्याम् । पुनः कीदृशी ? स्फीतः समृद्धः सीत्कारो यत्र[7]तथा । अन्तश्चित्ते जनितं उत्पादितं जडिम जाड्यमनङ्गविकाशं यथा; काकुव्याकुलं ध्वनिविकारविशेषेण आकुलं यथा तथा व्याहरन्ती; भावनया तव करं नीव्युन्मोचनसक्तं विचार्य निषेधवाक्यं वदन्तीत्यर्थः । भ्रमोत्प्रेक्षैवा[8]लङ्कारः ॥१॥

---

1. 'विधायामन्दकन्दर्पचिन्तां' इति मुद्रित पाठः (नि.सा)—ड. 'विधत्तेऽमन्दकन्दर्पचिन्ताज्वरजलनिधिमग्ना'—इ. 2. गीतसङ्ग्रहमाह—इ फ.ग.ह ज. 3. नास्ति—अ.ब.इ.ग.ह.ज. 4. उदितं गीतं—ग. उदितं भणितं गीतं—फ.ज. 5. रसान्तःकरणं—इ.फ.ग.ह.ज. 6. अतिशयेनानन्दितं—इ.फ.ग.ह.ज. 7. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज. 8. मृगनयनी—अ.ब.इ.फ.ग.ह.ज. 9. तदा—अ.ब. 10. कोटिकामस्मरणं करोति—इ.फ.ग.ह.ज. 11. सागर—इ.ग.ह. 12. नास्ति—अ.ब. 13. तं—अ.ब.इ.फ ह.ज. 14. अलङ्कृती—इ.फ.ग.ह.ज.

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवकवेरुदितं भाषितं [1]इदं गीतं रसिकजनं भक्तजनं [2]अतिमुदितं हर्षयुक्तं तनुतां करोत्वित्यर्थः ॥९॥

[3]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां द्वादशः प्रबन्धः ।

विपुलेति । हे कितव धूर्त वञ्चक ! सा मृगाक्षी [4]हरिणनयना तव रसजलनिधिमग्ना [5]शृङ्गारसागरे निमग्ना [6]लीना बभूवेत्यध्याहारः । किं कृत्वा ? अमन्दं कन्दर्पचिन्तां [7]महती कामस्य चिन्तां चिन्तनं स्मरणं विधाय कृत्वा । कीदृशी ? ध्याने तवैव चिन्तने लग्ना तत्परा । पुनः कीदृशी ? विपुला महती [8]पुलकपालिः [9]रोमाञ्चपङ्क्तिः यस्यास्सा, ध्यानकल्पितस्य तव [10]करस्य स्पर्शेन रोमाञ्चतीत्यर्थः । पुनः [11]कीदृशी ? त्वद्दत्तं दन्तक्षतादिकं परिकल्प्य स्फीतसीत्कारं [12]प्रवृद्धसीत्कारं [13]यथा स्यात्तथाऽन्तः अभ्यन्तरे जनित उत्पादितो जडिमा जडत्वं यस्यां क्रियायां तद्यथा भवति तथा काकुना ध्वनिविकारविशेषव्याकुलं यथा स्यात्तथा व्याहरन्ती । ध्यानेन तव करं [14]नीविबन्धनोन्मोचनासक्तं परिकल्प्य निषेधवाक्यं वदतीत्यर्थः ॥१॥

जयन्ती

श्रीजयदेवेति । श्रीजयदेवकवेः उदितं इदं वाक्यं रसिकाः काव्यरसज्ञाः सहृदयसंज्ञाः तेषां जने समुदाये अतिमुदितं अतिसन्तोषं तनुतां करोतु[15] ॥९॥ इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां द्वादशः प्रबन्धः ।

विपुलेति । हे कितव धूर्त ! मन्द परवेदनानभिज्ञत्वात् मूढ ! तव तुभ्यं विरहे इति रोषो वा । विपुलाः पुलकाः रोमाञ्चाः यस्याः सा पालिः कपोलप्रदेशः यस्याः सा । अन्तः मनसि जनित उत्पन्नो जडिमा जाड्यं काकुः ध्वनि-

---

1. नास्ति–ड.ल.म. 2. अतिशयेन मुदितं–क.ल.म. 3. नास्तीयं पुष्पिका–ड.क.ल.म. 4. नास्ति–ड. 5. शृङ्गाररसे–क. 6. नास्ति–ड. 7. महतः कामस्मरणं–ड. 8. पुलकपङ्क्तिः–ड.क.ल.म. 9. रोमपङ्क्तिः–ड.क.ल.म. 10. करस्पर्शेन–क.ल.म. 11. नास्ति–ड. 12. नास्ति–ड. 13. तः 14. पर्यन्तं नास्ति–ल.म. 15. एतदनन्तरं "गीतगोविन्दे द्वादशाष्टपदी सम्पूर्णा" इति दृश्यते–इ.

अङ्गेष्वाभरणं करोति बहुशः पत्रेऽपि सञ्चारिणि
प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति ।
इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-
व्यासक्ताऽपि विना त्वया वरतनुर्नैषा निशां नेष्यति ॥२॥

विकारः तया व्याकुलं यथा स्यात्तथा व्याहरन्ती, कन्दर्पचिन्ताज्वरः स एव जलधिः तस्मिन्निमग्ना, तव ध्याने लग्ना मृगाक्षी राधा, स्फीतः स्पष्टः उच्चैः सीत्कारो रतिकलासुखं विषयसुखं येन तं ध्वनिं विधत्ते । व्यामोहात्सम्भोगासक्तेव करोतीति भावः । अत्र ज्वरस्य समुद्रत्वेन निरूपणाद्रूपकालङ्कारः । मृगाक्षीत्यत्र लुप्तोपमा । अनयोस्संसृष्टिः । 'चिन्त स्मरे' ति पाठे स्फीतसीत्कारपदस्यापि क्रियाविशेषणत्वम् । चिन्ता विद्यत इत्यन्वयः । स्मर एव जलधिः । शेषं पूर्ववत् । अत एव सम्भोगासक्तानुकरणं युक्तं, तस्य चिन्तानुभवत्वादिति युक्तः पाठः ॥१॥

सञ्जीवनी

ध्यान[1]लग्नतामेव दर्शयति–[2]अङ्गेष्वित्यादिना । हे हरे! एषा वरतनुः सुन्दराङ्गी; [3]अवरतनुः [4]अस्वस्थाङ्गी वेति च्छेदः । त्वया विना निशां रात्रि [5]न नेष्यति गमयिष्यति । किञ्च सा अङ्गेषु करचरणादिष्वाभरणं अलङ्कारं बहुशो वारं वारं करोति । पत्रेऽपि सञ्चारिणि [6]चलिते सति त्वां प्राप्तमागतं परिशङ्कते वितर्कयति । त्वामागतं ज्ञात्वा शय्यां शयनीयं वितनुते रचयति । [7]श्रीकृष्णसङ्गमे मयेदमिदं कर्तव्यमिति ध्यायति[8] चिन्तयति । [9]अनेन प्रकारेण (आ)कल्पो भूषणं विकल्पस्तर्कः [10]तल्परचना शय्यारचना सङ्कल्पलीलाशतं बहुविलासशतं एतेषु व्यासक्ताऽपि [11]आसक्ताऽपि । "[12]तल्पं तु शयनीये स्यात्तल्पमट्टकलत्रयोः" इति विश्वः (७५.८) । "आकल्पवेषौ नेपथ्यं" इत्यमरः

---

1. लग्नामेव–फ.ज. 2. अङ्गेत्यादि–अ.ब.इ.फ.ग.हृ.ज. 3. नास्ति –अ.ब.इ.ग.हृ. 4. अस्वस्थाङ्गीति–ग. 5. न नेष्यति न गमयिष्यति–ग. 6. वलिते–इ. 7. श्रीनन्दसुनुसङ्गमे–ग. 8. नास्ति–अ.ब. 9. इत्यनेन– इ.फ.ग.हृ.ज. 10. नास्ति–अ.ब.इ.ग.हृ. 11. नास्ति–अ. प्रसक्तापि–इ.फ ग.हृ.ज. 12. तल्पं च शयनेऽपि स्यात्–इ.फ.ग.हृ.ज.

(२.६.९९)। "[1]तर्को विकल्पः शङ्का च" इति; "सङ्कल्पः कर्म मानसम्" इत्यपि[2] ॥२॥

पदद्योतनिका

[3]अङ्गेष्विति। एषा वरतनुः सुन्दराङ्गी। एषेति बुद्धया प्रत्यक्षीकृत्य वदति। राधा [4]अङ्गेषु हस्तादिष्वाभरणं [5]अलङ्कारं बहुशः करोति। एतेनाकल्प उक्तः। [6]पत्रेऽपि पर्णेऽपि सञ्चारिणि चलिते सति त्वां प्राप्तमागतं परिशङ्कते. [7]तर्कयति। एतेन विकल्प उक्तः। त्वामागतं ज्ञात्वा शय्यां [8]शयनीयं वितनुते। एतेन तल्परचनोक्ता। चिरं ध्यायति [9]चिन्तयति; कृष्णसङ्गमे मया इदमित्थं कर्तव्यमिति। अनेन सङ्कल्पलीलाशत[10]मुक्तम्। इति पूर्वोक्तप्रकारेण आकल्पो भूषणं विकल्पस्तर्कः तल्परचना शय्यारचना [11]सङ्कल्पलीलाशतं [12]रतबहुचिन्तनविलास[13]शतं एतेषु व्यासक्ताऽपि त्वया विना निशां रात्रिं न नेष्यति न गमयिष्यति ॥२॥

जयन्ती

वासकसज्जावस्थां वर्णयति—अङ्गेष्विति। एषा राधा अङ्गेषु कर्णादिषु आभरणं बहुशः बहूनि करोति स्थापयतीत्यर्थः। पत्रेऽपि पक्षिणि दलेऽपि सञ्चारिणि चलति सति त्वां प्राप्तं परिशङ्कते; त्वमागतोऽसि किमिति शङ्कते ऊहां करोति। शय्यां वितनुते विस्तारयति। चिरं ध्यायति। इति पूर्वार्धोक्तप्रकारेण आकल्पानां भूषणानां [14]विकल्पो विशेषकल्पना च, तल्पस्य शय्यायाः रचना च, सङ्कल्पलीलाः मानसाः रहःक्रीडाविशेषास्तेषां शतं च तेषु व्यासक्ता व्यापृताऽपि त्वया विना निशां न नेष्यति। त्वां विना रात्रेर्दीर्घत्वात्सन्तापयतीत्यर्थः। अत्र त्वां विनेति विनाशब्दप्रयोगान्न विनोक्तिरलङ्कारः। रम्यतारम्यतयोरभावात् चारुताया अप्रतिभानात्। यद्यपि व्यासक्ताया निशागमनं युक्तं तथापि…॥२॥

---

1. तः 2. पर्यन्तं नास्ति–अ.ब. 3. नास्ति–ड. 4. अङ्गेष्वाभरणं बहुशः करोति–ड. 5. नास्ति–ल. 6. पत्रे पर्णे–क. 7, 8, 9. नास्ति–ड. 10. उक्तमिति पूर्वोक्तप्रकारेण–ड. 11. नास्ति–ड. 12. बहुचिन्तन–क. 13. शतेषु व्यासक्ताऽपि–ड. 14. विकल्पाः–इ.

किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्यासि न दृष्टिगोचरमितः सानन्दनन्दास्पदम् ।
राधाया वचनं तदध्वगमुखा[1]न्नन्दन्ति केचिन्मुहु-
र्गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः ॥३॥

इति श्रीगीतगोविन्दमहाकाव्ये वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठः सर्गः ॥

सञ्जीवनी

सर्गान्ते कविराशिषमाशास्ते—किमिति । गोविन्दस्य [2]गिरो वाण्यो जयन्ति । कीदृशाः ? [3]सायमतिथिप्राशस्त्यं [4]सायङ्कालागतातिथिस्वागतादिस्तुति[5]वचन गर्भेषु यासां ताः । केचिन्नन्दग्रामस्थाया राधाया वचनं अध्वगमुखाच्छ्रुत्वा नन्दन्ति हर्षातिशयं प्राप्नुवन्ति । मुहुर्वारं वारम्[6] । वचनमेवाह—हे भ्रातः ! पथिक ! भाण्डीरभूमीरुहि भाण्डीरवटे किं विश्राम्यसि ? [7]विश्रामं मा कृथाः[8] । विश्रामाभावे हेतुमाह—कृष्णस्य [9]भोगिभवने सम्भोगमन्दिरे । किञ्च आनन्दसहितं [10]नन्दगृहं [11]किमिति न यासि ? [12]तच्च दृष्टिगोचरं सन्निहितमेव । शून्यगृहत्यागेन महद्गृहातिथ्येन च कृतार्थो भविष्यसीति भावः । व्याजोक्तिरलङ्कारः ॥३॥

यावन्न साक्षात्तु तवाङ्गसङ्ग-
स्तावद्वृथैवाथ परिश्रमोऽस्याः ।
ध्यानेन किं हन्त मुहुस्सरस्या-
[13]स्तृष्णोपशान्तिर्ननु पानसाध्या ॥इति॥

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[14]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां [15]वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठ सर्गः ॥

1. नन्दान्तिके शृण्वतो—इ. 2. नास्ति—अ.व. 3. नास्ति—अ.व.इ.ग.ह. 4. सन्ध्याकालीना—इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तं नास्ति—ग. 7. तः 8. पर्यन्तं नास्ति—अ.व. 9. भोगिनः भवने—इ.फ.ह.ज. 10. नन्दास्पदं नन्दगृहं—फ.ज. 11. किमितो—ग. किमिति इतो—इ.फ.ह.ज. 12. तव दृष्टिगोचरमभिहि(त)-मेव—इ. 13. तृष्णोपशाम्यत्यनुपानसाध्येति—इ.फ.ग.ह.ज. 14. शिवदासपण्डितात्मज—ह. 15. नास्ति—ग.

पदद्योतनिका

[1]सर्गान्ते मङ्गलमाह—[2]किं विश्राम्यसीति। कञ्चित् पथिकं प्रति [3]राधाया वचनम्। हे पथिक ! [4]भाण्डीरभूमीरुहि भाण्डीरनामवटवृक्षसमीपे किं विश्राम्यसि[5] किमित्यास्थीयते[6]? विश्रामाभावे हेतुगर्भविशेषणमाह। कीदृशे वृक्षे? [7]कृष्णभोगिभवने श्यामसर्पस्थाने। ततः श्रीकृष्णस्य [8]हरेर्भोगवतः स्थानमिति राधावचनाभिप्रायः। सायंकालीनातिथिनिवारणजनितदोषभिया तं प्रत्याह—हे भ्रातः वन्धो ! [9]सानन्दनन्दास्पदं कथं न यासि [10]गच्छसि। कीदृशम्? इतः स्थानात् दृष्टिगोचरं चक्षुर्विषयं; तस्यानन्दजननान्न दोष इत्यभिप्रायः। ततः केचिन्नन्दग्रामस्थाः अध्वगमुखात् राधायास्तद्वचनं श्रुत्वा नन्दन्ति हर्षं प्राप्नुवन्ति। मुहुः पुनः [11]गोविन्दस्य कृष्णस्य गिरो वाण्यः जयन्ति सर्वोत्कर्षेण वर्तन्ते। उत्कर्षे हेतुगर्भविशेषणमाह। कीदृश्यो गिरः? सायङ्कालीनस्यातिथेः सुस्निग्धगर्भाः सुस्निग्धत्वमतिथ्यादरो[12]गर्भ आशयो यास्वत एव ग्रामस्थाः गोविन्दस्य गिरो वाणीः श्रुत्वा जयन्ति आनन्दपूर्णा भवन्ति। विशेषणं तथैव। [13]किं विश्राम्यसीति क्षेपकः[14] ॥३॥

[15]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां धन्यवैकुण्ठो नाम षष्ठः सर्गः ॥

जयन्ती

किमिति। हे कृष्ण ! भोगिनां सर्पाणां भवने निलये भाण्डीरसंरक्षकः भूरुहः वृक्षः तस्मिन् किं किमर्थं विश्राम्यसि; सर्पनिवासस्थले न स्थेयमित्यर्थः। हे भ्रातः इति लोकानां पुरः प्रच्छादनार्थं सम्बुद्धिः। इतः अस्मात् प्रदेशात् दृष्टिगोचरं दृश्यमानं समीपवर्तीत्यर्थः। आनन्देन सहितः नन्दः तस्य आस्पदं निवासस्थानं न [16]यासि न गच्छसि। काकुः। न गच्छेत्यर्थः। इति राधाया वचनं तदध्वगाः तन्मार्गगाः पान्थाः तेषां मुखात् नन्दान्तिके नन्दसमीपे शृण्वतः गोविन्दस्य अतिथिवन्त्यः प्रशस्तस्य भावः प्राशस्त्यं गर्भे मध्ये यासां ताः गिरः सायं जयन्ति ॥३॥

[17]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां वासकसज्जावर्णने धन्यवैकुण्ठो नाम षष्ठः सर्गः ॥

---

1. सर्गान्तिमङ्गलमाह—ल.म. 2. नास्ति—ड. 3. राधाह—ड. 4. नास्ति—ड. 5. तः 6. पर्यन्तं नास्ति—ड. 7. नास्ति—ड. 8. नास्ति—ड. 9. सानन्दास्पदं—क. सानन्दनन्दस्य—ल.म. 10. न गच्छसि—क. 11. नास्ति—ड. 12. गर्भ आशये यासां ताः अथवाऽत एव—ल.म. 13. तः 14. पर्यन्तं नास्ति—क.ल.म. 15. नास्तीयं पुष्पिका—ड.क.ल.म. 16. यास्यसि—इ. 17. इति गीतगोविन्दे वासकसज्जावर्णनरूपो धन्य वैकुण्ठो नाम षष्ठः सर्गः—इ.

सप्तमः सर्गः

नागरनारायणः

हारावलीतरलकाञ्चनकाञ्चिदामा
केयूरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ सखीमियमित्युवाच ॥१॥

अत्रान्तरे च कुलटाकुलवर्त्मपात-
सञ्जातपातक इव स्फुटलाञ्छनश्रीः ।
बृन्दावनान्तरमदीपयदंशुजालै-
र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ॥१॥

सञ्जीवनी

अभिसारिकाभिसरणप्रत्यूहमलिनद्युतिः ।
[1]ज्योत्स्नाभयाभिसारं वै कलयन्निन्दुरुद्गतः ॥

एवमुभयोरनुरागं निरूप्य रसान्तरं प्रकटयन् [2]चन्द्रदर्शनेन राधाविरहमाह—अत्रान्तर इत्यादिना । अत्रान्तरे [3]कृष्णविरहकाले इन्दुश्चन्द्रोऽंशुजालैः किरणसमूहैः बृन्दावनान्तरं मध्यमदीपयत् प्रकाशितवान्; [4]कामदीप्तं चकारेति वा । कीदृशः ? दिश एव सुन्दर्यो नायिकोत्तमास्तद्वदने [5]चन्दनबिन्दुस्तिलकः । [6]अथवा दिक्सुन्दरी श्रीराधा तद्वदने चन्दनबिन्दुः । कीदृशः ? स्फुटा व्यक्ता लाञ्छनस्य कलङ्कस्य श्रीः शोभा यत्र । कीदृश इव ? कुलटाकुलस्य अभिसारिकासमूहस्य वर्त्मपातेन सङ्केतमार्गप्रतिरोधेन सञ्जातमुत्पन्नं पातकं यस्य तादृश इव । "इन्दुः कुमुदबान्धवः" इत्यमरः (१.३.१३) । "चिह्नं लक्ष्म च लाञ्छनम्" [7]इत्यमरः (१.३.१७) । "किरणोऽस्रमयूखांशु..." इत्यमरः (१.४.३३) ॥१॥

---

1. ज्योत्स्नाभिसारं कलयन्निन्दुरुद्गतस्सप्तमे–इ.फ.ग.ह.ज. 2. चन्द्रदर्शनराधाविरहमाह–इ.फ.ग.ह.ज. 3. अस्मिन् कृष्णविलम्बे–इ.फ.ग.ह.ज. 4. कामदीप्ति–इ.फ.ग.ह.ज. 5. चन्दनस्य बिन्दुः–इ.फ.ग.ह.ज. 6. यद्वा–ग. 7. इत्यपि–इ.फ.ग.

पदद्योतनिका

अधुना चन्द्रोदयेन [1]राधाया विरहव्यथाधिक्यं वर्णयन्नाह—अत्रान्तर इति। अत्रान्तरे अस्मिन्नवसरे इन्दुश्चन्द्रोंऽशुजालैः किरणसमूहैः [2]वृन्दावनान्तरं वृन्दावनस्य मध्यप्रदेशं अदीपयत् प्रकाशितवान्। कीदृशः इन्दुः? स्फुटा व्यक्ता लाञ्छनश्रीः कलङ्कशोभा यस्य [3]सः। कथम्भूत [4]इव? कुलटानामभिसारिकाणां कुलस्य समूहस्य [5]वर्त्मपातेन मार्गप्रतिरोधेन सञ्जातपातक इवोत्पन्नपाप इव। पातकिनः कलङ्को व्यक्तो भवति। पुनः कीदृशः? दिश एव सुन्दर्यः नायिकास्तासां [6]वदनस्य मुखस्य चन्दनबिन्दुः श्रीखण्डतिलक इव; स्त्रीतिलको वर्तुलो भवतीति। असतीनां चन्द्रोदये गमनाभावा[7]द्वर्त्मपातः[8]। अत्र विप्रलब्धा नायिका वर्ण्यते। तल्लक्षणं [9]भरते—

"प्रविलसदनुरागा दूतिकां प्रेष्य पूर्वं
[10]सरभसमपिधाय क्वापि सङ्केतभूमौ।
न मिलति खलु यस्या वल्लभो दैवयोगा–
त्प्रवदति भरतस्तां नायिकां विप्रलब्धाम् ॥१॥

जयन्ती

हारावलीति। हारावलीषु तरलाः मध्यमणयः काञ्चनकाञ्चिदामा केयूरौ च कङ्कणानि च तेषु मणयः तेषां द्युतिभिः कान्तिभिः दीपितस्य उज्ज्वलीकृतस्य (नि)कुञ्जनिलयस्य द्वारे व्रीडावतीं ह्रीणां समागतामिति शेषः। सखीं इति वक्ष्यमाणप्रकारेण उवाच। किं कृत्वा? व्रीडावतीमित्यवेक्ष्य हरिं अन्यासक्तं निरीक्ष्य विनैवागतामित्यर्थः ॥१॥

अत्रान्तर इति। हरिं विना सख्यागमनसमये कुलटानां स्वैरिणीनां कुलस्य समुदायस्य वर्त्मघातेन मार्गरोधेन सञ्जातं पातकं यस्य स इव स्फुटला-

---

1. नास्ति–ड. 2. वृन्दावनस्यान्तरं मध्यप्रदेशम्–ड. वृन्दावनान्तरं वृन्दावनमध्यप्रदेशम्–क. 3. नास्ति–ड.ल.म. 4. नास्ति–क. 5. वर्त्मघातेन–क. 6. वदनचन्दनबिन्दुः मुखे श्रीखण्डतिलक इव–क. 7. वर्त्मघातोऽपि भवति–क. 8. एतस्मादनन्तरं "मार्गस्था गमनं कर्तुं न शक्नुवन्ति; जनस्य विदितं भवति अमुकाऽमुकेण सह व्यभिचारं कर्तुं गच्छतीति भावः" इत्यधिकता दृश्यते–क. पुस्तके 9. यस्या दूतीं प्रियः प्रेष्य दत्त्वा सङ्केतमेव वा। नागतः कारणेनेह विप्रलब्धा तु सा भवेत् (ना. शा. २८.२१८)। 10. सरभसमपि या सा प्राप्य सङ्केतभूमौ–क. सरभसमपि चारु क्वापि सङ्केतभूमौ–ल.म.

प्रसरति हिमकरबिम्बे विहितविलम्बे च माधवे विधुरा ।
विरचित[1]विविधविलापं सा परितापं चकारोच्चैः ॥२॥

ञ्छनस्य व्यक्तकलङ्कस्य श्रीरिव (श्रीः) शोभा यस्य सः । दिक् प्राच्येव सुन्दरी रमणी तस्याः वदने चन्दनविन्दुः श्रीगन्धतिलकः इन्दुः चन्द्रः । अंशव एव किरणा एव दीपाः तैः वृन्दावनान्तरं अदीपयत् प्रकाशयामास । चन्द्रोदये गन्तुमशक्यत्वेन विरहोऽधिकोऽभूदित्यर्थः । अत्र स्वतस्सिद्धलाञ्छनाहेतोः कुलटामार्गरोधस्य हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा । दिगङ्गनातिलकत्वरूपकेण संसृष्टिः ॥१॥

सञ्जीवनी

एवं विप्रलम्भरसमुक्त्वा विप्रलम्भहेतुं प्रपञ्चयति–प्रसरतीत्यादिना । सा राधा उच्चैरत्यर्थं परितापं [2]श्रीकृष्णानागमनविषयं दुःखं चकार । कीदृशम् ? विरचितः कृतः विविधो नानाप्रकारो धूर्त शठ [3]वञ्चकोऽसीत्यादि गुणकीर्तनरूपो वा विलापो यत्र । कीदृशी ? नायातो धूर्त इति विधुरा [4]विकला । कस्मिन् सति ? शशधरबिम्बे चन्द्रमण्डले प्रसरति उद्गच्छति सति; माधवे राधाधरप्रिये वसन्तप्रिये वा विहितविलम्बे [5]कृतविलम्बे च सति ॥२॥

पदद्योतनिका

प्रसरतोति । सा राधा विरचितः कृतो [6]विविधो नानाप्रकारो विलापो यस्मिस्तमुच्चैर्महान्तं परितापं दुःखं चकार । कस्मिन् सति ? शशधरबिम्बे चन्द्रमण्डले प्रसरति उद्गच्छति सति । माधवे च कृष्णे च विहितविलम्बे [7]कृतविलम्बे सति विधुरा [8]विकला ॥२॥

जयन्ती

प्रसरतीति । शशधरस्य चन्द्रस्य बिम्बे प्रकाशे प्रसरति सति व्याप्नोति सति गगनतलमारोहति सति; विम्बपदेन किरणसमुदायो लक्ष्यते वा । माधवे

---

1. विविधालापं–इ. 2. श्रीकृष्णानागमनविरहदुःखं–इ.फ.ग.ह.ज. 3. वञ्चक क्वासीत्येवंरूपगुणकीर्तनरूपो–इ.फ.ग.ह.ज. 4. विह्वला–इ.फ.ग.ह.ज. 5. नास्ति–अ.ब. 6. नास्ति–ड.फ. 7. नास्ति–ड. 8. विह्वला –ल.म.

[1]गौडमालवरागे प्रतिमण्ठताले

कथितसमयेऽपि हरिरहह न ययौ वनम् ।
मम [2]विफलमिदं मम रूपमपि यौवनम् ।।
यामि हे कमिह शरणं सखीजनवचनवञ्चिता ।।३।।
(ध्रुवपदम्)

विहितः विलम्बः चिरकालः येन तस्मिन् सति विधुरा सुखरहिता सा राधा; विरचिता विविधा आलापाः प्रलापा यस्मिन् तम्; परितापं रुदितं उच्चैः चकार । इयञ्च नायिका विप्रलब्धा—

"क्वचित्सङ्केतमावेद्य दयितेनाथ वञ्चिता ।
स्मरार्ता विप्रलब्धेति कलाविद्भिः प्रकीत्यर्ते ।।
इति (प्र. रु. नायकप्र. श्लो. ४७) लक्षणात् ।

अत्र परितापकार्यस्य माधवविलम्बः कारणम् । शशधरविम्बप्रसरस्यापि तत्कारित्वात्समुच्चयः । आर्यावृत्तम् ।।२।।

सञ्जीवनी

पूर्वं यथा श्रीकृष्णः 'किं गृहेन धनेन' इति कृतवान् तथा राधाऽपि कृतवती इति निरूप्यते । किञ्चोक्तं विलापमेव दर्शयति–कथितेति । [3]कथ्यते विप्रलब्धा नायिकेयम्—

"प्रेष्य दूतीं स्वयं गत्वा सङ्केतं [4]नागते प्रिये ।
[5]या स्यात्तेन विना [6]दुःस्था विप्रलब्धा तु सा मता ।।" इति ।

गौडमालवरागे प्रतिमण्ठताले । इहास्मिन् समये [7]निर्जने [8]वा कुञ्जे कं प्रति शरणं यामि कं जलं वा प्रविशामि । किंविशिष्टाऽहम् ? सखीजनवचनैः श्रीकृष्णः [9]आगमिष्यति इति वञ्चिता [10]प्रतारिता । वञ्चनमेवाह । अहहेति खेदे । हरिः कथितसमयेऽतिनिबिडान्धकाररूपे सङ्केताख्ये वनं न ययौ

1. मालवगौडेन अडतालेन गीयते–इ. 2. विफलमेतदनुरूपमपि–ड. 3. नास्ति–इ.फ.ग. 4. नागतप्रियः–अ.ब.इ. नागतः प्रियः–फ.ग.ह. 5. यस्यां तेन–अ.ब.इ.फ.ग.ह. 6. दुःखा–ग. 7. निर्जने वाऽहह करताडनेन कं जनं प्रति शरणं–ग. 8. च–इ. 9. शीघ्रं स्वयमेवागमिष्यतीति–इ.फ.ग. 10. नास्ति–अ.ब.

यदनुगमनाय निशि गहनमपि शीलितम् ।
तेन मम हृदयमिदमसमशरकीलितम् ॥४॥

नाजगाम । तदागमनं विना इदं मम यौवनम[1]मलरूपं स्वच्छरूपमपि विफलं निरर्थकम् । "[2]कः पावके मयूरे च सुखशीर्षजलेषु च" इति विश्वः (२.२४) । "शरणं गृहरक्षित्रोः" इत्यमरः (३.३.५३) । विरोधोक्तिरलङ्कारः ॥३॥

पदद्योतनिका

विलापमेवाह [3]गीतेन—कथितेति । हे इति [4]स्वचित्तसम्बोधनम् । इह निर्जने वने सखीजनस्य वचनैः कृष्णागमनवेदकै[5]र्वञ्चिता प्रवञ्चिताऽहं कं पुरुषं शरणं रक्षितारं यामि गमिष्यामि । [6]किन्तु कमेव जलमेव शरणं यामि; जलप्रवेशो वरमित्यर्थः । [7]किमितीत्यतः आह—अहहेत्याश्चर्ये । हरिः कृष्णः कथितसमयेऽपि उक्तकालेऽपि वनं वृन्दावनं सङ्केतस्थानं न ययौ [8]न जगाम । कृष्णोपभोगाभावात् ममैतदनुरूपं योग्यमपि यौवनं विफलं [9]निरर्थकम् ॥३॥

जयन्ती

कथितेति । कथितसमये सङ्केतसमागमोक्तकालेऽपि हरिः माधवः वनं सङ्केतकुञ्जं न ययौ न प्राप्तः । अहह इति दुःखानुकरणशब्दः । अत एव मम अमलं रूपं यस्मिन् तस्मिन्नपि इदं यौवनं विफलं व्यर्थम् । ध्रुवाया व्याख्यानम् । हे इति हा कष्टम् । हा इति पाठे क्लिष्टम् । आभिमुख्यार्थसम्बोधनम् । सखीनां जनः तस्य वचनेन वञ्चिता । सखीभिः कथितं किल 'कुञ्जगृहं गतः कृष्णः' इति तन्मिथ्येति वचनं मम । अहं इह निर्जने कं शरणं रक्षितारं यामि व्रजामि । प्रवासे माधवं विना न कोऽपि रक्षेदित्यर्थः । अत्र प्रतिदलं पुष्पसंज्ञक-मात्रागणचतुष्टयमिति गुच्छसंज्ञकच्छन्दः ॥३॥

सञ्जीवनी

(यदिति ।) किञ्च यस्य श्रीकृष्णस्यानुगमनायान्वेषणाय सुरतेन सन्तोषयितुं निशि रात्रौ गहनमपि [1]निर्जनवनमपि मया शीलितं सेवितमनुभूतं वा ।

---

1. अमलं सुन्दररूपं—इ.फ.ग.ह. 2. "पावके च मयूरे च सुखशीर्षजलेषु कम्" विश्व (वना—१९११) कं पावके मयूखे च—फ. कः पावके मयूखे च—ह. 3. गीतेन गीयते—कं. 4. सखिचित्तसम्बोधनम्—क. 5. वञ्चिता-ऽहं कं पुरुषं—ड. 6. नास्ति—ड. 7. किमित्यत आह—क.ल. 8. नाज-गाम—क.ल.म. 9. निरर्थकमित्यर्थः—क. 10. नास्ति—अ.ब.

मम मरणमेव वरमतिवितथकेतना ।
किमिह विषहामि विरहानलमचेतना ॥५॥

तेन श्रीकृष्णेन निमित्तभूतेन [1]मम हृदयं असमशरेण कामबाणेन कृष्णागमनाभावात् कीलितं [2]विद्धम् ॥४॥

पदद्योतनिका

यदिति । मया यदनुगमनाय कृष्णस्यानुगमनाय सुरतेन सन्तोषयितुं निशि रात्रौ गहनमपि निर्जनवनमपि शीलितं सेवितं तेन कृष्णेन हेतुना ममेदं हृदयं चेतः असमशरेण [3]कामेन कीलितं विद्धम् । कृष्णागमनाभावात् ॥४॥

जयन्ती

यदनुगमनायेति । यस्यानुगमनाय अनुसरणाय निशि रात्रौ गहनं काननं शीलितं अभ्यस्तं प्रविष्टमिति यावत् । "गहनं काननं वनम्" इत्यमरः (२.४.१) । तेन वनप्रवेशेन इदं मम हृदयं असमाः पञ्च शराः अरविन्दादिरूपाः तैः कीलितं प्रोतम् । प्रकरणवशात् मन्मथस्येत्यर्थः । "अरविन्दमशोकञ्च चूतञ्च नवमल्लिका । नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥" इत्यमरः (१.१.२७) ॥४॥

सञ्जीवनी

(ममेति ।) एवं श्रीकृष्णेन वञ्चिताया मम मरणमेव वरं श्रेष्ठम् । मरणे विरहानलाभावात् । किञ्च अहं किमिति विषहामि विरहानलं सहामि ? कीदृश्यहम् ? अतिवितथकेतना अतिशयेन [4]वितथं मिथ्याभूतं गृहं शरीरं वा यस्याः । कीदृशी ? अचेतना ज्ञानशून्या [5]बुद्धि[6]र्यस्याः श्रीकृष्णागमनप्रत्याशारहितत्वात् । "वितथं त्वनृते व्यर्थे" इति हेमः । "केतनं लाञ्छने [7]शृङ्गे गोत्रे गेहापमन्त्रणे" इति विश्वः (७१.५१) । "[8]प्रतिपज्ज्ञप्तिचेतना." इत्यमरः (१.५.१) । विरोधोक्तिरलङ्कारः ॥५॥

पदद्योतनिका

ममेति । इह वनेऽचेतना ज्ञानशून्या [9]विरहानलं विरहाग्निं किमिति विषहामि सहामि । तस्मान्मम मरणमेव [10]वरं [11]श्रेष्ठम्; [12]मरणे [13]विरहा-

---

1. ममेदं हृदयं–इ.फ.ग.ह. 2. बद्धम्–अ.ब.इ. 3. कामबाणेन–क. 4. वितथो मिथ्याभूतो–अ.ब. 5, 6. नास्ति–इ.फ.ग्र.ह. 7. कार्षे गेहे चोपनिमन्त्रणे–विश्व (बना–१९११) 8. चेतनं रूपदेशे स्यात् प्रत्याशायां च चेतनमित्यपि –इ.फ.ग.ह.ज. 9 तः 13. पर्यन्तो भागो नास्ति–ड. 10,11,12. नास्ति–क.

[1]मामहह विधुरयति [2]मधुरमधुयामिनी ।
काऽपि हरि[3]मनुधावति कृतसुकृतकामिनी ॥६॥

नलाभावात् । [4]कीदृश्यहम् ? अतिवितथमतिव्यर्थं केतनं शरीरं यस्याः; कृष्णेन [5]सौन्दर्योपभोगाभावात्[6] ॥५॥

जयन्ती

ममेति । अत एव मम मरणमेव वरं इति । वितथं व्यर्थं केतनं कुञ्जगृहं यस्याः सा । इह अचेतना इतिकर्तव्यताज्ञानशून्या विरहानलं विषहामि; तस्मात् मरणमेव वरम्; विरहदुःखाननुभवात् । किमिति किं विरहानलं विषहामि अपि तु विषहाम्येव; अतो मरणमेव वरमिति काकुर्वा ॥५॥

सञ्जीवनी

(मामिति ।) [7]किञ्च, अहहेत्यादि आश्चर्ये । मधुरमधुयामिनी मनोज्ञा वसन्तरात्रिः परमानन्दप्रदाऽपि मां [8]विधुरयति विह्वलयति । कापि [9]कृतसुकृत-कामिनी कृतपुण्यपुञ्जा कान्ता हरिं श्रीकृष्णं अनुभवति [10]भुङ्क्ते भजते वा । [11]अथ वा काऽपि मादृशी सुकृतं श्रीकृष्णालिङ्गनादिपुण्यं यया तादृशी कामिनी । इदानीं न तादृग्विधाऽहमिति [12]विश्लेषमेवानुभवामीति भावः । इयमुन्मादावस्था सम्भवति ॥६॥

पदद्योतनिका

मामिति । अहहेति दुःखानुकारे । [13]मधुरमधुयामिनी मनोज्ञवसन्तरा-त्रिर्मां विधुरयति विकलयति । काऽपि कृतसुकृतकामिनी विहितपुण्या कान्ता हरिं कृष्णं अगुभवति उपभुङ्क्ते ॥६॥

जयन्ती

मामिति । मधुर्वसन्तः तस्मिन् मधुश्चन्द्रः तेन वा मधुरा अतिरमणीया यामिनी रात्रिः इह कुञ्जे मां विधुरयति क्लेशयति; हेति खेदे । काऽपि कृतं सुकृतं पुण्यं यया सा च सा कामिनी हरिं सुखत्वादनुभवति भोगसाधनत्वेन साक्षात्करोति । अत्र कृतसुकृतपदार्थहेतुकत्वाद्धर्यनुभवस्य काव्यलिङ्गमलङ्-कारः ॥६॥

1. मामिहह–इ. 2. मधुमधुर–इ. 3. अनुभवति–इ. 4 तः 6. पर्यन्तं नास्ति–म. 5. शरीरसौन्दर्यो–क.ल. 7. नास्ति–अ.ब. 8. नास्ति–इ. 9, 10. नास्ति–अ.ब. 11. यद्वा–ग. 12. श्लेषमात्रं क्लेशमेवानुभवामीति–फ. श्लेशमे-वानुभवामीति–ह. 13. मधुयामिनी–ड.ल.म.

अहह कलयामि वलयादिमणिभूषणम् ।
[1]हरिविरहदहनवहनेन बहुदूषणम् ॥७॥
कुसुमसुकुमारतनुमतनुशरलीलया ।
स्रगपि हृदि हन्ति [2]माममतिविषमशीलया ॥८॥

सञ्जीवनी

(अहहेति ।) किञ्च अहहेति खेदे । [3]अहो वलयादिमणिभूषणं कङ्कणाद्यलङ्कारं कलयामि धारयामि । कीदृशम् ? हरिविरह[4]दहनवहनेन श्रीकृष्णवियोगवह्निधारणेन बहुदूषणमतिशयपापाचारम् । प्रियदर्शने स्त्रीणां [5]शृङ्गारसाफल्यमिति भावः ॥७॥

बहुदूषणान्येवाह—(कुसुमेति ।)न केवलं हरिविरहो [6]हन्त [7]स्वकरधृता स्रगपि माला हृदि कृता अतनुशरलीलया अनङ्गबाणविलासेन मां हन्ति । [8]कीदृशीम् ? [9]कुसुमसुकुमारतनुं पुष्पवत्कोमलदेहाम्[10] । कीदृश्या ? अतिशयेन विषमं दारुणं शीलं स्वभावो यस्याः । वज्रादप्यतिकठोरयेति भावः । "[11]पुष्पं प्रसूनं कुसुमं सुमनो मृगजीवनम्" इति रत्नाकरः[12] ॥८॥

पदद्योतनिका

अहहेति । अहं [13]वलयादिमणिभूषणं कङ्कणप्रभृति[14]मणियुक्तालङ्कारं हरिविरहदहनवहनेन कृष्णवियोगवह्निधारणेन हेतुना बहुदूषणं अतिशयापचारं कलयामि मन्ये । प्रियदर्शने स्त्रीणां [15]अलङ्कारसाफल्यमिति भावः ॥७॥

कुसुमेति । स्रगपि पुष्पमालाऽपि अतनुशरलीलया कामबाणविलासेन मां हृदि हन्ति । कीदृशीं [16]माम् ? कुसुमवत्[17]पुष्पवत्सुकुमारा कोमला तनुः शरीरं यस्याः ताम् । कीदृशी अतनुशरलीला ? अतिविषममतिदारुणं शीलं स्वभावो यस्याः । बाणेन [18]हि क्षतं क्रियते न तु पुष्पादिना ॥८॥

---

1. हरिविरहवनजदहनेन–इ. 2. मामपि–इ. 3. अहं–इ.फ.ग.ह. 4. दहनेन–फ.ग. 5. शृङ्गाररस–अ.ब. 6. दहति–इ.फ.ह.ग. 7. स्वकरकृता–फ.ह. 8. तः 10. पर्यन्तं नास्ति–अ.ब. 9. नास्ति–इ.ग.ह. 11. तः 12. पर्यन्तं नास्ति–अ.ब. 13. वलयादिभूषणं–इ. वलयाभूषणं–क. 14. युक्तालङ्कारं–ड.म. 15. अलङ्कारस्य परं साफल्यमिति भावः–क. 16. नास्ति–ड. 17. सुकुमारा–क. 18. हृदि–क.ल.म.

अहमिह निवसामि [1]न गणितवनवेतसा ।
स्मरति मधुसूदनो मामपि न चेतसा ॥९॥

जयन्ती

अहहेति । वलयादिकं मणिभूषणं रत्नखचितालङ्कारं कलयामि वहामि । हरेः विरह एव वनजदहनो वह्निः तेन बहुदूषणं सन्तापकत्वांच्च दोषापादकम् ॥७॥

कुसुमेति । कुसुमवत् सुकुमारा कोमला तनुर्यस्यास्तां मामपि स्रगपि पुष्पमालाऽपि विषमे शीलं घातकस्वभावो यस्यास्तया । अतनोः मदनस्य शरलीलया बाणभावेन हन्ति ॥८॥

सञ्जीवनी

(अहमिति ।) इह निकुञ्जेऽहं [2]तदागमनाय न निवसामि किम् ? वसाम्येव; तथापि मधुसूदनो ममाधरपानकर्ता मां चेतसा चित्तेनाऽपि न स्मरति । कीदृश्यहम् ? गणिताः परिसंख्याताः [3]श्रीकृष्णान्वेषणार्थं [4]वने वेतसा लता [5]यया ॥९॥

पदद्योतनिका

अहमिति । गणितवनवेतसा गणिताः प्रतिलतं कृष्णमन्वेषयन्त्या परिसंख्याता वनवेतसा यया सा अहमिह कुञ्जे किं न [6]निवसामि अपि तु [7]वसाम्येव । अत्र तत्र समस्तशिरश्चालने एवंविधाऽपि मां मधुसूदनः कृष्णश्चेतसाऽपि न स्मरति; आश्चर्यमित्यर्थः ॥९॥

जयन्ती

अहमिति । अहं इह वने विगणितः भयसाधनत्वे वा लक्षितः; वने वेतसो हिज्जालो यया सा । 'नगणित' इति पाठे न शब्देन समासः । वनवेतसो यया सा । अलक्षितगहनवेतसा सती बिभीषिकारहिता निवसामि । मधुसूदनः माधवः चेतसाऽपि मां न स्मरति । स्मरणाभावे कथं यास्यामि तस्य सिद्धसङ्कल्पत्वात्तेन स्मृताऽहं चेत्तं प्राप्तैव स्यामिति भावः ॥९॥

---

1. विगणित–इ. 2. तदागमनाय निवसामि किञ्च वसाम्येव–अ.ब.ग. 3. श्रीकृष्णान्वेषणाय–इ.फ.ग.ह. 4. नास्ति–अ.व. 5. यया इति भावः–अ.ब. 6. वसामि–क. निवसाम्येव–ल.म. 7. निवसाम्येव–क.

हरिचरणशरणजयदेवकविभारती ।
वसतु हृदि युवतिरिव कोमलकलावती ॥१०॥

सञ्जीवनी

[1]किञ्च—[2]हरीति । हरिचरणौ शरणं यस्य तस्य जयदेवकवेर्भारती वाणी सरसान्तःकरणानां हृदि वसतु । [3]केव ? कामिनां युवतिरिव [4]कामिनीव । कीदृशी ? सुकुमाराङ्गी चतुष्षष्टिकामकलाकुशला वा । [5]भारतीविशषणं वा । कोमलकलायुक्ता यथा युवतिः प्रणयकलहादिना [6]शोभावती भवति तद्वदत्रापि भारती कोमलसुखोच्चारणादिनेति भावः ॥१०॥

[7]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां त्रयोदशः प्रबन्धः ।

पदद्योतनिका

हरीति । [8]हरिचरणं शरणं रक्षितृ यस्य स जयदेवकविस्तस्य भारती गीतरूपा सरस्वती भक्तानां हृदि मानसे वसतु । कीदृशी भारती ? कोमलाऽ-निष्ठुरवर्णा कलावती कवित्वकलायुता च । केव ? युवतिरिव । यथा नायक-हृदये कोमलकलावती सुकुमाराङ्गी चतुष्षष्टिकामकलायुक्ता [9]च नायिका वसति[10] ॥१०॥

[11]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां त्रयोदशः प्रबन्धः ।

जयन्ती

हरिचरणेति । हरिचरणावेव शरणं रक्षिता यस्य स चासौ जयदेवकविः तस्य भारती वाणी हृदि; भक्तानामिति शेषः; वसतु । कोमलाः कलाः यस्यां सा युवतिरिव वसतु । अत्र युवतिरुपमानं, भारती उपमेयं, कोम(ल क)लावत्त्वं धर्म इत्युपमा । अत्रोपमालङ्कारः ॥१०॥

[12]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां त्रयोदशः प्रबन्धः ।

1, 2. नास्ति–अ.व. 3. केव कामिनी युवतिरिव–अ. केवलकामिनी युवतिरिव–ब. 4. नास्ति–इ.फ.ग.ह. 5. नास्ति–अ. भारत्या विशेषणं वा–इ.फ.ह.ग. 6. शोभिता–ग. 7. नास्तीयं पुष्पिका–अ.व.इ.फ.ग.ह.ज. 8. हरि-चरणौ–ल.म. 9. तः 10. पर्यन्तं नास्ति–क.ल.म. 11. नास्तीयं पुष्पिका–ड. क.ल.म. 12. नास्तीयं पुष्पिका–इ.

चतुर्दशः प्रबन्धः

तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभि-
र्बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे [1]किमुद्भ्राम्यति ।
कान्तः क्लान्तमना [2]मनागपि पथि प्रस्थातुमेवाक्षमः
सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः ।।१।।

सञ्जीवनी

एवं विप्रलब्धा हरौ नानाशङ्कां जनयन्ती तर्कमाह—तत्किमिति । कान्तः श्रीकृष्णः [3]सङ्केतीकृते मञ्जौ मनोहरे वञ्जुललताकुञ्जे वेतसलतामन्दिरेऽपि यद्यस्मात् क्रीडार्थं नागतः तत्तस्मात्किं वा कामपि कामिनीं कामातुरां कमनीयां वाऽभिसृतः [4]सम्मुखं गतो[5]ऽनुगतो नु वा । किं वा [6]कलाकेलिभिर्व्रजयुवति-[7]हास्यादिभिः क्रीडादिभिर्बद्धो यन्त्रितः । किं वा बन्धुभिर्मित्रैः [8]कार्यान्तरं (प्रति)प्रेषितः । स्वयं विचार्य हेत्वन्तरमाह । अन्धकारिणि निबिडान्धकारे वनोपान्ते वनसमीपेऽभ्यर्णे निकट उद्भ्राम्यति । [9]उपान्ते वा पाठः[10] । कीदृशः ? क्लान्तं मद्वियोगेन दुःखितं मनो यस्य । पुनः कीदृशः ? मनागप्यल्प-मपि पथि मार्गे प्रस्थातुमागन्तुं अक्षमोऽसमर्थः । ततो विलम्ब इति भावः । "वितर्के संशये क्षेपे किमु संकीर्त्यते बुधैः" इति धरणिः ।।१।।

पदद्योतनिका

कृष्णस्य [11]विलम्वे तर्कमाह—तत्किमिति । कान्तः कृष्णः सङ्केतीकृतः अभिसरणस्थानं सम्पादितः; मञ्जुर्मनोहरो वञ्जूललताकुञ्जो वेतसलतागृहं तस्मिन्नपि यन्नागतो नायातः तत्तस्मात्कारणात् कामपि कामिनीं नायिकाम-भिसृतः अनुगतः; किं वा अथ वा बन्धुभिर्मित्रैः कलाकेलिभि[12]र्हास्यक्रीडा-भिर्बद्धो यन्त्रितः, उत अथ वा अन्धकारिणि तमोयुक्ते वनोपान्ते वनसमीपे

1. किमु भ्राम्यति–अ.ब. 2. अनागतपथेनागन्तुमेवाक्षमः–इ 3. सङ्के-तीकृतः अभिसरणस्थलं सम्पादितः मञ्जुर्मनोहरः वञ्जुललताकुञ्जः वेतसलता-मन्दिरं, तत्र–इ.फ.ग.ह. 4. सम्मुखं गतो वा–ब. 5. अनुसृतो वा–इ. अनुगतो वा–फ.ग.ज. नास्ति–ह. 6. अबलाकेलिभिः–अ.ब.ह.ज. 7. हास्यादिक्रीडाभिः–इ.फ.ग.ह.ज. 8. कार्यान्तरे प्रेरितः–इ.फ.ग.ह.ज. 9. तः 10. पर्यन्तं नास्ति–अ.ब. 11. विलम्बत्वे कारणमाह–क. 12. हास्यादिक्रीडाभिः–क.ल.म.

अथागतां माधवमन्तरेण
सखीमियं वीक्ष्य विषादमूकाम् ।
विशङ्कमाना रमितं कयाऽपि
जनार्दनं दृष्टवदेतदाह ॥२॥

भ्राम्यति किम्; तमसि [1]मार्गभ्रमाद्भ्रमणं युज्यत एव । [2]अभ्यस्तस्य भ्रमाभाव इति चेत्तत्राह—क्लान्तमनाः । मन्निमितं समाकुलान्तःकरणः सन् पथि मनागपि [3]अल्पमपि प्रस्थातुमा[4]गन्तुमेव क्षमः [5]किं समर्थः ? [6]अत्र अपिशब्दः किमर्थः । उत्का चेयं नायिका ।—

"उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयन्त्याकुला [7]यथा ॥१॥

जयन्ती

तत्किमिति । कान्तः प्रियः कामपि अन्यां कामिनीं अभिसृतः अभिसारं प्राप्तः, अनुसृत्य गत इति यावत् । किं वा अथ वा कलाः केलयः क्रीडा येषां तैः बन्धुभिः बद्धः । कलाकेलिभिरिति करणे तृतीया । अन्धकारोऽस्मिन्नित्यन्धकारी तस्मिन् वनाभ्यर्णे वनसमीपे उद्भ्राम्यति । मार्गाणां कलनात्परितो भ्रमति किम् ? क्लान्तं क्लमयुक्तं मनो यस्य सः सन् । अनागतः आगतो न भवतीति अज्ञात इत्यर्थः; स चासौ पन्थाः तेन पथेन मार्गेण आगन्तुं आयातुं अक्षम एव किम् ? सङ्केतीकृताः अहमत्र वसामि त्वमागच्छेति सङ्केतीकृताः मञ्जवः सुन्दराः ते च ते वञ्जुलाः तेषां वञ्जुलानां वेतसानां लतानाञ्च कुञ्जः तस्मिन् अपि यस्मान्नागतः । अत्र उत्तरवाक्यार्थगतत्वात्तच्छब्दाकाङ्क्षा नास्तीति न न्यूनपदत्वम् । अत्र विरहिणी नायिका । कामिन्यनुसारादिचतुर्विकल्पः सन्देहालङ्कारः ॥१॥

सञ्जीवनी

एवं [8]बहुधा वितर्कयन्ती सखीमाह—(अथेति ।) अथानन्तरं इयं राधा दृष्टवत्सुदृष्टार्थमिव एतद्वक्ष्यमाणं सखीमाह उक्तवती । [9]किं [10]कृत्वा ? माधव-

---

1. मार्गे–क.ल. 2. अभ्यस्ते भ्रमाभाव इति तत्राह–क. 3. नास्ति–क. 4. गन्तुमक्षमः–क.ल.म. 5. किमसमर्थः–क. 6. किमत्र–ड.क. किमपि अत्र–ल.म. 7. हृदि–क. 8. बहुविधं–फ.ह.ज. 9, 10. नास्ति–अ.व.

वसन्तरागे एकतालीताले

स्मरसमरोचितविरचित[1]वेशा ।
[2]गलितकुसुमदरविलुलितकेशा ॥
[3]काऽपि मधुरिपुणा विलसति युवतिरधिकगुणा ॥ध्रुवपदम् ॥३॥

मन्तरेण श्रीकृष्णं विनाऽऽगतां वीक्ष्य दृष्ट्वा । कीदृशीम् ? विषादमूकां दुःखातिशयेन वक्तुमसमर्थाम् । [4]कीदृशी ? जनार्दनं कयाऽपि नायिकया रमितमिति [5]विशङ्कमाना । जनार्दनस्य विरहिजनस्य [6]सन्तापकरत्वमुक्तमिति शब्दार्थः । [7]अर्द हिंसायाम्; जनानर्दयतीति ॥२॥

पदद्योतनिका

अथेति । अनन्तरं इयं राधा माधवं कृष्णमन्तरेण विना आगतां सखीं वीक्ष्य [8]दृष्ट्वा एतद्गीतेन वक्ष्यमाणमाह । कीदृशीं [9]सखीम् ? विषादेन कार्यासिद्धया मूकां वक्तुमक्षमाम् । कीदृशी [10]राधा ? जानर्दनं कृष्णं कयाऽपि कामिन्या रमितं क्रीडितं विशङ्कमाना तर्कयन्ती । दृष्टवत् कामिन्या सहितं कृष्णं दृष्ट्वेवेत्यर्थः । यथा दृष्ट्वाऽभिधीयते तथा प्राहेत्यर्थः । एषा उन्मादिन्या उक्तिः ॥२॥

जयन्ती

अष्टपदीमवतारयति—अथेति । अथ चन्द्रोदयानन्तरं विहितविलापानन्तरं माधवं गोविन्दं अन्तरेण विना इयं अङ्गना अत एव विषादेन मूकां प्रकृतकार्यत्वरालम्बितमौनां अनीर्यद्वचनामिति भावः । सखीं वीक्ष्य आलोक्य कयाऽपि स्वान्यगोपिकया रमितं क्रीडन्तं जनार्दनं विशङ्कमाना दृष्टवत् दृष्टवतीव एतत आह ॥२॥

सञ्जीवनी

[11]दृष्टार्थं [12]गीतेनाह—स्मरेति । वसन्तरागे एकतालीताले । [13]रागतालध्रुवाणां लक्षणमुक्तमेव । हे सखि काऽपि [14]युवतिर्व्रजवधूर्मधुरिपुणा

---

1. वेषा–ड. 2. ललित–इ. 3. काऽपि चपला मधुरिपुणा विलसति युवतिरधिकगुणा सखि–इ. 4. पुनः कीदृशीम्–अ.ब. 5. शङ्कमाना शङ्काप्राप्ता–ग. विशङ्कां प्राप्ता–फ. विशङ्कमाना शङ्कां प्राप्ता–ह. 6. सन्तापकत्वमुचितमिति–फ.ग.ह.ज. 7. अर्दधातुर्हिंसार्थे–इ.ग.ह. अर्दधातुर्हिंसार्थः–फ.ज. 8. नास्ति–ड.ल.म. 9, 10. नास्ति–ड. 11. इष्टार्थं–अ.ब. 12. गानेनाह–इ. 13. तालध्रुवाणां–अ.ब. 14. युवतिर्वधूः–ग.

श्रीकृष्णेन सह विलसति [1]क्रीडति । कीदृशी ? अधिकगुणा मत्तोऽधिका नृत्यकुशलसौन्दर्यादयो गुणा यत्र । मद्विलासमन्दिरगमनोत्कण्ठितमपि श्रीकृष्णं स्वगुणैराकृष्यान्यत्र नीतमिति तद्गुणाधिक्यं सूचितम् । कीदृशी ? स्मरसमरे कामसङ्ग्रामे उचितो योग्यो विरचितः कृतो वेशोऽलङ्कारः [2]स्रक्चन्दन[3]संयोगादिर्यया सा । [4]चिबुकमुद्धृत्य चुम्बितेति ध्वनिः । अथ वा स्मरसमरोचितो विरचितः कृतः । श्रीकृष्णेन वेषो [5]यस्यां सा । अलङ्कार[6]विधानेनैव कृतस्मरसङ्ग्रामायाश्चिह्नमाह—गलितकुसुमैः पतितपुष्पैः [7]दरविलुलिता ईषद्व्यस्ता केशा यस्याः[8]सेत्यर्थः ॥३॥

पदद्योतनिका

[9]वसन्तरागः । दृष्टवदिति [10]यदुक्तं तद्गीतेनाह—स्मरेति । हे सखि काऽपि युवतिः कामिनी मधुरिपुणा कृष्णेन सह विलसति क्रीडति । कीदृशी सा ? अधिकगुणा मत्तोऽतिशयितसौन्दर्यादिगुणयुक्ता । पुनः कीदृशी ? स्मरसमरोचितः कामयुद्धे योग्यः विरचितः [11]कृतो वेषो[12]ऽलङ्कारादिर्यया सा । पुनः कीदृशी ? गलितकुसुमेन पतितपुष्पस्रगादिना दरविलुलिता ईषदितस्ततो व्याप्ताः केशाः यस्याः सा ॥३॥

जयन्ती

स्मरेति । स्मरस्य समरः रतः तस्मिन् उचितः योग्यः विरचितः निर्मितः वेशः संवेशविशेषो यस्याः सा मकरिकापत्रवस्त्राद्यलङ्कारादियुक्ता । ललितैः सुन्दरैः कुसुमैः मल्लिकादिभिः दर ईषत् विलुलिताः निम्नोन्नतीकृताः केशाः चिकुराः यस्याः सा । कुसुमगुम्फनेन केशानां क्वचिन्निम्नीभावो भवति ॥ ध्रुवाया व्याख्यानम् । सखी काऽपि मधुरिपुणेति द्विवारं पठनीयम् । मधुरिपुणा गोविन्देन अधिकाः गुणा सौन्दर्यसौभाग्यादिगुणाः यस्याः सा युवतिः तरुणी विलसति ॥३॥

---

1. नास्ति–अ.ब. 2. पदमिदं नास्ति–फ. 3. सम्भोगादि–अ.ब.इ.ग.ह. 4. तः 6. पर्यन्तं नास्ति–फ. 5. यस्याः सा–ग. 7. दूरं–इ. 8. नास्ति–इ.फ.ग.ह.ज. 9. वसन्तरागेण गीयते एकतालीतालः–ल.म. 10. यदुक्तं तर्क–क. 11. नास्ति–ड. 12. अलङ्कारो यया सा–क. अलङ्कारादिर्यथा स्यात्तथा–ल.म.

हरिपरिरम्भणवलितविकारा ।
कुचकलशोपरि तरलितहारा ॥४॥
[1]विचलदलकललिताननचन्द्रा ।
तदधरपानरभसकृततन्द्रा ॥५॥

सञ्जीवनी

(हरीति ।) पुनः कीदृशी ? हरिपरिरम्भणेन श्रीकृष्णालिङ्गनेन वलितो [2]जातो विकारोऽनङ्गोद्बोधो यस्याः । पुनः कीदृशी ? कुचकलशयोरुपरि तरलितश्चञ्चलो हारो मुक्ताहारो यस्याः । तरलित [3]इत्यादिनाऽऽलिङ्गनं सूचितम् । कलशशब्देनाऽनङ्गोत्सवाय मङ्गलं स्थूलत्वं चेति ध्वनिः ॥४॥

(विकचदिति ।) पुनः कीदृशी ? [4]विचलद्भिः कम्पमानैरलकैश्चूर्ण-कुन्तलैर्ललितो मनोहर आननचन्द्रो [5]मुखमेव चन्द्रो [6]यस्याः । [7]पुनः [8]कीदृशी ? [9]तस्य श्रीकृष्णस्याधरपानरभसेन वेगेन कृता तन्द्रा [10]सुखानुभव[11]रूपा चक्षुर्निमीलनं वा यया । एतेन तदधरामृत[12]पानेनैव मूर्छितेति ध्वनिः । "[13]रभसो वेग उत्साहः" इत्यमरः[14] (?) ॥५॥

पदद्योतनिका

[15]हरीति । पुनः कीदृशी ? हरिपरिरम्भणेन कृष्णालिङ्गनेन वलितः कृतो विकारः कामोद्बोधो यस्याः सा । पुनः [16]कीदृशी ? कुचकलशोपरि स्तन-कुम्भोपरि तरलितश्चञ्चलः हारो मुक्ताहारो यस्याः सा ॥४॥

विचलदिति । विचलद्भिः कम्पमानैरलकैः चूर्णकुन्तलैर्ललितः सुन्दरः आननचन्द्रो [17]मुखचन्द्रो यस्याः सा । तदधरपानरभसेन कृष्णस्यौष्ठपानहर्षेण कृततन्द्रा रतिसुखानुभवनिद्रा यस्याः सा ॥५॥

---

1. विकचललिताननचन्द्रा–इ. विकलदलकललिताननचन्द्रा–अ.ब. 2. नास्ति–अ.ब. 3. इत्यनेन–इ.फ.ग.ह.ज. 4. विकचद्भिः–अ.ब. 5. तः 6. पर्यन्तं नास्ति–अ.ब.इ. 7, 8, 9, नास्ति–इ. 10. सुरतसुखानुभव–फ.ज. 11. रूपो न चक्षुर्निमीलनं यया–अ.ब. 12. पानेन च–फ.ज. 13. तः 14. पर्यन्तं नास्ति–अ.ब. 15. नास्ति–ड. हरिरिति–क.ल. 16. नास्ति–ड. 17. नास्ति–ड.

चञ्चलकुण्डल[1]ललितकपोला ।
मुखरितरसनजघनगतिलोला ॥६॥

जयन्ती

हरीति । हरेः परिरम्भणेन आलिङ्गनेन वलिता उद्भूताः विकाराः सात्त्विकमानसाः स्तम्भादयः हर्षादयश्च यस्याः सा । कलितेति पाठे स एवार्थः । कुचावेव कलशौ तत्र तरलितः चञ्चलः हारो यस्याः सा ॥४॥

विकचेति । विकचं विकसितं जलजं पद्मं तद्वत् ललितः आननमेव चन्द्रो यस्याः सा । तदधरः ओष्ठः तस्य पाने चुम्बने कृता तन्द्रा प्रमीला यस्याः सा । अत्र उपमारूपकालङ्कारौ ॥५॥

सञ्जीवनी

(चञ्चलेति ।) पुनः कीदृशी ? हे धूर्त [2]कुण्ठक वञ्चक ज्ञातोऽसीति कथयन् शिरःकम्पनेन क्रीडावशेन वा चञ्चलाभ्यां [3]चपलाभ्यां [4]कुण्डलाभ्यां ललितौ सुन्दरौ कपोलौ यस्याः । पुनः कीदृशी ? मुखरिता शब्दायमाना रसना [5]क्षुद्रघण्टिका यत्र जघने तद्गत्या गतागतेन लोला चञ्चला यस्याः [6]सा । इत्येतैः पदैः सुरतविपरीततोक्तेति भावः ॥६॥

पदद्योतनिका

चञ्चलेति । [7]पुनः [8]कीदृशी ? चञ्चलाभ्यां कुण्डलाभ्यां दलितौ सङ्घृष्टौ कपोलौ यस्याः [9]सा । पुनः [10]कीदृशी ? मुखरिता शब्दसहिता रसना काञ्ची यस्मिन् जघने तद्गत्या [11]चाञ्चल्येन लोला चञ्चला ॥६॥

जयन्ती

चञ्चलेति । चञ्चलाभ्यां कुण्डलाभ्यां कलितौ सहितौ कपोलौ यस्याः सा । मुखरिता शब्दिता रसना काञ्ची यस्मिन् तथा जघनस्य नाभेरधोभागस्य गतिलोला अस्थिरा । अनेन पुरुषायितं सूचितम् ॥६॥

---

1. कलित–इ. दलित–ड. 2. लुण्टक–इ.फ.ग.ह.ज. 3. नास्ति–अ.व.ग. 4. कुटिलाभ्यां–फ.ज. 5. कुन्दघण्टिका–इ. 6. नास्ति–अ.ब. 7, 8. नास्ति–ड.क. 9, 10. नास्ति–ड. 11. नास्ति–क.

दयितविलोकितलज्जितहसिता ।
बहुविधकूजितरतिरसरसिता ॥७॥
विपुलपुलकपृथुवेपथुभङ्गा ।
श्वसितनिमीलितविकसदनङ्गा ॥८॥

सञ्जीवनी

(दयितेति ।) पुनः कीदृशी ? स्वयं पुरुषायितमाचरन्त्यधःस्थितस्य दयितस्य वल्लभस्य निरीक्षणेन स्वपुरुषायितविस्मरणेन [1]तदाचरणेन वा यत् हसितं तेन लज्जिता सञ्जातलज्जा । पुनः कीदृशी ? बहुविधं शिखिकलहंसादीनां नानाप्रकारं कूजितं यत्र तादृशेन रतिरसेन क्रीडारसेन रसिता सञ्जातरसा [2]हृष्टेत्यर्थः । [3]एतेन तस्या [4]रसाभिमग्नत्व(मुक्त)मिति भावः । "रसितं [5]शब्दितं हृष्टम्" इति विश्वः[6] (?) ॥७॥

(विपुलेति ।) पुनः कीदृशी ? विपुलः प्रचुरः पुलको रोमाञ्चः पृथुर्महान् वेपथुः कम्पस्तस्य भङ्गा[7]स्तरङ्गा [8]यस्यां सा । सुरताम्बुधौ रोमाञ्च[9]कम्पयोस्तरङ्गसाम्यम् । पुनः कीदृशी ? श्वसितः सुरतायासजनितो निःश्वासः; निमीलितं परमाह्लादजनितं [10]नेत्रं ताभ्यां विकसदाविर्भवद[11]नङ्गः कामो यस्याः सा । अन्योऽन्यग्निर्वायुसंसर्गं प्राप्य विकासमेति तद्वदत्रापी(ति)भावः । [12]निमीलितेत्यनेन च्युतिकालः [13]सूचितः ॥८॥

पदद्योतनिका

दयितेति । दयितविलोकितेन कृष्णमुखवीक्षणेन लज्जितं सञ्जातलज्जं सलज्जमित्यर्थः; हसितं हास्यं यस्याः [14]सा । पुनः [15]कीदृशी ? बहुविधं पिकशिखि[16]कलहंसादीनामिव नानाप्रकारं कूजितं यत्र [17]एतादृशो यो रतिरसः क्रीडारसस्तेन रसिता हृष्टा ॥७॥

विपुलेति । पुनः कीदृशी ? विपुलाः बहुलाः पुलका रोमाञ्चा यस्याः सा । [18]पृथुर्महान् वेपथुः कम्पो भङ्ग [19]इव तरङ्ग इव यस्याः[20]; पश्चात्कर्म-

---

1. नास्ति–अ.ब. 2. दृष्टेत्यर्थः–अ.ब. 3. तः 6. पर्यन्तं नास्ति–अ.ब. 4. रसनिमग्नत्व–फ.ग.ह.ज. 5. शब्दिते हृष्टे–फ.ग.ह.ज. 7. नास्ति–अ.ब. 8. यस्याः सा–फ.ग.ह.ज. 9. कम्पस्य–फ.ज. 10. नेत्रं च–फ.ज. 11. नास्ति–अ.ब. 12. निमीलितेन–इ.ग. 13. संसूचितः–इ.ग. 14, 15. नास्ति–ड. 16. कलहंससारसादीनामिव–क. 17. तादृशो रतिरसः–क. 18. तः 20. पर्यन्तं नास्ति–क. 19. नास्ति–ल.म.

श्रमजलकणभ सुभगशरीरा ।
परिपतितोरसि रतिरणधीरा ॥९॥

धारयः । [1]पुनः [2]कीदृशी ? श्वसितं सुरतायासजनितो निःश्वासो निमीलितं [3]परमानन्दावाप्तिजनितं [4]नेत्रनिमीलनं ताभ्यां विकसन् प्रकटीभवन् अनङ्गः कामो यस्याः सा । निमीलितेत्यनेन [5]रतिकालः [6]सूचितः ॥८॥

जयन्ती

दयितेति । दयितेन कृष्णेन विलोकितं आलोकनं तेन लज्जिता च सा हसिता च; स्नातानुलिप्तवत्समासः; पूर्वं लज्जिता पश्चाद्धसितेति । बहुविधैः कूजितैः सीत्कारैः रतिरसः सुरतासक्तिः तेन रसिता भाविता ॥७॥

विपुलेति । विपुलः पुलकः रोमाञ्चः पृथवः स्थूलाः वेपथवः कम्पाः भङ्गाः यस्याः सा । श्वसितं रतिश्रमेण उच्छ्वसनं निमीलनं नेत्रानुन्मीलनं तेन विकसन् अनङ्गो मन्मथो यस्याः सा। रतिविभावितरोमाञ्चकम्पौ सात्त्विकभावौ सूचितौ ॥८॥

सञ्जीवनी

(श्रमेति ।) पुनः कीदृशी ? सुरतश्रमजलकणभरेणाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा; इत्यनेन सात्त्विकगुणोदयः सूचितः । पुनः कीदृशी ? सुरतश्रमात् भुजाभ्यां श्रीकृष्णमालिङ्ग्योरसि वक्षःस्थले पतिता; निस्सहत्वं चातुर्येणाच्छादितमिति भावः । [7]कीदृशी ? रतिरणे सुरतसङ्ग्रामे धीरा चतुरा कुशला वा स्थिरा मन्दा वा[8] । परिपतितोरसीति हंसलीलाको बन्धश्च कथितः । [9]उक्तञ्च—

नारी पदद्वयं दत्त्वा कान्तस्योरुयुगोपरि ।
कटिमान्दोलयेदाशु बन्धोऽयं हंसलीलकः ॥ इति ।

"धीरः पण्डितमन्दयोः" इति विश्वः (?) । "सुभगस्सुन्दरश्च" इति विश्वः (?) । "लवलेशकणाणवः" [10]इत्यमरः (३.१.६२) ॥९॥

पदद्योतनिका

श्रमेति । [11]पुनः [12]कीदृशी ? श्रमजलकणभरेण सुरतायासघर्मजलबिन्द्वाधिक्येन सुभगं मनोज्ञं शरीरं यस्याः सा । एतेन सात्त्विकभावोत्पत्तिः सूचिता ।

1, 2. नास्ति–ड. 3. परमानन्देन–ड. 4. नेत्रनिमीलितं–ड. 5. च्युतिकालः–क.ल.म. 6. सूचित इति भावः–क. 7. तः 8. पर्यन्तं नास्ति–अ.व. 9. नास्ति–अ.ब.इ.फ.ह.ज. 10. इत्यर्थः–फ.ज. 11, 12. नास्ति–क.

श्रीजयदेवभणितहरिरमितम् ।
कलिकलुषं जनयतु परिशमितम् ॥१०॥

सात्त्विकभावाः पूर्वमुक्ताः । पुनः [1]कीदृशी ? उरसि वक्षःस्थले परिपतिता वक्षःस्थलं व्याप्य स्थिता; रतिः सुरतं रण इव, तत्र धीरा कुशला ॥९॥

जयन्ती

श्रमेति । श्रमजलस्य स्वेदस्य कणानां भरेण सुभगं सुन्दरं शरीरं यस्याः सा । उरसि प्रियवक्षसि परिपतिता । रतिरेव रणः युद्धं तत्र धीरा अचञ्चला । रतान्तवर्णनमिदम् । स्वेदोऽनुभावः ॥९॥

सञ्जीवनी

श्रीराधावर्णितं हरिरमितं सर्वजनपावनत्वेन निरूपयन् प्रार्थयते-- श्रीजयदेवेति । श्रिया युक्तेन जयदेवेन भणितं कथितं यद्धरेः रमितं विपरीतरतौ क्रीडितं तत्कलेः कलुषं वासनात्मकं परदारादिरूपं वा भक्त्यन्तरायरूपं वा पापं परिशमितं सर्वशान्ति जनयतु करोतु । अन्यत्रौपचारिकं [2]रमणं [3]श्रीराधायां पारमार्थिकमिति [4]ध्वनिः ॥१०॥

[5]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां चतुर्दशः प्रबन्धः ॥

पदद्योतनिका

[6]श्रीजयदेवेति । श्रीजयदेवेन भणितं उक्तं, [7]वर्णितमिति भावः; हरिरमितं [8]कृष्णसम्भोगः कलिकलुषं कलियुगपापं शमयतु । कीदृशं हरिरमितम् ? अतिललितं [9]मनोहरम् ॥१०॥

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां चतुर्दशः प्रबन्धः ॥

जयन्ती

श्रीजयदेवेति । श्री जयदेवेन भणितं रमितं श्रीकृष्णसुरतं कलिकलुषं चरमयुगपापं परिशमितं शान्तं जनयतु । पापं नाशयत्वित्यर्थः ॥१०॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां चतुर्दशः प्रबन्धः ॥

---

1. नास्ति—ड.क. 2. नास्ति—ग. 3. श्रीराधायाः—इ.फ.ग. 4. भावः—इ.फ.ग.ह.ज. 5. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज. 6. नास्ति—ल.म. 7. वर्णितमित्यर्थः—क.ल.म. 8. कृष्णभोगः—क. 9. मनोज्ञम्—क.

पञ्चदशः प्रबन्धः

विरहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम् ।
विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम् ॥१॥

सञ्जीवनी

चन्द्रदर्शनक्लेशेन सखीं [1]प्रत्यूचे–विरहेति । [2]अये इति खेदे[3] । [4]अयं विधुश्चन्द्रो मम हृदये सुहृदिव श्रीकृष्ण इव [5]अतीव मदनव्यथां तनोति अतिकामपीडां विस्तारयति । कीदृशः ? मनोभुवः कामस्य सुहृन्मित्रम् । [6]अथ वा [7]मदनस्य व्यथां करोति मम [8]का वार्ता इति भावः । कीदृशः ? विरहेण वियोगेन पाण्डुमुरारिमुखाम्बुज[9]सदृशद्युतिः समानकान्तिः । कीदृशः ? वेदनां ज्ञानं तिरयन्नपि हरन्नपि । "वेदना ज्ञानदुःखयोः" इति विश्वः (७१.१३४) । "[10]अये क्रोधे विषादे च सम्बुद्धौ स्मरणे च" इति विश्वः[11] (?) । "तिरोऽन्तर्धौ तिर्यगर्थे" [12]इत्यमरः (३.४.२५६) । "विधुः सुधांशुश्शुभ्रांशुरो[13]षधीशो [14]निशापतिः" इत्यमरः (१.३.१४) "पीडा बाधा व्यथा दुःखम्" इत्यमरः (१.१०.३) ॥१॥

पदद्योतनिका

विरहेति । अये सखि ! चन्द्रदर्शनविषादेन सखीं प्रति ब्रूते । [15]अयं विधुश्चन्द्रः मम हृदये मदनव्यथां कामपीडां [16]अतीवाधिक्येन तनोति [17]विस्तारयति । उद्दीपकविभावत्वात् । कीदृशो विधुः ? विरहेण वियोगेन पाण्डु [18]यत् मुरारिमुखाम्बुजं कृष्णमुखकमलं तद्वत् द्युतिः शोभा यस्य सः । पुनः कीदृशः ? वेदनामपि ज्ञानमपि तिरयन्नाच्छादयन् । पुनः कीदृशः ? मनोभुवः कामस्य सुहृन्मित्रम् ॥१॥

जयन्ती

पुनरपि राधिका प्राह–विरहेति । अये सखि ! विरहतीति विरहः तेन पाण्डु ईषद्रक्तश्वेतं मुरारेः मुखाम्बुजस्य द्युतिरिव द्युतिर्यस्य सः । अत एव

1. प्रति ब्रूते–इफ.ग.ह.ज. 2. तः 3. पर्यन्तं नास्ति–अ.ब. 4. अये–इ. 5. अतिमदनव्यथां–इ.फ.ग.ह.ज. 6. यद्वा–ग. 7. मदनव्यथां–अ.ब. 8. कामो वर्वर्ति–अ.ब. 9. सद्युतिः–ग. 10. तः 11. पर्यन्तं नास्ति–अ.व. 12. इति च–ग. 13, 14. नास्ति–इ.फ.ग.ह.ज. 15. अये–ल.म. 16. अतीवात्यर्थेन–क.ल.म. 17 विस्तारयति उद्दीपयति उद्दीपिकभावत्वात्–म. 18. नास्ति–ड.

गुर्जरीरागे एकतालीताले

समुदितमदने रमणीवदने चुम्बनवलिताधरे ।
मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥
रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ ध्रुवपदम् ॥२॥

वेदनां तिरयन् नाशयन् । मुरारिमुखसाम्यादस्यालोकने वेदनाशान्तिरिति भावः । तादृशः सन्नपि मनसि भवतीति मनोभूः तस्य सुहृत् अयं पुरोवर्ती विधुः मम हृदये शरीरे च मदनव्यथां कामपीडां अतीव तनोति । 'सुहृदय' इति पाठे 'अये' इति च्छेदः । अये दूति ! शृणुष्वेति भावः । प्रतीपालङ्कारः । अनुप्रासेन संसृष्टिः । अत्र मनोभूसुहृदपि मन्मथव्यथां करो(ती)ति विरोधः । मम तज्जनितबाधां करो(ती)ति परिहारः । द्रुतविलम्बितं वृत्तम् ॥१॥

सञ्जीवनी

पूर्वोक्तेन गीतेन कस्याश्चिद्विपरीतरतमुक्त्वा [1]सखी तस्या एव नायककृतां क्रीडामाह—समुदितेति । [2]गुर्जरीरागे [3]एकतालीताले । [4]ध्रुवरागतालानां लक्षणमुक्तमेव । स्वाधीनभर्तृकेयम् । तस्या लक्षणम्—

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्ता स्वाधीन[5]पतिका यथा ॥ इति ।

हे सखि ! अधुनाऽस्मिन्नेवावसरे या पूर्वं मधुरिपुणा रमिता तामेव विजयी[6]व्रजयुवतियूथजयेनानङ्गजयेन वा सकलसौन्दर्यादिगुणजयेन वा निःशङ्कं उक्तलक्षणो मुरारिः श्रीकृष्णो यमुनापुलिनवने [7]कृष्णातीरवने रमत इति[8]विरोधोक्तेः; किं रमते, अपि तु [9]न, [10]त्वद्विरहाग्निसन्तप्तो यमुनातीरवनं सेवत इति भावः । [11]कीदृशे वदने ? [12]समुदितः उपचितो मदनः कामो यत्र । [13]पुनः कीदृशे वदने ? रमणीयायास्तवैव वदनं [14]पुराभिवादनं यत्र । पुनः कीदृशे वदने ? चुम्बनाय वलितोऽनु[15]कूलितः पुरा तवैवाधरो यत्र तत्रैव[16]वदने रमणीवदने

---

1. नास्ति–अ.ब. 2, 3. नास्ति–अ.ब.फ.ग.ह.ज. 4. ध्रुवतालानां–अ.ब. 5. भर्तृका–इ.फ.ग.ह.ज. 6. व्रजयुवतियूथजयेन वा सकलसौन्दर्यादिगुणेन–ग. 7. नास्ति–ग. 8. विरोधोक्तिः–अ.ब. विरोधोक्तैः–फ. 9. नास्ति –अ.ब.इ.फ.ज. 10. तद्विरहाग्नि–फ.ज. मद्विरहाग्नि–ह. 11. कीदृशे वने–ब.इ. वाक्यमिदं नास्ति–ग. 12. नास्ति–इ.फ.ह.ज. 13. कीदृशे वने–इ. 14. नास्ति–ग. 15. कूलीकृतः–इ.फ.ग.ह.ज. 16. नास्ति–अ.ब.

व्रजयुवतिमुखे ध्यानप्राप्ते त्वन्मुखे वा सपुलकं रोमाञ्चसहितं यथा [1]तथा मृगमदतिलकं तव ध्यानेन तस्याः साक्षाद्वालिङ्‌ग्य लिखति। कीदृशे [2]वदने? समुदितः समुपचितो मदनः कामो यत्र। पुनः [3]कीदृशे [4]वदने? चुम्बनेन वलितश्चुबुकमुद्धृत्य सङ्कोचितः अधरो यत्र। कस्मिन्? कमिव? रजनीकरे चन्द्रे मृगमिव। मुखस्य चन्द्रसाम्यम्। [5]तिलकस्य मृगसाम्यम्। "[6]वलितं सेवितेऽपि स्याच्चुम्बनाकुञ्चनेऽपि च" इति विश्वः। "[7]यमुना [8]शमनस्वसा" इत्यमरः [9](१.१०.३२) ॥२॥

पदद्योतनिका

पूर्वस्मिन् गीते कस्याश्चिद्विपरीतरतमुक्तम्। अधुना कस्याश्चित्स्वाधीनभर्तृकाया नायककर्तृकां क्रीडामाह—समुदितेति। स्वाधीनभर्तृकालक्षणम्—

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।
विचित्रविभ्रमासक्ता स्वाधीनपतिका [10]यथा ॥

अस्य गुर्जरीरागः। हे सखि! अधुना अस्मिन् काले यमुनापुलिने यद्वनं तस्मिन् विजयी जयशीलो मुरारिः कृष्णो रमते [11]क्रीडति। कथं रमत इत्यत आह— रमणीवदने कान्तामुखे सपुलकं रोमाञ्चसहितं यथा स्यात्तथा मृगमदतिलकं कस्तूरीतिलकं [12]लिखति। कीदृशे वदने? समुदितः समुपचितः मदनः कामो यत्र; [13]सकाम इत्यर्थः। चुम्बनेन वलितः सम्मुखीकृत्य सङ्कोचितः अधरो [14]यस्य [15]तस्मिन्; चुम्बनं दत्त्वा तिलकं [16]लिखतीत्यर्थः। कस्मिन्? क इव? रजनीकरे चन्द्रे मृगमिव [17]लिखतीत्यर्थः ॥२॥

जयन्ती

समुदितेति। चुम्बने वलितः सङ्कुचितः अधरो यस्य तस्मिन्। समुद्दीपितः मदनो येन तस्मिन्। रमण्याः कस्याश्चिद्वदने मृगमदेन कस्तूर्या तिलकं विशेषकं सपुलकं रोमाञ्चसहितं यथा स्यात्तथा रजनीकरे चन्द्रे मृगमिव लिखति। अत्र विम्बप्रतिविम्बभावेन मृगस्य तिलकस्यैक्यात् रजनीकरोपमानेन

---

1. नास्ति—इ.फ.ग.ह.ज. 2. वने—अ.ब. 3, 4. नास्ति—अ.ब.ग. 5. मृगस्य तिलकसाम्यम्—अ.ब.इ.फ.ग.ह.ज. 6. तः 9. पर्यन्तं नास्ति—अ.व. 7. कालिन्दी सूर्यतनया यमुना च यमस्वसा—फ.ज. 8. तु यमस्वसा—इ.ह. च यमस्वसा—ग. 10. यथेति—ल.म. भवेदिति—क. 11. क्रीडते—ड.क. 12. नास्ति—क.म. 13. सकामेत्यर्थः—ड. 14. नास्ति—क. 15. यस्मिन्—क. 16, 17. लिखति—क.

घटयति [1]सघने चयुकुगगगने मृगमदरुचि[2]रूषिते ।
[3]मणिसरममलं तारकपटलं नखपदशशिभूषिते[4] ॥३॥

वदनसाम्यात् उपमालङ्कारः ॥ ध्रुवाया व्याख्यानम् । विजयीवासौ मुरारिः अधुना चन्द्रिकोज्ज्वलनिशायां यमुनायाः पुलिनस्थवने रमते क्रीडति ॥२॥

सञ्जीवनी

पुनरपि तामेव वर्णवति–[5]घटयतीत्यादिना। कुचयुगगगने स्तनद्वयोत्सङ्गे [6]अमलमुज्ज्वलं मणिसरं मुक्ताहार[7]स्तमेव तारकपटलं नक्षत्रसमूहं घटयति [8]योजयति । [9]आकाशस्थां शोभामत्र निर्माति । कीदृशे ? [10]सघने निविडे मांसले वा । पुनः कीदृशे ? मृगमदरुचिरूषिते [11]कस्तूरीक्षितिलिप्ते । कुचयोरत्राकाशस्य मृगमदलिप्तयोः पयोधरत्वेन मणिसरस्य नक्षत्रसमूहत्वेन च साम्यमित्युत्प्रेक्षारूपकालङ्कारः । पुनः कीदृशे ? नखपदं नखक्षत तदेव शशी तेन भूषितेऽलङ्कृते । नखचिह्नस्यार्धेन्दुसाम्यम् । तद्यथा (पञ्च) सायके—

"अर्धेन्दुसङ्काशमिदं रसज्ञैरर्धेन्दुसंज्ञं कथितं समासात्" । इति । "घनः सान्द्रे दृढे [12]दाढर्चे विस्तारे लोहमुद्गरे" इति विश्वः (७०.३) । "अभिषङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम्" [13]इत्यमरः (३.३.२९) । "[14]नक्षत्रे चाक्षमध्ये च तारकापि च" इति विश्वः(?) । "सुघनं निविडे प्रोक्तं विशाले दृढसारके" इति वैजयन्ती। "हारो मणिसरो मुक्ताकाञ्चनादिविनिर्मिते" इत्यपि च । "समूहे पटलः पूजाभेदेऽपि" इति भोजे[15] ॥३॥

पदद्योतनिका

[16]घटयतीति । सुघने निबिडकुचयुगगगने स्तनद्वयाकाशेऽमलं निर्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं नक्षत्रसमूहं घटयति [17]योजयति । [18]पुनः [19]कीदृशे ? मृगमदरुचिः कस्तूरीदीप्ति[20]स्तया भूषिते । पुनः कीदृशे ? नखपदं

1. सुघने–नि.सा.इ.ड. 2. भूषिते–इ.ड. 3. मणिरस–अ. 4. पदमिदं तृतीयत्वेन दृश्यते–नि.सा.इ.ड. 5. तः 7. पर्यन्तं नास्ति–ब. 6. निर्मलम्–अ.ब.इ.ग. 8. नास्ति–अ.ब. 9. आकाशस्याभामात्रं–अ.ब. 10. सुघने–इ.फ.ग.ह.ज. 11. कस्तूरीदीप्तिदीप्ते–इ.ह. कस्तूर्यादिलिप्ते–ग. कस्तूरीदीप्तिजिते–फ.ज. 12. दीर्घे–ग. 13. इति धरणिः–इ.फ.ग.ह.ज. 14. तः 15. पर्यन्तं नास्ति–अ.ब. 16. घटयति–ड.ल.म. 17. नास्ति–ड. 18, 19. नास्ति–ड.ल.म. 20. तथा–ड.

घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ।
कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने[1] ॥४॥

नखक्षतं तदेव शशी [2]द्वितीयाचन्द्रस्तेन भूषितेऽलङ्कृते; गगनपक्षे [3]शोभना मेघा यस्मिन् । "[4]घनं सान्द्रे दृढे दार्ढ्ये विस्तारे लोहमुद्गरे" इति विश्वकोशे[5] (७०.३) ॥३॥

जयन्ती

घटयतीति । किञ्च सुघने निबिडे नखानां पदान्येव शशिनः तैः भूषिते कृतनखक्षत इत्यर्थः । मृगमदस्य रुच्या भूषिते; आलिप्त इत्यर्थः । कुचयुगमेव गगनं तस्मिन् अमलं मणिसरं मुक्तामणिहारं तमेव तारकाणां पटलं समुदायं घटयति । मुक्ताहारं क्षिपतीत्यर्थः । अत्र कुचयुगस्य गगनत्वारोपेण मुक्तानां नक्षत्रारोपत्वमिति परम्परितम् । नखपदस्य चन्द्रत्वारोप इति सावयवाख्यरूपकम् ॥३॥

सञ्जीवनी

किञ्च घनेति । श्रीकृष्ण ! सम्प्रति [6]ध्यानेन तव [7]समागमेन तस्याश्चिकुरे; जातावेकवचनम्; केशेषु कुरुबककुसुमं शोणमम्लानपुष्पं रचयति रचना[8]विशेषं करोति । कीदृशे ? मेघसमूहवन्मनोहरे । [9]अन्यया सह रमणमाशङ्क्य किमर्थं खेदं प्राप्स्यतीति ध्वनिः । कीदृशम् ? चपलावत् विद्युदिव सुषमा शोभा यस्य तत् । यथा मेघे विद्युद्भाति तथा चिकुरे कुसुमानीति भावः । कीदृशे ? रतिपतिः कामः स एव मृगस्तस्य वने । यथा कानने मृगस्तथा चिकुरे कामस्तस्याः । [10]करचरणादिषु कामः किमु वक्तव्यमिति [11]भावः । पुनः कीदृशे [12]चिकुरे ? तरलितानि [13]चञ्चलीकृतानि तरुणानामाननानि श्रीकृष्णस्य वा येन [14]यस्मिन्वा ॥४॥

---

1. पदमेतत् द्वितीयत्वेन दृश्यते–नि.सा. इ.ड. 2. द्वितीयः चन्द्रः–ड. 3. शोभमानाः–ल.म. 4. तः 5. अयं भागः पञ्चमपदव्याख्यानान्ते दृश्यते–ड. 6. तव ध्यानेन तव समक्षमेव तस्याश्चिकुरे–फ.ज. 7. समागमे–ग. समाने–ह. 8. विशेषं वा–फ.ज. 9. त्वया–ग. 10. करणादिषु–अ.ब. 11. नास्ति–फ.ज.ह 12. नास्ति–फ.ग.ह.ज. 13. चञ्चलानि कृतानि–फ.ज. 14. यस्मिन्वेत्यर्थः–अ.ब.

जितबिसशकले मृदुभुजयुगले [1]करतलनलिनीदले ।
मरकतवलयं मधुकर[2]निचयं वितरति हिमशीतले ।।५।।

पदद्योतनिका

घनेति । घनचयरुचिरे मेघसमूहवत् मनोहरे चिकुरे केशपाशे कुरवक-कुसुमं [3]रक्तगेंठीपुष्पं रचयति यथास्थानमर्पयति । पुनः [4]कीदृशे ? तरलितानि [5]चञ्चलीकृतानि तरुणानां मानसानि येन; अति[6]सुन्दरतयेत्यर्थः । कीदृशं [7]कुसुमम् ? चपला विद्युदिव सुषमा शोभा यस्य; लक्ष्यालक्ष्यतया लोहितत्वाच्च विद्युत्साम्यम् । पुनः कीदृशे ? रतिपतिः कामः स एव मृगस्तस्य कानने । यथा मृगवासो वने तथा चिकुरे [8]काम इति; कामजनक इत्यर्थः । अन्यस्मिन्नपि मेघे विद्युद्भवति । तरुणानां मेघसमयः कामाविर्भावजनक इति । मेघोदये हि [9]हरिणीनामप्यतिसुखमुत्पद्यते ।।४।।

जयन्ती

घनेति । तरलितं चञ्चलीकृतं तरुणस्य कृष्णस्य आननं मुखं येन तस्मिन् । यद्वा तरलितः तरुणो यया तस्याः तरलिततरुणायाः आनने रतिपतेः मदनस्य मृगकानने मृगयावने । घनचयः मेघसमुदाय इव रुचिरे रमणीये चिकुरे । चपलायाः विद्युतः सुषमा शोभा यस्मिन् तत् । "सुषमा परमा शोभा" इत्यमरः (१.३.१७) । कुरवकस्य रक्तवर्णबाणस्य कुसुमं रचयति । स्रजं गुम्फति । "कुरवकोऽरुणे" इत्यमरः (२.४.७५) । रक्तत्वाद्विद्युदुपमानीकरणम् ।।४।।

सञ्जीवनी

किञ्च जितेति । श्रीकृष्णस्तस्या मृदुभुजयुगले कोमलबाहुयुग्मे मरकतवलयं इन्द्रनीलमणिखचित[10]कङ्कणमेव भ्रमरसमूहं वितरत्यर्पयति । एतेन

---

1. तरलितनलिनीदले–इ. 2. निलयं–इ. 3. रक्तगोडिपुष्पं–ल. रक्तगोटिपुष्पं–म. रक्तझिण्टीपुष्पं–क. 4. नास्ति–क. 5. नास्ति–ल. 6. सुन्दरेत्यर्थः–ल. सुन्दरयेत्यर्थः–म. 7. कुरबककुसुमम्–क. 8. कामवास इति कामजनके इत्यर्थः–क. 9. विरहिणामप्यतिदुःखमुत्पद्यते–क. हरिणीनामप्यतिसुखमुद्योतते–ल.म. 10. कङ्कणे च–ग.

रतिगृहजघने विपुलापघने मनसिजकनकासने ।
मणिमयरसनं तोरणहसनं विकिरति कृतवासन ॥६॥

मरकतवलयस्य भ्रमरसमूहत्वेन भुजयुगल[1]सौरभाधिक्यं सूचितम् । कीदृशे ? जितमभिभूतं [2]तिरस्कृतं मदनेन गौरवतया वा बिसशकलं मृणालसमूहो येन । पुनः कीदृशे ? [3]करतलं नलिनी[4]दलसदृशं यत्र । पुनः कीदृशे ? [5]हिमशीतले हिमादपि शीतले विरहसन्ताप[6]हारित्वात् । "कङ्कणे वलयो मतः" इति धरणिः (?) ॥५॥

पद्द्योतनिका

जितेति । मृदुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरकतरत्नखचित-कङ्कणमेव मधुकरनिचयं भ्रमरसमूहं [7]वितरति ददाति विरचयतीत्यर्थः । कीदृशे [8]भुजयुगले ? जितविसशकले [9]जितकमलिनीदले । भ्रमरसमूह-स्तिष्ठतीति । [10]करतलनलिनीदले करतलमेव पद्मिनीपत्रं तादृशे[11] । रूप-कालङ्कारः ॥५॥

जयन्ती

जितेति । हिमवच्छीतले जितं बिसशकलं कमलनालखण्डो येन तस्मिन् । मृदु च तत् भुजयुगलञ्च तस्मिन् । एवं तरलितनलिनीदले कमलपत्रे । मरकतवलयमेव मरकतकङ्कणमेव मधुकरस्य निलयं आश्रयं सदृशमित्यर्थः । वितरति तनोति । अत्रापि रूपकालङ्कारो व्यस्तः ॥५॥

सञ्जीवनी

किञ्च रतिगृहेति । श्रीकृष्णः रतेः सुरतशृङ्गारस्य वा गृहे जघने नितम्बे मणिमयरसनं मुक्तामयीं मेखलां विकिरत्यर्पयति । कीदृशम् ? [12]तोरण-

---

1. सौरभ्याधिक्यं सूचितमिति–फ.ग.ह.ज. 2. निजसम्मर्दनेन–इ.फ. ग.ह.ज. 3. करतलमेव नलिनीदलं यत्र–ग. करतलमेव कमलिनीदलं यत्र–इ.ह. करतलमेव नलिनीदलं कमलिनीदलं यत्र–फ.ज. 4. दलं–इ. 5. नास्ति–इ.फ. ग.ह.ज. 6. हारकत्वात्–ग. 7. विरचति ददाति । विरचयतीत्यर्थः–क. 8. नास्ति–ड. 9. नास्ति–ड.ल.म. 10. तः 11. पर्यन्तो भागः पञ्चमपद-व्याख्यान्ते दृश्यते–ड. नास्ति–ल.म. 12. तोरणस्य हसनं–अ.ब. नास्ति–इ.फ.ग.ह.ज.

हसनं तोरणस्य [1]वनमालिकाया हसनं [2]निन्दकम्। राज्ञि सिंहासनोपविष्टे [3]वनमालिका बध्यत इति भावः। [4]कीदृशे ? विपुलापघने महत्तरमांसले। पुनः कीदृशे ? कामस्य [5]कनकासने सुवर्णासने। एतेन गौरवत्त्वमतिशयेन सूचितमिति। पुनः कीदृशे ? कृतं कामेन वासनं निवासो वस्त्रं वा सुगन्धो वा यत्र। "अङ्गं प्रतीकोऽवयवोऽ[6]पघनोऽथ कलेवरम्" इत्यमरः (२.६.७०)। "[7]वासनं वसने वाऽथ स्थाने यानेऽवधूयने" इति विश्वः[8] (७१.४२) ॥६॥

पदद्योतनिका

रतीति। रतेः शृङ्गारस्य गृहे आश्रये जघने नितम्बे मणिमयरसनं मुक्तामयीं मेखलां विकिरति ददाति। कीदृशे जघने ? विपुलो महत्तरोऽपघनः शरीरं यस्य। अतिमांसल इत्यर्थः। पुनः कीदृशे ? मनसिजस्य [9]कामस्य कनक-निर्मितं सिंहासनमिव (विद्यमाने)। [10]कीदृशम् मणिमयरसनम् ? [11]तोरणहसनं तोरणस्य [12]वन्दनमालिकाया हसनं निन्दकम्। यदा राजा सिंहासने उपविशति तदा [13]वन्दनमालिका वध्यते। [14]पुनः [15]कीदृशे ? कृतवासने कृतं दत्तं वासनं वस्त्रं यस्मिन् वस्त्रोपरि मेखलां बध्नातीत्यर्थः। यद्वा कृतं कामेन वासनं स्थानं यत्र। [16]वासनं वा पाठः। "वासनं वसने वासस्थाने ज्ञाने च धूपने" इति विश्वः (७१.४२) ॥६॥

जयन्ती

रतिगृहेति। विपुलः अपघनः अवयवो यस्मिन् तस्मिन्। विशालभाग इत्यर्थः। मनसिजस्य कनकासनं सिंहासनं तस्मिन् निवासस्थाने तदालोकनेन उद्दी-पनं भवतीति तदारोपः। कृतं वासनं अगुरुधूपनेन मृगमदलेपनेन वा परिमलितं तस्मिन्। रतिः काममहिषी तस्याः गृहञ्च तत् जघनं तस्मिन् सम्भोगस्थलमिति भावः। तोरणस्य बहिर्द्वारस्य हसनं उपहासकम्। मणिमयरसनं रत्नखचितकाञ्चीं विकिरति निबध्नातीत्यर्थः। तोरणग्रह उत्सवकाले रसालपल्लवादिमालाबन्धनं लोके प्रसिद्धतोरणे बध्यते इति तोरणशब्देन रसालसर इति कथितम् ॥६॥

---

1. चन्दनमालिकायाः–ह.ज. 2. निन्दनम्–इ.फ.ग.ह.ज. 3. चन्दन–फ.ज. 4. नास्ति–फ.ज. 5. नास्ति–इ.फ.ग.ह 6. जवनो–इ.फ.ग.ह.ज. 7 तः 8. पर्यन्तं नास्ति–अ.ब. वासनं वसने वीरासने ज्ञाने च धूपने–विश्वः 9. नास्ति–क. 10. कीदृशे–ल.म. कीदृशम्–क. 11. नास्ति–ल.क.म.ड. 12. चन्दन–क. 13. चन्दन–क. 14, 15. नास्ति–ड.ल.मः 16. वासनं पाठः–क.

चरणकिसलये कमलानिलये नखमणिगणपूजिते ।
[1]बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥७॥

सञ्जीवनी

किञ्च चरणकिसलय इति । [2]श्रीकृष्णस्तस्याश्चरणपल्लवे यावकभरणं अलक्तकपूर्णं जनयति करोति तस्यास्तदनु शोभार्थम् । कीदृशे ? हृदि योजिते नन्दसूनुना सुभृशमतिशयेन तव प्रेमातिशयाय स्वहृदयं प्रापिते । हृदि [3]तच्चरणं धृत्वा यावकं रचयतीत्यर्थः । पुनः कीदृशे [4]हृदि ? कमलायाः लक्ष्म्याः [5]श्रीराधाया निलये मन्दिरे । पुनः कीदृशे ? नखा एव [6]मणिगणाः तैः पूजितेऽलङ्कृते । कीदृशम् ? बहिर्भूतमपवरणं आवरणं यस्य; स्पष्टमित्यर्थः । आलक्तकालङ्कारेण हृद्यनुरागो बहिः स्फुटं जनित इति भावः ॥७॥

पदद्योतनिका

चरणेति । चरणकिसलये पादपल्लवे यावकभरणं [7]अलक्तकपूरणकं जनयति करोतीत्यर्थः । कीदृशे चरणकिसलये ? हृदि योजिते [8]कृष्णेनानुरागातिशयात् स्वहृदयं प्रापिते । स्वहृदये तच्चरणं कृत्वा यावकं रचयतीत्यर्थः । कीदृशे हृदि ? कमलानिलये [9]लक्ष्म्या आश्रये । [10]कीदृशे चरणकिसलये ? नखा एव मणिगणाः पुष्परागादिरक्तसमूहास्तैः पूजिते अर्चिते । कीदृशं यावकभरणम् ? बाह्यमाच्छादकं बहिर्भूतं अपवरणं [11]संवरणं यस्य स्पष्टमित्यर्थः; नत्वान्तरमिति ॥७॥

जयन्ती

चरणेति । कमलायाः लक्ष्म्याः शोभायाः निलये आश्रये । गोपीचरणस्य लक्ष्म्यालयत्वाभावेऽपि लक्ष्मीकान्तवक्षस्सम्बन्धवर्णनाद्वक्षःस्थलस्थलक्ष्मीसम्बन्धाद्वा कमलानिलयत्वं तत्काले सङ्गच्छते । हृदः विशेषणत्वे अस्थानत्वं स्यादिति चरणविशेषणत्वम् । नखा एव मणिगणाः तैः पूजिते शोभिते हृदि माधववक्षःस्थले योजिते प्रयुक्ते; बन्धविशेषमानावस्थायां वक्षस्सम्बन्धात् । तदैकाग्रत्वेन माधवमनस्सिद्ध्यते । चरण एव किसलये पल्लवे बहिः उपकरणं उपचाररूपं यावकं लाक्षारसः तस्य भरणं लेपनं जनयति रचयति ॥७॥

1. बहिरुपकरणं–इ. 2. श्रीकृष्णश्चरणपल्लवे–इ.फ.ग.ह.ज. 3. तव चरणं–ग. 4. नास्ति–अ.ब. 5. नास्ति–अ.व. 6. मणिसमूहाः–इ.फ.ग.ह.ज. 7. अलक्तभूषणं–क. 8. कृष्णेन रागातिशयात्–क. 9. लक्ष्म्याश्रये–क. 10. कीदृशकिसलये–ड. 11. नास्ति–ड.

रमयति [1]सुदृशं कामपि [2]सुभृशं खलहलधरसोदरे ।
किमफलमवसं चिरमिह विरसं वद सखि विटपोदरे ॥८॥

सञ्जीवनी

किञ्च [3]रमयतीति । हे सखि ! खलार्थं हलं [4]धारयति तस्य [5]सोदरे भ्रातरि [6]निर्दयं नखक्षतकर्तुः सहोदरे सदृशे । कामपि नायिकां [7]त्वादृशीं [8]सुदृशं शोभनाक्षीं [9]तच्चरणं सुभृशमतिशयेत रमयति सति इह विटपोदरे धूर्तलतानिकुञ्जे अफलं निष्प्रयोजनं विरसं रसरहितं [10]तथा चिरं बहुकालं किं अवसम् ? किमर्थं [11]मुषिताऽस्मि [12]वद कथय । मौनं त्यक्त्वा तत्सन्तोषार्थं गमनं प्रति [13]सानूकूलवाक्यं कथयेत्यर्थः । "विटपः पल्लवे शृङ्गे विस्तारे स्तम्बशाखयोः" इति [14]विश्वः (७६.१३) ॥८॥

पदद्योतनिका

रमयतीति । हे [15]सखि ! खलहलधरसोदरे खलस्य दुर्जनस्य बलभद्रस्य [16]सोदरे भ्रातरि कृष्णे [17]कामपि [18]सुदृशं कामपि नायिकां सुभृशं यौवनरूपगुणादिभिस्तुल्यं यथा स्यात्तथा [19]रमयति सति क्रीडयति सति इह विटपोदरे लतागृहे अफलं निष्प्रयोजनं विरसं रसरहितं यथा स्यात्तथा चिरं बहुकालं किमवसम् ? स्थिताऽस्मि हे सखि ! वद कथय । [20]वाहिकस्य सोदर इति साभिप्रायम् । खल इति क्रोधाविर्भावेन । "विटपः पल्लवे शृङ्गे विस्तारे स्तम्बशाखयोः" इति विश्वः (७६.१३) ॥८॥

जयन्ती

रमयतीति । खलः असौ हलधरस्य सोदरः अनुजः तस्मिन् । सदृक् समाना । प्रकरणवशात् खलत्वगुणयुक्ततया माधवसममिति ईर्ष्यावचनम् । कामपीति । ज्ञाते नामन्यपि असहनतयाऽनामग्रहणेन कामपीति । सुदृशं माधव-

1. सुभृशं–ड.क. 2. सदृशं–क. सुदृशं–ड. 3. नास्ति–इ.फ.ग.ह.ज. 4. धारयतीति–इ.फ.ग.ह.ज. 5. सहोदरे–इ.फ.ग.ह.ज. 6. निर्दयं–इ.फ.ग.ह.ज. 7. नास्ति–अ.ब. 8. नास्ति–ग. 9. चरणमतिशयेन–ड. 10. नास्ति–अ.ब. 11. उषितासि–अ.ब. 12. नास्ति–अ.ब. 13. स्वानु–फ.ज. 14. विटपोऽद्रौ लवणे धूर्तमूर्खके खदिरेऽपि च इति विश्वः–अ.ब. 15. नास्ति–क. 16. नास्ति–ड.ल.म. 17. कामपि सुभृशं अत्यर्थं कामपि नायिकां सदृश यौवनगुणादिभिस्तुल्यं–क. कामपि सुभृशं अत्यर्थं कामिना सदृश यौवन तपोगुणादिभिस्तुल्य–ल.म. 18. सदृशं–ड. 19. क्रीडयति–क.ल.म. 20. वाहकस्य–क.

इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ।
कलियुगचरितं न वसतु दुरितं कविनृपजयदेवके ।।९।।

वशीकारकरणसमर्थदृक्त्वेन सुदृशं रमयति सति हे सखि! इह विटपोदरे कुञ्जे विरसं नीरसं पर्युषितं अफलं माधवाश्लेषफलशून्यं यथा तथा चिरं अवसं स्थिताऽस्मि । यद्वा काकुः; किमर्थं स्थातव्यं एहि गच्छाम इति भावः । यद्वा किमर्थं अहं स्थिता अहो मूढतेति ।।८।।

सञ्जीवनी

गीतफलमाह—इहेति । इह [1]काव्यकर्तरि कवीनां नृपे कविराजे जयदेवके कलियुगस्य चरित दुरितं पापं न वसतु न तिष्ठतु । कीदृशे ? रसस्य श्रीराधाकृष्णशृङ्गारस्य भणन कथनं यत्र । पुनः कीदृशे ? कृतं हरेर्गुणगणनं सौन्दर्यादिपरिसंख्या येन । [2]पुनः किंविशिष्टे ? मधुरिपोः [3]श्रीकृष्णचन्द्रस्य चरणसेवके [4]चरणारविन्ददासे । [5]मधुसूदनपदस्य व्या(ख्या) पूर्ववद् ज्ञेया ।।९।।

[6]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां पञ्चदशः प्रबन्धः ।

पदद्योतनिका

इहेति । [7]इह मयि कविनृपजयदेवके कलियुगचरितं कलियुगकृतं [8]दुरितं पापं न वसतु न तिष्ठतु । प्रार्थनायां लोट् । कीदृशे ? रसभणने कृष्णशृङ्गारकथके । कर्तरि युच् । पुनः [9]कीदृशे ? कृतहरिगुणने कृतं हरेर्गुणनं [10]गुणकीर्तनं चिन्तनं येन । पुनः [11]कीदृशे ? मधुरिपोः कृष्णस्य पदसेवके ।।९।।

[12]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां पञ्चदशः प्रबन्धः ।

जयन्ती

इहेति । इह अष्टपद्यां रसभणने शृङ्गाररसकथने कृतं हरेः गुणनं कीर्तनं येन तस्मिन् । मधुरिपुपदस्य सेवके । कविनृपश्चासौ जयदेवकः तस्मिन्; स्वार्थे कः । कलियुगे चरितं दुरितं पापं न वसतु मा तिष्ठतु ।।९।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां पञ्चदशः प्रबन्धः ।

---

1. काव्यवक्तरि—इ. 2. कीदृशे—इ.फ.ग.ह.ज. 3. श्रीकृष्णस्य—इ.फ.ग.ह.ज. 4. नास्ति—इ.फ.ग.ह.ज. 5. मधुसूदनपदं पूर्ववत्—इ.फ.ग.ह.ज. 6. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज. 7. इहापि—ड. 8. नास्ति—ड. 9. नास्ति—ड. 10. नास्ति—ड.ल.म. 11. नास्ति—ड. 12. नास्तीयं पुष्पिका—ड.क.ल.म.

षोडशः प्रबन्धः

[1]नायातो यदि निर्दयो यदि शठस्त्वं दूति किं दूयसे
स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम् ।
पश्याद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणै-
रुत्कण्ठार्तिभरादिव स्फुटदिदं चेत. स्वयं यास्यति ।।१।।

सञ्जीवनी

[2]एवमन्यवधूरमणोत्कर्षं श्रुत्वा सञ्जातनिर्वेदा दूतीमाश्वासयन्तीव स्वयमेवाह—[3]नायातेति । हे सखि ! [4]दूति दौत्यकर्मकुशले यदि निर्दयो[5]मयि दयाशून्योऽत एव शठो धूर्तः [6]कुण्ठितरागो निगूढापराधो वा नायातो नागतस्तर्हि[7] [7]त्वं किं दूयसे वृथा सन्तप्यसे । किं च वञ्चकोऽपि स्वच्छन्दं रमते । अनागमने हेतुमाह—बहुवल्लभः । बह्वीनां वल्लभः प्रियो बह्व्यो वल्लभा यस्येति वा । तदानयने ते तव किं न दूषणं कोऽपराधोऽसामर्थ्यात् । ननु तच्छ्रुत्वा गन्तुमुदितामिवाह—पश्याद्येति । इदं मच्चेतः प्रियस्य वल्लभस्य श्रीकृष्णस्य [8]सङ्गमाय मिलनायालिङ्गनाय वा अद्य शीघ्रं [9]स्वयमेव यास्यतीति पश्य जानीहि । कीदृशं [10]चेतः ? [11]दयितस्य प्रियस्य गुणै. सौन्दर्यादिभिराकृष्यमाणं वशीकृतम् । पुनः कीदृशम् ? उत्कण्ठया प्रियदर्शनेच्छया या आर्तिर्मनःपीडा तस्या भरादाधिक्यादिव स्फुटत् बहुधा भवत् [12]बहिर्भवदिति वा । अपरमपि वस्त्वन्तरसङ्कुले स्थाने स्थितं वस्तु साङ्कर्याद्बहिर्भवति स्फुटत्यनेकधा भवति च । एतेन श्रीकृष्णगुणानां प्राणहारित्वमुक्तमिति भावः । नातः परं त्वया [13]तदानयनायायासः कर्तव्य [14]इत्यर्थः ।।१।।

पदद्योतनिका

कृष्णस्यानागमनदुःखितां सखीमाश्वासयन्त्याह—नायात इति । हे सखि दौत्यकर्मकुशले ! यदि निर्दयो दयारहितः, शठो[15]धूर्तो वञ्चकः कृष्णो

1. नायातस्सखि–इ.फ.ग.ह.ज.ड. 2. एवमन्यव्रजयुवतीरमणोत्कर्षं–इ.फ.ग.ह.ज. 3. नायात इति–इ.फ.ग.ह.ज. 4. हे दूति–इ.ग.ह. 5. मद्दयाशून्यो–फ.ग.ह.ज. 6. कुण्ठितानुरागो–इ.फ.ग.ह.ज. 7. नास्ति–ग 8. सङ्गमायालिङ्गनाय वा–ग. 9. स्वयमेव वा–इ.फ.ह.ज. स्वयमेवायास्यतीति–ग. 10. नास्ति–अ.ब.इ.ग.ह. 11. दयितस्य गुणैः–फ.ज. दयितस्य प्रियगुणैः–ग. 12. नास्ति–अ.ब. 13. तदानयनाय प्रयासः–ग. 14. इति–इ.फ.ग.ह.ज. 15. नास्ति–क.

[1]देशाखरागे रूपकताले

अनिलतरलकुवलयनयनेन
तपति न सा किसलयशयनेन ।
सखि या रमिता वनमालिना ॥२॥ ध्रुवपदम् ॥

नाऽऽयातस्तर्हि किं दूयसे [2]समुपतप्ता भवसि । अनागमने कारणमाह—बहुवल्लभः बह्व्यो वल्लभाः स्त्रियः यस्य सः कृष्णः स्वच्छन्दं स्वेच्छया तत्र स्थाने रमते [3]क्रीडति । ते तव किं दूषणं कोऽपराधः । तर्हि कथमत्रागमिष्यतीत्यत आह—पश्येति । हे सखि ! अद्य ममेदं चेतो मनः प्रियसङ्गमाय कृष्णसम्भोगार्थं स्वयमेव यास्यति । त्वं पश्य जानीहि । [4]कीदृशं चेतः ? दयितस्य कृष्णस्य गुणैः सौन्दर्यादिभिराकृष्यमाणं वशीकृतम्[5] । पुनः [6]कीदृशम् ? उत्कण्ठा औत्सुक्यं आर्तिः कामपीडा तयोर्भरोऽतिशयस्तस्मादिव स्फुटत् वहिर्भवत् । अपरमपि वस्त्वन्तरं सङ्कुले स्थाने स्थितं वस्तु साङ्कर्याद्वहिर्भवतीति; अन्योऽपि गुणै रज्जुभिराकृष्टस्सन् [7]प्रयातीति ॥१॥

जयन्ती

नायात इति । हे सखि प्रियकारिणि दूति ! निर्दयः कारुण्यरहितः शठः सङ्केतदानच्छलेन मां प्रस्थाप्य अन्यां गत इति गूढविप्रियकृत्त्वाच्छठः नायातः नागतश्चेत्त्वं किं दूयसे विषण्णासि किम् ? शठत्वमेव बह्व्यः वल्लभाः कान्ताः यस्य सः । स शठः स्वच्छन्दं अप्रतिवन्धकं रमते । तत्र तदानयनाभावकार्ये ते दूत्याः दूषणं किम् ? न किमपि । तत्प्रतिपादनेन मदभिसरणकारित्वेन तवैवैतद्दूषणमिति व्यङ्ग्यम् । दयितस्य कृष्णस्य गुणैः सौन्दर्यातिकौशलादिगुणैः आकृष्यमाणं इदं मदीयं चेतः उत्कण्ठा औत्कण्ठ्यं कालासहिष्णुता तया आर्तिः पीडा तस्याः भयादिव स्फुटत् भिद्यमानं सत् प्रियस्य कान्तस्य सङ्गमाय स्वयं यास्यति चित्तविस्फोटां दशमीमवस्थां यास्यामीति व्यङ्ग्यम् ॥१॥

सञ्जीवनी

तत्र गतमपि चेतः सन्तप्तमेव भविष्यतीत्याह—अनिलेति । अक्रीडितायास्तु दुःखं समुचितमेव, क्रीडितायाः क्लेशं पश्य । वनं मद्वियोगाश्रुजलं; तन्मा-

---

1. देववराडिरागे–नि.सा. देशाङ्करागेण एकतालीतालेन गीयते–इ. देशवरागः रूपकतालः–ड. देशाङ्करागेणैकतालीतालेन–क. 2. सन्तप्ता–क. समुत्तप्ता–ल.म. 3. नास्ति–क. 4. तः 5. पर्यन्तं नास्ति–क. 6. नास्ति–ड. 7. प्रयातीति भावः–क.

विकसितसरसिजललितमुखेन ।
स्फुटति न सा मनसिजविशिखेन ॥३॥

लिना । हे सखि या वनमालिना रमिता क्रीडिता सा किसलयशयनेन मृदुपल्लवतल्पेन न तपति; न सन्तप्ता भवति ? अपि तु भवत्येव । कुतः ?[1] सङ्गानन्तरं विरहशङ्कयाऽनुभूतरसोऽतिदुःखप्रदो भवतीति [2]अरमितावन्नैराश्यमागता । कीदृशेन वनमालिना ? अनिलेन वायुना तरलं चञ्चलं [3]यत्कुवलयं कमलं तद्वन्नयने नेत्रे यस्य तेन । अस्मिन् गीते संयोगवियोगौ ज्ञातव्यौ । राग-[4]तालध्रुवपदं पूर्ववत् ॥२॥

पदद्योतनिका

देशवरागः । अनिलेति । हे सखि ! या नायिका वनमालिना कृष्णेन रमिता क्रीडिता सा किसलय[5]शयनेन पल्लवशय्यया न तपति । [6]अपि च सा या वनमलिना अरमिता मादृशी सा किसलयशयनेन (न) तपति अपि तु तपत्येवेति काकुः[7] । [8]कीदृशेन ? अनिलेन वायुना तरलं चञ्चलं यत्कुवलयं नीलोत्पलं तद्वन्नयने यस्य [9]सः; तेन सर्वरसानामवलोकनादिति भावः । अस्मिन् गीते सम्भोगवियोगौ ज्ञातव्यौ ॥२॥

जयन्ती

तत्सम्भोगगुणान् प्रकटीकरोति—अनिलेति । अनिलेन वायुना तरलं चञ्चलं नीलोत्पलं तद्वन्नयने यस्य तेन वनमालिना या रमिता सम्भुक्ता सा स्त्री किसलयशयनेन पल्लवशय्यया न तपति । विरहिण्याः शीतोपचर्याकृतशय्यया सन्तापो न भवतीत्यर्थः । या रमिता वनमालिनेति द्विः पठनीयम् । ध्रुवास्थवनमालिविशेषणानि पदपूर्वदलस्थानि ध्रुवास्थयच्छब्दाकाङ्क्षापूरकाणि उत्तरदलस्थानीति ध्रुवसहितं पदं प्रत्येकमेव वाक्यम् ॥२॥

सञ्जीवनी

विकसितेति । या रमिता वनमालिनेति सर्वत्र योज्यम् । सा मनसिजविशिखेन कामबाणेन न स्फुटति विद्धा न भवति अपि तु [10]भवत्येवेति पूर्व-

---

1. संयोगानन्तरं–इ.फ.ग.ह.ज. 2. परमेतावन्नैराश्यमागता–फ.ज. 3. यत्कुवलयं तद्वन्नेत्रे–अ.ब.ग. 4. तालादिध्रुवपदं–फ.ज. 5. शयने पल्लवशय्यायां–क. 6. तः 7. पर्यन्तं नास्ति–क.ल.म. 8. कथम्भूतेन वनमालिना–क. 9. नास्ति–ड. 10. भवत्येवेत्यादि–इ.फ.ग.ह.ज.

[1]अमृतमधुरमृदुतरवचनेन
ज्वलति न सा मलयजपवनेन ॥४॥

व[2]त्सर्वत्र योज्यम् । कीदृशेन [3]वनमालिना ? विकसितं प्रफुल्लं [4]यत्सरसिजं कमलं तद्वल्ललितं [5]मनोहरं मुखं यस्य तेन ॥३॥

पदद्योतनिका

विकसितेति । विकसितं प्रफुल्लं यत्सरसिजं कमलं तद्वन्मनोहरं [6]ललितमाननं यस्य; एवम्भूतेन [7]वनमालिना या रमिता सा मनसिजविशिखेन [8]कामवाणेन न स्फुटति न विद्धा भवतीति सम्भोगे; वियोगे [9]तु [10]स्फुटत्येवेति [11]काकुः ॥३॥

जयन्ती

विकसितेति । विकसितं फुल्लं सरसिजं तद्वत् ललितं सुन्दरं मुखं यस्य तेन । अत्र समासगतलुप्तोपमा । वनमालिना या रमिता सा मनसिजस्य मन्मथस्य विशिखेन बाणेन न स्फुटति न विदीर्णा भवति ।।४।।

सञ्जीवनी

किञ्च अमृतेति । [12]अमृतादपि मधुराणि मनोज्ञानि मृदुतराणि अतिशयेन कोमलानि वचनानि भाषणानि यस्य तेन [13]रमिता सा मलयजपवनेन चन्दनवायुना न ज्वलति इति पूर्ववत् सम्भोगे । वियोगे च ज्वलत्येव । अनेन नायकस्य प्रियवचनादयो गुणाः [14]सूचिताः ॥४॥

पदद्योतनिका

अमृतेति । अमृतवन्मधुराणि मनोज्ञानि मृदुतराणि अतिकोमलानि [15]वचनानि [16]वाक्यानि यस्य तेन [17]वनमालिना या रमिता सा मलयजपवनेन [18]मलयानिलेन [19]न ज्वलति [20]न [21]सन्दीप्यते सम्भोगे; वियोगे तु सा [22]न ज्वलति ? ज्वलत्येव ॥४॥

---

1. अमृतमधुरतरमृदुवचनेन–इ.ड. 2. सर्वं सर्वत्र–इ.ग.ह. 3. नास्ति–अ.ब. 4. यत्कुवलयं–अ.ब. 5. नास्ति–अ.ब. 6. आननं–क.ब. 7, 8. नास्ति–ड. 9. नास्ति–ल.म. 10. न स्फुटत्येवेति–ड. 11. काक्वा–क.ल.म. 12. अमृतादतिमधुराणि–इ.फ.ग.ह.ज. 13. रमिताऽपि–इ.फ.ग.ह.ज. 14. निरूपिताः–इ.फ.ग.ह.ब. 15. नास्ति–क.ल. 16–21. नास्ति–ड. 22. न ज्वलत्येव–ल.म. ज्वलत्येव–क.

स्थलजलरुहरुचिकरचरणेन ।
[1]दहति न सा हिमकरकिरणेन ॥५॥
सजलजलद[2]समुदयरुचिरेण ।
दलति न सा हृदि [3]चिरविरहेण ॥६॥

जयन्ती

अमृतेति । अमृतमिव मधुरतरं अतिमधुरं च तत् मृदु च तत् कोमलं च तत् वचनं यस्य तेन । अत्रापि वाचकलुप्तोपमालङ्कारः । तेन या रमिता सा मलयजपनेन दक्षिणमारुतेन न ज्वलति सन्तप्ता भवति ॥४॥

सञ्जीवनी

[4]किञ्च [5]स्थलेति । स्थलजलरुहाणां स्थलकमलानां जलकमलानां च रुचिरिव दीप्तिर्येषां तादृशाः करचरणा यस्य तेन श्रीकृष्णेन रमिता या सा हिमकरकिरणेन चन्द्रकिरणसमूहेन न दहति; अपि तु दहत्येव । जलरुहं [6]मकरध्वजस्य बाणत्वेनैवेति ध्वनितम् ॥५॥

किञ्च सजलेति । सजलजलदस्य सोदकमेघस्य सम्यगुदयस्तद्वद्रुचिरेण [7]मनोहरेण वनमालिना रमिता सा हृदि विरहभरेण न दलति; अपि तु विदीर्णहृदया भवत्येव । अनुक्रीडितायाः [8]कथं विर(ह)स्तत्राह–विप्रयोगरसमयत्वात् । सजलेत्यनेन श्रीराधाविरहात् श्रीकृष्णस्याश्रुपात इति भावः ॥६॥

पदद्योतनिका

स्थलेति । स्थलजलरुहाणां स्थलपद्मानां रुचिरिव रुचिर्येषां तादृशाः करचरणा यस्य तेन [9]वनमालिना या रमिता सा हिमकरकिरणेन चन्द्रदीप्त्या न दहति [10]नोपतप्ता भवति । [11]अविवक्षितत्वात्कर्मभावः। इति सम्भोगे; वियोगे तु न दहति ? अपि तु दहत्येव । स्थलपद्मस्यातिलोहितत्वेनोपादानम् ॥५॥

सजलेति । सजलजलदसमुदयवत् सोदकमेघोदयवत् रुचिरेण सुन्दरेण [12]वनमालिना या रमिता [13]सा हृदि [14]मनसि विरहभरेण विरहाधिक्येन न दलति न [15]विदीर्यते इति सम्भोगे; वियोगे तु न दलति ? अपितु दलत्येव ॥६॥

---

1. लुठति–अ.ब.इ.नि.सा. 2. रुचिसमरुचिरेण–इ. 3. विरहभरेण– 4. अपि च–इ.फ.ग.ह.ज. 5. नास्ति–इ.फ.ग.ह.ज. 6. कामस्य–इ.फ.ग.ह.ज. 7. नास्ति–अ.ब. 8. कथं तस्य–फ.ज. 9. नास्ति–ड. 10. न मनस्तप्ता–ड. 11. अलक्षितत्वात्–क. 12, 13. नास्ति–ड. 14. मम मनसि–ड. 15. विदार्यते–ड.

कनकनिकषरुचिशुचिवसनेन ।
श्वसिति न सा परिजनहसनेन ॥७॥

जयन्ती

स्थलेति । स्थलजलरुहं अनीरजकमलं तद्वत् रुचिरं करौ चरणौ च करचरणं, द्वन्द्वैकवद्भावः, यस्य तेन या रमिता सा हिमकरस्य चन्द्रस्य किरणेन न लुठति विरहाधिक्यान्निद्राया अभावान्न परिवर्तते । अत्रापि लुप्तोपमालङ्कारः ॥५॥

सजलेति । सजलः जलसम्भृतः स चासौ जलदः मेघ तस्य रुचेः समा रुचिः यस्य तेन । अत्र मेघकान्तेः उपमानत्वात्समपदसत्त्वादार्थी धर्मलुप्तोपमा । या रमिता सा हृदि विरहभरेण विरहातिशयेन न दलति न भिन्ना भवति ॥६॥

सञ्जीवनी

किञ्च [1]कनकेति । कनकनिकषस्य सुवर्णतेजनपाषाणस्य रुचिरिव [2]रुचिर्यस्य तादृशं शुचि निर्मलं वसनं वस्त्रं यस्य तेन वनमालिना या रमिता सा परिजनहसनेन सखीजनपरिहासवाक्येन न श्वसिति; अपि तु[3]श्वासं करोतीति । वसनमिति श्रीराधाङ्गदीप्तिसादृश्यात्पीताम्बरधारणं न तु मण्डनार्थमिति भावः । तद्यथा—

"पीताम्वरं किमिति नन्दसुतो बिभर्ति
नीलाम्वरं किमिति भानुसुता बिभर्ति ।
मन्ये दिनेऽपि निजजीवनधारणार्थ–
मालिङ्गनं कलयतो वसनच्छलेन ॥" इति ।

"शृङ्गारः शुचिरुज्ज्वलः" इत्यमरः (१.७.१७) । "[4]शुचि.शुद्धेऽनुपहते" इति विश्वः (२१.६) । "निकषः कषपट्टिका" इति हारावली[5] ॥७॥

पदद्योतनिका

कनकेति । कनकनिकषस्य सुवर्णरेखाया रुचिरिव रुचिर्यस्य तादृशं शुचि विमलं वसनं वस्त्रं यस्य; पीताम्बरेणेत्यर्थः; तेन [6]वनमालिना या रमिता [7]सा परिजनहसनेन [8]सपत्नीहसनेन [9]न [10]श्वसिति न श्वसनं करोति इति सम्भोगे; वियोगे तु न श्वसिति ? अपि तु श्वसित्येव ॥७॥

---

1. नास्ति–इ.फ.ग.हृ.ज. 2. रुचिर्दीप्तिर्यस्य–ग.हृ. 3. निःश्वासं –इ.फ.ग.हृ.ज. 4. तः 5. पर्यन्तं नास्ति–अ.ब्र. 6–10. नास्ति–.ड

सकलभुवनजनवरतरुणेन ।
वहति न सा रुजमतिकरुणेन ॥८॥

जयन्ती

कनकेति । कनकनिकषस्य रुचिवत् दीप्तिवत् शुचिनी सोज्ज्वले वसने वस्त्रे यस्य तेन । अत्र वाचकलुप्तोपमया पीताम्बरत्वं वस्तु व्यज्यते । या रमिता सा वाग्भूषणविपर्यासजनितेन परिजनानां सखीनां हसनेन न श्वसिति न खिद्यति ॥७॥

सञ्जीवनी

किञ्च [1]सकलेति । सकलभुवने चतुर्दशलोके ये जनास्तेभ्योऽपि वरेण सुन्दरेण श्रेष्ठेन वा तरुणेन च, सकलभुवने यः श्रीराधाख्यो जनो वरः श्रेष्ठस्तरुणो वा यस्य तेन वनमालिना या रमिता सा रुजं पीडां न वहति [2]न [3]धारयति; अपि तु धारयत्येव । कीदृशेन ? अतिकरुणेन दयातिक्रान्तेन निर्दयेनेत्यर्थः । [4]यद्वा कीदृशी सा ? अतिकरुणरसेनोपलक्षिता; अस्यां सम्भोगः वियोगश्च निर्वाहितः । "[5]करुणस्तु रसे वृक्षे कृपायां करुणा मता" इति विश्वः[6] (५०.३०) ॥८॥

पदद्योतनिका

सकलेति । सकलभुवने ये जना युवानस्तेभ्योऽपि वरेण श्रेष्ठेन [7]तरुणेन च यूनाऽतिकरुणेनातिदयावता [8]तेन [9]वनमालिना या रमिता सा रुजं पीडां न वहति इति सम्भोगे; वियोगे तु सा रुजं वहत्येव । कीदृशेन [10]कृष्णेन ? अतिकरुणेन करुणां दयां अतिक्रान्तेन निर्दयेनेत्यर्थः । "करुणस्तु रसे वृक्षे कृपायां करुणा मता" इति विश्वः (५०.३०) । अतिकरुणेनातिकरुणरसेन उपलक्षिता सती ॥८॥

जयन्ती

सकलेति । सकलभुवनजनेषु त्रैलोक्यलोकेषु वरः श्रेष्ठः स चासौ तरुणः तेन । सा विरहव्याधिं अतिकरुणेन विप्रलम्भजनितशोकेन न वहति । तत्सङ्गमे सति पूर्वोक्तरूपं न भवतीति भावः ॥८॥

---

1. नास्ति–इ.फ.ग.ह.ज. 2, 3. नास्ति–अ.ब. 4. नास्ति–इ.फ.ग.ह.ज. 5. तः 6. पर्यन्तं नास्ति–अ.ब. 7. नास्ति–क. 8. नास्ति–क.ल.म. 9, 10. नास्ति–ड.

श्रीजयदेवभणित[1]वचनेन ।

[2]प्रविशतु हरिरपि हृदयमनेन ॥९॥

सञ्जीवनी

(श्रीजयदेवेति) । श्रीजयदेवभणितं यद्वचनं गीतरूपं तेन । [3]अनेन हरिर्मनोहरः सन्तापहारी वा शृण्वतां गायतां श्रीराधाया अपि हृदयं प्रविशतु [4]प्रकर्षेण प्राप्नोतु ॥९॥

[5]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां षोडशः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेवेति । [6]अनेन श्रीजयदेवेन भणितं यद्वचनं गीतरूपं तेन हरिरपि हृदयं भक्तानां [7]चित्तं प्रविशतु; पुण्यदातृत्वात् ॥९॥

[8]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां षोडशः प्रबन्धः ।

जयन्ती

श्रीजयदेवेति । श्रीजयदेवभणितं यद्रमणं प्रियं तेन अनेन अष्टपदीरूपेण हरिः हृदयं प्रविशति । अष्टपदीश्रवणेन श्रोता हरिध्यानयुक्तो भवतीत्यर्थः ॥९॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां षोडशः प्रबन्धः ।

---

1. रमणेन–इ.ड. 2. प्रविशति–इ. 3. अनेन परिगीतेन–फ.ज. 4. प्रवेशं प्राप्नोतु–इ.फ.ग.ह.ज. 5. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 6. नास्ति–ड. 7. नास्ति–ड.क. चित्ते–ल.म. 8. नास्तीयं पुष्पिका–ड.क.ल.म.

सप्तदशः प्रबन्धः

मनोभवानन्दन चन्दनानिल
प्रसीद [1]रे दक्षिण मुञ्च वामताम् ।
क्षण जगत्प्राण निधाय माधवं
पुरो मम प्राणहरो भविष्यसि ॥१॥

सञ्जीवनी

एवं सखीवचनेन विस्मृतप्रियदोषा मलयानिलमुपालभते प्रार्थयते च—मनोभवेति । हे मनोभवा[2]नन्दप्रद चन्दनानिल मलयसमीर त्वं प्रसीद प्रसादं [3]कुरु । रे इत्याक्षेपसम्बोधने । दक्षिण वामतां प्रतिकूलतां मुञ्च दाहं संवारय । हे जगत्प्राण विश्वप्राणभूत माधवं श्रीकृष्णं क्षणं क्षणमात्रं पुरोऽग्रे निधाय कृत्वा मम प्राणहरो भविष्यसि; प्राणोत्क्रमणसमये श्रीकृष्णदर्शनमतिदुर्लभमिति । भक्तजनानां प्राणहर्तृत्वमनुचितं तवेति भावः । "[4]वामं सव्ये प्रतीपे च द्रविणे चाऽतिसुन्दरे" इति विश्वः[5] (८९.२२) ॥१॥

पदद्योतनिका

पीडयन्तं मलयानिलं प्रार्थयते—मनोभवेति । हे मनोभवानन्दन कामप्रमोदजनक चन्दनानिल मलय[6]मारुत ! प्रसीद ममोपरि प्रसन्नो भव । रे इत्याक्षेपसम्बोधनं दुःखकारित्वात् । दक्षिण ! वामतां [7]प्रतिकूलतां [8]मुञ्च [9]त्यज । हे जगत्प्राण जगतां प्राणभूत ! क्षणमल्पकालं माधवं पुरो विधाय कृष्णमग्रे कृत्वा मम प्राणहरो भविष्यसि । प्राणगमनसमये हि कृष्णदर्शनं अतिदुर्लभमिति । [10]जगतां प्राणहन्तृत्वमनुचितमिति भावः । "वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे" इति विश्वः (८९.२२) ॥१॥

जयन्ती

वायुमुपालभते— मनोभवेति । मनोभवस्य आनन्दन सन्तोषक तत्सहकारित्वात् । चन्दनानिल मलयजवात ! मे मह्यं प्रसीद । मदनं तोषय मयि

---

1. मे–इ. 2. नन्दन प्रसीद–फ.ज. 3. नास्ति–ग. 4. तः 5. पर्यन्तं नास्ति–अ.ब. 6. वात–क.ल.म. नास्ति–ल. 7. प्रतिकूलत्वं–क.ल.म. 8. मुञ्चेति –ल.म. नास्ति–क. 9. नास्ति–ल.म. 10. जगतां प्राणकर्तृत्वात्प्राणहरणमनुचितमिति भावः–क.

रिपुरिव सखीसंवासोऽयं शिखीव हिमानिलो
विषमिव सुधारश्मिर्यस्मिन् दुनोति मनो गते ।
हृदयमदये तस्मिन्नेवं पुनर्वलिते बलात्
कुवलयदृशां वामः कामो निकामनिरङ्कुशः ॥२॥

प्रसन्नो भव । दक्षिणवायो ! वामतां वक्रतां क्रूरतामिति यावत्; मुञ्च त्यज । हे जगत्प्राण ! त्वं मम पुरः माधवं क्षणं निधाय प्राणहरो मृत्युकरो भविष्यसि । अत्र मनोभवानन्दनत्वं प्रसन्नत्वे दक्षिणत्वं वामतात्यागे जगत्प्राणत्वं प्राणहरणे च हेतुत्वेन साभिप्रायकाणीति परिकराङ्कुरालङ्कारः । विशेष्यत्वेन साभिप्रायकत्वात् ॥१॥

सञ्जीवनी

पूर्वं मलयानिलस्य प्राणहन्तृत्वं विज्ञायोपालब्धः; सम्प्रति सर्वानेवोपालभते—रिपुरिवेति । अयं सखीभिस्सह सम्यग्वासो[1]ऽवस्थानं [2]रिपुरिव शत्रुरिव मम मनो दुनोति [3]सन्तापयति । [4]किञ्च हिमानिलः स्वभावशीतलोऽपि शिखीवाग्निरिव दुनोति दहति[5] । किञ्च सुधारश्मिश्चन्द्रोऽपि विषमिव प्राणहर्ता । नायमेतेषामपराधः; [6]किन्तु तस्मिन् श्रीकृष्णे गते दूरं प्रस्थिते सति तथाविधा जाता इति [7]भावः । एवं तस्मिन् अदये [8]निर्दये मम हृदयं चेतः बलात् हठात् वलते पुनः पुनर्वार्यमाणमपि प्रविशति । बलेनाभिनिविशत इत्यर्थः । तत्र हेतुः कुवलयदृशां [9]नीलोत्पलाक्षीणां कामो निकाम[10]निरङ्कुशोऽत्यर्थं स्वेच्छाचारी । किञ्च वामः [11]क्रूरश्च । "शिखी मयूरे दहने शिखी स्याद्-ब्रह्मचारिणि" इति [12]हलायुधः ॥२॥

पदद्योतनिका

पुनरपि सखीं प्रत्याह—रिपुरिति । यस्मिन् कृष्णे गते दूरस्थे सति अयं सखीसंवासः सखीभिः सह सम्यक् वासोऽवस्थानं रिपुरिव [13]शत्रुरिव मम [14]मनो दुनोति सन्तापयति । हिमानिलः शीतलवायुः शिखीव अग्निरिव [15]मम [16]मनो

---

1. वसतिस्थानं–अ.व. 2, 3. नास्ति–अ.व. 4. तः 5. पर्यन्तं नास्ति–अ. 6. किञ्च–अ.ब. 7. नास्ति–इ.फ.ग.ह.ज. 8. नास्ति–ग. 9. नीलोत्पलदलनयनानां–ग. 10. निरङ्कुशस्त्वत्यर्थं–इ.ह. 11. क्रूर एव–अ.व. 12. हलायुधकोशे नास्ति 13. नास्ति–ड. 14. नास्ति–क. 15, 16. नास्ति–ड.

बाधां विधेहि मलयानिल पञ्चबाण
प्राणान् गृहाण न गृहं [1]पुनराश्रयिष्ये ।
किन्ते कृतान्तभगिनि क्षमया तरङ्गै–
रङ्गानि सिञ्च मम शाम्यतु देहदाहः ॥३॥

दुनोति । सुधारश्मिश्चन्द्रो विषमिव दुनोति । तस्मिन्नदये करुणारहिते प्रिये एवं अविचारितमेव मम हृदयं [2]मम [3]मनः पुनः पुनरपि वलात् [4]हठात् वलते सङ्गच्छते निवार्यमाणमपि तत्रैव निर्गच्छतीत्यर्थः । [5]ततः कुवलयदृशां नीलोत्पलाक्षीणां [6]नारीणां वामःक्रूरः कामो निकामनिरङ्कुशः अतिशयेन स्वेच्छाचारी अपरतन्त्र इत्यर्थः ॥२॥

जयन्ती

रिपुरिवेति । हे सखि सहचरि ! समीपस्थत्वेऽपि शोकेन सप्लुतप्रयोगः। दूराह्वाने टेः प्लुतः स्यादिति । सख्याः संवास इति समस्तपदत्वेन व्याख्याने सर्वमतेऽपि स्वभवनोपालम्भत्यागः गुणवत्सख्या दूषणमापततीति प्लुतत्वेनैव व्याख्येयम् । यस्मिन् कृष्णे मनोगते सति अनागते सति बहिरप्राप्ते सति अयं संवासः कुञ्जः रिपुरिव शत्रुवत्, हिमानिलः दक्षिणवायुः शिखीव अग्निरिव, सुधारश्मिः चन्द्रः विषमिव दुनोति पीडयति । एवं अदये निर्दये तस्मिन् कृष्णे हृदयं अन्तःकरणं वलात् वलतो इच्छां विनाऽपि आलम्वते । कुवलयदृशां कामः निकामः अत्यन्त निरङ्कुशः । नियन्तृहीनगजतुल्यात् कामः मदनः वामः वक्रः भवति । हरिणीवृत्तम् ॥२॥

सञ्जीवनी

पूर्वं[7] मलयानिलादयः शत्रुत्वेन ज्ञाताः । इदानीं तानेव मित्रत्वेन याचते—बाधामिति । हे मलयानिल चन्दनवायो ! परमशीतलाश्रयोऽपि मम वाधां विधेहि कुरु । [8]किञ्च इतस्ततो विलोक्याह—हे पञ्चबाण ! पञ्चवाणेति सम्बोधनं सुकरहिंसार्थमिति । हे काम ! पञ्चभिर्बाणैः मम प्राणान् गृहाण । [9]तानेवाह—"सम्मोहनः क्षोभण(श्च) दहनः शोषणस्तथा । उच्चाटनश्च कामस्य [10]पञ्च बाणाः प्रकीर्तिताः" ॥ ननु कथं गृहं प्रति न

1. पुनरागमिष्ये–इ. 2. 3. नास्ति–ड.ल. 4. नास्ति–ल.म. 5. यतः–क.ल.म. 6. नास्ति–ड. 7. तया नियमेन मलयानिलादयः–फ.ज. 8. नास्ति–अ.ब. 9. तानाह–फ.ग.ज. 10. बाणाः पञ्च–इ.फ.ग.ह.ज.

यासि तत्राह—यथा पुनर्भूयो गृहान्नाश्रयिष्ये न यास्यामि । [1]श्रीनन्दात्मजं विना मलयानिलादयोऽपि सन्तापकारका एवेति भावः । तेभ्योऽभीष्टम[2]प्राप्य कृष्णां याचते—हे कृतान्तभगिनि यमुने[3] ! ते तव [4]क्षमया शान्त्या [5]किम् ? यतस्त्वं यमभगिनी । तरङ्गैः [6]कल्लोलैर्ममाङ्गानि सिञ्च क्षीणत्वात् [7]सिञ्चनमेव प्लावनमिति ध्वनिः । तेन च सिञ्चनेन मम देहदाहो विरहाग्निजनितो देहसम्बन्धी दाहः [8]क्लेशः शाम्यतु; देहदाह.[9] सोढुमशक्योऽतो मरणं भवत्वित्यर्थः । "यमुना[10]शमनस्वसा" इति (अमरः १.१०.३२) "[11]पीडा बाधा व्यथा दुःखम्" [12]इति चामरः (१.९.३)। [13] "कामः पञ्चशरः स्मरः"[14] इत्यमरः[15] (१.१.२५) ॥३॥

पदद्योतनिका

[16]पुनरपि जीवितनिरपेक्षत्वेन मलयानिलादीन् प्रत्याह—बाधामिति । हे मलयानिल चन्दनवायो ! बाधां मम पीडां विधेहि कुरु । हे पञ्चबाण काम ! त्वं प्राणान् गृहाण; यथा पुनरपि अहं गृहं नाश्रयिष्ये न यास्यामि तथा प्राणान् गृहाणेत्यर्थः । हे कृतान्तभगिनि [17]यमभगिनि यमुने ! ते तव क्षमया शान्त्या किम् ? यमभगिन्यास्तव शान्तिर्नोचितेति भावः । त्वं तरङ्गैः [18]स्वकीयैः कल्लोलैरङ्गानि सिञ्च तेन मम देहदाहः शरीरसन्तापः शाम्यतु; मरणं मे भवत्वित्यर्थः । [19]एते कामबाणाः—"सम्मोहनः क्षोभणश्च दहनः शोषणस्तथा । उत्पाटनश्च कामस्य बाणाः पञ्च प्रकीर्तिताः[20] ॥३॥

जयन्ती

बाधामिति । हे मलयानिल दक्षिणवायो ! बाधां विधेहि पीडां कुरु । हे पञ्चबाण ! प्राणान् गृहाण । अहं गृहं पुनः नागमिष्ये हे कृतान्तस्य

1. श्रीनंन्दसूनुं–ग. 2. अप्राप्ता कृष्णां–इ.फ.ग.ह.ज. 3. ते तव क्षमया वक्ष्यमाणशान्त्या किं–फ.ह.ज. 4. नास्ति–अ.ब. 5. नास्ति–ग. 6. नास्ति–अ.ब. 7. सिञ्चनमेवाप्लावनमिति–इ.फ.ज.ह. सिञ्चनमेवाप्तजीवनमिति–ग. 8. तः 9. पर्यन्तं नास्ति–अ. 10. तु यमस्वसा इत्यमरः–इ.फ.ग.ह.ज. 11. अयं नघण्टुकोद्धारो नास्ति–ग. 12. इत्यमरः–अ.ब.इ.फ.ह.ज. 13. तः 15. पर्यन्तं नास्ति–अ.ब. 14. इत्यपि च–ग. इत्यपि–फ.ह.ज. 16. पुनरपि सखीं प्रत्याह जीवितनिरपेक्षत्वेन मलयादीन् प्रत्याह–ड. 17. नास्ति–क.ल.म. 18. नास्ति–क. 19. तः 20. पर्यन्तो भागः सर्गान्तश्लोकव्याख्याया अवसाने दृश्यते–ड.क.ल.म.

[1]प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले ।
व्रीडाचञ्चलमञ्चलं नयनयोराधाय राधाननं
[2]स्वैरस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः ॥४॥

यमस्य भगिनि ! ते क्षमया किम् ? तरङ्गैः मे अङ्गानि सिञ्च । तेन मम देहदाहः शाम्यतु शान्तो भवतु । कृतान्तभगिनीति सम्बोधनं दाहशमनं प्रत्यननुगुणमिति विपरीतलक्षणया देहनाशानन्तरं स्वयमेव दाहशान्तिरिति देहत्यागो व्यज्यते । अत्र विप्रलब्धा नायिका । कृतान्तभगिनीति साभिप्रायम् ॥३॥

[3]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः ॥

सञ्जीवनी

[4]सर्गान्ते कविराशिषमाशास्ते— प्रातरित्यादिना । [5]सखीवचनैः शान्तिमलभमानां श्रीराधां दृष्ट्वा [6]श्रीकृष्ण एव जयदेवापदेशेन नान्य इति तदग्रे [7]प्रत्यक्षीभूतो नान्यथा कविः कथं प्रत्यक्षानभूतमिव वर्णयेत्[8] । अयं नन्दात्मजः जगदानन्दायाऽस्तु । कीदृशः ? राधामुखे [9]स्वैरस्मेरमुखः स्वैरं स्वेच्छया मन्दहास्ययुक्तमुखः । किं कृत्वा ? श्रीराधायाश्चकितं विलोक्य दृष्ट्वा । [10]कीदृशम् ? व्रीडेति [11]कामोद्भूतलज्जया [12]चञ्चलमञ्चलं वस्त्रप्रदेशो यत्र । व्रीडेति [13]भागसम्भोगव्यञ्जिकेति भावः । [14]पुनः किं कृत्वा ? नयनयोरञ्चलमाधाय अञ्चलेन [15]राधानयने [16]वाससाऽऽच्छाद्येत्यर्थः । कस्मिन् सति ? [17]सखीवृन्दे स्वच्छन्दं हसति सति । [18]किं दृष्ट्वा ? प्रात प्रभाते अच्युतस्योरो वक्षो

---

1. एतत्पद्यतद्व्याख्याभागवत्पत्रं नोपलभ्यते–अ. पद्यमिदं सव्याख्यं नास्ति–इ. अष्टमसर्गान्ते दृश्यते–ड.क.ल.म. 2. स्मेरस्मेरमुखो–इ. 3. इति गीतगोविन्दे विप्रलब्धवर्णने–इ. 4. सम्प्रति कविराशिषं ब्रूते–ड. सर्गान्ते कविराशिषं ब्रूते–फ.ग.ह.ज. 5. तः 8. पर्यन्तं नास्ति–अ.ब. 6. श्रीगोपाल एव–ग. 7. प्रकटीभूतो–फ.ग.ह.ज. 9. स्मेरेण ईषद्धसनेन स्मेरमुखोऽवहिर्भूतदन्तद्युतिः–फ.ग. 10. कीदृशं चकितम्–ग. 11. कामोद्भूतया–फ.ग.ह.ज. 12. चञ्चलं चपलमञ्चलं–फ.ग.ह.ज. 13. मानससम्भोग–ग.ह. 14. पुनश्च–फ.ग.ह.ज. 15. श्रीगोपात्मजानयने–ग. 16. वा समाच्छाद्येत्यर्थ.–फ.ह.ज. 17. सखीवृन्दे हसति सति स्वैरं स्वच्छन्दम्–फ.ज. 18. पुनः किं कृत्वा–व.

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दारमन्दादरा-
दानम्रैर्मकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दिन्दिरम् ।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपरारविन्दमशुभस्कन्दाय वन्दामहे ।।५।।
इति श्रीगीतगोविन्दे नागरनारायणो नाम सप्तमः सर्गः ।।

नीलनिचोलं नीलकञ्चुकावृतं संवीतपीतांशुकं [1]परिकलितपीताम्बरञ्च द्वयोश्चकितं च विलोक्य । [2]अथ वा राधायाः संवीतपीताम्बरं कृष्णस्य नीलनिचोलमिति वस्त्रविपर्यासं दृष्ट्वेति योजना ।।४।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[3]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां नागरनारायणो नाम सप्तमः सर्गः ।।

पदद्योतनिका

सर्गान्ते कविर्भक्तान् प्रत्याशिषं ब्रूते—प्रातरिति । अयं नन्दात्मजः कृष्णो जगदानन्दायाऽस्तु लोकसुखार्थं भवतु । कीदृशः ? व्रीडया चञ्चलं [4]चलत् नयनयोर्नेत्रयोरञ्चल अपाङ्गं कटाक्षं राधानने [5]राधामुखे आधायार्पयित्वा [6]स्वैरमतिशयेन स्मेरमुख ईषद्धास्ययुक्तमुखः । [7]स्मेरमुखे कारणमाह—(प्रातरिति) । [8]कस्मिन् [9]सति ? प्रातः [10]उषसि अच्युतं तं कृष्णं नीलं निचोलं वस्त्रं यस्य श्यामवस्त्रधरं विलोक्य दृष्ट्वा, [11]अन् च राधाया उरो वक्षःस्थलं संवीतपीतांशुकं परिधानीतकृतपीताम्बरं सविस्मयं विलोक्य [12]सखीमण्डले सखीसमूहे स्वैरं शनैर्हसति । [13]वस्त्रपरिवर्तनमालोक्य [14]हास इत्यर्थः । [15]विलक्ष इति विस्म्यान्वितः विलखायी भाषाप्रसिद्धः[16] ।।४।।

पदद्योतनिका

सान्द्रेति । क्षेपकः । इन्दिन्दिरो भ्रमरः मकरन्दवत् पुष्परसवत् सुन्दरं यथा स्यात्तथा गलन्त्या मन्दाकिन्या वियद्गङ्गया मेदुरं स्निग्धमित्यर्थः । अशुभस्कन्दाय पापनाशाय । [17]नागरश्चतुरः ।।५।।

[18]इति श्रीगीतगोविन्दटीकायां नरायणपण्डितविरचितायां नागरनारायणो नाम सप्तमः सर्गः ।।

---

1. परिकल्पित—ग. 2. यद्वा—ग. 3. शिवदासपण्डितात्मज—ग.ह. 4. चलमानं—ड.क.ल.म. 5. राधाया आनने आधाय—क. 6. नास्ति—क. 7. स्मेरमुखत्वे—क. 8, 9. नास्ति—ड. 10. उरसि—ड.ल.म. 11. अमुत्र—क. 12. नास्ति—क. इत आरभ्याऽऽपद्यसमाप्ति व्याख्या नास्ति—ल.म. 13. वर्तनमालोक्य—ड. 14. हसति विहसति इत्यर्थः—ड. 15. तः 16. पर्यन्तं नास्ति—क.ल.म. 17. नास्ति—क. 18. इति श्रीगीतगोविन्दटीकायां सप्तमः सर्गः—ड.

अष्टमः सर्गः

विलक्षणलक्ष्मीपतिः

अथ कथमपि यामिनीं [1]विनीय
स्मरशरजर्जरिताऽपि सा प्रभाते ।
अनुनयविनयं वदन्तमग्रे
प्रणतमपि प्रियमाह साभ्यसूयम् ॥१॥

सञ्जीवनी

अष्टमे पादपतितं विलोक्य हृदयेश्वरम् ।
उपालम्भं बहुविधं राधा प्रेम्णा समब्रवीत् ॥

(अथेति ।) अथशब्दो मङ्गलार्थः । सा राधा कथमपि [2]कष्टं यामिनीं [3]विनीय रात्रिं नीत्वा साभ्यसूयं सेर्ष्यं यथा [4]स्यात्तथा प्रियं [5]श्रीकृष्णमाह । कीदृशी ? स्मरशरैः कामबाणै[6]र्जर्जरिता विद्धाऽपि । कीदृशं प्रियम् ? प्रभाते प्रातःकाले अनुनयाय [7]स्वापराधक्षमापणाय विनयं साञ्जलिं 'कृतापराधमपि मां क्षमस्वेति पुनरप्येवं न करिष्यामीत्यादि' वदन्तम् । कीदृशम्[8] ? [9]अग्रे प्रणतमपि प्रकर्षेण नतं नम्रमपि । गृहीत[10]चरणमित्यर्थः । अत्र खण्डि(ते)यं नायिका । तल्लक्षणम्—

"उल्लङ्घ्य समयं (य)स्याः प्रियश्चान्योपभोगवान् ।
भोगलक्ष्माङ्कितः प्रातरागच्छेत्सा हि खण्डिता ॥" इति ॥१॥

पदद्योतनिका

अधुना [11]राधा प्रियं प्रातरागतं दृष्ट्वा [12]साभ्यसूयं वचनमेवाह— अथेति । अथानन्तरं कथमपि सकष्टं यामिनीं रात्रिं विनीय[13]नीत्वा स्थिता सा राधा प्रियं कृष्णं साभ्यसूयं सेर्ष्यं यथा स्यात्तथा आहोक्तवती । कीदृशी ? स्मरशरैः कामबाणैर्जर्जरिताऽपि विद्धाऽपि । कीदृशम् ? प्रभाते प्रातःसमयेऽनुन-

1. निनीय–इ.फ.ग.ह.ज. 2. कष्टेन–ग. 3. निनीय–इ.फ.ग.ह.ज. 4. नास्ति–इ. तथा–फ.ग.ह.ज. 5. श्रीनन्दसूनुमाह–ग. 6. नास्ति–ब. 7. तः 8. पर्यन्तं नास्ति–व. 9. स्वाग्रे प्रणतं नम्रीभूतमित्यर्थः–ब. 10. चरणमपीत्यर्थः–फ. 11. नास्ति–ड. 12. साभ्यसूयवचनमेवाह–ड. साभ्यसूयं वचनमाह–क. 13. नास्ति–क.ल.

[1]भैरवरागे [2]यतिताले

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्[3] ।
वहसि नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ॥२॥

(य)वचनं अनुनयाय प्रबोधाय वचनं वाक्यं वदन्तम् । पुनः कीदृशम् ? अग्रे प्रणतमपि । अत्र खण्डिता वर्ण्यते । [4]तल्लक्षणम्—

"उल्लङ्घ्य समयं यस्या [5]वल्लभोऽन्योपभोगवान् ।
भोगलक्ष्माङ्कितः प्रातरागच्छेत्सा हि खण्डिता ॥ इति ।

[6]लक्षणान्तरमपि—

"निद्राकषायमुकुलीकृतताम्रनेत्रो
नारीनखव्रणविचित्रितसर्वगात्रः ।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते
सा खण्डिता निगदिता कविभिः पुराणैः[7] ॥१॥

जयन्ती

खण्डितानायिकात्वं वर्णयितुं राधायाः खण्डितात्वं प्रकटयति—अथेति । अथ सा राधा यामिनीं रात्रिं कथमपि अतिकष्टेन विनीय गमयित्वा स्मरशरेण जर्जरिता विशकलीकृताऽपि प्रभाते प्रातः अनुनयेन विनयं विज्ञप्तिं वदन्तं स्वानागमनकारणकलापं [8]वदन्तं प्रणतमपि स्वापराधशमनार्थं नमस्कुर्वन्तमपि अभ्यसूयया ईर्ष्यया सहितं स्याद्यथा तथा प्रियं कृष्णं प्रत्याह । अर्थात् खण्डिता-लक्षणं सूचितम् । तथा च—

"नीत्वाऽन्यत्र निशां प्रातरागते प्राणवल्लभे ।
अन्यासम्भोगचिह्नैस्तु कुपिता खण्डिता मता ॥

इति विद्यानाथः (प्र. रु. ना. प्र. श्लो. ४९) ॥१॥

सञ्जीवनी

[9]भैरवरागः तल्लक्षणम्—

[10]सरोवरस्थे स्फटिकस्य [11]मन्दिरे
सरोरुहैः शङ्करमर्चयन्ती ।

1. भैरवरागः–ब. 2. नास्ति–ब. 3. अष्टमसर्गादित एतदवधिको भागो नोपलभ्यते । पत्रलोपश्चोह्यते–अ. 4. नास्ति–क. 5. प्रेयानन्योभोगवान्–क. 6. तः 7. पर्यन्तं नास्ति–ड.ल.म. 8. वाञ्छन्तं–इ. 9. भैरविरागे यतिताले; भैरविरागलक्षणम्–इ.ह. भैरवीरागे यतिताले; भैरवीलक्षणम्–ग. भैरवीराग-लक्षणम्–फ.ज. 10. शिवोवरस्य–ब. 11. मण्डपे–इ.फग.ह.ज.

[1]हरि हरि याहि माधव याहि केशव मा वद कैतववादम् ।
तामनुसर सरसीरुहलोचन या तव हरति विषादम् ।। ध्रुवपदम् ।।

तालप्रभेदप्रतिपन्नगीता
गौरीतनुर्नाम तु [2]भैरवीयम् ।। इति ।

[3]यतितालध्रुवयोर्लक्षणं [4]पूर्वमेवोक्तम् । अभ्यसूयावचनमेवाह—[5]हरी(ति)। [6]हरीति खेदे । हे माधव मायाः [7]कपटरूपायाः धवः स्वामी हे कपटचूडामणे विरहिजन[8]दुःख(द)त्वान्माधवेति । हे वसन्तेति वा । याहि [9]नेत्रपथा[10]दितो गच्छ । किञ्च हे केशव प्रशस्तचिकुर सुन्दरशिखामणे प्रियागृहं याहि । कोपावेशेन पुनरुक्तिः । किञ्चोपालम्भान्तरमाह—हे सरसीरुहलोचन कमलनयन या तव विषादं मनस्तापं हरति दूरीकरोति तां प्रियामनुसर गच्छ । [11]कपटवादं मा वद । धूर्तवादमेवाह—हे कृष्ण ! नयनं स्फुटं यथा स्यात्तथाऽनुरागमिव वहसि धारयसि । कीदृशम् ? रजनिजनितेन गुरुणा गरिष्ठेन जागरणस्य [12]रागेण कषायितं आरक्तीकृतम् । [13]पुनः [14]कीदृशम् ? अलसेनालस्येन निमेषः [15]पक्ष्मचलनं यस्य । पुनः कीदृशम् ? उदितः कथितः रसस्यान्यनायिकाविषय-शृङ्गाररसस्याभिनिवेशो [16]यस्य । [17]अथ वा [18]प्रियविशेषणम् । कीदृशं प्रियम् ? रजनिजनितो यो गुरु[19]र्जागरस्तेन कषायिते ईषदारक्ते लोचने यस्य [20]तम् । पुनः कीदृशम् ? अलसो निवेशो वेशः स्वरूपं यस्य । पुनः कीदृशम् ? उदितः प्रकटितः [21]रसस्य शृङ्गाररसस्याभिनिवेशः परतन्त्रता [22]येन ।।२।।

---

1. "हरि हरि" इति इ पुस्तके नास्ति 2. भैरवाय–ब. 3. ताल-ध्रुवयोः–इ.फ.ग.ह.ज. 4. पूर्ववत्–ग. 5. रजनीति–इ.फ.ग.ह.ज. 6. हरिहरीति क्वचित्पाठान्तरंखेदे–इ.फ.ग.ह.ज. 7. नास्ति–ब. 8. दुःखप्रदत्वात्–ग. 9. मेऽत्र-पथादितोभव–अ.ब. 10. अष्टमसर्गस्यादितो व्याख्यानमेतदवधि नोपलभ्यते पत्रलोपात्–अ. 11. कपटवाक्यं–इ.फ.ग.ह.ज. 12. सङ्गेन–अ.ब. 13. नास्ति–इ.फ.ग.ह.ज. 14. नास्ति–ग. 15. पक्ष्मचपलं–इ.फ.ज. 16. यस्य तम्–फ.ज. 17. यद्वा–ग. 18. प्रियविषयं विशेषणम्–फ.ज. 19. जागरो जागरणं तेन–इ.फ.ह.ज. 20. नास्ति–अ. 21. सरस–अ.ब. 22. येन तम्–ग.

पदद्योतनिका

अभ्यसूया[1]वचनमेवाह । [2]तेनास्य भैरवीरागस्तल्लक्षणम्—

[3]सरोवरस्थस्फटिकस्य मण्डपे
सरोरुहैः शङ्करमर्चयन्ती ।
[4]तालप्रभेदप्रतिपन्नगीता
गौरीतनुर्नाम तु भैरवीयम् ॥

रजनीति । [5]हरि हरि खेदानुकारेऽव्ययम् । हे केशव ! याहि इतो गच्छ; हे माधव ! याहि; [6]कोपाधिक्याद् द्विरुक्तिः । कैतववादं वञ्चककपट-वाक्यं मा वद । हे सरसीरुहलोचन कमलनयन तां नायिकामनुसरानुगच्छ या तव विषादं मनस्तापं हरति दूरीकरोति । कथं [7]कैतववाद इत्यत आह— हे कृष्ण ! तव नयनं स्फुटं प्रकटं [8]तस्या अनुरागमिव वहति धारयति । कीदृशं नयनम् ? रजनिजनितेन [9]रात्रिकृतेन गुरुणाऽतिशयेन जागररागेण [10]जागरोत्पन्नरागेण लोहितत्वेन कषायित[11]मारक्तं कृतम् । पुनः कीदृशम् ? रात्रि-जागरेण अलसः निमेषः पक्ष्मचलनं यस्य । कीदृशं अनुरागम् ? [12]उदितरसा-भिनिवेशं उदितः कथितः रसस्य अन्यकामिनीविषयक[13]शृङ्गाररसस्याभि-निवेशः तत्परता येन । मायाः लक्ष्म्याः धव इत्यनेन तत्पतित्वेन चाञ्चल्यं द्योतितम् । [14]केशव [15]इत्यनेन क्लेश[16]नाशकेनापि क्लेशदातृत्वमनुचितमिति द्योतितम्[17] ॥२॥

जयन्ती

भैरवरागेण यतितालेन गीयते ।

'सम्पूर्णो भैरवीरागः सन्यासः सांशको मतः ।
षड्जग्रहस्तथा गेयो यामेऽह्नः पश्चिमेऽपि च ॥'

रजनीति । रजन्यां जनितः गुरुजागरः तेन अतिजागरणेन रागः अरुणिमा तेन कषायितं आरक्तमित्यर्थः । अलसः मन्दः निमेषः निमीलनं यस्य तत्; नयनं

---

1. वचनमाह–क. 2. भैरवीरागस्तल्लक्षणम्–क.ल.म. 3. सरोवरस्थे स्फटिकस्य मण्डले–क.ल.म. 4. प्रक्षेपतालप्रतिपन्नगीता–क. 5. हरि हरिति खेदानुवाक्ये–क. 6. कोपाधिका द्विरुक्तिः–ड. कोपाधिक्येन द्विरुक्तिः–क.ल.म. 7. कैतववादित्वमित्यत आह–क.ल.म. 8. तस्यामनुरागमिव–ड. 9. नास्ति–क.ल.म. 10. जागरोत्पन्नलोहितरागेण–ड.ल.म. 11. आरक्तीकृतम्–ड. 12. नास्ति–ड. 13. शृङ्गारस्य–ड. 14. तः 17. पर्यन्तं नास्ति–ड. 15. इत्यनेनानेकक्लेशदातृत्वमनुचितमिति–ल. 16. नाशकत्वेनापि–ल.म.

कज्जलमलिनविलोचनचुम्बन[1]विरचितनीलिमरूपम् ।
दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥३॥

नेत्रम् । स्फुटं यथा तथा उदितः उद्भूतः रसस्य अभिनिवेशः आग्रहः यस्मिन् तत् । अनुरागं प्रीतिमिव वहति । हृदयस्यानुरागो नेत्रयोरारुण्यरूपेणाभिव्यक्त इत्यर्थः । अत्र नयनं जागररागत्वेन निमित्तेन अनुरागरूपवस्तुत्वेन सम्भाव्य(त) इति वस्तूत्प्रेक्षा पृथङ्निर्देशादुक्तास्पदा । निमेषमित्यत्र षकारशकारसाम्येच्छ-याऽनुषज्य अलसनिवेशमिति पाठे मन्दसंवेशः आकृतिरित्यर्थः । स्मरार्तायाः प्रणतं प्रत्यसूयावचनं विरुद्धम् । तेन तस्मादपि प्रियस्यान्याभिसरणं दुःखकरमिति व्यज्यते । ध्रुवाया व्याख्यानम् । हे माधव ! हे केशव ! त्वं याहि याहि (इति) वीप्सा । कैतववादं कपटवादं उत्तररूपं मा वद । ननु किम् ? या रमणी तव विषादं सन्तापं हरति तोषं करोति तां अनुसर गच्छ । हे सरसीरुहवल्लोचने यस्य तत्सम्बुद्धिः ॥२॥

सञ्जीवनी

पुनरपि प्रकारान्तरेणोपालम्भमाह—कज्जलेति । हे कृष्ण ! तवारुणं रागेणारक्तं [2]दशनस्य वसनमध(र)स्तनोः शरीरस्यानुरूपं तनोति विस्तार-यति । कीदृशम् ? कज्जलेनाञ्जनेन मलिनं श्यामं यद्विलोचनं तस्य चुम्बनेन विरचितं कृतं नीलिम्नो रूपं श्यामरूपं यस्य । स्वभावमलिनस्य तव मालिन्य-करमिति ध्वनिः ॥३॥

पदद्योतनिका

कज्जलेति । हे कृष्ण ! तवारुणं रागेण लोहितं दशनवसनं अधरः तनोः शरीरस्यानुरूपं सादृश्यं तनोति विस्तारयति । कीदृशं दशनवसनम् ? कज्जले-नाञ्जनेन मलिनं श्यामं यद्विलोचनं नेत्रं तस्य चुम्बनेन विरचितं कृतं नीलिम-रूपं श्यामतास्वरूपं यस्य । आरक्तस्याधरस्य नेत्रचुम्बनेन श्यामताप्रतिपादनात् तनोरनुरूपत्वमन्यस्यामनुरागश्च सूचित इति ॥३॥

जयन्ती

तदर्थमुच्यते मयाऽन्या काऽपि नानुसृतेत्यत आह—कज्जलेति । कज्ज-लमलिने विलोचने तयोश्चुम्बनेन विरचितं नीलिमरूपं यस्य तत् । अरुणं दशन-

---

1. कीलित–अ. 2. दशनं तस्य–अ.ब.

वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम् ।
मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम् ॥४॥

वसनं अधरोष्ठं हे कृष्ण ! तव तनोः अनुरूपं नामाभिव्यक्तवर्णशरीरस्य तनोति । यल्लोचनचुम्बनेन तवाधरः कृष्णो जातः इति अन्याङ्गनासङ्गमचिह्नस्य अनुरूपं सदृशं कृष्णत्वमिति भावः ॥३॥

सञ्जीवनी

[1]किञ्च वपुरिति । हे प्रिय ! तवेदं वपुः रतिजयलेखं सुरतविजयपत्रमनुहरति सदृशीकरोति । कीदृशम् ? स्मरसङ्गरे सुरतसङ्ग्रामे खराणां [2]तीक्ष्णानां [3]नखानां क्षतैर्जनिता रेखा यत्र । [4]कस्या इव ? मरकतशकले नीलमणिखण्डे कलिता निर्मिता कलधौतस्य [5]सुवर्णस्य लिपि[6]र्न्यासः पङ्क्तिर्यस्या इव ॥४॥

पदद्योतनिका

वपुरिति । हे कृष्ण ! तव वपुः शरीरं रतिजयलेखं [7]सुरतविजयलेखं सुरतविजय[8]प्रशस्तिलिखितपत्रं अनुकरोति । कीदृशं वपुः ? स्मरसङ्गरे कामयुद्धे खराणां तीक्ष्णानां नखराणां नखानां क्षतान्येव रेखा यत्र । कस्येव ? मरकतशकले नीलमणिखण्डे कलिता निर्मिता या कलधौतलिपिः [9]सुवर्णाक्षरविन्यासो यस्मिन् [10]सः [11]तस्येवेति तव विशेषणम् ॥४॥

जयन्ती

वपुरिति । स्मरसङ्गरे मदनकलहे निधुवने नखरनखाः तीक्ष्णनखाः तैः क्षताश्च ताः रेखाः क्षतरूपरेखाः यस्मिन् तत् । तव वपुः शरीरं मरकतशकलस्य मरकताभिधनीलस्य फलके कलिता लिखिता कलधौतस्य हेम्नः लिपिः प्रस्ता(रा)क्षरावलिः तस्याः सकाशात् रतेर्जयलेखा एतावत्पर्यन्तं ज्ञापिका रेखा यस्मिन् तदिव अनुहरति शोभते । अत्र गुणनिमित्तलेखधर्मोत्प्रेक्षालङ्कारः ॥४॥

---

1. किञ्च हे प्रिय–इ.फ.ग.ह.ज. 2. तीव्राणां–इ.फ.ग.ह.ज. 3. नास्ति –अ.व. 4. कस्यां क इव–ग. 5. सौवर्णस्य–फ.ज. 6. न्यासपङ्क्तिः–इ.ग.ह. नाम पङ्क्तिः–फ.ज. 7. नास्ति–ड.ल.म. 8. प्रशस्तिपत्रं–ड. 9. सुवर्णवर्ण–क. 10. नास्ति–ड.ल.म. 11. तस्येति तव विशेषणम्–ड. तस्येतीति तव विशेषणम्–क.ल.म.

चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम् ।
दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥५॥
दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ।
कथयति कथमधुनाऽपि मया सह तव वपुरेतदभेदम् ॥६॥

सञ्जीवनी

किञ्च चरणेति । तवेदं हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य नवकिसलयपरिवारं नूतनपल्लवसमूहं बहिर्दर्शयतीव प्रकटयतीव । कीदृशम् ? चरणकमलादन्यस्त्रीपादपद्माद्गलता स्रवताऽलक्तकेन सिक्तमुक्षितम् । अन्योऽपि वृक्षः सिक्तमूलस्सन् पल्लवं प्रकटयति इति ध्वनिः । कीदृशम् ? उदारं [1]मनोहरमित्यर्थः ॥५॥

इदानीं वैदग्ध्यमवलम्ब्योपालम्भमाह— दशनपदमिति । भवदधरगतं तवाधरे स्थितं दशनपदं कयाचिद्दत्तं दन्तक्षतं मम चेतसि चित्ते खेदं सन्तापं जनयति । अन्यदीयकरजक्षत[2]व्रणानि तवैव वपुषि; मां [3]पीडयन्तीति भावः । तदेवाह—[4]एतद्वपुरधुना मया सह अभेदं [5]कथं कथयति । एतेनादोषदर्शनं [6]नायके नायिकायाः कथितम् ॥६॥

पदद्योतनिका

चरणेति । तवेदमुदारं [7]मनोहरं हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य [8]नवकिसलयस्य परिवारं [9]नूतनपल्लवसमूहं बहिर्दर्शयतीव प्रकटयतीव । कीदृशं हृदयम् ? चरणकमलादन्यस्त्रीपादपद्मात् गलता स्रवताऽलक्तकेन सिक्तमुक्षितम् । किसलयपदेनैव नूतनत्वाभिधानात्पुनर्नवपदमत्यन्तनवत्वसूचनार्थम् । "परिवारः परिकरे समूहे वेष्टनेऽपि च" इति [10]विश्वः (१०२.२५८) ॥५॥

दशनेति । भवदधरगतं तवाधरोष्ठे वर्तमानं दशनपदं अन्यकामिनीदत्तं दन्तक्षतं मम चेतसि खेदं तापं जनयति करोतीत्यर्थः । एतद्दशनपदमधुनाऽपि

---

1. मनोहरम्–इ.फ.ग. 2. व्रणस्तावके–इ.फ.ह.ज. 3. पीडयतीति–अ.ब.इ.फ.ग.ह. 4. तवाप्येतद्वपुरधुना–इ.फ.ग.ह.ज. 5. कथयति कथम्–फ.ग. 6. नयने–अ.ब. 7. महत्–क. 8. नवकिसलयपरिवार–क.ल.म. 9. नवपल्लव–क. 10. परिवारः परिजने खड्गकोषे परिच्छदे–विश्वः

बहिरिव मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम् ।
कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम् ।।७।।

[1]इदानीमपि तव वपुर्मया सहाभेदं [2]कथं कथयति ? न कथयतीत्यर्थः । न विद्यते भेदो यस्य । पूर्वं मया सह तव [3]वपुषो भेदो नास्तीति स्थितम् । [4]इदानीं तद्विपरीतमिति मया सह भेद एवेति ।।६।।

जयन्ती

चरणेति । चरणावेव कमले ताभ्यां गलत् स्रवत् अलक्तकं लाक्षारसः तेन सिक्तं आरक्तं उदारं तव हृदयं वक्षः कर्तृ; मदनः काम एव द्रुमः तस्य नवकिसलयपरिवारः नवदलसमुदयः तं बहिः दर्शयतीव व्यञ्जयतीव । अत्रारुण्यगुणनिमित्तेन मदन(द्रुम)किसलयत्वेन सम्भावनाद्वस्तूत्प्रेक्षा । इवशब्दस्य (य)या सहान्वये धर्मोत्प्रेक्षेति वाग्भटः ।।५।।

दशनेति । भवतः कृष्णस्य अधरगतं अधरोष्ठच्छदनानां पदं क्षतरूपं मम चेतसि खेदं जनयति । एतत् नखदन्तक्षतं तव वपुः अधुनाऽपि मां विना त्वयि क्रीडत्यपि समये मया सह विरहदुःखमनुभवन्त्या सह अभेदं कथयति । तवाधरक्षतवेदनां मयि जनयतीति वाक्यहेतुकं काव्यलिङ्गमभेदप्रतिपादकम् । सपत्न्या त्वदधरचुम्बनमनुभूतं मम तन्नास्तीति ईर्ष्याकृतवेदना व्यज्यते दन्तक्षतवेदनया । पूर्वार्धे क्षतस्य कारणस्य खेदरूपकार्यस्य च भिन्नदेशत्वादसङ्गत्यलङ्कारः । वाक्यार्थत्वेनाङ्गमिति अङ्गाङ्गिभावेन सङ्करः । 'कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः' इति लक्षणात् ।।६।।

सञ्जीवनी

अभेदमुक्त्वा पुनर्दोषमाह—बहिरिवेति । हे कृष्ण ! नूनं निश्चितं तव मनोऽपि चित्तमपि बहिरिवातिशयेन मलिनं भविष्यति । वपुषः [5]श्यामत्वादिति [6]भावः । कथं त्वया ज्ञातमित्यत आह—कथमिति । अथान्यथा मादृशं जनमनुगतमनुसृतं [7]त्वदेकशरणं तदभावे कथं [7]वञ्चयसे प्रतारयसि । कीदृशम् ? असम[9]शरज्वरेण दूनं सन्तप्तम्; तस्मात्तदस्तीति भावः ।।७।।

1. नास्ति–क. 2. कथं कथयतीत्यर्थः–ङ. कथयति नकथयतीत्यर्थः–क. 3. नास्ति–क. 4. इदानीन्तु–ल.म. इदानीमुत–क. 5. श्यामता–अ.ब. 6. नास्ति–अ.ब. 7. त्वदेकशरणे–इ. 8. वञ्चयसि–इ.फ.ग.ह.ज. 9. शरदूनं–ग.

भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम् ।
प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम् ।।८।।

पदद्योतनिका

वहिरिवेति । नूनमिति वितर्के । हे कृष्ण ! तव मनोऽपि चित्तमपि वहिरिव मलिनतरं कृष्णं भविष्यतीति नूनं तर्कयामि । त्वया कथं ज्ञातमित्यत आह (–अथेति ।) अथ अन्यथा त्वमनुगतं [1]सेवकं जनं मल्लक्षणं कथं वञ्चयसे प्रतारयसि । कीदृशं जनम् ? असमशरः [2]कामस्तस्य ज्वरेण पीडया [3]दूनमुपतप्तम् । [4]अत्र मलिनकृष्णत्वे कौटिल्यमेवेति ।।७।।

जयन्ती

वहिरिवेति । हे कृष्ण ! तव मनोऽपि अन्तःकरणं वहिरिव वहिर्गताङ्गमिव वहिर्भागमिव मलिनतरं कपटरूपमालिन्यवत्त्वात् कृष्णं भविष्यति नूनम् । अथैवं न चेत् असमशरज्वरेण दूनं खिन्नं अनुगतं अनुरागानुसृतं जनं मद्रूपं कथं वञ्चयसे । अनुगतवञ्चकत्वात्तव मनोमालिन्यं युक्तमिति भावः । अत्र मनसो मलिनतरत्वं नूनमिति प्रयोगादुत्प्रेक्ष्यत इत्युत्प्रेक्षा वहिरिवेत्युपमानुप्राणिता । उपमेयप्रतिपादितकृष्णवर्णस्य असमत्वेऽपि नीरूपमनसि कापट्यरूपमालिन्यस्य कृष्णत्वस्य च भेदे निमित्तं मलिनत्वस्य प्रकटनमुत्तरार्धेऽनुगतजनवञ्चनरूपो हेतुरिति ।।७।।

सञ्जीवनी

पुनरपि क्रूरत्वेनोपालम्भमाह—भ्रमतीति । भवान् अबलाकवलाय युवतीनां ग्रसनार्थं अकवलाय सुखाय वा वनेषु भ्रमति । अत्र अस्मिन्नर्थे किं [5]विचित्रमाश्चर्यं न किमपीत्यर्थः । तत्र हेतुमाह(पूतनिकैवेति ।) पूतनिकैव पूतनैव वधूवधे दयारहितं बालचरित्रं बालचेष्टितं प्रथयति [6]ख्यापयति । न केवलं पूतनैवाऽन्या खण्डिताऽपि [7]वा । तल्लक्षणम्—

1. सेवकजनं–ड. 2. कामबाणः–क. 3. दूनमनुतप्तम्–क. 4. अत्र मलिनकृष्णत्वं–क. अत्र मलिनं कृष्णत्वं–ल.म. 5. चित्रमाश्चर्यं–इ.फ.ग.ह.ज. 6. नास्ति–ग. 7. च–इ.फ.ग.ह.ज.

'निद्राकषायकलुषीकृत[1]ताम्रनेत्रो
नारीनखव्रणविशेषविचित्रिताङ्गः ।
यस्याः कुतोऽपि गृहमेति पतिः प्रभाते
सा खण्डितेति कथिता कविभिः पुराणैः ।। इति भरते ।

बालेन त्वया कठिना हता तरुणेन कोमलाङ्गी[2]ग्रासे किं चित्रमिति भावः ।।८।।

पदद्योतनिका

भ्रमतीति । अबलाकवलाय स्त्रीणां ग्रसनार्थं भवान् वनेषु [3]अरण्येषु भ्रमति । अत्र स्त्रीग्रासे किं चित्रं किमाश्चर्यं यत् पूतनिकैव राक्षस्येव तव [4]वधूवधे निर्दयं दयारहितं [5]बालचेष्टितं प्रथयति ख्यापयति । हे वधूवधनिर्दयेति सम्बोधनं वा । शिशुना त्वया राक्षसी हता तस्मिन् त्वयि यूनि सम्प्रति कोमलाङ्गीनामस्माकं ग्रासे[6]न नैव चित्रमिति भावः । "अथो अथ च सम्प्रश्ने मङ्गलारम्भयोरपि" इति विश्वः (१५०.२७) । "मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः । उत्पेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः" इति (काव्याद–II. २३४) ।।८।।

जयन्ती

भ्रमतीति । वनेषु कुञ्जवत्सु भवान् त्वं अबलानां स्त्रीणां कबलाय ग्रासाय नाशायेति यावत्; भ्रमति । युष्मच्छब्दप्रयोगा(भावा)त् मध्यमपुरुषाप्रयोगः । अत्र अस्मिन्नर्थे स्त्रीसंहारकत्वे किं चित्रं किमाश्चर्यम् ? पूतनिका कंसग्रहयुक्ता पूतनानाम राक्षसी । सैव वधूवधेन स्त्रीहननेन निर्दयं करुणारहितं बालचरित्रं अव्यक्तबुद्धिचरित्रं कर्म प्रथयति प्रकटयति । स्त्रीणां हनने यौवनसमये किं वक्तव्यमिति भावः । अत्र अबलेत्यत्र बलाभावाभिप्रायकम् । बाल्ये तादृश्याः राक्षस्याः हन्तुः यौवने किं निर्बला(हन)नेन प्रयासः इति व्यज्यते । यौवने त्वां पश्यति सा त्वत्सङ्गमनाद्विना रमणं प्राप्नोतीति न तवैकनियतत्वमिति भावः ।।८।।

---

1. तीव्रनेत्रो–ग. 2. ग्रसने–ग. 3. नास्ति–क. 4. वधूवधेऽतिनिर्दयं–ड. 5. नास्ति–क. 6. तत्र किं चित्रमिति भावः–क. तव विचित्रमिति भावः–ल.म.

श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम् ।
शृणुत सुधामधुरं [1]विबुधा विबुधालयतोऽपि दुरापम् ॥९॥

सञ्जीवनी

गीतार्थं दुर्लभत्वेन कथयति—[2]श्रीजयदेवेति । हे विबुधाः [3]श्रीकृष्ण-क्रीडारसविभावनाचतुराः हे विबुधाः पण्डिता [4]वा । इदं जयदेवभणितं कथितं रत्या सुरतेन [5]वञ्चिता या खण्डितामात्मानं मन्यमाना [6]युवतिः श्रीराधा तस्या विलापं प्रातरागमननखक्षतशिथिलावलोकनस्वरभङ्गादिपरिदेवनं शृणुत । कीदृशम् ? लयतो मोक्षादपि [7]ब्रह्मानन्दादपि दुरापं [8]दुष्प्रापम् । नेदं सुखं तत्रास्तीति भावः । पुनः कीदृशम् ? सुधामधुरं अमृतादपि [9]मधुरतरं गरिष्ठं वेत्यर्थः ॥९॥

[10]इति श्रीष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां सप्तदशः प्रवन्धः ।

पदद्योतनिका

श्रीजयदेवेति । हे विबुधाः पण्डिताः भक्ता इत्यर्थः । [11]इदं जयदेवभणितं गीतं जयदेवमुखादुदितं शृणुत । कीदृशं गीतम् ? विबुधालयतोऽपि दुरापं विबुधानां आलयः समाजः तस्य दुरापम् । सकलविबुधानां पण्डितश्रेष्ठानामपि दुरापं दुर्बोधमित्यर्थः । कस्मात् दुर्बोधम् ? विषमपदसमूहवाहुल्यात्; अर्शाद्यजादिभिरुपलक्षितत्वात्[12] ॥९॥

[13]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सप्तदशः प्रबन्धः ।

जयन्ती

श्रीजयदेवेति । हे विबुधाः पण्डिताः यूयं मधुरं माधुर्यगुणयुक्तं श्रीजयदेवेन भणितं वर्णितं रतिवञ्चिता अप्राप्तसुरता खण्डिता च या युवतिः तस्याः विलापः प्रलापः तम् । रतिवञ्चितेति विशेषणं खण्डितालक्षणज्ञापनार्थम् । विबुधानां देवानां आलयतोऽपि स्वर्गतोऽपि दुरापं प्राप्तुमशक्यत्वात् स्वर्लोकेऽपि दुर्लभमित्यर्थः । एतादृशं शृणुत आकर्णयध्वम् ॥९॥

[14]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सप्तदशः प्रवन्धः ।

1. नास्ति—अ.ब. 2. नास्ति—अ.ब. श्री इति—इ.फ.ह.ज. 3. श्रीराधाकृष्ण—ग. 4. नास्ति—इ.फ.ग.ह.ज. 5. बृंहिता—इ. 6. नास्ति—अ.ब. 7. नास्ति—अ.ब. 8. नास्ति—अ.ब. 9. मिष्टं गरिष्ठं वा—इ.फ.ग.ह.ज. 10. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज. 11. तः 12. पर्यन्तं नास्ति—ड.ल.म. 13. पुष्पिकेयं नास्ति—ड.क.ल.म. 14. नास्ति पुष्पिकेयम्—इ.

अष्टादशः प्रबन्धः

[1]तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव
प्रियापादालक्तच्छुरितमरुण[2]च्छायमधुरम् ।
ममाद्य [3]प्रख्यातप्रणयभरभङ्गेन कितव
त्वदालोकः शोकादपि किमपि लज्जां जनयति ॥१॥

सञ्जीवनी

गीतार्थं श्लोकेन सङ्गृह्याह—तवेदमिति । हे[4] कितव धूर्त त्वदालोकस्तव दर्शनं प्रख्यातः [5]प्रसिद्धः ममापि प्रणयभरस्य प्रेमातिशयस्य भङ्गेन नाशेन शोकादप्यद्य किमपि अनिर्वचनीयां लज्जां जनयति । कीदृश्या मम ? तवेदमीदृशं हृदयं [6]मनश्चापि अधरमपि च प्रियायाः वल्लभायाः पादालक्तेन यावकेन छुरितं मिश्रितं पश्यन्त्याः; अत एवारुणच्छायं अरुणा [7]रक्ता छाया दीप्तिर्यस्य तादृशम्; उत्प्रेक्षते—बहिर्बाह्ये [8]प्रसरन्निर्गच्छदनुरागमिव । रागोऽप्यरूपो वर्ण्यते ॥१॥

पदद्योतनिका

तवेति । हे कितव वञ्चक त्वदालोकः प्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य भङ्गेन नाशेन यः शोकस्तस्मादपि ममाद्य किमपि अनिर्वचनीयां लज्जां जनयति । कीदृश्या मम ? तवेदं हृदयं [9]वक्षःस्थलं पश्यन्त्याः । कीदृशं हृदयम् ? प्रियायाः नायिकायाः पादालक्तेन चरणयावकेन छुरितं [10]व्याप्तम् । अत एवारुणवत् सन्ध्यारागवत् द्योतितुं शीलं यस्येति । अरुणच्छायमिति पाठे अरुणाऽऽरक्ता छाया द्युतिर्यस्य तादृशं हृदयमिति समासः । उत्प्रेक्षते—बहिः प्रसरदनुरागमिव बाह्ये प्रसरन्ननुरागो यस्य । रागो हि अरुणो वर्ण्यते ॥१॥

जयन्ती

तदेवमिति । हे कितव वञ्चकवचन प्रियायाः मदितरायाः पादालक्तेन यावकरसेन छुरितं आलिप्तं अत एव अरुणच्छायि आरुण्ययुक्तं प्रस्तुतत्वात् तव हृदयं वक्षः बहिः प्रसरन् प्राप्नुवन् अनुरागः यस्मिन् तदिव तदेतदिति हस्तनिर्देशः । एवमिति पाठेऽपि स एवार्थः प्रत्यक्षगमकः । पश्यन्त्याः अवलोक-

1. तदेवं—अ.ब.ग. 2. द्योतिहृदयम्—नि.सा.ड. च्छायि हृदयम्—इ. 3. प्रारब्धात्—इ. 4. हे धूर्त कितव—अ.ब. 5. यस्तव—इ.फ.ह.ज. यतस्तव—ग. 6. मन अधरंच—इ.फ.ह.ज. मनश्चाधरं च—ग. 7. नास्ति—अ.ब. 8. प्रसरद्गच्छदनुरागमिव—अ.ब. 9. नास्ति—क. 10. चिह्नितम्—क.

[1]अन्तर्मोहनमौलिघूर्णनमिलन्मन्दारविश्रंसन-
[2]स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम् ।
[3]दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपो[4]र्व्यपोहयतु वः श्रेयांसि वंशीरवः ॥२॥

इति श्रीगीतगोविन्दे विलक्षणलक्ष्मीपतिर्नामाऽष्टमः सर्गः ॥

यन्त्याः मम अद्य अधुना प्रारब्धात् फलोन्मुखदुरदृष्टात् प्रणयभरः स्नेहातिशयः तस्य भङ्गेन मां विहाय अन्यत्र गमनरूपेण त्वदालोकः तवालोकनं आलोक्यते वीक्ष्यत इति आलोको वीक्षणं शोकादपि सन्तापादपि मनसि मे मम चित्ते लज्जाधिक्यं जनयति । मम सन्तापस्तु महान् जात एव तदपेक्षया अधिकलज्जा भवतीत्यनेन त्वमेव निर्लज्जोऽसि एतादृशनिर्लज्जसङ्गमात् ममव लज्जा भवतीति भावः ॥१॥

[5]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां विलक्षणलक्ष्मीपतिर्नामाष्टमः सर्गः ॥

सञ्जीवनी

[6]श्लोकेन कविः सर्गान्ते [7]मङ्गलमाचरति—अन्तरिति । [8]कंसरिपोः श्रीकृष्णस्य वंशीरवो युष्माकं श्रेयांसि कल्याणानि व्यपोहयतु [9]ददातु । कीदृशः ? कुरङ्गीदृशां हरिणाक्षीणामन्तर्मोहनेन मौलिघूर्णनं [10]शिरःकम्पनं [11]तेन मिलन्मन्दारस्य पारिजातपुष्प(स्य) विश्रंसनं पतनं यस्मात्सः । (पुनः) कीदृशः ? [12]स्तब्धानां सौन्दर्यादिगुणैर्गर्विष्ठानां [13]कामिनीनामाकर्षणं वशीकरणं दृष्टिहर्षणं नेत्रोत्साह[14]करी चेष्टेत्येवमादिसाधनम्[15] एव महामन्त्रो यस्य सः । (पुनः) कीदृशः ? [16]दृप्यद्भिर्दर्पयुक्तैर्दैत्यैर्दूयमाना [17]उपतप्यमाना(ये) दिविषदो

---

1. पद्यमिदं नास्ति–इ. सव्याख्यं नवमसर्गान्ते दृश्यते–ड.क.ल.म. 2. स्तम्भा–इ. 3. हृष्यद्दानव–फ.ग.ह.ज. 4. व्यपोहरतु–अ.ब. 5. इति गीतगोविन्दे खण्डितावर्णने लक्ष्मीपतिर्नामाष्टमः सर्गः–इ. 6. श्लोकान्ते–अ. 7. सर्गान्तं–इ. 8. नास्ति–ग. 9. नास्ति–अ.ब. 10. शिरःकम्पनेन–अ.ब. शिरोधूननं–इ.फ.ग.ह.ज. 11. नास्ति–ग.ह. 12. स्तम्भानां–इ. 13. कामिनां–अ.ब.ह. 14. करं–अ.ब. करं चेत्येवमादि–इ.फ.ग.ह.ज. 15. एष–अ.ब. 16. हृष्यद्भिः–इ.फ.ग.ह.ज. 17. उपलप्यमाना–अ.ब.


देवाः तेषां दुर्वारा या दुःखापदस्तासां [1]भ्रंशो नाशकः ॥२॥ विलक्षणा लक्ष्मीः शोभा [2]यस्याः सा श्रीराधा तस्याः पतिः श्रीकृष्णसंज्ञकः ॥

इति [3]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[4]शिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां विलक्षणक्ष्मीपति-र्नामाष्टमः [5]सर्गः ॥

पदद्योतनिका

इदानीं कविर्भक्तान् प्रत्याशिषं ब्रूते—अन्तरिति । कंसरिपोः [6]कृष्णस्य वंशीरवो वेणुनादः वो युष्माकं भक्तानां अश्रेयांस्यशुभानि व्यपोहयतु खण्डयतु । कीदृशो वंशीरवः? कुरङ्गीदृशां हरिणनयनानां अन्तर्मोहनं मनोमोहः मौलिघूर्णनं साधु साध्विति शिरःकम्पनं चलन्मन्दारविस्रंसनं गुम्फितपारिजातपुष्पादधः-पतनम् [7]स्तब्धाकर्षणं स्तब्धस्य अनिच्छोः आकर्षः दृष्टिहर्षणं नेत्रोत्साहः एतेषु महामन्त्रः सिद्धमन्त्रः । वंशीरवाकर्णनेन सर्वा नायिकाः सकलभावापन्ना भवन्तीत्यर्थः । पुनः कीदृशः ? दृप्यद्भिः दर्पयुक्तैः [8]दानवैर्दूयमानानां पीडितानां [9]दिविषदां देवानां दुर्वारा अनिवार्या [10]दुःखापदो [11]दुःखविपदस्तासां भ्रंशो नाशकः। वंशीरवं श्रुत्वा दुःखिता अपि [12]देवा [13]मुदमुद्वहन्तीत्यर्थः। मुग्धो मूढो अलसः ॥२॥

इति श्रीगीतगोविन्दटीकायां [14]नारायणपण्डितविरचितायां विलक्षण-लक्ष्मीपतिर्नामाष्टमः सर्गः ॥



1. ध्वंसो–ब. 2. यस्याः श्रीराधायाः पतिः श्रीनन्दसूनुसंज्ञकः–ग. 3. श्रीमत्–अ.ब. 4. श्रीशिवदासपण्डितात्मज–ग.ह. 5. सर्गः समाप्तः–अ.ब. 6. कंसस्य शत्रोः–क. 7. स्तब्धस्यानिच्छोराकर्षः–ड. 8. दानवैर्हृष्य-मानानां–ड. 9. नास्ति–ड. 10. दुःखविपदो–ड. 11. दुःखविपर्यया:–ड.ल. दुःखविपर्यायाः–म. 12. देवानां–ड. 13. मुदं वहन्तीत्यर्थः–क. 14. नास्ति–ड.

नवमः सर्गः

[1]मुग्धमुकुन्दः

तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नाम् ।
अनुचिन्तितहरिचरितां कलहान्तरितामुवाच [2]रहसि सखी ।।१।।

सञ्जीवनी

निर्व्याजस्नेहसंयुक्ता प्रोक्ताऽपि परुषं वचः ।
[3]अनुतप्ता सहचरीवाक्यात्सा [4]नवमे भवेत् ।।

(अथेति ।) अथेति मङ्गलमनन्तरं वा । रह एकान्ते तां श्रीराधां सख्युवाचोक्तवती । कीदृशीम् ? मन्मथखिन्नां कामसन्तप्ताम् । पुनः कीदृशीम् ? रतिरसभिन्नां सुरतशृङ्गाररसेन विदारितां अत एव विषादसम्पन्नां उद्वेग-युक्ताम् । पुनः कीदृशीम् ? [5]अनुचिन्तितहरिचरितां अनुचिन्तितं ध्यातं हरि-चरितं [6]कृष्णविलासो यया ताम् । पुनः कीदृशीम् ? कलहान्तरितां [7]प्रीति-कलहेन व्यवहिताम् । कलहान्तरितेयम्—

"या पादपतितं कान्त[8]मात्मनो गुणगर्विता ।
निरस्य पश्चात्तपति कलहान्तरिता तु सा ।।१।।"

पदद्योतनिका

अथेति । अथानन्तरं सखी तां राधां प्राहोक्तवती । कीदृशीं ताम् ? मन्मथेन कामेन खिन्नां दीनाम् । पुनः [9]कीदृशीम् ? रतिरसेन शृङ्गाररसेन भिन्नां रहितां अत एव [10]मन्मथखिन्नाम् । पुनः [11]कीदृशीम् ? विषादेन दुःखेन सम्पन्नाम् । पुनः [12]कीदृशीम् ? [13]अनुचिन्तितहरिचरितां अनुचिन्तितं ध्यातं हरिचरितं कृष्णविलासो यया [14]सा [15]ताम् । कलहेन प्रीतिकलहेनान्तरितां व्यवहिताम् । अत्र कलहान्तरिता नायिका वर्ण्यते । लक्षणं [16]भरतोक्तम्—

---

1. अमन्दमुकुन्दः–इ.फ.ग.ह.ज. 2. रहः–अ.ब. पुनः–इ. 3. अनुत्तमा सहचरी वाक्यान् सा नवमेऽब्रवीत्–अ. अनुत्तमा सहचरी वाक्यान् सा नर्मम-ब्रवीत्–ब. 4. नवमेऽभवत्–इ.फ.ह.ज. 5. नास्ति–अ.ब.इ.फ.ग.ह.ज. 6. श्री-नन्दात्मजविलासो–ग. 7. प्रीतिकलन–अ.ब. 8. मामनो–अ.ब. 9. नास्ति–ड. 10, 11. नास्ति–ड.ल.म. 12. नास्ति–क. 13. नास्ति–ड.क.ल.म. 14. नास्ति–ड.ल.म. 15. नास्ति–ड.क.ल.म. 16. नास्ति भरते

गुर्जरीरागे रूपकताले

हरिरभिसरति वहति [1]मधुपवने
किमपरमधिकसुखं सखि [2]भवने ॥२॥
माधवे मा कुरु मानिनि मानमये ॥ ध्रुवपदम् ॥

"प्राणेश्वरं प्रणयकोप[3]भरेण [4]भीतं [5]या चाटुकारमचिरा[6]दवधार्य पश्चात्।
सन्तप्यते मदनवह्निशिखा[7]सहस्रै[8]र्बाष्पाकुला [9]नु कलहान्तरिते[10]ति सा स्यात् ॥"

[11]भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे" इति विश्वः (७०.१५) ॥१॥

जयन्ती

अष्टपदीमवतारयति—अथेति । अथ एवं परुषवचनावमानितगोविन्द-निस्सरणानन्तरं सखी कर्त्री मन्मथेन खिन्नां दुःखितां रतिरसेन भिन्नां वर्जितामित्यर्थः । अत एव विषादेन सम्पन्नां सम्पूर्णाम् । अनुचिन्तितं हरिचरितं कृष्ण-सल्लापादिकं यया तां सञ्जातानुरागामित्यर्थः । कलहेन वाङ्निष्ठुरप्रयोगरूपेण अन्तरितां व्यवहितां तां राधां पुनः उवाच । पुनरर्थात्कलहान्तरितालक्षणमुक्तम्—

"कोपात्कान्तं पराभूय पश्चात्तापसमन्विता ।
कलहान्तरिता सा तु सूरिभिः परिकीर्त्यते ॥"

पूर्वसर्गे प्रत्यक्षसल्लापानन्तरं सख्या वचनेन कृष्णगमनमनुमीयते । प्रायः कलहान्तरितायाः प्रत्यक्ष[12]सन्निधिरेव वर्ण्यते ॥१॥

सञ्जीवनी

गुर्जरीरागे रूपकताले । [13]रागतालध्रुवपदलक्षणं [14]पूर्वमेवोक्तम् । हरिरिति । अये [15]हे मानिनि माधवे मधुप्रिये श्रीकृष्णे मानं मा कुरु सम्भोगविलम्बनं मा कार्षीरित्यर्थः । यतो मधुपवने वसन्तवायौ वहति सति; हरिः

---

1. मृदुपवने–इ. 2. भुवने–इ. 3. विशेषभीतं–र.प्रि.(नि.सा.) 4. भीतिं–ड. 5. या चाटुकाननचिरादवधार्य पश्चात्–ड. या चाटुकारमवधार्य विशेषवाग्भिः–र.प्रि.(नि.सा.) 6. अवधीर्य–क. 7. समूहैः–र.प्रि.(नि.सा.) 8. बाष्पाकुलेह–र.प्रि. (नि.सा.) 9. तु–क.ल.म. 10. हि–र.प्रि.(नि.सा.) 11. अयं नैघण्टुकोद्धारः तालफलादिति पदव्याख्यान्ते दृश्यते–ड.ल.म. नास्ति–क. 12. सन्निधावेव–इ. 13. रागताललक्षणं–अ.ब. 14. पूर्ववत्–ग. 15. हे भामिनि–ग.

तालफलादपि गुरुमतिसरसम् ।
किमु विफलीकुरुषे कुचकलशम् ।।३।।

सकलमनोहरः कामतापहरो वाऽभिसरति सति स्वयमेवा[1]गच्छति हे सखि ! भवने त्रैलोक्ये वैकुण्ठे वा [2]श्रीकृष्णालिङ्गनादपरमुत्कृष्ट[3]मधिकं सुखमस्ति ? अपि तु न किञ्चि[4]दित्यर्थः । अस्मादन्यत्कुत्सितं सुखमिति भावः ।।२।।

पदद्योतनिका

हरिरिति । अस्य गुर्जरीरागः । अये हे मानिनि अभिमानवति राधे माधवे कृष्णे मानं अभिमानं मा कुरु मा कार्षीरिति प्रार्थनायां लोट् । यतः मधुपवने वसन्तवायौ वहति [5]सति हरिरभिसरति [6]स्वयमेव त्वदीयसङ्केत-[7]भूमिमागच्छति । हे सखि राधे भवनेऽपि गृहेऽपि अपरं अधिकं सुखं [8]अतिशयसुखं किम् ? अपि तु न किमपि । नायकस्य स्वयमागमनात्कोपो न युक्त इत्यर्थः । "[9]मधु क्षीरे जले क्षौद्रे मद्ये पुष्परसे मधुः । दैत्ये चैत्रे वसन्ते च जीवाशाके मधुद्रुमे" इति विश्वः (६६.११) ।।२।।

जयन्ती

हरिरिति । हरिः मृदुपवने मन्दमारुते वहति सति चलति सति अभिसरति; त्वामिति शेषः । हे सखि ! भुवने एतदपेक्षयाऽपरं अन्यत् अधिकमुत्कृष्टं सुखं किम् ? न किमपीति भावः । ध्रुवाया व्याख्यानम्—अये इति कोमलामन्त्रणम् । मानिनि ईर्ष्याकृतकोपवति माधवे विषये मानं मा कुरु मा विधेहि । यद्वा मानः सन्मानः तदस्याऽस्तीति मानी तस्मिन् । इति माधवविशेषणम् । तादृशे गर्वरूपमानकरणात् अवमानं मा कुर्वित्यर्थः ।।२।।

सञ्जीवनी

अधिकसुखमेव प्रपञ्चयति—तालेति । हे राधे ! त्वं कुचकलशं स्तनघटं किमर्थं विफलीकुरुषे निष्फलं करोषि । श्रीकृष्णकरसमर्पणाभावादित्यर्थः । कीदृशम् ? तालफलादपि तालफलापेक्षयाऽपि काठिन्यस्थौल्याभ्यां वर्तुलत्वेन

---

1. आगच्छति सति—अ.ब. 2. श्रीकृष्णालिङ्गनसङ्गमादपर—इ.फ.ग. 3. अधिकसुखं—फ.ज. 4. अस्तीत्यर्थः—ग. 5. नास्ति—ड. 6. नास्ति—ड.ल.म. 7. भूमिं गच्छति—क. 8. नास्ति—ड. 9. अयं नैघण्टुकोद्धारः तालफलादिति पदव्याख्यान्ते दृश्यते—ड.ल.म. नास्ति—क.

कति न कथितमिदमनुपदमचिरम् ।
मा परिहर हरिमतिशयरुचिरम् ॥४॥

चातिगुरुमधिकम् । पुनः कीदृशम् ? अतिसरसं अतिरसप्रदं शृङ्गाररससहितं वा । रतिविरामेऽपि [1]सरसोत्पादकमित्यर्थः । तालफलं भक्षणेन मादकमिदन्त्व-वलोकनमात्रेणेति भावः ॥३॥

पदद्योतनिका

तालेति । हे राधे ! तालफलादपि काठिन्येन स्थौल्येन वर्तुलत्वेन च तालफलादपि गुरुमधिकं कुचकलशं स्तनतटं किमिति विफलीकुरुषे; [2]कृष्ण-हस्तव्यापारशीलनाभावात् । कीदृशं [3]कुचकलशम् ? अतिसरसं असिरसयुक्तम् । [4]तस्मिन् दृष्टे यूनां रसाविर्भावात् । हृदयाह्लादकरमिति यावत ॥३॥

जयन्ती

तालेति । त्वं तालफलात् तृणराजफलात् गुरुं विपुलं अतिसरसं कान्ति-रूपरसाधिकं कुचौ कलशाविव कुचकलशं; जातावेकवचनं द्वित्वाभिप्रायकम्; किं विफलीकुरुषे व्यर्थं करोषि । कुचकलशस्य साफल्यं तावत्कान्तालिङ्गनं तन्न करोषीति वैयर्थ्यम् । अत्र कुचकलशेत्यत्र वर्तुलत्वरूपधर्मस्य इव शब्दस्य च उपमितिसमासेन लोपात् धर्मवाचकलुप्तोपमा । तालफलादुपमानादाधिक्य-कथनात् व्यतिरेकालङ्कारः । 'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः' इति लक्षणात् । अतिगौरवसरसत्वं उत्कर्षहेतुरुक्त इति हेतूक्तिः । 'हेतोरुक्तावनुक्तौ' इति काव्यप्रकाशात् ॥३॥

सञ्जीवनी

(कतीति ।) इदमचिरं साम्प्रतं अनुपदं [5]कतिवारं न कथितम् । हरिं मा परिहर मा त्यज । कीदृशम् ? अतिशयरुचिरं [6]अतिमनोहरम् । पुनः कीदृशं [7]हरिम् ? अचिरं [8]विलम्वासहम् । पुनः कीदृशम् ? अनुपद्यते [9]स्त्रीसमूहैरन्विष्यत इत्यनुपदम् ॥४॥

---

1. रसोत्पादक–ज. 2. श्रीकृष्णहस्तव्यापारपरिसेचनाभावात्–क. कृष्णहस्तव्यापारपरिशीलनाभावात्–ल.म. 3. नास्ति–ड.ल.म. 4. यस्मिन् –क. 5. कति न वारं कथितम्–अ.ब. कतिवारं किं न कथितम्–इ.फ.ग.ह. ज. 6. मनोहरम्–ग. 7. नास्ति–अ.ब. 8. विलम्वासहितम्–ग. 9. स्त्रीसहस्रैः समूहैर्वा–फ.ज.

किमिति विषीदसि रोदिषि विकला ।
विहसति युवतिसभा तव सकला ।।५।।

पदद्योतनिका

कतीति । हे राधे ! इदमनुपदं स्थाने अचिरं साम्प्रतं [1]कति कति-वारान् न कथितम् । किन्तु कथितमेव । किं तदित्यत आह—त्वं अतिशयरुचिरं अतिकमनीयं कृष्णं मा परिहर माऽवज्ञासीरिति ।।४।।

जयन्ती

कथितेति । अनुपदं प्रतिवचनं अचिरं शीघ्रं कथितकथितं वीप्सया अनेकवारं कथितं इदं वक्ष्यमाणं अतिशयरुचिरं अत्यन्तमोहनं हरिं मा परिहर मा मुञ्च । अधुनैव तमानयेति द्वितीयकथितमुपदेशतया परिणमतीति अर्थान्तरसङ्क्रमितवाच्यत्वादुत्तमं काव्यम् ।।४।।

सञ्जीवनी

एवं श्रुत्वाऽश्रुमुखीमिवाह—किमिति । किमर्थं विषीदसि सन्तापं [2]प्राप्नोषि । [3]विकला [4]विगतकला [5]गतकौशला विह्वला वा सती रोदिषि । सम्प्रति [6]दुःखरोदनं व्यर्थमिति । सकला सर्वा युवतिसभा [7]तरुणीसभा समाजस्तव त्वां विहसति [8]विगतकौशलां त्वामुपहसतीति भावः ।।५।।

पदद्योतनिका

किमितीति । विकला [9]असावधानेन्द्रिया त्वं किमिति [10]कस्मात् विषीदसि दुःखिता भवसि रोदिषि च क्रन्दसि । [11]मदुक्तनिराकरणात् इदानीं विषादो रोदनञ्च व्यर्थमिति । सकला सम्पूर्णा युवतिसभा तरुणीसमाजः तव त्वां विहसति उपहसति । तवेति 'कर्मण्यपीति केचित्' इति षष्ठी ।।५।।

जयन्ती

किमितीति । विकला कान्तिहीना विह्वला किमिति किमर्थं विषीदसि विषादमाप्स्यसि । रोदिषि । सकला समस्ता युवतिसभा स्त्रीपरिषद् तव त्वां विहसति । अनुनयपरप्रियावमानेन मूर्खेति विहसतीति भावः ।।५।।

1. नास्ति—क. 2. करोषि—अ.ब. 3. नास्ति—ग. 4, 5. नास्ति—अ.ब. 6. दुःखं रोदनं च—इ.फ.ग.ह.ज. 7. तरुणीसमाजः—इ.फ.ग.ह.ज. 8. विहतकौशलां—इ. 9. अवसानेन्द्रिया—क. 10. कामात्—ड. 11. मदुक्ति—क.

सजलनलिनीदल[1]शीतलशयने ।
हरिमवलोकय सफलय नयने ।।६।।
जनयसि मनसि किमिति गुरुखेदम् ।
शृणु मम वचन[2]मनीहितभेदम् ।।७।।

सञ्जीवनी

[3]सजलेति । नलिनीपत्रसहितानि [4]यानि [5]जलानि तेषां शीलित-माश्रितं शयनं यया; तत्सम्बुद्धिः । अनेन तापाधिक्यं सूचितमिति [6]भावः । अथ वेदृशे शयने हरिमागतमवलोक्य नयने [7]सफलय सफलीकुरु । किमर्थं [8]मानाग्रहेण विरहसन्ताप[9]मनुभवसीति ध्वनिः ।।६।।

(जनयसीति ।) हे राधे ! मनसि गुरुखेदं महत्कष्टं किमिति जनयसि [10]उत्पादयसि । तस्मान्मम वचनं वक्ष्यमाणं शृणु । कीदृशम् ? अनीहितोऽना-काङ्क्षितो भेदो वैरस्यं विरहो वा यत्र । यदि न करोषि [11]तदा वचनमपि तावच्छृण्विति [12]भावः ।।७।।

पदद्योतनिका

सजलेति । सजलेनार्द्रेण नलिनीदलेन कमलिनीपत्रेण शीलिते कृते शयने शय्यायां स्थितं हरिं कृष्णमवलोकय पश्य । [13]दर्शनान्नयने नेत्रे सफलय सफले कुरु ।।६।।

जनयसीति । हे राधे ! त्वं [14]मनसि गुरु महत् खेदं [15]दुःखं किमिति जनयसि उत्पादयसि । तस्मान्मम वचनं वाक्यं शृणु आकर्णय । कीदृशं वचनम् ? अनीहितः अनाकाङ्क्षितः भेदो विरहो येन । [16]भवत्या हितमेव वचनं वदामीत्यर्थः । अत एव शृणु ।।७।।

---

1. शीलित–इ.ड. 2. मनिहित–इ. 3. हे सजलेति–इ.फ.ग.हृ.ज. 4. नास्ति–इ.फ.ग.हृ.ज. 5. सजलानि–अ.ब. 6. ध्वनिः–फ.ज. 7. नास्ति–अ.ब. 8. मानाग्रहणेन–इ. 9. अनुभवतीति–फ.ज. 10. नास्ति–अ.ब. 11. नास्ति–ग. 12. नास्ति–इ.फ.ग.हृ.ज. 13. दर्शनान्नयने नेत्रे सफलय नेत्रे सफले कुरु–ड. दर्शनान्नयने नेत्रे सफलं कुरु–क. दर्शनानन्तरं नयने नेत्रे सफले कुरु–ल.म. 14. नास्ति–ड. 15. नास्ति–क. 16. भगवत्याः–क.

हरिरुपयातु वदतु बहुमधुरम् ।
किमिति करोषि हृदयमतिविधुरम् ॥८॥

जयन्ती

सजलेति । सजलैर्जलयुक्तैः नलिनीदलैः शीलितं सहितं रचितमित्यर्थः । तस्माच्च तच्छयनं तस्मिन् । शीलितं शयनं ययेति सम्बुद्धिर्वा । हरिं माधवं अवलोक्य नयने सफलय । माधवावलोकनं विना नेत्रं व्यर्थमित्यर्थः ॥६॥

जनयसीति । मनसि गुरुखेदं महादुःखं किमिति जनयसि प्राप्नोषि । किं कर्तव्यमित्यत आह—अनिहितः निवर्तितः भेदः कलहकृतवियोगः येन तत् मम वचनं शृणु । श्रुत्वा तथा कुर्वित्यर्थः ॥७॥

सञ्जीवनी

वचनमेवाह—हरिरिति । हरिर्मनोहर उपयातु तव समीपमागच्छतु; किञ्च बहुमधुरं तवानुनयवचनं वदतु; त्वं हृदयं [1]मनोऽतिविधुरमतिविह्वलं किमिति करोषि मानाग्रहेण । तद्यथा—

सौन्दर्यसारः सखि नन्दसूनु-
[2]स्तस्यापि राधा स्पृहणीयमूर्तिः ।
तस्याश्च [3]कृष्णे प्रणयानुबन्ध-
स्तस्याभिमानैक[4]धनेषु मानः ॥ इति ॥८॥

पदद्योतनिका

कीदृशं [5]तव वचनमित्यत आह—हरिरिति । हरिरुपयातु आगच्छतु । बहुमधुरं तवानुनयवचनं वदतु । त्वं हृदयं मनः अतिविधुरं अतिविह्वलं किमिति करोषि । न किञ्चित्प्रयोजनमित्यर्थः ॥८॥

जयन्ती

तदेवाह—हरिरिति । हरिः उपयातु; मधुरं अनुनयवचनं बहु वदतु । तेन तव तापशान्तिर्भविष्यति । गृहागतं निस्सारितवती । हृदयमन्तःकरणं अतिविधुरं अत्यन्तशून्यं करोषि ॥८॥

1. मनो विधुरमतिवि लं—फ.ज. 2. तस्यास्ति—ग. 3. कृष्णप्रणयानुबन्धः—इ.फ.ह.ज. कृष्णः प्रणयानुबन्धः—ग. 4. धने सुमानः—इ.ह. धने नु मानः—फ.ज. 5. नास्ति—क.

श्रीजयदेवभणितमतिललितम्
सुखयतु रसिकजनं हरिचरितम् ॥९॥

सञ्जीवनी

(श्रीजयदेवेति ।) श्रीजयदेवेन भणितमुक्तं हरिचरितं रसिकजनं श्रीराधाकृष्णभक्तिभावनाचतुरं सुखयतु आनन्दयतु । कीदृशम् ? अतिललितं [1]शृङ्गाररसस्निग्धमधुरवादादिगुणयुक्तम् । "शृङ्गारप्रचुरा चेष्टा यत्र तल्ललितं विदुः" इति ॥९॥

[2]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामष्टादशः प्रबन्धः

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवेन भणितं उक्तं हरिचरितं कर्तृ रसिकजनं [3]भावुकजनं सुखयतु [4]सुखिनं [5]करोतु । कीदृशम् ? अतिललितं अतिसुन्दरं सुश्राव्यमित्यर्थः ॥९॥

[6]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामष्टादशः प्रबन्धः

जयन्ती

श्रीजयदेवेति । श्रीजयदेवस्य भणितं रचितं अतिललितं मृदुलं हरिचरितं (श्रीकृष्ण)चरित्रं रसिकः काव्यरसज्ञः स चासौ जनः तं सुखयतु ॥९॥

[7]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामष्टादशः प्रबन्धः

---

1. शृङ्गारहारस्निग्ध–इ. शृङ्गारहासस्निग्धां–ग. शृङ्गारहासस्निग्ध–ह.
2. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 3. भाविकजनं–ड. नास्ति–क.ल.म.
4, 5. नास्ति–क. 6. इति अष्टादशसर्गः–ड. 7. नास्तीयं पुष्पिका–इ.

एकोनविंशः प्रबन्धः

स्निग्धे यत्परुषाऽसि यत्प्रणमति स्तब्धाऽसि यद्रागिणि
द्वेषस्थाऽसि यदुन्मुखे विमुखतां याताऽसि तस्मिन् प्रिये ।
तद्युक्तं विपरीतकारिणि तव श्रीखण्डचर्चा विषं
शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥१॥

सञ्जीवनी

गीतार्थं सङ्गृह्य श्लोकेनाह—स्निग्धेत्यादि । हे विपरीतकारिणि [1]विरुद्धकारिणि [2]तत्ततो हेतोस्त्वय्येतद्युक्तमेव । किं तत् ? श्रीखण्डचर्चा चन्दनवार्ताऽपि तव विषमिव [3]गरलमिव दहति । किञ्च शीतांशुश्चन्द्रः [4]तपनः सूर्य इव सन्तापको भवति । किञ्च क्रीडामुदः [5]केलिप्रमोदाः यातनास्तीव्रवेदना[6]प्रदाः । [7]कुतः एतद्विपरीतं [8]जातम् ? तस्मिन् प्रिये [9]श्रीकृष्णचन्द्रे प्रणमति नमस्कुर्वति सति यतस्त्वं परुषाऽसि कठिनाऽसि, यतस्तब्धासि [10]सगर्वाऽसि, यद्रागिणि सानुरागे [11]स्निग्धे प्रिये द्वेषस्थाऽसि असन्तुष्टाऽसि, यदुन्मुखे [12]आलिङ्गनाय [13]सम्मुखे विमुखतां पराङ्मुखतां याताऽसि [14]इत्यर्थः ॥१॥

पदद्योतनिका

वश्यं प्रियं कोपेन त्यजन्तीं राधां सखीदं [15]प्राह—स्निग्ध इति । हे विपरीतकारिणि विपर्ययविधायिनि राधे त्वं स्निग्धे मधुरवादिनि तस्मिन् प्रिये कृष्णे [16]यत्परुषाऽसि, यत्प्रणमति विनीते सति स्तब्धाऽसि दण्डवत् स्थिताऽसि, यद्रागिणि सानुरागे तस्मिन् प्रिये द्वेषस्थाऽसि असन्तुष्टाऽसि, यत् उन्मुखे प्रिये विमुखतां परावृत्तिं याताऽसि तत्तस्मात्कारणात् श्रीखण्डचर्चा चन्दनकथाऽपि तव विषमिव; शीतांशुश्चन्द्रस्तपनः सूर्य इव; हिमं तुषारः हुतवहः अग्निरिव;

1. विरुद्धविधायिनि—इ.फ.ग.ह.ज. 2. तत्वतो हेतोः—ग. 3. नास्ति—अ.ब.ग. 4. नास्ति—अ.व. 5. केलिप्रमोदयातनाः—इ. 6. इव—अ.व. 7. उत एतद्विपरीतं—ग. 8. नास्ति—इ.फ.ग.ह.ज. 9. श्रीकृष्णे—इ.फ.ग. ह.ज. 10. स्निग्धे सानुरागे सगर्वाऽसि—इ.फ.ग.ह.ज. 11. नास्ति—इ.फ. ग.ह.ज. 12. नास्ति—अ.व. 13. सन्मुखे—फ.ग.ह.ज. नास्ति—अ.ब. 14. नास्ति—इ.फ.ग.ह.ज. 15. प्रत्याह—ड. 16. यत्पुरुषादयुक्ताऽसि—क.

[1]सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मकुटेन्द्रनीलमणिभिः [2]सन्दर्शितेन्दीवरम् ।

[3]क्रीडामुदः सन्तोषाः यातनास्तीव्रवेदना इति युक्तमेव योग्यमेव । तव मदीयवचनविपरीतकारित्वात् ॥१॥

[4]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां मुग्धमुकुन्दो नाम नवमः सर्गः ॥

जयन्ती

श्रीखण्डादेः सन्तापकत्वात् कथं कर्तव्यमित्याह–स्निग्धे इति । हे प्रिये हे राधे विपरीतकारिणि त्वं स्निग्धे स्नेहयुते तस्मिन् कृष्णे परुषाऽसि रूक्षाऽसीति यावत् । तस्मिन् प्रणमति सति नमस्कुर्वति स्तब्धाऽसि । अनुनयानङ्गीकारेण करधरणालिङ्गनादिषु न नम्रासीति यावत् । तस्मिन् रागिणि सति द्वेषस्थाऽसि द्वेषजन्यकार्ये तिष्ठसीति द्वेषस्था द्वेषिणीति भावः । यत् तस्मिन् उन्मुखे अभिमुखे सति विमुखस्य भावः विमुखता तां वैमुख्यं चुम्बनादौ याताऽसि प्राप्ताऽसीति [5]तत्तस्मात्कारणात् हे विपरीतकारिणि उक्तरीत्या वैपरीत्यशालिनि तव विपरीतकारिण्याः श्रीखण्डस्य चर्चा लेपनं विषं भवति । शीतांशुः चन्द्रः तपनः सूर्यः अभवत् । हिमं स्रङ्मलयमारुतव्यजनादिशीतोपचारसमुदायरूपं हुतवहः वह्निर्भवति । क्रीडामुदः रतिप्रमोदसाधनसामग्र्यः यातनाः वेदनारूपाः भवन्ति इति तत्सर्वं युक्तम् । अत्र श्रीखण्डचन्द्रादेर्विषत्वाद्यारोपस्य विरुद्धत्वात् विरोधालङ्कारः । तल्लक्षणम्–'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः" इति काव्यप्रकाशे (१०.२४) ॥१॥

[6]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां कलहान्तरितावर्णने मन्दमुकुन्दो नाम नवमः सर्गः ॥

सञ्जीवनी

सर्गान्ते हृदयशान्त्यै [7]मङ्गलमारचयति–सान्द्रेति । वयं [8]श्रीगोविन्दस्य चरणकमलमशुभस्कन्दाय [9]वन्दामहे भक्तिप्रतिबन्धकदुरितनाशाय वन्दामहे ।

1. पद्यमिदं सव्याख्यं नोपलभ्यते–ड.ल.म.क. 2. सन्दर्शितेन्दिन्दिरम् –इ. 3. क्रीडाः–ड.ल.म. 4. इति श्रीगीतगोविन्दटीकायां पदद्योतनिकायां नवमः सर्गः–ड. 5. यत् तत्तस्मात्–इ. 6. इति गीतगोविन्दे कलहान्तरितावर्णने–इ. 7. मङ्गलमाचरति–इ.फ.ग.ह.ज. 8. श्रीगीतगोविन्दस्य–अ.ब. 9. नास्ति–इ.फ.ग.ह.ज.

स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे ॥२॥
इति श्रीगीतगोविन्दे [1]मुग्धमुकुन्दो नाम नवमः सर्गः ॥

कीदृशम् ? स्वच्छन्दं स्वेच्छया मकरन्दवत्सुन्दरञ्च यथा स्यादेवं गलन्त्या [2]स्रवन्त्या मन्द.किन्याऽऽकाशगङ्गया मेदुरं स्निग्धम् । (पुनः) [3]कीदृशम् ? सान्द्रो निबिडो हर्षो येषां ते इन्द्रादयो दिविषदो देवास्तेषां वृन्दैस्समूहैः [4]अमन्दादरात् बद्धादरात् समन्तान्नम्रैर्नतियुक्तैस्तैर्मकुटेन्द्रनीलमणिभिः [5]सन्दर्शितेन्दीवरम् ॥२॥

इति [6]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[7]शिवदासात्मजवनमालिभट्टविरचितायां [8]वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां कलहान्तरितावर्णने [9]मुग्धमुकुन्दो नाम नवमः सर्गः ॥

---

1. नास्ति–अ.ब. अमन्दमुकुन्दो नाम–इ.फ.ग.ह.ज. 2, 3. नास्ति–ग. 4. अमन्दादरादासमन्तान्नम्रैः–ग. 5. सन्दर्शिता इन्दिन्दिरा भ्रमरा यत्र तादृशम् –इ.फ.ग.ह.ज. 6. श्रीमत्–अ.ब. 7. श्रीशिवदासपण्डितात्मज–ग.ह. 8. नास्ति–अ.ब. 9. अमन्दमुकुन्दो–अ.ब.इ.फ.ग.ह.ज.

दशमः सर्गः

[1]मुग्धमधुसूदनः

अत्रान्तरे मसृणरोषवशा[2]मसीम-
निःश्वासनिःसहमुखीं सुमुखीमुपेत्य ।
सव्रीडमीक्षितसखीवदनां [3]प्रदोषे
सानन्दगद्गदपदं हरिरित्युवाच ॥१॥

सञ्जीवनी

दशमे त्वथ निःश्वासम्लानविम्वाधरद्युतिम् ।
राधामुपेत्य कुपितां हरिरूचे सुधामुखीम् ॥
तत्कोपशान्त्यै निपुणः स्वदण्डं स्वसुखप्रदम् ।
तटस्थ इव गोविन्दो वहुरूपमवर्णयत् ॥

साम्प्रतं श्रीकृष्णो राधामनुनयन्नाह—अत्रेति । [4]अत्रान्तरेऽस्मिन्नेवावसरे प्रदोषे रात्रिमुखे वा सुमुखीं राधामुपेत्य कोपहरस्तापहरो वा हरिः आनन्द-सहितानि गद्गदानि रसावरुद्धकण्ठानि [5]पदानि यथा स्यात्तथा इति वक्ष्यमाण-मुवाच । कीदृशीम् ? मसृणस्य कर्कशस्य [6]रोषस्य क्रोधस्य वशामधीनाम् । (पुनः) कीदृशीम् ? [7]असीमं दीर्घं यो निःश्वासस्तेन निःसहं विरहदुःखसह-नाक्षमं मुखं यस्यास्ताम् । (पुनः) कीदृशीम् ? सव्रीडं सलज्जं [8]ईक्षितं सखीवदनं यया ताम् ॥१॥

पदद्योतनिका

इदानीं सोत्कण्ठः श्रीकृष्णो राधामनुनयन्नाह–अत्रेति । अत्रान्तरेऽस्मिन्न-वसरे हरिर्दिनान्ते सन्ध्यासमये तां सुमुखीं [9]शोभनमुखीं राधां समुपेत्य [10]समीपमागत्य सानन्दानि अत एव गद्गदानि कण्ठादल्पं निर्गच्छन्ति पदानि यस्यां क्रियायां तद्यथा भवति तथा [11]इति वक्ष्यमाणं [12]उवाच। कीदृशीं ताम् ?

---

1. चतुरचतुर्भुजः–नि.सा. 2. अपार–नि. सा. रोषरसामसीम–इ. 3. दिनान्ते–नि.सा. 4. अत्रास्मिन्नेवावसरे–अ.ब. 5. नास्ति–इ.फ.ग.ह.ज. 6. नास्ति–अ.ब. 7. असीमस्य दीर्घस्य–इ.फ.ग.ह.ज. 8. नास्ति–अ.ब. 9. नास्ति–क. 10. नास्ति–क.ल.म. 11. नास्ति–क. 12. आह च–ल.

देशवराडीरागे अष्टतालीताले

वदसि यदि किञ्चिदपि दन्तरुचिकौमुदी
हरति दरतिमिरमतिघोरम् ।
स्फुरदधरसीधवे तव वदनचन्द्रमा
रोचयति लोचनचकोरम् ॥२॥
प्रिये चारुशीले मुञ्च मयि मानमनिदानं
सपदि मदनानलो दहति मम मानसं
देहि मुखकमलमधुपानम् ॥ध्रुवपदम्॥

मसृणस्य कर्कशस्य रोषस्य [1]क्रोधस्य वशां अधीनाम् । पुनः कीदृशीं [2]ताम् ? असीमस्य महतो निःश्वासस्य निःसहं [3]सोढुमशक्यं मुखं यस्याः ताम् । कोपवदनामित्यर्थः । पुनः कीदृशीम् ? सव्रीडं सलज्जं ईक्षितं दृष्टं [4]सखीवदनं सखीमुखं यया ताम् । पश्य कृष्णचेष्टितमिति भावः ॥१॥

जयन्ती

हरिरुपयातु वहु मधुरं वदत्विति सूचितमेवाह—अत्रान्तर इति । अत्रान्तरे एतावन्मध्ये सख्याः संवादसमये हरिः मसृणः अतिपोषितो रोषरसः गाढीकृतो रोषो यस्यास्ताम् । असीमानः निर्मर्यादाः अगणिताः निःश्वासाः तैः निःसहं मुखं यस्यास्तां सुमुखीं राधामुपेत्य अभ्येत्य, व्रीडया लज्जया सहितं यथा तथा ईक्षित अवलोकितं सखीवदनं यथा तथा, आनन्देन सहितं गद्गदानि पदानि यस्मिन् यथा तथा दिनान्ते उवाच ॥१॥

सञ्जीवनी

देशवराडीरागे अष्टतालीताले । ध्रुवपदम् । रागरूपम्—

"[5]आरब्धगमनमुद्रा निद्राघूर्णायमाननयन[6]युगा ।
[7]सुखशायिनि निजदयिते देशवराडी भवेद् गौरी ॥" इति ।

'लघुद्रुतौ लघुश्चैवाष्टताली [8]सा प्रकीर्तिता' इति तालरूपम् । हर्युक्तं गीतेनाह—वदसीति । हे प्रिये [9]वल्लभे [10]यदि [11]त्वं किञ्चिदपि सरोषं सप्रसादं

1, 2. नास्ति–ड. 3. सोढ्मसमर्थं–क.ल.म. 4. नास्ति–क. 5. आरब्धगमनमुन्निद्रा–अ.ब. 6. युग्मा–अ.ब.इ.फ.ग.ह.ज. 7. सुखमयनिजजनदयिते–फ.ज. 8. नास्ति–इ.फ.ग.ह.ज. 9. नास्ति–अ.ब. 10. त्वं यदि–इ.ग.ह. यदि–फ.ज. 11. त्वं वदसि किञ्चित्सरोषं–अ.ब.

वा वदसि तदा तव दन्तरुचिकौमुदी दन्तरुचिज्योत्स्ना अतिघोरं अतिभीमं दरतिमिरं साध्वसान्धकारं अपराधान्धकारं वा हरति नाशयति । हरतीत्यनेन [1]मुखे हास्यं प्रार्थितम् । किञ्च तव वदनचन्द्रमा मुखचन्द्रः स्फुरदधरसीधवे प्रकाशबहुलाधरा[2]मृतार्थे मल्लोचनचकोरं रोचयति [3]राधयति; नेत्रं पक्षिणं करोति । अनेन [4]श्रीराधाधरामृतं प्रार्थितम् । एवं गम्भीरार्थमुक्त्वा वाञ्छितमाह—हे [5]प्रिये ! हे चारुशीले सुन्दरस्वभावे मयि मानं मुञ्च त्यज । [6]कीदृशम् ? अनिदानमकारणं अन्ययुवतिभजनकारणरहितं वा । [7]चारुशीलाया नैतद्युक्तमिति गूढाभिप्रायेणोपालम्भ इति भावः । कीदृशे मयि ? प्रिये वल्लभे चारुशीले मनोहरस्वभाव इति वा । मानात्यागे दोषमाह—मदनानलः कामाग्निरकाले मम मानसं दहति । नायं मानसमय इति भावः । अतः सपदि शीघ्रं [8]मुखकमलमधुपानं देहि [9]प्रयच्छ । अनेन [10]सम्मुखीकरणं प्रार्थितम् ॥२॥

पदद्योतनिका

उक्तमर्थं गीतेनाह—(वदसीति ।) [11]अस्य देशवराडीरागस्तल्लक्षणम्—

'आरब्धगमनमुद्रा घूर्णयमाननयनयुग्मा ।
सुखशायिनि निजदयिते देशवराडी भवेद्गौरी ॥' इति ।

हे चारुशीले मनोहरसद्वृत्ते प्रिये मयि अनिदानं अकारणं मानमभिमानं मुञ्च त्यज । किमिति मानत्यागस्तत्राह—मदनानलः कामाग्निः मम मानसं दहति । अतः कारणात्सपदि [12]दाहानन्तरं [13]मे मुखकमलमधुपानं [14]मुखपद्ममधुपानं देहि । [15]मधुना वह्निदाहः प्रशाम्यति । हे राधे त्वं यदि यदा किञ्चिदपि वदसि तदा तव दन्तरुचिकौमुदी दशनकान्तिरेव चन्द्रज्योत्स्ना अतिघोरं अतिशयेन भयङ्करं [16]दरतिमिरं [17]भयान्धकारं [18]हरति नाशयति । अनु च तव वदनचन्द्रमाः

---

1. सुखं हास्यं प्रार्थिते–अ.ब. 2. अमृतार्थं–इ.फ.ग.ह.ज. 3. नास्ति–अ.ब. 4. श्रीवृषभानुकुमार्यधरामृतं–ग. 5. नास्ति–इ.फ.ग.ह.ज. 6. नास्ति–इ.फ.ग.ह.ज. 7. चारुशीलाय–फ.ग.ह.ज. 8. मुखकमलं मधुपानं च देहि–इ.फ.ग.ह.ज. 9. नास्ति–अ.ब. 10. सन्मुखीकरणं–फ.ग.ह.ज. 11. वराडी-देशीरागः रूपकतालेन गीयते । तल्लक्षणम्—क. देशिवराडिरागः । रागलक्षणम्–ल.म. 12. दाहानन्तरमेव–क.ल.म. 13. नास्ति–क.ल.म. 14. नास्ति–क.ल.म. 15. अधुना–क. 16. नास्ति–ल.म. 17. नास्ति–क.ल.म. 18. हरतु नाशयतु–क.

सत्यमेवासि यदि सुदति मयि कोपिनी
देहि खरनखरशरघातम् ।
घटय भुजबन्धनं जनय [1]रदखण्डनं
येन वा भवति सुखजातम् ।।३।।

---

[2]मुखचन्द्रः स्फुरदधरसीधवे [3]देदीप्यमानाधरामृतार्थे लोचनचकोरं नेत्रपक्षि-विशेषं [4]रोचयति [5]रुचिमिच्छां कारयति[6] ।।२।।

जयन्ती

वदसीति । किञ्चिदपि मृदु कठिनं वा वदसि यदि चेत् दन्तरुचिरेव कौमुदी ज्योत्स्ना अतिघोरं बहुगाढं दरमेव भयमेव तिमिरं अन्धकारं हरतु । त्वया अनादरपूर्वकमुक्तं चेदपि मम भयं यास्यति । मौनं त्याज्यमिति भावः । तव वदनमेव चन्द्रमाः मुखचन्द्रः । लोचनमेव चकोरः । अर्थात् मम नेत्रं चकोरं स्फुरतु उद्भवतु । अधर एव सीधुः तस्मै । सुधात्वारोपे कर्तव्ये प्रमादकत्वात्सीधुशब्दप्रयोगः । आनन्दातिशयसम्बन्धेन सुधायां लक्षणा चन्द्रेऽभावान्न चकोराणामनास्वाद्यत्वात् । रोचयतु, सीधवे रुचिमुत्पादयितुं मुखं प्रदर्शयेति रूपकालङ्कारेण व्यज्यते । तत्र रूपकं वदनावयवे चन्द्रावयवारोपणात्सावयवम् ।। ध्रुवपदम् । चारुशीले सम्यक्स्वभावे प्रिये कान्ते । प्रार्थनार्थं रञ्जनार्थं द्विः पठनीयम् । मयि विषये अनिदानं निर्निमित्तं मानं कोपं मुञ्च त्यज । मदन एव अनलः मम मानसं चेतः दहति सन्तापयति । मुखमेव कमलं तस्य मधु अधररूपं तस्य पानं देहि । तवाधरमकरन्दास्वादात् मदनदाहः शाम्यतीति भावः । इति ध्रुवाया व्याख्यानम् ।।२।।

सञ्जीवनी

एवमप्रसन्नां दृष्ट्वा [7]सानुकूलं दण्डमेवादिशन्नाह—सत्यमेवासीति । हे [8]सुदति शोभन[9]दशने सत्यमेव यथार्थं यदि मयि कोपिनी क्रोधवत्यसि तदा

---

1. दर–अ.ब. 2. नास्ति–ड. 3. देदीप्यमानाधरामृतार्थी–ल.म., 4. रोचयतु–क. 5. तः 6. पर्यन्तं नास्ति–क.ल.म. 7. सानुकूलदण्दमुपदिशन्नेवाह–इ.फ.ह.ज. स्वानुकूलदण्डमुपदिशन्नेवाह–ग. 8. सुन्दरि–अ.ब. 9. दर्शने–अ.ब.

खरनखरशरघातं तीक्ष्ण[1]नखनाराचघातं देहि । अनेन नखप्रहार[2]दानेन सुरतमेव ध्वनितम् । अयमेव [3]पुरो दण्डः । [4]किञ्च [5]सापराधस्य [6]भुज-बन्धनमपि युक्तमेव । भुजबन्धनमेव घटय कुरु न [7]रज्ज्वादिना । किञ्च [8]रदखण्डनं जनय विरचय । एतेन दण्डातिशयः प्रोक्तः । स यथा—

"दयिताबाहुपाशस्य कुतोऽयमपरो विधिः ।
जीवयत्यर्पितः [9]कण्ठे मारयत्यपवर्जितः ।।"

येन [10]तव सुख[11]समूहो भवति तद्विधेहि ।।३।।

पदद्योतनिका

सत्यमिति । हे सुदति [12]शोभनदन्ते यदि मयि विषये सत्यमेव कोपिनी क्रोधवती असि तदा [13]खरनखरशरघातं तीक्ष्णनख[14]वाणघातं देहि । अनु च भुजबन्धनं घटय कुरु; रदखण्डनं दन्तघातं जनय [15]विरचय । [16]वा अथवा [17]येन मुष्टचादिना सुखजातं सुखसमूहो भवति ।।३।।

जयन्ती

सत्यमेवेति । हे सुदति सुष्ठु शोभनाः दन्ताः यस्यास्तत्सम्बोधनम् । दन्तशब्दस्य दतृ आदेशादनन्तरं ङीष् । त्वंमयि कोपिनी रोषवती सत्यमेव यथार्थमेव असि चेत् खराः तीक्ष्णाः नखरा एव शराः तैर्घातं प्रहारं देहि । भुजाभ्यां बन्धनं घटय योजय; रदैः खण्डनं दन्तैः अधरदंशमादिकं जनय कुरु येन नखघातादिना सुखजातं आनन्दसमुदायः । "जातिर्जातञ्च सामान्यम्" इत्यमरः (१.५.३१) । भवति (इति) वाक्यालङ्कारे । कोपावेशेन नखप्रहा-रादिकरणे कोपस्य कृतकार्यत्वाच्छमो भवति तेन सुखं भवतीति भावः । तेन स्वस्य अङ्गनालिङ्गनाद्यभीष्टप्राप्तिर्भवतीति वस्तुना वस्तुध्वनिः । कोपिनी यदीति कथनात्कोपाभावेऽपि आलिङ्गनादिकमावश्यकमिति भावः । यद्यर्थोक्तत्वात्कोपो नास्त्येव ।।३।।

---

1. नखर–ग. 2. दाने–अ.ब. 3. परो–इ.फ.ग.ह.ज. 4. नास्ति–अ.ब. 5. सापराधबन्धनमपि–ग. 6. बन्धनमपि–इ.फ.ह.ज. 7. रक्षादिना–इ. 8. दर–अ.ब.ह. 9. कोषे–अ.ब. 10. तत्सुख–अ.ब. 11. संमोहो–ग. 12. शोभनदन्ति–क.ल.म. 13. खरघातं–ड. खरनखरघातं–ल. 14. बाणनाराचघातं–ड. 15. रचय–क. 16. नास्ति–क. 17. नास्ति–ड.

[1]त्वमसि मम जीवनं त्वमसि मम भूषणं
त्वमसि मम भवजलधिरत्नम् ।
भवतु भवतीह मयि सततमनुरोधिनी
तत्र मम हृदयमतियत्नम् ।।४।।

सञ्जीवनी

एवं कृतदण्डां [2]प्रतोष्याह—त्वमसीति । हे प्रिये ! त्वं मम [3]जीवनं प्राणोऽसि । त्वां विना मम जीवनपि दुर्लभमिति भावः । त्वं मम भूषणमलङ्कारोऽसि त्वां विना भूषण[4]मप्यभूषणमेव; अङ्गभूषणं त्वदङ्गमेव । एतेनालिङ्गनविधिः [5]प्रार्थितः । किञ्च भवजलधौ संसारसमुद्रे त्वमेव मम रत्नमसि; स्वजन्मरत्नाकरे त्वमेव मया रत्नं लब्धमिति भावः । किं बहूक्तेन [6]मया; [7]यथा कश्चिद्रत्नाकरे प्रविश्य [8]संशोध्य महद्रत्नं प्राप्य [9]सुखी भवति तथा [10]स्वजन्मरत्नाकरे [11]त्वां प्राप्याहमिति । [12]इह त्वेक[13]जीवने मयि भवती पूज्या सततं [14]निरन्तरमनुरोधिनी अनुकूला भवतु । [15]तवानुकूले प्रसादे मम हृदयमतियत्नमतिशय[16]यत्नयुक्तं भवति ।।४।।

पदद्योतनिका

त्वमसीति । हे राधे ! त्वं मम जीवनं प्राणोऽसि त्वां विना स्थातुमशक्यत्वात् । त्वं मम भूषणं अलङ्कारोऽसि । त्वं मम भवजलधिरत्नं संसारसागरनिधिरसि । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते' इति; स्त्रीरत्नं त्वमुक्तम् । इह एतादृशे मयि भवती सततं निरन्तरं अनुरोधिनी अनुकूला भवतु । तत्रानुकूल्ये मम हृदयं [17]मनः अतियत्नं अतिशययत्नयुक्तं भवति । तवानुकूल्यार्थं अतिशयं यत्नं करोमीत्यर्थः ।।४।।

---

1. त्वमसि मम भूषणं त्वमसि मम जीवनं–नि.सा. 2. प्रत्याह–इ.फ. ग.हृ.ज. 3. जीवितं–अ. 4. अभूषणं ममाङ्गभूषणं त्वदङ्गमेव–ग. अभूषणमेवाङ्गभूषणमेव त्वदङ्गम्–फ.ज. 5. प्रार्थिता–अ.व. 6. नास्ति–इ.फ.ग.हृ.ज. 7. नास्ति–अ.व. 8. नास्ति–अ.इ.फ.ग.हृ.ज. 9. यथा सुखी–अ.ब. 10. त्वज्जन्मरत्नाकरे–इ.हृ. मज्जन्मरत्नाकरे–ग. त्वां जन्मरत्नाकरे–फ.ज. 11. नास्ति–फ.ज. 12. इह त्वदेकजीवने–इ.फ.ग.हृ.ज. 13. जीवनमपि–अ.व. 14. निरन्तरमनुकूला–अ.ब. 15. तत्र प्रसादे–इ. तव प्रसादे–हृ. तत्र मम हृदयं–ग.फ.ज. 16. रत्नं–अ. 17. नास्ति–क.

नीलनलिनाभमपि तन्वि तव लोचनं
[1]धारयति कोकनदरूपम् ।
कुसुमशरबाणभावेन यदि रञ्जयसि
[2]कृष्णमिदमेतदनुरूपम् ॥५॥

जयन्ती

त्वमसीति । त्वं मम जीवनं प्राणसाधनं असि जीवितं वा । त्वं मम भूषणं कनककिरीटादिमण्डनं असि भवसि । जीवनस्यानन्तरत्वेन गूढत्वात् प्रसिद्धार्थं मण्डनत्वारोपः । त्वं मम भवः संसार एव जलधिः समुद्रः तद्रत्नम् । श्रेष्ठत्वेन मुक्तामणित्वारोपः । कनकादेरुत्कृष्टत्वात् । एकस्या राधायाः जीवनत्वभूषणत्वरत्नत्वादीनां बहूनामारोन्मालारूपकालङ्कारः । असीति क्रियापदस्य पुनः पुनरावर्तनादावृत्तिदीपकालङ्कारः । तेन च भवस्य समुद्रत्वारोपरूपकेण चाङ्गाङ्गिभावेन सङ्कीर्णः । हेति खेदे । भवती त्वमपि सततं सदा अनुरोधिनी अनुरागिणी मदनुकूलेति यावत्; भवतु । तत्र आनुकूल्ये साभिलाषत्वे मम हृदयं अन्तःकरणं अति अत्यर्थं यत्नः त्वत्सुखसमार्जनाय त्वदभीष्टानुष्ठानरूपो यस्तत् । तिष्ठतीति शेषः । एवं स्थिते त्वदनादरः कदा न क्रियत इति भावः । इह अस्मिन् कोपत्यागे इति वा ॥४॥

सञ्जीवनी

एवं स्वदण्डमुक्त्वा सम्प्रति सुरतोत्सवानु[3]कारि लोचनानुरागं वर्णयन्नाह-नीलेति । हे तन्वि कृशाङ्गि नीलनलिनाभं नीलोत्पल[4]सदृशमपि तव लोचनं कोकनदरूपमतिरक्तकमलसदृशं धारयति । मां प्रति रोषारुणत्वं धत्ते । एतेन [5]रागावलोकनं प्रार्थितमिति ध्वनिः । यदि इदं चक्षुः कृष्णं [6]श्यामं कृष्णं मां वा कुसुमशरस्य बाणभावेन बाणत्वेन रञ्जयसि [7]तद्युक्तं करोषि । तदेतच्चक्षु-[8]रनुरूपं योग्यं[9]भवतीत्यर्थः ॥५॥

पदद्योतनिका

नीलेति । तन्वि कृशाङ्गि नीलनलिनाभमपि नीलोत्पलसदृशमपि तव लोचनं कोकनदरूपं रक्तोत्पलसरूपतां धारयति धत्ते; रोषारुणत्वात् । यदि इदं

---

1. धारयसि–इ. 2. कृष्णमेतदनुरूपम्–अ.ब. 3. कारी–फ.ग.ज. 4. सदृशं–अ.ब. 5. सरागावलोकनं–इ.फ.ग.ह.ज. 6. स्यात्–ग. 7. रागयुक्तं –इ.फ.ग.ह.ज. 8. अनुकूलं–अ.ब. 9. भवति–इ.फ.ग.ह.ज.

स्फुरतु [1]कुचकुम्भयोरुपरि मणिमञ्जरी
रञ्जयतु [2]तव [3]हृदयदेशम् ।
[4]रसतु रसनाऽपि तव घनजघनमण्डले
घोषयतु मन्मथनिदेशम् ॥६॥

चक्षुः कृष्णं श्यामं सत् कुसुमशरः कामस्तस्य बाणाः पुष्पाणि तेभ्यो भाव उत्पत्तिर्यस्य [5]मधुनस्तेन रञ्जयसि रक्तं करोषि [6]तदा एतद्रक्तरूपं अनुरूपं योग्यं भवति । यदि मया सह मधुपानं करोषि तदा नेत्रस्य रक्तत्वमुचितं [7]न रोषादिति भावः ॥५॥

जयन्ती

नीलेति । हे तन्वि मृद्वि सुकुमारे त्वं नीलनलिनं नीलोत्पलं तस्याभेवाभा यस्य तत् तव लोचनं कोकनदः रक्तोत्पलं तस्य रूपं आरक्तवर्णं धारयसि कारयसि । रोषवशात्तव लोचनमारक्तं जातमिति भावः । कृष्णं नीलवर्णं इदं लोचनं कुसुमशरस्य मन्मथस्य बाणभावेन शरत्वेन रञ्जयसि रक्तवर्णयसि यदि एतन्नेत्ररञ्जनं अनुरूपं युक्तम् । अत्र एतद्युक्तमित्यनेन समालङ्कारः । अप्रतिहतशररञ्जनं सर्वसम्मतम् । एतेन स्वहृदयस्य अतिवेदनेति वस्तु व्यज्यते । कुसुमशरत्वेन सम्भाव्यमाने रञ्जनोत्प्रेक्षया गूढया रोषकृतारुण्यस्य निह्नवादपह्नवालङ्कारो व्यज्यते । रोषारुण्यं न भवति किन्तु रञ्जनारुण्यमिति । तेनापह्नवेन मयि कदाऽपि तव रोषो नास्तीति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥५॥

सञ्जीवनी

किञ्च स्फुरत्वित्यादि । हे प्रिये मणिमञ्जरी हारलता कुचकुम्भयोरुपरि स्फुरतु तरला भवतु । किञ्च सा लता तव [8]हृदयप्रदेशं रञ्जयतु [9]तन्मण्डनं करोतु । एतेन [10]पुरुषायितमेव सुरतं प्रार्थितमिति भावः । किञ्च तव [11]घनजघनमण्डले निबिडकटिप्रदेशे रशना काञ्च्यपि रसतु शब्दं करोतु । शृङ्गारादिरस-

1. कुचयोः–अ.ब. 2. नास्ति–अ.ब. 3. हृदयेशम्–अ.ब. 4. वसतु–इ. 5. मधुरं जनयसि–ड. मनस्तेन रञ्जयसि–क. 6. यदि इदं चक्षु. तदा एतद्रक्तं रूपं–क. एतद्रक्तं रूपं–ड. 7. तत्त्वं न करोषि रोषादिति भावः–क. 8. हृदयप्रदेशे रञ्जयतु स्तनमण्डनं करोतु–इ. 9. स्तनमण्डनं–ह. 10. पुरुषायितमिव–इ. 11. जघनमण्डले–अ.ब.

स्थलकमलगञ्जनं मम हृदयरञ्जनं
जनितरतिरङ्गपरभागम् ।
[1]भण मसृणवाणि करवाणि चरणद्वयं
सरस[2]गलदलक्तकरागम् ।।७।।

---

[3]सहिता मन्मथनिदेशं कामाज्ञां घोषयतु । त्वया जितमिति मत्पराजयं घोषयत्विति ध्वनिः । अनेन विपरीत[4]सुरतप्रार्थना प्रकटीकृता ।।६।।

पदद्योतनिका

स्फुरत्विति । हे राधे ! मणिमञ्जरी हारलता [5]कुचकुम्भयोः स्तनकुम्भयोरुपरि स्फुरतु [6]शोभताम् । सा [7]रत्नलता तव हृदयदेशं वक्षःप्रदेशं रञ्जयतु अलङ्करोतु; रश्मिभिरिति शेषः । तव घनजघनमण्डले निविडकटिपुरोभागदेशे रशनाऽपि काञ्च्यपि रसतु शब्दं करोतु । सा काञ्ची मन्मथनिदेशं कामाज्ञां घोषयतु शब्दायताम् ।।६।।

जयन्ती

स्फुरत्विति । हे तन्वि ! तव कुचावेव कुम्भौ तयोरुपरि मणिमञ्जरी मुक्तादिहारः स्फुरतु वसतु । भूषयत्विति यावत् । अत एव सा मणिमञ्जरी तव हृदयदेशं वक्षःस्थलं रञ्जयतु स्वकान्त्या भूषयतु । कुचकुम्भस्थहारस्यैव वक्षःस्थलभ्रामकत्वेन मध्ये भूषणान्तरस्यानवकाशो व्यज्यत इति वस्तुध्वनिः । रशना काञ्ची । अपिः समुच्चायकः । तव घनस्य विपुलस्य जघनस्य मण्डले वर्तुलाकारभागे वसतु । जघनावस्थानप्रयोजनमाह—मन्मथस्य निदेशः आज्ञा निधुवनं कर्तव्यमिति तं घोषयतु सर्वत्रोच्चध्वनिना प्रकटयतु । अनेन सकिङ्किणीकध्वनिः मन्मथाज्ञोद्घोषणत्वेन सम्भावनाद् गूढोत्प्रेक्षया च पुरुषायितादिबन्धो व्यज्यते ।।६।।

सञ्जीवनी

किञ्च [8]कृतमौनां दृष्ट्वा वचनव्यापारं कारयितुं [9]सम्बोधयन्नाह—(स्थलेति ।) हे मसृणवाणि स्निग्धवचने भण ब्रूहि आज्ञापय वा । सरसः

---

1. घनमसृणवाणि–ड. 2. लसदलक्तक–नि.सा. 3. सहित–फ.ज. 4. रतप्रार्थना–इ.फ.ग.हृ.ज 5. कुचकुम्भयोरुपरि–ड.क. 6. शोभतु–ल.म. 7. रक्तलता–ड. 8. धृतमौनां–इ.फ.ग.हृ.ज. 9. सम्बोधयति–इ.ग.हृ. सम्बोधयति पुनररमिताऽपि मलयजपवनेन चन्दनवायुना च ज्वलतीति–फ.ज.

सान्द्रो गलदलक्तकरागो [1]गतयावकपङ्को यत्र तादृशं चरणद्वयं पादयुगलं करवाणि कुर्याम् । कीदृशम् ? [2]स्थलकमलगञ्जनं [3]स्थलकमलस्यारुणत्व[4]सुगन्धित्वसुकुमारत्वादिगुणैः स्वकान्त्या वा गञ्जनं शोभा[5]तिरस्कारकम् । अत एव मम हृदयरञ्जनमनुरागप्रदम् । (पुनः) कीदृशम् ? जनित उत्पादितो रतिरङ्ग सुरतकौशले परभागः परस्परशोभा येन । क्रौञ्चवन्धादौ [6]मम हृदये लग्न[7]मलक्तकं परस्परशोभां प्रदास्यतीति भावः । स यथा—

"क्रौञ्चवद्यत्र सुरते वाहुपक्षयुगं वधूः ।
[8]सन्धूनयति सुरते रमते क्रौञ्चकस्तु सः ॥"

इति कामसर्वस्वे । अनेन चरणग्रहोऽनुनयः [9]कथित इति ध्वनिः ॥७॥

पदद्योतनिका

स्थलेति । हे [10]राधे घनमसृणवाणि निविडस्निग्धवचने अहं तव [11]पदपङ्कजं [12]चरणकमलं सरसः सान्द्रः [13]लसन् शोभमानः अलक्तकरागो यावकपङ्को यस्मिन्नेतादृश करवाणि । प्रार्थनायां लोट् । कीदृशं [14]पदपङ्कजम् ? स्थलकमलस्य गञ्जनं तिरस्कारकम्; [15]सदृशमित्यर्थः । पुनः कीदृशम् ? मम हृदयरञ्जनं अनुरागकारकम् । पुनः कीदृशम् ? जनितो रतिरङ्गे [16]सुरतकौशले परभागः परस्परशोभा येन, [17]मयाऽलक्तकेन चेदिदं रज्यते तदेदमपि क्रौञ्चवन्धादौ मम हृदये लग्नं सत् परां शोभां परस्परं दास्यतीति भावः ॥७॥

जयन्ती

स्थलेति । हे मसृणा मधु(र)कोमला वाणी गीर्यस्यास्तत्सम्बुद्धिः । याहि माधवेत्यादि परुषवचनान्यपि स्वसन्तोषकाणीति द्योतयितुं मर्मोद्घाटनार्थं वा । स्थलकमलं अपङ्कजं कमलं तस्य गञ्जनं भञ्जनं, तदपेक्षया मृदुलारुण्यात । अत एव मम हृदयस्य रञ्जनं अन्तःकरणाह्लादकं वक्षःस्थलभूषकं वा । जनित उत्पादितः रतिरेव रङ्गः नाट्यभूमिः तस्याः परभागः उत्कृष्टप्रदेशः येन तत् । तव चरणद्वयं सरसः आर्द्रः गलन् स्यन्दन् अलक्तकः लाक्षा तस्य रागः रसः

1. गलद्यावक—इ.फ.ग.हृ.ज. 2. नास्ति—अ.ब.इ.फ.हृ.ज. 3. जनितारुणत्व—अ.ब. 4. सौगन्धित्व—ग. 5. तिरस्कारम्—ग. 6. मद्धृदये—फ.हृ.ज. 7. अलक्तक सत्परस्परशोभां—इ.फ.ग.हृ.ज. 8. सन्धूनयन्ती—इ. 9. कृत इति—इ.फ.ग.हृ.ज. 10. नास्ति—क.ल.म. 11. पादपङ्कजम्—क.ल.म. 12. कमलचरणं रसज्ञ—ङ. 13. लसत्—ङ.ल.क.म. 14. पादपङ्कजम्—क.ल.म. 15. तत्सदृशमित्यर्थः—क. 16. सुरतकौशल्ये—क. 17. मदीयालक्तकेन-क.

स्मरगरलखण्डनं मम शिरसि मण्डनं
[1]धेहि पदपल्लवमुदारम् ।
ज्वलति मयि दारुणो मदनकद[2]नानलो
हरतु तदुपहितविकारम् ॥८॥

रक्तिमाधिक्यात् रागव्यपदेशो यस्मिन् तत् । विधेयविशेषणम् । करवाणि करोमि । आशिषि लोट् । भण आज्ञापय । पादसेवनमप्याज्ञां विना कर्तुं न शक्यमिति । (अनेन) अतिविधेयत्वमुक्तम् । अत्र स्थलकमलेत्यत्र व्यतिरेकालङ्कारः ॥७॥

सञ्जीवनी

[3]उपक्रान्तो चरणप्रसादं प्रार्थयते—[4]स्मरेति । [5]हे राधे ! उदारं रतिजनकं पदपल्लवं चरणकिसलयं शिरसि धेहि धारय । कीदृशम् ? मम मण्डनमलङ्करणम् । मण्डनस्यापि मण्डन[6]मिति भावः । पुनः कीदृशम् ? स्मरगरलखण्डनं कामतापनाशनम्; आवश्यकमेत[7]त्कर्तव्यम् । मयि मदनस्य कामस्य यत्कदनं सन्तापस्स एवानलोऽग्निर्ज्वलति । कीदृशः ? दारुणः सन्तापकः । अत एव तव पदपल्लवं तदुपहितविकारं मदनकृतोपतापं हरतु । शिरस्सन्तापनिवर्तनेन सर्वाङ्गपीडानिवृत्तिरितिवत् । [8]मणिदारुण इति पाठे दारुकमणिभ्योप्यतिसन्तापकः । पल्लवाच्छादितस्य सन्तापो [9]न भवति; तद्वदत्रापि ॥८॥

पदद्योतनिका

स्मरेति । त्वमुदारं मनोहरं पदपल्लवं चरणपल्लवं मम शिरसि मण्डनं अलङ्कारमिव देहि [10]अर्पय । कीदृशम् ? [11]स्मरगरलस्य कामविषस्य खण्डनं नाशकम्; कामपीडानिवर्तकमित्यर्थः । मयि दारुणकर्मा मदनकदनानलः काम-

1. देहि—इ.ड. 2. नारुणो—नि.सा. 3. उपक्रान्ते चरणप्रसादे—इ. उपक्रान्ते चरणप्रसादं—फ.ग.ह.ज. 4. नास्ति—अ.ब.इ.फ.ग.ज. 5. हे वृषभानुसुते—ग. 6. इत्यर्थः—इ.फ.ग.ह.ज. 7. कर्तव्यमेव—इ.फ.ग.ह.ज. 8. मणिः इति पाठे दारुकः प्राणिभ्योऽप्यतिसन्तापकः—इ. मणिः पाठे दारुकमणिभ्योऽप्यतिसन्तापकः—ग. मणिः इति पाठे दारुकमणिभ्योऽप्यतिसन्तापकः—ह. मणिरिति पाठे दारुणः प्राणिभ्योऽप्युपसन्तापकः—फ.ज. 9. न भवतीति—ग. न भवति तद्वदत्रापीति भावः—फ.ज. 10. नास्ति—ड. 11. गरलस्य—क. स्मरस्य—ल.म.

इति चटुलचाटु पटु चारु मुरवैरिणो
राधिकामधि वचनजातम् ।
[1]जयति जयदेवकविभारतीभूषितं
मानिनीजनजनितशातम् ॥९॥

परितापवह्निः ज्वलति दीप्यते । [2]तत्पादपल्लवं [3]कर्तृ तदुपहितविकारं मदनकृतोपतापं हरतु । शिरःपीडानिवर्तनेन सर्वशरीरपीडानिवृत्तिरिति शिरसि दानम् । अथ वा पल्लवाच्छादितशिरसः [4]सूर्यतापो न भवतीति ॥८॥

जयन्ती

स्मरेति । स्मर एव गरलं विषं तस्य खण्डनं नाशकम् । लोके पल्लवादेर्विषहरत्वं वर्तत इति । मम शिरसि मण्डनं अलङ्कारः प्रणामकाले उत्तानपादसंज्ञकबन्धसुखकाले वा मूर्ध्नि तिष्ठतीति शिरोमण्डनत्वम् । उदारं उत्कृष्टं पदमेव पल्लवः नवकिसलयः तदेव हि लाक्षानुगुणं करिष्यामि (इति) पूर्ववाक्यस्थेनान्वयः । मयि तदेव सेवनार्थितमिति वा देहि यच्छ । तेन किं तव स्यादित्यतः प्रभावमाह—मयि मदनकदनं प्रणयकलहः स एव अनलो वह्निः मदनकदनं सुरतं तदेव अनलः अप्राप्तत्वात् । ज्वलति वाञ्छारूपेण तापयति । तदुपहितः तत्कृतः विकारः विरहलक्षणाग्निसन्तापादिः तं हरतु नाशयतु । प्रणामार्थं शिरसि मया धृतं चेच्चरणद्वयं तव कोपशान्तिर्भविष्यति तेन मम सन्तापः शाम्यतीति भावः । ईर्ष्याकृतगुरुकोपस्य प्रार्थनावधिकत्वात् ॥८॥

सञ्जीवनी

किञ्च [5]फलभूतार्थमाह—इतीति । [6]इति पूर्वोक्तप्रकारेण मुरवैरिणः श्रीकृष्णस्य राधिकां अधि राधां लक्षीकृत्य वचनजातं [7]साभिप्रायवचनसमूहो जयति उत्कर्षेण वर्धताम् । कीदृशम् ? चटुलं मनोहरं, चाटु प्रेमयुक्तं, पटु [8]चतुरं, चारु सुकुमारम् । पुनः कीदृशम् ? [9]जयदेवकविभारतीभूषितं [10]जय-

---

1. जयति पद्मावतीरमणजयदेवकविभारतीभणितमपि गीतम्–इ.ड. 2. तत्पदपल्लवं–क. 3. नास्ति–ड. 4. सूर्यतापो भवतीति–ल.म. सन्तापो भवतीति भावः–क. 5. फलभूतमर्थमाह–इ.फ.ग.ह.ज. 6. इतीति–फ.ज. 7. साभिप्रायं–इ. अभिप्राय–फ.ज. 8. नास्ति–अ.ब. 9. नास्ति–अ.ब.इ.फ.ह.ज. 10. जयदेवस्य कवेः–इ.फ.ह.ज.

विंशः प्रबन्धः

परिहर [1]कृताताङ्के शङ्कां त्वया [2]सततं घन-
[3]स्तनजघनयाऽऽक्रान्ते स्वान्ते परानवकाशिनि ।

देवकवेः [4]भारत्या [5]वाण्या भूषितमलङ्कृतम् । पुनः कीदृशम् ? मानिनीजन-समूहस्य श्रीराधाख्यस्य वा जनितमुत्पादितं शातं सुखं [6]येनेति भावः ।।९।।

[7]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामेकोनविंशः प्रबन्धः ।

पदद्योतनिका

इतीति । मधुवैरिणः कृष्णस्य राधिकामधि अनु राधिकां लक्षीकृत्य [8]इति [9]वचनजातं [10]इति वचनसमूहः जयतु उत्कर्षेण [11]वर्तताम् । कीदृशम् ? चटुलं मनोहरं चाटु प्रीतियुक्तं पटु चतुरं चारु सुकुमारम् । पुनः कीदृशम् ? जयदेवकवेर्भारत्या भूषितमलङ्कृतम् । पुनः कीदृशम् ? मानिनीजनस्य [12]भामिनीसमूहस्य जनितं शातं सुखं येन ।।९।।

[13]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामेकोनविंशः प्रबन्धः ।

जयन्ती

इतीति । इति उक्तप्रकारेण चटुलं मृदु चाटु प्रियं पटु समर्थं चारु मनोहरं राधिकामधि राधिकां प्रति मुरवैरिणः माधवस्य वचनजातं वाक्यसमुदायः पद्मावत्याः तत्संज्ञकायाः रमणः कान्तः जयदेवकविः तस्य भारती वाणी तया भणितं प्रकटितं ग्रथितं गीतमपि गायनोपयोगितया रचितं जयति उत्कर्षेण वर्तते ।।९।।

[14]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकोनविंशः प्रबन्धः ।

सञ्जीवनी

प्रसन्नां दृष्ट्वाऽऽत्मनः [15]सम्प्रसन्नतामाह—परिहरेति । हे [16]कृतातङ्के हे [17]कृतककोपे अन्यवधूभजनसन्तापशङ्कां परिहर त्यज । यतो मम स्वान्ते हृदये

1. कृतातङ्कां—इ. 2. सततं विना—इ. 3. स्तनघनभराक्रान्ते—इ. 4. नास्ति—ग. 5. वाण्यामलङ्कृतम्—ग. 6. येन तत्—इ.फ.ग.ह.ज. 7. नास्तीयं पुष्पिका—अ.ब.इ.फ.ग.ह.ज 8, 9. नास्ति—क.ल.म. 10. इति समूहः—ड. 11. वर्धताम्—क.ल.म. 12. मानिनीसमूहस्य—क.ल.म. 13. पुष्पिकेयं नास्ति—ड.क.ल.म. 14. पुष्पिकेयं नास्ति—इ. 15. सम्पन्नतां निरूपयति—इ.फ.ह. 16. नास्ति—ग. 17. कृतकामकोपे—इ.

विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं
[1]प्रणयिनि परीरम्भारम्भे विधेहि विधेयताम् ॥१॥

अन्तरमभ्यन्तरं वितनोः कामादन्यः कोऽपि धन्यः सुभगः [2]स्त्रीलक्षणोऽपि न विशति [3]प्रविशति। [4]एतेनात्मनि अन्यनायिकापरिहार उक्तः। कीदृशे स्वान्ते? त्वया सततं [5]सदाऽऽक्रान्ते व्याप्ते। कीदृश्या? घनस्तनजघनया [6]घने निविडेऽनवकाशे कठिने वा स्तनजघने यस्याः तया। पुनः कीदृशे? परानवकाशिनि अन्यस्यावकाशशून्ये। पुनः कीदृशे? प्रणयिनि त्वत्प्रणयपूर्णे। [7]परीरम्भारम्भे [8]कृतालिङ्गनोद्योगे [9]तं विधेयतां सुरतकर्तव्यतां विधेहि कुरु। विधेहीत्यनेन [10]स(वं)कलाकुशलत्वं नायिकाया उक्तम्। "आतङ्कः क्रोध[11]शङ्कयोः" इति धरणिः ॥१॥

पदद्योतनिका

परिहरेति। हे कृतातङ्के [12]विहितकोपापराधे [13]राधे त्वं शङ्कां अन्यनायिकासम्भोगजां परिहर त्यज। मम स्वान्ते हृदये त्वया सततमाक्रान्ते व्याप्ते सति वितनोः कामादन्यः कोऽपि धन्यः ममान्तरमभ्यन्तरं न विशति [14]न[15]प्रविशति। कीदृश्या त्वया? घने कठिने स्तनजघने यस्याः। कीदृशे स्वान्ते? अत एव परानवकाशिनि अन्यस्यावकाशशून्ये। यतो ममान्तरं [16]काम एव विशति [17]अतः स्तनभरपरीरम्भारम्भे तेनातिशयालिङ्गनोद्योगे विधेयतां [18]कर्तव्यतां विधेहि; आलिङ्गयेत्यर्थः ॥१॥

जयन्ती

परिहरेति। हे प्रणयिनि प्रणयः स्नेहोऽस्यामस्तीति प्रणयिनी तत्सम्बोधनम्। हे कान्ते! कृतः उत्पादितः चातङ्कः सन्तापरूपो यया तां शङ्कां अन्या-

1. स्तनभरपरी–ड. 2. स्त्रीलक्षणो–अ.ब. 3. नास्ति–अ.ब. 4. एतेनान्यनायिका–इ.फ.ग.ज. एतेनात्मनि नायिका–अ.ब. 5. सर्वदा–इ.फ.ग.ह.ज. 6. नास्ति–अ.ब. 7. पुनः कीदृशे परीरम्भारम्भे–अ.ब. कीदृशे परीरम्भारम्भे–इ.फ.ग.ह.ज. 8. कृतालिङ्गनयोगे–अ.ब. 9. नास्ति–फ.ज. 10. कलाकुशलत्वं–इ.फ.ग.ह.ज. 11. शोकयोः–इ. 12. नास्ति–क. विहितकोपे–ल.म. 13. नास्ति–ड. 14. नास्ति–ड.ल.म. 15. नास्ति–ल. 16. कामो वसति–क. 17. अतः स्तनपरिरम्भारम्भे तेनातिशयालिङ्गनोद्योगे–क. अतः स्तनभरपरिरम्भारम्भे स्तनातिशयालिङ्गनोद्योगे–ल.म. अतः स्तनभरपरीरम्भारम्भे स्तनातिलिङ्गनोद्योगे–ड. 18. नास्ति–क.ल.म.

मुग्धे विधेहि मयि निर्दयदन्तदंश-
दोर्वल्लिबन्धनिबिडस्तनपीडनानि ।
[1]चण्डि त्वमेव [2]मुदमञ्चय पञ्चबाण-
चण्डालकाण्डदलनादसवः [3]प्रयान्तु ॥२॥

ङ्गनासहां परिहर त्यज । कुत इत्यत आह—त्वया सन्ततं निरन्तरम् । घनौ च तौ स्तनौ च जघनञ्च घनस्तनजघनम् । द्वन्द्वैकवद्भावः प्राण्यङ्गत्वात् । तस्य भरेण क्रान्ते व्याप्ते अत एव परस्याः अन्यस्त्रियः अनवकाशे अवकाशाभावोऽस्यास्तीति अनवकाशी तस्मिन् जाते सति । विगता तनुर्यस्य सो वितनुः अनङ्गः तस्मात् अन्यः कोऽपि धन्यो जनः मम अन्तरं अन्तःकरणं न विशति । परीरम्भस्य आलिङ्गनस्य आरम्भे उपक्रमे विधेयतां अप्रतिकूलतां विधेहि स्वीकुरु । अत्र स्तनजघनाक्रान्तत्वं परानवकाशे हेतुरिति पदार्थहेतुककाव्यलिङ्गमलङ्कारः । तेन तव स्तनजघनासक्तचित्तस्य त्वदेकाग्रता व्यज्यते । तेनासदृशजघनादिसौन्दर्यं च व्यज्यत इति वस्तुध्वनिः । मन्मथमात्रस्यान्तरप्रवेशं प्रति वितनुत्वं शरीराभावपरत्वे साभिप्रायमिति तस्य विशेषणम् । परिकराङ्कुरालङ्कारः । तेन त्वदाकाङ्क्षारूपकामस्यैव प्रवेशो नान्यस्येति । स्तनजघनेति कृते गणभङ्गो भवतीति स्तनघनेति पाठः । स्तनयोर्घनः अतिशयितभारस्तेनेति योजनम् ॥१॥

सञ्जीवनी

यद्यालिङ्गने मौनमाचरसि तत्परिहाराय [4]ममानुरूपं दण्डमाचरेत्याह—मुग्धे इति । हे मुग्धे सुन्दरि मयि निर्दयं दयारहितं [5]दन्तदंशं दन्तैर्दंशं खण्डनम्; दोर्वल्लिबन्धः भुजलताबन्धश्च; निबिडं गाढं स्तनाभ्यां [6]पीडनानि आलिङ्गनानि च विधेहि कुरु । कृतापराधे मयि [7]सर्वे दण्डाः कर्तव्याः । [8]नात्र [9]सङ्कोचः

---

1. चण्डि त्वमेव वद मुञ्च रुषं न काम—इ. 2. मुदमुद्वह—नि. सा.ड. मुदमञ्चय—अ.ब. 3. प्रयान्ति—ड. 4. ममानुरूपमिदमाचरेत्याह—ग. 5. दन्तदंशनं दन्तैः खण्डनं—इ. दन्तदंशैः खण्डनः—ग. दन्तदंशं दन्तेन खण्डनं—फ.ज. दन्तदंशं दन्तैः खण्डनं—इ. 6. पीडिताभ्यां आलिङ्गनानि—अ.ब. 7. सर्वदण्डाः —इ. 8. माऽत्र—इ.ग. 9. शङ्का च कार्या—फ.ज.

कार्यः। किञ्च हे चण्डि कोपनस्वभावे [1]सुरतोद्भटे वा ममापराधिनो [2]त्वमेव [3]मुदमानन्दं अञ्च [4]प्राप्नुहि। न [5]त्वन्यस्यां ममानुराग इत्यर्थः। नो चे[6]त्पञ्चबाणचण्डालस्तस्य काण्डदलनात् बाणप्रहरणादसवः [7]प्राणाः प्रयान्तु [8]गच्छन्तु। अतो मयि प्रसन्ना भवेति प्रार्थना। "चण्डी च सुरतोद्भटा" इति महोदधिः ॥२॥

पदद्योतनिका

मुग्ध इति। हे मुग्धे मूढे सुन्दरि वा मयि निर्दयं दयारहितं दन्तदंशं दन्तक्षतं विधेहि [9]कुरु। किञ्च दोर्वल्लिबन्धो भुजलताबन्धः तेन निविडं यथा [10]स्यात्तथा स्तनाभ्यां पीडनान्यालिङ्गनानि विधेहि। हे चण्डि कोपनशीले त्वमेव मम[11]मुदं प्रीतिमञ्चय जनय [12]न त्वन्यस्यां ममानुराग इत्यर्थः। उद्वहेति पाठे कुरु। नो चेत् पञ्चबाणः [13]कामः स एव चण्डालस्तस्य काण्डदलनात् [14]बाणक्षतात् असवः मम प्राणाः प्रयान्ति गच्छन्ति। अतो मयि प्रसीदेत्यर्थः ॥२॥

जयन्ती

सत्यमेवास्तीति गीतार्थं श्लोकेन ग्रथयति—मुग्ध इति। हे मुग्धे स्वहितानभिज्ञे मयि निर्गता दया यस्मिन् कर्मणि तथा निर्दयं; पुनः समासाद्विभक्तिलोपः। निर्दयं दन्तदशाश्च दोरेव वल्लिः भुजलता तया बन्धः स च निविडस्तनाभ्यां पीडनं घट्टनं च तानि विधेहि। हे चण्डि अनिवार्यकोपे त्वमेव वद मया किमपि नोच्यते। मौनं त्यज रुषं मुञ्च कोपं त्यज। काम एव मन्मथ एव चण्डालः घातुकत्वाच्चण्डालत्वारोपः। तस्य काण्डाः शराः तैः दलनं भेदनं तस्मात् असवः प्राणाः न प्रयान्तु न गच्छन्तु नोत्क्रामन्तु। यद्वा हे चण्डि रुषं न मुञ्च किन्तु कामचण्डालशराघातान्ममासवः प्रयान्तु। किन्तु त्वमेव वद। कोपं न मुञ्चसि चेत् मम प्राणोत्क्रमणं स्यादिति भावः। पूर्वार्धे प्रकृतगम्यसाधर्म्यतुल्ययोगिता। वसन्ततिलकावृत्तम् ॥२॥

---

1. नास्ति–अ.ब. 2. त्वमेव हे चण्डि सुरतोद्भवे मुदमानन्दं–अ.ब. 3. मुदमञ्च आनन्दं प्राप्नुहि–फ.ज. 4. प्राप्नोति–अ.ब. 5. त्वन्यस्यामनुराग इत्यर्थः–ग. 6. पञ्चबाणः पञ्चचाण्डालः–इ.ग.ह. पञ्चबाणः चाण्डालः–फ.ज. 7. नास्ति–अ.ब. 8. नास्ति–अ.ब. 9. नास्ति–क. 10–13. नास्ति–ड. 14. नास्ति–क.

[1]दृशौ तव मदालसे वदनमिन्दु[2]मत्यास्पदं
गतिर्जनमनोरमा [3]विधुतरम्भमूरुद्वयम् ।
रतिस्तव कलावती [4]रचितचित्रलेखे भ्रुवा-
वहो विविधयौवतं वहसि तन्वि पृथ्वीं गता ॥३॥

सञ्जीवनी

किञ्च (दृशाविति ।) तव दृशौ मदालसे [5]अवलोकनाय मन्दयत्ने द्वे; स्वर्गे त्वेकैव मदालसा । वदनं तव मुखं इन्दुमत्याश्चन्द्रवुद्धचाः आस्पदं स्थानम् । [6]त्वन्मुखदर्शनाच्चन्द्रबुद्धिर्भवतीत्यर्थः । सा त्वनेकधा स्वर्गे त्वेकेन्दुमती । तव गतिर्गमनं जनस्य मादृशस्य वा मनोरमा मनोहारिणी; सा बहुविधा स्वर्गे त्वेकैव मनोरमा । तवोरुद्वयं विधुतरम्भं तिरस्कृतकदलीकम्; [7]कदलीनां बहुत्वात्तस्यापि बहुत्वम्[8]; स्वर्गे त्वेकैव रम्भेति । तव रतिः सुरतक्रीडा कलावती [9]नानाकाम-कलाकौशलयुक्ता । स्वर्गे त्वेका कला । तव भ्रुवौ रचितचित्रलेखे, विरचिते सौन्दर्याय चित्रलेखे द्वे । स्वर्गे त्वेकैव चित्रलेखा । अहो इत्याश्चर्ये । हे तन्वि सुन्दरि पृथ्वीं गता सती त्वं विविधयौवतं नानायुवतिकदम्ब[10]भावं वहसि धारयसि ॥३॥

पदद्योतनिका

दृशाविति । अहो इत्याश्चर्ये । हे तन्वि सुन्दरि पृथ्वीगता भूमिस्थाऽपि त्वं विविधयौवतं देवयुवतीवृन्दं अप्सरस्समूहं वहसि । केन प्रकारेणेत्यत आह— तव दृशौ नयने मदालसे [11]अवलोकनाय मन्दयत्ने । [12]वदनं तव मुखं इन्दुमत्या चन्द्रबुद्धयाऽन्वितं युक्तम् । त्वन्मुखदर्शने सादृश्याच्चन्द्रबुद्धिर्भवतीत्यर्थः । तव गतिर्गमनं जनमनो [13]लोकमनो रमयतीति जनमनोरमा । तवोरुद्वयं [14]जङ्घाद्वयं

1. पद्यमिदं सर्गान्त्यत्वेन दृश्यते–इ. एतस्मात् श्लोकात्पूर्वं नि.सा. ग्रन्थे, फ.ग.ह.ज. ग्रन्थेषु च (१) 'शशिमुखि', (२) 'व्यथयति', (३) 'वन्धूकद्युति' इत्यादिकश्लोकत्रयं दृश्यते; ब.इ.ड. ग्रन्थेषु तु भिन्नस्थानेषु दृश्यते 2. सन्दीपनम्–अ.ब. गत्युच्छ्रितम्–इ. मत्यान्वितम्–ड. 3. विजित–नि.सा. 4. रुचिर–नि.सा.ड. 5. नास्ति–अ.ब. 6. त्वन्मखदर्शनेन सादृश्यात्–इ.फ.ग.ह.ज. 7. तः 8. पर्यन्तं नास्ति–अ.ब. 9. कामकला–अ.ब. 10. नावं–अ.ब. 11. अवलोकनानन्दजनके महत्प्रयत्नेन–क. 12. तव वदनं–क. 13. नास्ति–ड. 14. नास्ति–क.ल.म.

[1]शशिमुखि तव भाति भङ्गुरभ्रू-
र्युवजनमोह[2]करालकालसर्पी ।

[3]विधुतरम्भं जितकदलीकम् । तव रतिः सुरतविलासः [4]कलावती कामकला-कौशल[5]युता । [6]ते भ्रुवौ [7]रुचिरचित्रलेखे [8]रुचिराणां चित्राणां लेखा ययोस्ते । यथा चित्रे [9]कृष्णा रेखा लिख्यते [10]तथेति । तदनया पदयोजनया मदालसा-इन्दुमतीमनोरमारम्भाकलावतीचित्रलेखासंज्ञका अप्सरसः प्रतिपादिताः । पृथ्वीगतेत्यपि च एकस्यामपि त्वयि सर्वासामप्सरसां गुणा वर्तन्त [11]इत्या-श्चर्यम् ॥३॥

जयन्ती

दृशाविति । हे तन्वि सुकुमारे तव दृशौ मदेन यौवनदर्पेण अलसे अवलोकनाक्षमे । वदनं मुखं इन्दुश्चन्द्रः तस्य गतिः अवस्था कान्तिरिति यावत्; तदपेक्षया उच्छ्रितं ऊर्जितं श्रेष्ठम् । गतिः गमनं जनानां मनोहरा सविलासेत्यर्थः । ऊर्वोः द्वयं ऊरुयुगं विधुता कम्पिता भीषिता विजितेति यावत्; रम्भा येन तत् । तव रतिः रहःक्रीडा कलावती अनेकवन्धातिचातुर्यवती । भ्रुवौ रुचिरे मनोहरे च ते चित्ररेखे चित्रलिखितनानावल्लिदलाकृतिरेखे । अहो आश्चर्यम् । पृथ्वीं गता क्षोणीं प्राप्ता । विविधं नानाप्रकारं यौवनं वयः विलासयुतत्वाद्यौवतमिति । वहसि प्राप्नोषि । एतादृशसौन्दर्यशालि(नी) पृथिव्यां दुर्लभा; त्वं पृथिव्यां तिष्ठसीति आश्चर्यम् । अत एवाद्भुतरसः । अलसत्वादिकमुद्दीपनविभावाः । राधैवालम्बनम् । विस्मयः स्थायी भावः । स्तिमि(त)त्वादिकाः अनुभावा ऊह्याः । अत्र पृथ्वीपदेन वृत्तनामापि सूचितमिति सूचनालङ्कारः ॥३॥

सञ्जीवनी

(शशिमुखीति ।) किञ्च हे शशिमुखि [12]चन्द्रवदने तव [13]भङ्गुरा कुटिला चासौ भ्रूश्च सा भाति शोभते । [14]कीदृशी सा ? यूनां जनो युवज-

1. पद्यमिदं सव्याख्यं नास्ति–अ. 2. करालकालसर्पः–इ. 3. नास्ति–ल.म. 4. नास्ति–ड. 5. युक्ता–क.ल.म. 6. तव–क.ल.म. 7. नास्ति–ड. 8. रुचिरे चित्राणां लेखे–ड. रुचिराणां लेखा–क. रुचिरा चित्राणां लेखा–ल.म. 9. कृष्णरेखा–ड. श्यामा रेखा–क.ल.म. 10. नास्ति–ड. 11. इत्यर्थः –क. 12. चन्द्रानने–इ.फ.ग.ह.ज. 13. भङ्गुरभ्रूः वक्रभ्रूः भाति शोभते–इ.फ.ग.ह.ज. 14. कीदृशी ? युवजनानां तरुणजनानां सम्मोहनाय कराला भीषणा कालसर्पी कृष्णाहिवधूः । अन्या भुजङ्गी दंशेन जनं विमोहयति;

[1]तदुदितभयभञ्जनाय यूनां
[2]त्वदधरसीधुसुधैव सिद्धमन्त्रः ॥४॥

नस्तस्य मोहस्तत्र करालो भयङ्करो यः कालसर्पः सोऽस्यास्तीति । यथा स तन्मोहसमर्थो भवति तद्वत् । अथ तन्नाशने सिद्धमणिमन्त्राद्यपेक्षितं तत्राह—तदिति । यूनां तरुणजनानां तेनोदितं यद्भयं तद्भञ्जनाय (ना)शाय तव यदधरं तस्य यन्मदामृतमेव सिद्धमन्त्रो भवति नान्य इत्यर्थः । [3]रूपकोऽयमलङ्कारः । "भीतिर्भीस्साध्वसं भयम्" इत्यमरः (१.७.२१) । "[4]करालश्च भयङ्करे" इति विश्वः[5] (१०५.१०६) ॥४॥

पदद्योतनिका

शशीति । हे शशिमुखि चन्द्रवदने तव भङ्गुरभ्रूर्वक्रभ्रूलता भाति शोभते युवजन[6]मोहाय [7]कराला भीषणा कालसर्पी कृष्णसर्पस्त्री । किञ्च तस्या भ्रुवः उदितं उत्पन्नं यद्भयं तस्य भञ्जनाय नाशाय यूनां तरुणानां तवाधरसीधु मद्यं तदेव [8]सुधापानसाम्यान्माधुर्याच्च [9]सिद्धमन्त्रः विषापहरणार्थम् ॥४॥

जयन्ती

शशिमुखीति । शशीव मुखं यस्याः तत्सम्बोधनम् । हे शशिमुखि ! तव भङ्गुरा भञ्जनशीला वक्रेत्यर्थः । भ्रूः व्यस्तरूपा । युवानश्च ते जनास्तेषां मोहे मूर्छने करालश्चासौ सर्पः । भिन्नपदव्यस्तरूपकम् । भाति शोभते । यूनां तरुणानां यस्मात् सर्पात् उदितं उत्पन्नं भयं भञ्जनाय नाशनाय त्वत्तव अधर एव सीधुसुधा सुरारूपपीयूषः हर्षातिशयसाधनत्वात् सीधुत्वारोपः । सैव सिद्धमन्त्रः । क्षिप्रनिवर्तकत्वात् मन्त्रत्वारोपः । इति परम्परितरूपकालङ्कारः । तव भ्रूसमालोकनोद्दीपितमदनभयनाशः त्वदधरपानादेव भवतीत्यर्थः ॥४॥

-त्वं तु भ्रूभङ्गमात्रेणेति भावः । किञ्च तदुदितभयभञ्जनाय तस्या भ्रुवः सकाशादुदितं उत्पन्नं यद्भयं तस्य भञ्जनाय नाशाय यूनां तरुणानां मादृशां त्वदधरसीधुः त्वदीयाधरसीधुः मदिरा सैव सुधाऽमृतमेव सिद्धमन्त्रः साधितो मन्त्रः प्रभावयुक्तो वा–इ.फ.ग.ह.ज. 1. यदुदित–इ.ड. 2. तद़धर–ब. 3. तः 5. पर्यन्तं नास्ति–इ.फ.ग.ह.ज. 4. करालश्च कुठेरके–विश्वः । 6. मोहनाय–क.ल.म. 7. करालो भीषणः कालसर्पः कृष्णसर्पः–क. 8. सुधापानं–क. 9. सैव सिद्धमन्त्रः–क.ल.म.

[1]व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं
तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ।
सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां
स्वयमतिशयस्निग्धो मुग्धे प्रियोऽयमुपस्थित ॥५॥

सञ्जीवनी

[2]व्यथयतीति । [3]मौनं कर्तृ वृथा व्यथयति दुःखं करोति । तन्वीति सम्बोधनम् । मधुरालापैः मनोहरध्वनिभिः पञ्चमं स्वरविशेषं प्रपञ्चय मनोविषयं कुर्वित्यर्थः । हे तरुणि ! दृष्टिभिः अक्षिपातैः तापं सन्तापं विनोदय दूरीकुरु । सुमुखि ! तावदिति वाक्यालङ्कारे; वि(मुखी)भावं मुञ्च त्यज मां च न मुञ्च मा त्यज; त्वत्सङ्गमाभावे ममापि भवत्याः सुखं नास्ति । स्वयमेव न तु दूत्यादिद्वारा । अतिशयस्निग्धः अतिमनोहरः प्रियश्च, मुग्धे रसानभिज्ञे अयमुपस्थितः समीपमाप्तः । "पञ्चमश्चेत्यमी" इत्यमरः (१.७.१) । नायिका मानवती । शेषं सुगमम् ॥५॥

पदद्योतनिका

व्यथयतीति । हे तन्वि सुन्दरि तव वृथा मौनं [4]व्यथयति [5]मामित्यर्थात् । तस्मात् हे तरुणि ! मधुरालापैः कोमलवचनः पञ्चमरागं प्रपञ्चय [6]उद्गिर । दृष्टिभिरवलोकनैस्तापं विनोदय अपसारय । हे सुमुखि [7]सुवदने [8]राधे तावत् सम्पूर्णं विमुखीभावं दत्तपृष्ठत्वं विमुञ्च त्यज । हे मुग्धे ज्ञानशून्ये अहं प्रियः स्वयमकारणं (कारणं) विनैवोपस्थितः [9]आगतः । [10]अत एव मां न वञ्च मा वञ्चय । कीदृशः प्रियः ? अतिशयस्निग्धो [11]महावत्सलः ॥५॥

1. पद्यमिदं सव्याख्यं नास्ति–अ. 2. एवं धृतमौनां प्रत्याह–व्यथयतीति–इ.फ.ग.ह.ज. 3. हे तन्वि कृशाङ्गि तव मौनं वृथा निष्कारणं व्यथयति । किञ्च हे तरुणि कामिनि मधुरालापैरमृतवचनैः पञ्चमं रागं प्रपञ्चय विस्तारय । किञ्च कटाक्षैः कामजं तापं नाशय । हे शोभनवदने विमुखीभावं दत्तपृष्ठत्वं विमुञ्च त्यज । सुमुख्यास्तवैतदनुचितमिति भावः । अत एम मां न मुञ्च मा त्यज । हे मुग्धे सुन्दरि मूढे वा । अहं प्रियः स्वयमेव अनाहूत उपस्थितः समागतः । कीदृशोऽहम् ? अतिशयस्निग्धः सम्पूर्णस्नेहो महावत्सलो वा । तावत् मानाग्रहो न कर्तव्यः प्राप्तफलत्वादिति भावः–इ.फ.ग.ह.ज. 4. नास्ति–ड. 5. मामित्यर्थः–क. 6. उदीरय–क. 7, 8. नास्ति–ड.ल.म. 9. नास्ति–ड. 10. अत एव मा वञ्चय–ड. 11. मांसलः–ड. महावत्सल इत्यर्थः–क.

[1]बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-
[2]र्गण्डश्चण्डि चकास्ति नीलनलिन[3]श्रीमोचने लोचने ।
नासाऽभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये
प्रायस्त्वन्मुख[4]सेवया विजयते विश्वं स पुष्पायुधः ॥६॥

जयन्ती

व्यथयतीति । हे तन्वि सुकुमारे वृथा मौनं मुनिव्रतं तूष्णीम्भावः अकारणासम्भाषणं व्यथयति क्लेशयति । पञ्चमं कोकिलस्वरं प्रपञ्चय विस्तारय । तव सल्लापस्य पञ्चमस्वरात्मकत्वात्तमुच्चारयेति । पञ्चमरागवत् रञ्जनं मम भविष्यतीति भावः । हे तरुणि यौवनमदोद्रिक्ते मधुरैः कोमलैः आलापैः कुशलप्रश्नपूर्वकरहोवचनः तापं विनोदय; णुद प्रेरण इत्यस्माद्धातोः नोदनार्थकत्वात्; विनाशय । वातनुदित्यादि वैद्यके प्रयोगात् । विनाशयेति शेषाध्याहारो वा । प्रविश पिडामित्यत्रेव गृहं भक्षयेत्यध्याहारः (?) दृष्टिभिर्विनोदय । कटाक्षालोकनैः विनोदय आनन्दय हर्षय । पूर्वव्याख्याने मध्यमणिन्यायेन विनोदयेति उभयत्रान्वयः । एकत्र विनाशार्थः, अपरत्र कौतुकार्थः । सहार्थकतृतीयया आलापसहिताभिर्दृष्टिभिर्विनोदयेति वाऽर्थः क्लिष्टः । हे सुमुखि सुष्ठु शोभनं मुखं यस्याः सा तत्सम्बोधनम् । विमुखीभावं वैमुख्यं मुखपरावर्तनं चुम्बनादौ तावत् आदौ विमुञ्च त्यज । वैमुख्यमनुचितमित्यर्थः । सौमुख्यं मा न मुञ्च मा त्यज । अत्र हेतुमाह—स्वयमिति । हे मुग्धे स्वहितानभिज्ञे अतिशयेन स्निग्धः स्नेहातिशयवान् अयं प्रियः मद्रूपः कान्तः स्वयमेव अनाहूत एव उपस्थितः । अयाचितप्राप्तार्थत्यागो न युक्त इति भावः । अत्र स्वस्य त्यागे स्वयमित्यादिवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकः काव्यलिङ्गमलङ्कारः । सुमुखीत्यत्र साभिप्रायकत्वात्परिकरः । हरिणी वृत्तम् ॥५॥

सञ्जीवनी

(बन्धूकेति ।) [5]किञ्च बन्धूको वृक्षविशेषः तस्य या द्युतिस्तस्या बान्धवः अयं ते अधरो भातीति शेषः । स्निग्धो मनोहरः मधूकच्छविः मधूकस्य

1. पद्यमिदं सव्याख्यं नोपलभ्यते–अ. 2. गण्डे चण्डि–इ. 3. श्रीमोचनं लोचनं–इ. 4. शोभया–इ. 5. सम्प्रति मानिन्या अङ्गानि स्पर्शयन्(?)प्रियो ब्रूते-बन्धूकेति । हे चण्डि कोपनशीले सुरतोद्भटे वा । तवाधरोऽयं बन्धूकस्य द्युतिः कान्तिस्तस्या बान्धवो मित्रं सदृशश्चकास्ति शोभते । किञ्च स्निग्धश्चि-

छविरिव छविर्यस्य। वाचक(स्य)लुप्तत्वात् लुप्तोपमालङ्कारः। एतादृशो, यो गण्डः कपोलस्थलम्। चण्डीति सकोपायाः सम्बोधनम् चकास्ति शोभते। नीलगुणावच्छिन्नं यत् नलिनं पद्मं तस्य या श्रीस्तां मोचयति त्याजयति। एतादृशलोचनमस्तीति; निदर्शनाभेदः। नासा नासिका तिलप्रसूनं तिलपुष्पं तस्य पदवीं मार्गमभ्येति अतिक्रमणं करोति। कुन्दस्याभेव भा येषामेतादृशा दन्ता यस्या स्तत्सम्बोधनम्। हे प्रिये प्रायः तव मुखस्य सेवया स पुष्पायुधः कामः विश्वं विजयते। "विपराभ्यां जेः" (पा.सू.१.३.१९) इत्यात्मनेपदम्। "सर्जकासनबन्धूकपुष्पप्रियकजीवकाः" इत्यमरः (२.४.४४)। "वा पुंसि पद्मं नलिनम्" (इत्यमरः १.१०.३९)। वस्तुतः सेवायास्तस्याभावादसद्विषया हेतूत्प्रेक्षा ॥६॥

पदद्योतनिका

अधुना मानिनीप्रबोधाय प्रियं ब्रूते—बन्धूकेति। हे चण्डि [1]कोपनशीले तवायमधरो बन्धूकपुष्पद्युतिः कान्तिस्तस्या बान्धवो मित्रसदृशश्चकास्ति शोभते। तथा स्निग्धश्चिक्कणो गण्डः [2]कपोलः। कीदृशः? [3]मधूकपुष्पवच्छविः दीप्तिर्यस्य सः। तथा लोचनं [4]नेत्रं [5]नीलनलिनश्रियं नीलोत्पलकान्तिं [6]मोचयति त्याजयतीति चकास्ति। [7]ते नासा [8]नासिका [9]तिलप्रसूनस्य तिलपुष्पस्य पदवीं [10]मार्गं [11]सादृश्यमित्यर्थः [12]अभ्येति प्राप्नोति। हे कुन्दाभदन्ति कुन्दपुष्प[13]सदृशकान्तिदशने प्रिये वल्लभे, [14]प्राय इत्यूहा शङ्के स पुष्पायुधः कामस्त्वन्मुखसेवया विश्वं जगत् विजयते वशीकरोतीत्यर्थः। यानि कामस्य पुष्पायुधानि तानि त्वन्मुखे वर्तन्त इति सेवाकारणम्। बन्धूकमिति 'दुपहरिया' इति कान्यकुब्जभाषायां व्यवहार। मधूकमिति 'महुवा' इति ॥६॥

क्कणो गण्डः कपोलश्चकास्ति। कीदृशः? मधूकपुष्पवद्दीप्तिर्यस्य; तथा तव लोचनं नीलनलिनश्रियं नीलोत्पलशोभां मोचयति त्याजयतीति तच्चकास्ति। एतेन लोचनस्य मनोहरत्वमुक्तम्। तथा तव नासा नासिका तिलप्रसूनपदवीं शोभाश्रेणीं अभ्येति प्राप्नोति। हे कुन्दाभदन्ति कुन्दपुष्पसदृशदशने इत्यनेन दन्ता एव उज्ज्वला मनस्तु श्याममिति ध्वनिः। हे प्रिये वल्लभे स पुष्पायुधः कामः प्रायो बाहुल्येन तव मुखसेवया विश्वं जगत् विजयते वशीकरोति। पुष्पायुधस्य आयुधानि तव मुखे वर्तन्त इति सेवाकारणमुक्तम्–इ.फ.ग.ह.ज.

1. नास्ति–ड. 2. कपोलश्चकास्ति–ल.म. 3. छविः–ड. 4–6. नास्ति–ड. 7. तथा तव नासा–क. तव नासा–ल.म. 8, 9. नास्ति–ड. 10. अधिकारं–क. 11. तः 12. पर्यन्तं नास्ति–क. 13. सदृशदशने–क.ल.म. 14. प्राय इति शङ्के–क.

[1]प्रीतिं वस्तनुतां हरिः कुवलयापीडेन [2]सार्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन [3]संसर्गवान् ।

जयन्ती

बन्धूकेति । हे चण्डि राधे तव अधरः अयं परिदृश्यमानः सुरक्तः। अधरः ओष्ठस्पर्शनपरः बन्धूकस्य जपाकुसुमस्य द्युतेः बान्धवः सदृशः । "बन्धुश्चोरस्सुहृद्वादीसोदराद्या इवार्थकाः" इति केदारवचनात् । आर्थी धर्मलुप्तोपमा । गण्डे स्निग्धा स्नेहयुक्ता मधूकस्य मधूकपुष्पस्य छविः कान्तिः चकास्ति दीप्यते । गण्डः मधूकपुष्पवद्धेमवर्णं इति भावः । नीलनलिनस्य कुवलयस्य श्रियं मोचयति चोरयतीति मोचनं अपहारकं लोचनम् । अत्र कुवलयसदृशं नेत्रमित्यर्थः । अत्रापि नैल्यधर्मानुपादानाद्धर्मलोपः । मोचनपदस्यार्थतः सादृश्यवाचकत्वात् । नासा नासिका तिलप्रसूनस्यय तिलपुष्पस्य पदवीं आकृतिं अभ्येति प्राप्नोति; तिलकुसुमाकृतिरित्यर्थः । अत्रापि पदवीपदस्य अर्थतः सादृश्यवाचकत्वात् आर्थी वाचकलुप्तोपमा । सादृश्यवाचकपदस्य समस्तत्वात् अभिन्नवाक्यत्वे न वाक्यगा । हे प्रिये राधे कुन्दस्य माघ्यकुसुमस्य आभेव आभा येषां ते कुन्दाभाः दन्ताः यस्याः सा तत्सम्बोधनम् । अन्यशोभायाः अन्यत्रासम्भवात् उपमायां पर्यवसानात्पदार्थगतो निर्देश इति प्राञ्चः । पुष्पाणि अरविन्दादीनि आयुधानि बाणाः यस्य स मदनः । प्रायः बहुशः विश्वं युवलोकत्वात् तव मुखस्य शोभया कान्त्या कारणेन विजयते । त्वन्मुखावलोकनात्सर्वे कामातुरा भवन्तीति भावः । अत्र पुष्पपदमसारत्वाभिप्रायकम् । तेन अस्मिन् सत्यपि त्वन्मुखस्याधररागजकारणत्वकथनात् अप्रतिहतायुधत्वं व्यज्यते । मुखे बन्धूकमधूकनीलोत्पलकुन्दप्रसूनाभ्यधिकाङ्गानि सन्तीति इदमेवोत्कृष्टम् । समस्तवाणवदिति । विश्वं विष्णुरिति विष्णुवाचकत्वात् तद्देवावतारं विश्वं मां विजयते वशीकरोति । पुष्पायुधो विष्णुपुत्रोऽपि त्वन्मुखरूपायुधसम्पत्त्या पितरमपि जयति । आयुधधारणं निषिद्धं तद्धारणेन हननेच्छा(या)उदयात् । शार्दूलविक्रीडितं वृत्तम् ॥६॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां मानिनीवर्णने (चतुर) चतुर्भुजो नाम दशमः सर्गः ॥

सञ्जीवनी

सर्गान्ते कविराशिषमाशास्ते—प्रीतिमिति । हरिर्मनोहरस्तापहरो वा वो युष्माकं गायतां शृण्वताञ्च प्रीतिं [4]भक्तिविषयां तनुतां विस्तारयतु ।

1. स प्रीतिं–नि.सा. 2. सम्भेदवान्–ड. 3. सम्भेदवान्–नि.सा. सार्धं रणे–ड. 4. भक्तिविषयिणीं–इ.ग.ह. अनुरागं–फ.ज.

यत्र स्विद्यति मीलति [1]क्षणमथो क्षिप्ते द्विपे तत्क्षणात्
[2]कंसस्यालमसूक्षितं जितमिति व्यामोहकोलाहलः ॥७॥

इति श्रीगीतगोविन्दे [3]मानिनीमानापनोदने मुग्धमधुसूदनो नाम दशमः सर्गः ॥

कीदृशः ? [4]राधापीनपयोधरस्मरणकारी । पुनः कीदृशः[5] ? [6]कुवलयापीडेन कुम्भेन कुम्भस्थलेन सार्धं रणे संसर्गवान् [7]सम्भेदवान् । [8]कुवलयापीडसंसर्गेण राधापीनस्तनस्मरणकृदित्यर्थः । कुम्भशब्दोऽत्र [9]श्रीराधास्तनस्मारक इति । यत्र यस्मिन् रणे हरिः स्विद्यति स्वेदयुक्तो भवति । अथोऽनन्तरं [10]क्षणं क्षणमात्रं केनापि सुखोदयेन मीलति लोचने मुद्रिते करोति । तत्तस्मिन् क्षिप्तद्विपे [11]क्षिप्तहस्तिनि तत्क्षणात् कंसस्यालमतिशयेन [12]असूक्षितं [13]त्यक्तजीवितं जितं जितमिति वेगेन व्यामोहकोलाहलो [14]मरणभयोत्पन्नशब्दोऽभूत् । पक्षे द्वाभ्यां श्रीराधा[15]कृष्णाभ्यां सुरतरसं पिबति स द्विपः कामः । तस्मिन् क्षिप्ते जिते द्विपे कंसस्य [16]सुखकूजितस्य व्यामोहकोलाहलः परमसुखप्रदः किङ्किणी-[17]नूपुरध्वनिसङ्घातकृतः जितं जितमिति परस्परं तयोरभूत् । कीदृशो हरिः ? कुवलयं नीलोत्पलं तस्यापीडो माला शिरस्संवेष्टनं वा तेन; संमोदवानिति पाठः । शेषं समानम् । "कंसोऽसुरे स्मरकृते कूजिते तत्सुखेऽपि च" इति कोशचूडामणिः ॥७॥

---

1. क्षणमपि क्षिप्रं तदालोकनात्–नि.सा. क्षणमथ क्षिप्रं द्विपे तत्क्षणात्–ड. 2. व्यामोहेन जितं जितं जितमभूत्कंसस्य कोलाहलः–नि.सा. कंसं वालजितं जितं जितमिति व्यालोलकोलाहलः–ड. कंसस्यालमसूञ्जितं जितमिति व्यामोहकोलाहलः–ग. 3. पदमिदं नास्ति–फ.ग.ह.ज. इयं पुष्पिकैव नास्ति–इ. 4. तः 5. पर्यन्तं नास्ति–इ. 4. राधायाः पीनपयोधरस्मरणकारी–अ.व. राधापीनपयोधरस्मरणकृत स्मरणकारः–ग. 6. कुवलयापीडकुम्भेन–इ.ग. 7. नास्ति–ग. 8. कुवलयापीडकुम्भसंसर्गेन–इ.फ.ग.ह.ज. 9. श्रीवृषभानुसुता–ग. 10. नास्ति–इ.ग. 11. नास्ति–अ.ग. प्रक्षिप्तहस्तिनि–इ.फ.ग.ह.ज. 12. अभूज्जितं–ग. 13. त्यक्तजीविताशां–इ.फ.ग.ह.ज. 14. मरणभयोऽन्यत्र शब्दोऽभूत्–इ. 15. नन्दसूनूभ्यां–ग. 16. मुखे कूजितस्य–अ.व. 17. नूपुरसङ्घातकृतः–अ.ब. नूपुरध्वनिः सङ्घातकृतः–ग.

[1]इति [2]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[3]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां गीतगोविन्दटीकायां मानिनीमानापनोदने मुग्धमधुसूदनो नाम दशमः सर्गः ॥

पदद्योतनिका

प्रीतिं व इति । क्षेपकः । [4]सम्भेदवान् सम्वन्धः वचनकौशलेन मानिनीमानापनोदनाच्चतुरः ॥७॥

इति श्रीगीतगोविन्दटीकायां नारायणपण्डित[5]विरचितायां (मुग्धमधुसूदनो नाम) दशमः सर्गः ॥



1. इति श्रीगीतगोविन्दटीकायां–अ.ब. 2. श्रीमत्कृष्ण–इ.फ.ग.ह.ज. 3. शिवदासपण्डितात्मज–ग.ह. 4. इतो नास्ति–क. 5. कृतायां पदद्योतनिकायां दशमः सर्गः–ड.

एकादशः सर्गः

सामोददामोदरः

सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं
गतवति कृतवेशे केशवे कुञ्जशय्याम् ।
रचितरुचिरभूषां दृष्टिमोषे प्रदोषे
स्फुरति निरवसादां काऽपि राधां जगाद ॥१॥

सञ्जीवनी

एकादशेऽनुनयतः प्रसन्नां संविभाव्य ताम् ।
उवाच काचिद्रजनीमुखे राधां सखी वचः ॥

एवं वल्लभानुनयप्रसन्नां राधां प्रति सख्याह—सुचिरमिति । काऽपि सखी प्रदोषे रजनीमुखे स्फुरति दीप्यमाने सति राधां जगाद उवाच । वक्ष्यमाणमिति शेषः । कीदृशे प्रदोषे ? [1]दृष्टिमोषे दर्शनचोरके । कस्मिन् सति ? केशवे श्रीकृष्णे सुचिरं वहुकालमनुनयेन मृगाक्षीं प्रीणयित्वा प्रसादयित्वा कुञ्जशय्यां लतागृहशयनं गतवति प्राप्ते सति । [2]कीदृशे ? कृतवेशे कृताभिसारोचितवेशे; श्रीराधायां स्वस्मिन्वा सम्भोगसम्पादनाय कृतालङ्करण इत्यर्थः । कीदृशीं राधाम् ? रचिता कृता [3]रुचिरा मनोहरा भूषालङ्कारो यया सा ताम् । कृष्णस्य स्वस्य वेति परस्परालङ्कारकरणेन परस्परं स्नेहः सूचितः । पुनः कीदृशीम् ? निरवसादां निर्गतो मानभङ्गादिरूपोऽवसाद उपतापो यस्यास्ताम् । प्रसन्नामित्यर्थः । "वेशो वेषेऽथ भूषायां वेशो वेश्मनि [4]कथ्यते" इति [5]यादवः ॥१॥

पदद्योतनिका

अधुना राधां प्रति सखी ब्रूते—सुचिरमिति । काऽपि सखी प्रदोषे रजनीमुखे स्फुरति दीप्यमाने सति [6]प्राप्त इत्यर्थः । राधां जगाद वक्ष्यमाणमिति शेषः । कस्मिन् सति ? केशवे कृष्णे अनुनयेन प्रीतिवचसा सुचिरं वहुकालं मृगाक्षीं राधां प्रीणयित्वा [7]सन्तोष्य कुञ्जशय्यां लतागृहशयनं [8]गतवति प्राप्ते

1. नास्ति–ग. 2. कीदृशे केशवे–इ.फ.ग.ह.ज. 3. नास्ति–अ.ब. 4. नास्ति–फ.ज. 5. विश्वः–फ.ज. 6. प्राप्यमित्यर्थः–क. 7. सन्तुष्य–ड 8. गतवति सति–क.ल.म.

[1]वसन्तरागे रूपकताले

विरचितचाटुवचनरचनं [2]चरणे रचितप्रणिपातम् ।
सम्प्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम् ॥२॥
मुग्धे मधुमथनमनुगतमनुसर राधिके ॥ ध्रुवपदम् ॥

सति । कीदृशे केशवे ? कृतवेशे [3]कृतशृङ्गारालङ्कारे, राधाया इति । कीदृशीं राधाम् ? रचिता कृता रुचिरा मनोहरा भूषाऽलङ्कारो [4]यया, कृष्णस्येति अन्योन्यालङ्करणेनान्योन्यरागः सूचितः । कीदृशे प्रदोषे ? अन्धकाराधिक्येन दृष्टिमोषे दर्शनचोरके । पुनः कीदृशीम् ? निरवसादां निर्गतो मानभङ्गादि-रूपोऽवसाद उपतापो यस्याः [5]ताम् ॥१॥

जयन्ती

उत्तराष्टपदीमवतारयितुं सङ्गतिमाह—सुचिरमिति । सुचिरं बहुकालं अनुनयेन क्षमापनेन मृगस्य अक्षिणीवाक्षिणी यस्यास्तां मृगाक्षीं प्रीणयित्वा प्रीतिमुत्पादयित्वा; कृतः वेशः संवेशः वेषो वा स्रकचन्दनादिशोभितः तस्मिन् केशवे कुञ्जे शय्यां शयनं गतवति प्राप्ते सति रचिताः कृताः रुचिराः भूषाः वस्त्रादिकाः ताटङ्कादिकाश्चालङ्कृतयः तासु दृष्टिमोक्षो नेत्रप्रसारो यया ताम् । अवलोकितभूषामित्यर्थः । प्रदोषे सन्ध्याकाले स्फुरति उदयति सति निर्गतः अवसादः सन्तापो यस्यास्ताम् । शान्तकोपामित्यर्थः । काऽपि राधां जगाद अवोचत् । अनुनीत्वा सङ्केतकुञ्जे तिष्ठामीति गते कृष्णे अभिसर्तुं उद्यतां अवोचदिति भावः । काव्यलिङ्गालङ्कारः ॥१॥

सञ्जीवनी

उक्तमर्थं गीतेन प्रपञ्चयति –विरचितेति । [6]वसन्तरागे रूपकताले । ध्रुवाया लक्षणमुक्तमेव[7] । हे मुग्धे सुन्दरि राधिके मधु अधरामृतरसं वसन्तं वा स्वमाधुर्यसौन्दर्यादि[8]गुणेन मथ्नाति क्षोभयतीति मधुमथनः [9]शृङ्गाररसास्वाद-

---

1. वसन्तरागयतितालाभ्यां गीयते–नि.सा. वसन्तरागेण एकतालीतालेन गीयते–इ. 2. चरणविरचित–इ. 3. शृङ्गारालङ्कारे–ड. 4. यया ताम्–क. 5. सा–ड. 6. तः 7. पर्यन्तं नास्ति–इ. 6. वसन्तरागरूपकतालध्रुवास्तत्पूर्वमुक्तमेव–ग. वसन्तरागे रूपकताले । वसन्तरागरूपकतालध्रुवानां स्वरूपं उक्तमेव–फ.ज.ह. 8. गुणैः–ग. 9. शृङ्गाररसास्वादनः चतुरः–अ.

नचतुरः तमनुसर अभिगच्छ । [1]नन्वनाकारिता कथं व्रजामीति चेत् तत्राह— न हि शृङ्गाररसास्वादनचतुरं श्रयन्त्यास्तव मानभङ्गः किन्तु गौरवमेव । कीदृशम् ? त्वद्गुणैस्त्वामेवानुगतमनुसृतम् । तत्र हेतुमाह । कीदृशम् ? विरचिता प्राणेश्वरि प्रसीदेत्यादि[2]चाटु प्रियवचनरचना वचनपरम्परा येन तम् । अनुगतत्वमेवाह-चरणे त्वच्चरणे रचितः कृतः प्रणिपातः प्रणामो येन तम् । तवानयनाय [3]मम चरणे कृतनमस्कार इति वा । पुनः कीदृशम् ? सम्प्रति इदानीं त्वां प्रति मां सम्प्रेष्य मञ्जुलो मनोहरो वेतसः तस्य सीमनि मर्यादाविधौ निकुञ्जे यत्केलिशयनं[4]क्रीडार्थं शय्या तामनुयातं प्राप्तम् । अतस्त्वया शीघ्रं गन्तव्यमिति [5]मम प्रार्थना ॥२॥

पदद्योतनिका

उक्तार्थं गीतेनाह—विरचितेति । हे राधे मुग्धे मूढे अनुगतं [6]अनुकूलं मधुमथनं कृष्णं अनुसर अनुगच्छ । [7]कीदृशम् ? सम्प्रति इदानीं मञ्जुलो मनोहरो [8]वञ्जुलोऽशोको वेतसो वा तस्य सीमनि पर्यन्ततटे केलिशयनं [9]सुरतार्थे शय्यां अनुयातं प्राप्तमित्यर्थः । अतस्त्वया शीघ्रं [10]गन्तव्यमिति ॥२॥

जयन्ती

विरचितेति । ध्रुवाया व्याख्यानम् । हे मुग्धे राधिके अनुगतं अनुकूलं मधुमथनं मधुनामदैत्यसंहारकं माधवं अनुसर तं प्रति याहि । कीदृशमित्याकाङ्क्षायां विरचितेत्यादीनि विशेषणानि । विरचिता कृता चाटुवचनानां प्रियवाक्यानां रचना सन्दर्भरूपा त्वमसि मम जीवनमित्यादिरूपा येन तम् । चरणयोः विरचितः प्रणिपातः नमस्कारो येन । विरचितपदस्य पुनरावृत्त्या कथितपदत्वदोषो नोद्घाटनीयः । संख्यायाः कार्यव्यग्रत्वात् । सम्प्रति अधुना मञ्जुलाः पल्लवितत्वेन रमणीयाः वञ्जुलाः तेषां सीमनि तत्प्रान्तकुञ्ज इत्यर्थः । "निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे" इत्यमरः (२.४.८) । सीमशब्दे कुञ्जभ्रान्तिर्न कार्या । केलिशयनं क्रीडाशय्याम् अनुयातं अनुप्राप्तम् ॥२॥

---

1. नन्वाकारिता—ग. 2. वहु—इ. 3. त्वच्चरणे कृतदण्डवत् इति वा—इ. मच्चरणे कृतदण्डवत् इति वा—फ.ग.ह.ज. 4. नास्ति—इ. 5. नास्ति—ग. 6. नास्ति—क. 7. कीदृशं मधुमथनम्—क. 8. अशोको—ड. 9. सुरतार्थं—क.ल.म. 10. गन्तव्यमित्यर्थः—क.ल.

घनजघनस्तनभारभरे दरमन्थरचरणविहारम् ।
मुखरितमणिमञ्जीरमुपैहि विधेहि मराल[1]विकारम् ॥३॥

सञ्जीवनी

(घनेति ।) [2]घने निविडे जघनस्तने [3]कटिस्तनप्रदेशे यो भारभरो भाराधिक्यं यस्यास्तत्सम्बोधनम् । श्रीकृष्णार्पणं विना जघनस्तनं केवलं भारमात्रमिति ध्वनिः । अतः [4]मुखरितं कृतरणत्कारं [5]मणिरचितं मञ्जीरं नूपुरं यथा स्यात्तथा उपैहि समीपं गच्छ । किञ्च [6]दर ईषत् मन्थरं [7]मन्दगतिः चरणविहारः पादन्यासो यथा स्यात्तथा मरालानां राजहंसानां विकारं विलासं विधेहि कुरु । एवं राजहंसगत्या प्रियं रञ्जयेत्यर्थः । [8]अथ वा कीदृशं मधुमथनम् ? दरं त्वत्कोपेन मन्थरा मन्दा चरणयोर्विहारो गतिर्यस्य तम्[9] । अथ वा कीदृशम् ? मुखरिता कृतरणत्कारा मणिमयी मञ्जीरा मेखला यस्य तम् । पुनः कीदृशम् ? मरालस्य कामस्य विकारो पीडा यस्य तम् । कामस्य नामान्तरं मराल इति । मम मनोरञ्जनाय न तु सर्वेषाम् ॥३॥

पदद्योतनिका

घनेति । हे घनजघनस्तनभारभरे घनयोर्मांसलयोर्जघनस्तनयोर्भारभरो भाराधिक्यं [10]यस्या स्तत्सम्बुद्धिः । त्वं दरमन्थरः ईषन्मन्थरः चरणविहारः पादक्रमो यस्यां क्रियायाम्; मुखरितः शब्दितः मणिमञ्जीरो [11]मणिसहितनूपुरो यस्यां क्रियायां तद्यथा उपैहि [12]उपगच्छ । अत एव मरालविकारं राजहंसविलासं विधेहि कुरु ॥३॥

जयन्ती

घनेति । घनः सान्द्रः जघनश्च स्तनौ च जघनस्तनं; प्राण्यङ्गत्वादेकवद्भावो नपुंसकत्वं (च) । तस्य भारः गुरुत्वं तेन भरा पूर्णा तत्सम्बुद्धिः । अत एव दर ईषत् मन्थरः मन्दः चरणयोर्विहारः सञ्चारः तम् । गमनमिति यावत् ।

---

1. निकारम्–नि.सा. 2. किञ्च घने–फ.ज. 3. कठिनस्तन–अ.ब. 4. श्रीमुखरितं रणत्कारं–अ.व. श्रीकृष्णमुखरितं कृतरणत्कारं–इ.फ.ग.ह.ज. 5. मणिखचितं–इ.फ.ग.ह.ज. 6. दरं–फ.ज. 7. मन्दगतिचरणविहारं–ग. मन्दगतिं चरणविहारं–इ.फ.ह.ज. 8. तः 9: पर्यन्तं नास्ति–अ.व. 8. यद्वा–ग. 10. यस्याः सा तत्सम्बोधनम्–क. 11. मणिसहितो नूपुरो–क.ल.म. 12. तमुपागच्छ–क.ल.म.

श्रृणु रमणीयतरं तरुणीजनमोहन[1]मधुरिपुरावम् ।
कुसुमशरासनशासन[2]बन्दिनि पिकनिकरे भज भावम् ॥४॥

मुखरिताः मणिमञ्जीराः पादकटकविशेषाः यस्मिन् तम् । उपैहि प्राप्नुहि । आगच्छेत्यर्थः । त्वमिति शेषः । मरालस्य हंसस्य विकारं गत्यनुकरणं न तस्य विकारं परिहासरूपं विधेहि । हंसगमनाधिकगतिविलासव(ती)त्यर्थः । अत्र गमनार्थं चरणविहाररूपकथनादग्राम्यत्वं, उदाराख्यगुणश्च । शब्दः अर्थश्च हंसानुकृतौ ॥३॥

सञ्जीवनी

[3]एवं तदनुगतत्वं प्रपञ्च्य तदुद्दीपन[4]विभावमाह— श्रृणित्यादिना । तरुणीजनमोहनस्य मधुरिपोस्तव विरहेण [5]मधु अन्यनायिकाधरामृतं मधुर्वसन्तो वा रिपुर्यस्य तस्य कृष्णस्य रावं मुरलीरणत्कारं तत्र गत्वा श्रृणु । कीदृशम् ? रमणीयतरं अतिशयेन मनोहरं [6]भज । [7]किञ्च पिकनिकरे कोकिलसमूहे भावं [8]श्रीकृष्णसम्भोगानुरागं [9]व्रज; श्रीकृष्णे अभिप्रायं विधेहि इति भावः । कीदृशे ? कुसुमशरासनस्य कामस्य शासनमाज्ञा तस्या बन्दिनि स्तावके । एतेन पिकगणाः [10]कामाज्ञया [11]मृदुवचनैस्तव ध्यानं [12]कुर्वन्ति । [13]मानं हित्वा श्रीष्णभजनं कर्तव्यमिति च घोषयन्तीति भावः[14] ॥४॥

पदद्योतनिका

श्रृण्विति । त्वं रमणीयतरं अतिमनोहरं [15]सुश्राव्यं तरुणीजनमोहनं मधुरिपोः[16]कृष्णस्य रावं [17]वंशशब्दं तत्र गत्वा श्रृणु । [18]मधुपविरावमिति वा पाठः[19] । किञ्च [20]पिकनिकरे [21]कोकिलसमूहे कुसुमशरासनः कामस्तदाज्ञाबन्दिनि स्तावके सति [22]कृष्णे भावं अनुरागं भज आश्रय । "हे मानिन्यः ! मानं त्यक्त्वा यूनां भजनं कर्तव्यम्" इति कोकिला घोषयन्तीत्यर्थः ॥४॥

1. मधुपविरावम्–नि.सा. 2. मन्त्रिणि–इ. 3. एतदनुगतत्वं–इ.फ.हृ.ज. एतदनुरागतत्त्वं–ग. 4. विभावनामाह–अ. विभावानाह–इ.फ.ग.हृ.ज. 5. मन्युना–अ.ब. 6. नास्ति–इ.फ.ग.हृ.ज. 7. तः 14. पर्यन्तं नास्ति–अ.ब. 8. श्रीकृष्णभोगानुरागं–ग. 9. भज–इ.फ.ग.हृ.ज. 10. कामात्ततया–इ. 11. मृदुवचनैस्तवाध्यानं–इ. मृदुवचनैस्तवाह्वानं–फ.ग.हृ.ज. 12. कुर्वन्तीत्युत्प्रेक्षते इति–फ.ग. 13. तः 14. पर्यन्तं नास्ति–फ.ज. 15. श्राव्यं–क.ल.म. 16. नास्ति–ड. 17. शब्दं–ड. 18. मधुपविरावमिति पाठे भ्रमरशब्दः–क. 19. भ्रमरशब्दः–म. घनशब्दः–ल. 20. पिकसमूहे–ड. 21. नास्ति–ड. 22. भावं कृष्णे अनुरागम्–क.ल.म.

अनिलतरलकिसलयनिकरेण करेण लतानिकुरुम्बम् ।
प्रेरणमिव करभोरु करोति गतिं प्रति मुञ्च विलम्बम् ।।५।।

जयन्ती

शृण्विति । रमणीयतरं अतिशयाकर्णनीयं तरुणीजनस्य युवतीगणस्य मोहनः चित्ताकर्षकः स चासौ मधुरिपोः केशवस्य रावः ध्वनिः कण्ठजः वेणुजो वा तं शृणु । तदाकर्णनेन अन्यास्तं यास्यन्तीति बिभीषिका । कुसुममेव शरासनं धनुः तस्य पुष्पधन्वनः शासनं आज्ञा तस्य मन्त्रिणि आज्ञाघोषणाधिकारिणि पिकनिकरे कोकिलसमुदाये भावं आदरं भज । प्रियनिकटे गन्तव्यमिति मदनाज्ञारूपकोकिलनादानादरे विरहतापरूपशासनं स्यादिति भावः ।।४।।

सञ्जीवनी

(अनिलेति ।) [1]किञ्च हे करभोरु, कनिष्ठातो मणिबन्धपर्यन्तः करभस्तस्य बहिर्भागस्तद्वन्निम्नोन्नते ऊरू [2]तरुणजनानां मोहने वशीकरणे [3]द्वे यस्यास्तत्सम्बोधनम् । गतिं गमनं प्रतिं विलम्ब मुञ्च त्यज[4] । यतो लतानिकुरुम्बं लतासमूहः [5]अनिलेन वायुना तरल[6]श्चपलो यः किसलयनिकरः पल्लवसमूहस्तद्रूपेण [7]करेण प्रेरणमिव तव [8]याचनामिव [9]करोतीति भावः । [10]अनेन [11]अचेतना अपि वृन्दावनगततरुलताः श्रीकृष्णानुरागोदये त्वामेव प्रेरयन्ति त्वय्यनुरागञ्च बोधयन्ति । किमस्माकं चेतनानां सखीनां चित्रमिति भावः[12] । [13]अतस्तव महद्भाग्यमिति ध्वनिश्च । "मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः (२.६.८१) । "निकुरुम्बं कदम्बकम्" [14]इत्यमरः (२.५.३९) । "समूहे निकुरुम्बं स्यात्कूजितेऽपि च" इति[15]हलायुधः । पिकादय [16]उद्दीपनविभावाः ।।५।।

---

1. तः 4. पर्यन्तं नास्ति–अ.ब. 2. तरुणीजनानां मनोहरत्वेन प्रसिद्धयोस्तत्सम्बोधनम्–फ.ज. 3. द्वये–इ. 5. चलनवायुना–अ.ब. 6. चञ्चलः–इ. 7. नास्ति–ग. 8. ज्ञापनमिव–फ. यापनमिव–हृ.ज. 9. करोति–इ.फ.ग.हृ.ज. 10. तः 12. पर्यन्तं नास्ति–अ.ब. (इ. पुस्तकगतोऽयं पाठः) 11. अचेतनेनापि–इ. 13. अतस्तवैव महद्भाग्यमिति ध्वनिः–फ.ग.हृ.ज. 14. इत्यपि–इ.फ.हृ.ज. 15. नास्ति हलायुधे 16. उद्दीपनमिति भावः–ग. उद्दीपनविभावः–फ.हृ.ज.

स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम् ।
[1]पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम् ॥६॥

पदद्योतनिका

अनिलेति । हे करभोरु; [2]कनिष्ठातो मणिवन्धपर्यन्तं करस्य वहिर्भागः [3]करभस्तद्वदूरुद्वयं जङ्घे यस्यास्तत्सम्वोधनम् । हे राधे ! गतिं गमनं प्रति विलम्वं मुञ्च शीघ्रं गच्छेति यावत् । यतो लतानिकुरुम्बं लतासमूहः अनिलेन वायुना तरलश्चञ्चलः किसलयनिकरः पल्लवसमूहस्तद्रूपेण करेण [4]हस्तेन तव प्रेरणमिव [5]यापनमिव करोति । अचेतना लताऽपि त्वां प्रेरयति; किं पुनरहम् ॥५॥

जयन्ती

अनिलेति । हे करभोरु, रलयोरभेदात्करभः त्रिंशद्वर्षगजः तस्य शुण्डावत् ऊरू यस्याः सेति । गजशुण्डोरुः मृगाक्षीवेति त्रिलोपसमासगोपमा; तद्वदत्र व्याख्याने गजोरुसमोरुत्वं न शुण्डासाम्यं, मध्यमपदलोपे शुण्डापदस्मारकपदाभावात् । मृगाक्षीत्यत्राक्षिशब्दस्तिष्ठतीति समर्थत्वा(द)दोष इति । "मणिवन्धादाकनिष्ठं करस्य करभो वहिः" इति कोशात् (अमरः २.६.८१) । करभवत् ऊरू यस्यास्तत्सम्वोधनम् । लतानां वल्लीनां निकुरुम्बं समुदायः अनिलेन तरलः चञ्चलः किसलयनिकरो गणः तेनेव करेण हस्तेन प्रेरणं करोतीव प्रेरयतीव । अतः त्वं गतिं प्रति गमनमुद्दिश्य विलम्वं आलस्यं मुञ्च शीघ्रं व्रजेति भावः । अत्र किसलयगणस्य करत्वारोपेण लतासमुदायस्य सखीजनत्वं प्रतीयत इति एकदेशवर्तिरूपकम् । तच्च प्रेरणं करोतीवेति प्रेरणधर्मोत्प्रेक्षायाः अङ्गम् । इवशव्दस्य क्रियान्वये धर्मोत्प्रेक्षेति वाग्भटात् ॥५॥

सञ्जीवनी

(स्फुरितेति ।) किञ्च हे प्रिये ! [6]त्वं अमुं कुचकुम्भं प्रियागमनमङ्गलकलशं [7]पृच्छ, सहचरी सम्यग्वदति न वेति [8]प्रश्नं कुरु । वर्तुलत्वात्पीनत्वाच्च [9]कुचस्य कुम्भसाम्यम् । कीदृशम् ? अनङ्गस्य कामस्य तरङ्गवशादिव

---

1. पश्य–इ. 2. कनिष्ठान्तो–क. 3. स करभः–क 4. नास्ति–ङ. 5. प्रापणमिव–ङ. ज्ञापनमिव–क. 6, 7. नास्ति–फ.ज. 8. पृच्छ प्रश्नं कुरु–फ.ज. 9. कुम्भसाम्यं कुचस्य–इ.फ.ग.ह.ज.

स्फुरितं सकम्पम । कामोऽत्र पयोधिस्थानीयः; कलशस्तरङ्गनिपतितः स्फुरतीति भावः । पुनः कीदृशम् ? सूचितहरिपरिरम्भं सूचितो ज्ञापितो हरेः श्रीकृष्णस्य परिरम्भः आलिङ्गनं येन [1]तम् । [2]हरिजलनिधेः तव कुचकलशः पूर्णो भविष्यतीति कलशशब्दग्रहणमिति ध्वनिः । पुनः कीदृशम् ? मनोहरो यो हारो मुक्ताहारः स एव विमला जलधारा यत्र तादृशम् । एतेन स्तनकलशस्य [3]यौवनपूर्णत्वं सूचितम् । कम्पः सात्त्विकभावजः प्रियागमनशंसी । "[4]नार्याः स्तने कम्पः प्रियसङ्गमसूचकः" इति भरते ।।६।।

पदद्योतनिका

स्फुरितमिति । हे राधे ! त्वं अमुं कुचकुम्भं स्तनद्वयं पृच्छ सखी सम्यग्वक्तीति । वर्तुलत्वात्पीनत्वाच्च कुम्भसाम्यम् । कीदृशं कुचकुम्भम् ? अनङ्गस्य कामस्य ये तरङ्गा विकारास्तद्वशादिव स्फुरितं सकम्पम् । अत एव सूचितः हरेः परिरम्भ आलिङ्गनं येन । अन्योऽपि कलशो नद्यां तरङ्गैः प्रेर्यमाणः सकम्पो भवति । पुनः कीदृशम् ? मनोहरो यो हारः स एव विमला निर्मला जलधारा यस्मिन् ।

वामे मधुरवाक्यानि वृक्षः पल्लवितोऽग्रतः ।
[5]अनुकूलवहो वायुः प्रयाणे शुभसूचकाः ।।६।।

जयन्ती

स्फुरितेति । मनोहरः रमणीयो हारः मुक्तादिमणिसम्बन्धभवः स इव विमला स्वच्छा जलधारा स्वेदाम्बुपङ्क्तिः यस्मिन् तम् । अमुं कुचकुम्भं पश्य । कुम्भस्य जलभरणयोग्यत्वाज्जलधारावत्त्वोक्त्या स्वेदरूपसात्त्विकभावः सूचितः । सूचितः ज्ञापितः हरेः कृष्णस्य परिरम्भः आश्लेषः येन तम् । अनङ्गस्य तरङ्गः उद्वेलनं तद्वशादिव स्फुरितं स्फुरणं प्रस्तुतत्वाद्वाह्वाद्यङ्गस्फुरणञ्च पश्य अवलोकय । अत्र स्फुरणं प्रति अनङ्गतरङ्गस्यैव हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा । अनङ्गस्य तरङ्गाभावादसिद्धास्पदा । स्फुरणयुक्तं स्फुरितमिति कुचकुम्भस्य विशेषणत्वे तेन विशेषणत्वेन सूचितादिपदं योजनीयम् । तथा च कुचकुम्भमात्रस्फुरणं स्यादिति पार्थक्येन योजना ।।६।।

---

1. तत्–ग. 2. हरिजलनिधेरेव तव कलशः–इ.फ.ग.ह.ज. 3. यौवनरसपूर्णत्वं ध्वनितम्–इ.फ.ग.ह.ज. 4. भार्यास्तने–फ.ज. 5. अनुकूलावहो–ड.

अधिगतमखिलसखीभिरिदं तव [1]वपुरतिरतिरणसज्जम् ।
चण्डि रसितरशनारवडिण्डिममभिसर सरसमलज्जम् ॥७॥

सञ्जीवनी

एवं वचनप्रसन्ना[2]मालज्जन्तीं [3]प्रत्याह–अधिगतमिति । हे चण्डि कोपने सुरतोद्भटे वा । इदं तव वपुरखिलसखीभिरतिशयेन रतिरणे सुरतसङ्ग्रामे सज्जं [4]कृतालङ्करणादिसन्नद्धं वा अधिगतं [5]ज्ञातम् । [6]तस्माद्बहुविधं विज्ञातेऽर्थे का लज्जेति भावः । कीदृशं वपुः ? रसिता शब्दायमाना रसना क्षुद्रघण्टिका च सैव रवो ध्वनिः डिण्डिमो वाद्यविशेषो यत्र तादृशं कृष्णमभिसर [7]गच्छ । कीदृशम् ? [8]सरसं शृङ्गाररससहितम् । (पुनः) कीदृशम् ? अलज्जं सुरते [9]गतत्रपम् । अथ वा क्रियाविशेषणं [10]वपुर्विशेषणञ्च पदत्रयम् ॥७॥

पदद्योतनिका

अधिगतमिति । हे चण्डि कोपने इत्याक्षेपे सम्बोधनम् । हे राधे ! [11]अखिलसखीभिरपि [12]समस्तसखीभिरपि [13]तवेदं वपुः शरीरं रतिरणे [14]सुरतयुद्धे सज्जं सन्नद्धं अधिगतं ज्ञातम् । तव मनस्यभिमानो [15]माऽस्त्वित्यर्थः । एवं सति [16]रसिता शब्दिता रसना क्षुद्रघण्टिका सैव [17]आरवडिण्डिमः [18]शब्दप्रधानो डिण्डिमो वाद्यविशेषो यस्यां क्रियायां सरसं सोत्कण्ठं यथा स्यात्तथा अलज्जं लज्जारहितं यथा [19]तथाऽभिसर; [20]कृष्णमिति शेषः ॥७॥

जयन्ती

अधिगतमिति । हे सखि ! अखिलाः असङ्ख्याः सख्यः ताभिः इदं तव वपुः अङ्गमपि रतिरणे सज्जं सन्नद्धं स्रक्चन्दनमकरिकापत्रादियुक्तं अधिगतं

1. वपुरपि–नि.सा.इ.ड. 2. आलक्ष्य लज्जितां प्रत्याह–इ.ग.ह. आलक्ष्य अतिलज्जितां प्रत्याह–फ.ज. 3. प्रीत्याह–अ.ब. 4. कृतालङ्कारादि–ग. 5. नास्ति–अ.व. 6. तासां बहुधा विज्ञाते अर्थे–इ.फ.ग.ह.ज. 7. शीघ्रं गच्छ–इ.फ.ग.ह.ज. 8. रसः शृङ्गाररससहितम्–ज. 9. सुरतनिश्शङ्कं–इ.फ.ग.ह.ज. 10. नास्ति–अ.ब. 11. नास्ति–ड. 12. नास्ति–क.ल.म. 13. तव वपुः–क. 14. सुरतियुद्धे–ड. सुरतसङ्ग्रामे–क.ल.म. 15. नास्तीत्यर्थः–ड.क.ल.म. 16. रणिता–क.ल.म. 17. अखण्डडिण्डिमः–क.ल.म. 18. शब्दप्रधानडिण्डिमो–ड. नास्ति–क. 19. स्यात्तथा–क. नास्ति–ल.म. 20. कृष्णमित्यध्याहारः–क.ल.म.

स्मरशरसुभगनखेन सखीमवलम्ब्य करेण सलीलम् ।
चलवलयक्वणितैरवबोधय हरिमपि [1]निजगतिशीलम् ॥८॥

प्रत्यक्षदृष्टम् । हे चण्डि अप्रतीकारकोपवति । कथं ज्ञापितमित्याकाङ्क्षायामाह–रसिता नादिता या रशना काञ्ची तस्याः आरवः शब्दः तेन डिण्डिमं तेन ज्ञातमिति भावः । अत एव अलज्जं सरसञ्च अभिसर । अज्ञाते लज्जोचिता ॥७॥

सञ्जीवनी

अभिसरणमेवाह—(स्मरशरेति ।) हे प्रिये ! करेण सखीमवलम्ब्य [2]सलीलं शृङ्गारचेष्टया सहितं यथा स्यात्तथा चल गच्छ । कीदृशेन [3]करेण ? स्मरशरवत् कामबाणवत् सुभगाः सुन्दरा नखा यत्र । अन्यत्रापि सङ्ग्रामेऽस्त्राणि भवन्ति । [4]अत्रापि त्वन्नखा [5]एवेति स्मरसहायैव गच्छेति भावः । किञ्च तत्र गत्वा वलयक्वणितैः कङ्कणझङ्कारैर्हरिमपि अहमागतेत्यवहितं बोधय ज्ञापय । अन्योऽपि वीरः प्रतिभटमवहितं कृत्वा युद्ध्यत इति [6]भावः । कीदृशम् ? [7]निजगतिशीलं निजगत्या निजगमनेन [8]तत्र समीपमागन्तु शीलं स्वभावो यस्य । [9]यद्वा निजे आत्मनि [10]गतिर्गमनं यस्य सः निजगतिः कामः तस्मिन् शीलं [11]स्वभावो [12]चित्तैकाग्र्यं यस्य । [13]स्मराधीनमित्यर्थः ॥८॥

पदद्योतनिका

स्मरेति । हे राधे ! त्वं करेण हस्तेन सखीमवलम्ब्य सलीलं सविलासं चल गच्छ । कीदृशेन करेण ? स्मरशरवत्कामबाणवत्सुभगानि सुन्दराणि नखानि यस्मिन् । गत्वा च वलयक्वणितैः कङ्कणशब्दैः हरिं कृष्णं [14]अवबोधय अहमागतेति [15]ज्ञापयेत्यर्थः । अपिः क्रियासमुच्चये । कीदृशं [16]हरिम् ? निजे आत्मनि गतिर्यस्य स निजगतिः कामः तस्मिन् शीलं समाधिश्चित्तैकाग्र्यं यस्य; कामपरवशमित्यर्थः ॥८॥

1. निगदितशीलम्–इ. 2. सलीलं लीला शृङ्गारचेष्टा वा तया सहितं यथा तथा चल गच्छ–इ.फ.ह.ज. सलीलं लीला शृङ्गारचेष्टा तत्सहितं यथा तथा चल गच्छ–ग. 3. नास्ति–इ.फ.ग.ह.ज. 4. अत्र–इ.फ.ग.ह.ज. 5. एवेत्यतः–इ.फ.ग.ह.ज. 6. ध्वनिः–इ.फ.ग.ह.ज. 7. नास्ति–इ.फ.ग.ह.ज. 8. नास्ति–फ.ज. 9. अथ वा–इ.फ.ह.ज. 10. गतिर्यस्य सः–ग. गतिर्ज्ञानं यस्य–फ.ज. गतिर्गमनं यस्य–ह. 11. नास्ति–इ.फ.ग.ह.ज. 12. चित्तैकाग्र्यसमाधिर्यस्य–फ. चित्तैकाग्र्यसमाधिरित्यर्थः–ज. 13. नास्ति–फ.ज. 14. प्रबोधय–क. 15. विज्ञापयेत्यर्थः–क. 16. हरिं कृष्णम्–क.

श्रीजयदेवभणितमधरीकृतहार[1]मुदासितवामम् ।
हरिविनिहितमनसामधितिष्ठतु [2]कण्ठतटीमविरामम् ।।९।।

जयन्ती

स्मरशरेति । स्मरस्य शरवत् सुभगाः सुन्दराः नखाः यस्मिन् तेन करेण सखीं अवलम्ब्य लीलया सहितं (यथा) स्यात्तथा चल व्रज । वलयानां क्वणितैः सिञ्जितैः निगदितं प्रोक्तं शीलं मञ्जुलवञ्जुलकेलिशयनादिस्वभावं हरिमपि अधिवोधय । त्वदागमतन्द्रालसोऽपि कङ्कणशब्दाकर्णनादेव उत्थास्यतीति भावः ।।८।।

सञ्जीवनी

(श्री जयदेवेति ।) [3]श्रीजयदेवेन भणितं [4]गीतं [5]हरिविनिहितमनसां [6]कृष्णनिविष्टचित्तानां अविरामं [7]निरन्तरं [8]कण्ठतटीं कण्ठप्रदेशेऽधितिष्ठतु [9]आश्रयतु । "[10]अधिशीङ्स्थासां कर्म" (पा.सू. १.४.४६) इत्यधिकरणे द्वितीया । [11]एतद्धारणमात्रेण कण्ठशोभा भवतीति भावः । कीदृशम् ? अधरीकृतः स्वगुणैर्हीनीकृतो हारो मुक्ताहारो येन । पुनः कीदृशम् ? उदासिताः [12]स्वगुणैः स्वकृता वामाः [13]सुन्दर्यो येन । हरिसुरतवर्णनेन जयदेवभणितं मणिहारादिभ्यो वाऽधिकमिति भावः ।।९।।

[14]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां विंशः प्रबधः ।

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवेन भणितं गीतं हरौ कृष्णे विनिहितमारोपितं मनश्चित्तं यैस्तेषां [15]भक्तानां कण्ठतटीं अविरामं सर्वदाऽधितिष्ठतु आश्रयतु । कीदृशं भणितम् ? अधरीकृतः स्वगुणै[16]र्नीचीकृतः हारो मुक्ताहारो येन । [17]पुनः [18]कीदृशम् ? उदासिता स्वगुणैस्तिरस्कृता वामा सुन्दरी येन । यद्यपि

1. मुपहसितवामम्–इ. 2. कण्ठनलिनमविरामम्–इ. 3. श्रीजयदेव-भणितं–इ. 4. नास्ति–इ.फ.ग.ह.ज. 5. विनिहितमनसां–ज. 6, 7. नास्ति–अ.ब. 8. नास्ति–अ.ब.इ.ग.ह. 9. समीपं वसतु–फ.ज. 10. कर्मण्यधिकरणे द्वितीया–फ.ज. 11. एतद्धारणे कण्ठशोभा–ग. 12. नास्ति–फ. 13. सौन्दर्या-दिगुणाः–अ.ब. 14. पुष्पिकेयं नास्ति–अ.ब.इ.फ.ग.ह.ज. 15. नास्ति–क. 16. नीचः कृतः–क. 17. नास्ति–ल.म. 18. नास्ति–ड.

एकविंशः प्रबन्धः

सा मां द्रक्ष्यति वक्ष्यति [1]स्मरकथां प्रत्यङ्गमालिङ्गनैः
प्रीतिं यास्यति रंस्यते सखि [2]समागत्येति [3]चिन्ताकुलः
[4]स त्वां पश्यति [5]वेपते पुलकय[6]त्यानन्दति [7]स्विद्यति
प्रत्युद्गच्छति मूर्छति [8]स्थिरतमःपुञ्जे निकुञ्जे प्रियः ॥१॥

हारस्य रामाणाञ्च कण्ठदेशे स्थित्या शोभाप्रदत्वं सम्भवति तथापि [9]तयो रागिणामेव [10]शोभाप्रदत्वं न तु मुमुक्षूणां तत्रापि तारुण्य एव न तु सर्वदा। [11]जयदेवभणितं तु कृष्णकथात्वेन हारापेक्षया चाधिकमित्यर्थः[12] ॥९॥

[13]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां विंशः प्रबन्धः।

जयन्ती

श्रीजयदेवेति। श्रीजयदेवस्य भणितं वचनं अधरीकृतः हारो येन तम्। उपहसितः वामः येन तम्। हरौ कृष्णे विनिहितं मनो यैः तेषां कृष्णभक्तानां कण्ठ एव नलिनं कमलं; जातावेकवचनम्। अविरामं अवसानं न विद्यते यस्मिन् तथा अविश्रान्तं अधिगच्छतु। अत्यन्तसंयोगे द्वितीया ॥९॥

[14]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां विंशः प्रबन्धः।

सञ्जीवनी

एवमनभिगच्छन्तीं श्रीकृष्णस्य [15]तदुत्कण्ठामाह–सा मामित्यादिना। हे सखि ! सा राधा मां द्रक्ष्यति आदरेण द्रक्षिष्यते। [16]दृष्ट्वा [17]प्रियकथां मनोहरानन्दकेलिवार्तां च वक्ष्यति वदिष्यति। अनङ्गालापं कृत्वा [18]प्रत्यङ्गं

---

1. प्रियकथां–ड. 2. समासम्येति–ड. 3. सञ्चिन्तयन्–इ. 4. दूरं पश्यति–इ. सत्वां पश्यति–ड. 5. कम्पते–ड. 6. त्यानन्दने–इ. 7. खिद्यति–इ. 8. प्रियतमः कुञ्जे निकुजे प्रियः–ड. 9. तत्र–क. 10. शोभाप्रदत्वं वक्ष्यति–क. 11. तः 12. पर्यन्तं नास्ति–ड. 13. नास्तीयं पुष्पिका–ड.क.ल.म. 14. पुष्पिकेयं नास्ति–इ. 15. तदुक्तं च निरूपयति–इ. तदुत्कण्ठां निरूपयति–फ.ग.ह.ज. 16. अतो दृष्ट्वा–फ.ज. 17. स्मरकथां मनोहरानङ्गकेलिवार्तां–इ.फ.ग.ह.ज. 18. प्रत्यङ्गावयवं–अ.ब.

प्रत्यवयवं प्रति आलिङ्गनैः [1]प्रीतिं [2]स्नेहं यास्यति प्राप्स्यति। प्रीता सती मया सह रंस्यते [3]केलिं करिष्यति। इत्यनेन प्रकारेण चिन्ताकुलः [4]चिन्तायुक्तः स प्रियो वल्लभः श्रीकृष्णो निकुञ्जे लतामन्दिरे स्थिरतमःपुञ्जे निश्चलान्धकारसमूहे [6]त्वां पश्यति त्वद्भिया वेपते कम्पते। एतेन [7]प्रथमसमा[8]गमावस्थामनुभवतीति ध्वनिः। तच्चिह्नमाह-पुलकयत्यङ्गानि [9]तवालिङ्गनाय सम्भाव्य त्वत्स्पर्शसुखेन [10]पुलकिताङ्गो भवतीति ध्वनिः। किञ्च सुरतकेलिं सम्भाव्यानन्दति सानन्दो भवति। किञ्च सुरतसुखं विभाव्य स्विद्यति [11]प्रस्वेदयुक्तो भवति। [12]किञ्च त्वामागतां पुरतो विभाव्य प्रत्युद्गच्छति प्रत्युत्थानं करोति। किञ्च त्वामदृष्ट्वा मूर्च्छति क्लेशं प्राप्नोति। [13]किं वहुधा कर्तव्यम्? गोपालभूपस्यान्तिकं त्वया गन्तव्यमिति [14]मम प्रार्थना ॥१॥

पदद्योतनिका

इदानीं सखी कृष्णस्य स्नेहातिशयमाह—सा मामिति। हे [15]राधे! स प्रियः कृष्णः [16]स्थिरो निश्चलस्तम पुञ्जोऽन्धकारस्तोमः यत्र निकुञ्जे त्वां पश्यति; ध्यानेन दृष्ट्वाऽपि किमियं परुषं मधुरं वा वदिष्यतीति भयात्कम्पते। [17]पुलकयत्यङ्गानि। ध्यानेनैव त्वदालिङ्गनं परिकल्प्य [18]सरोमाञ्चः। [19]ध्यानेन त्वत्सुरतकेलिं [20]परिकल्प्यानन्दति सानन्दो भवति। सुरतसुखं सङ्कल्प्य [21]स्विद्यति प्रस्वेदयुक्तो भवति। पश्चात्केलिं कृत्वा [22]उत्थाय गन्तुं प्रवृत्तायां त्वयि [23]प्रत्युद्गच्छति प्रत्यत्थानं करोति। ततो ध्यानविच्छेदे त्वामदृष्ट्वा मूर्च्छति। कीदृशः[24] प्रियः? [25]इति चिन्ताकुलः चिन्तायुक्तः। इति [26]किम्? हे सखि! सा राधा मां द्रक्ष्यति अनुकूलतया ईक्षिष्यते, दृष्ट्वा च प्रियकथां

---

1. प्रीतिं यास्यति—ग. 2. तः 5. पर्यन्तं नास्ति—ज. 3. क्रीडिष्यति—इ.फ.ग.हृ.ज. 4. चिन्ताकुलः—अ. 6. समागत्य त्वां पश्यति—इ.ग.हृ. त्वां समागत्य पश्यति—फ.ज. 7. समागमस्थामनुभवतीति ध्वनिः—ग. 8. गतावस्थां—अ.ब. 9. तवालिङ्गनं विभाव्य—इ.ग.हृ. तवालिङ्गनान्तं विभाव्य—फ.ज. 10. पुलकाङ्गो—अ.ब.इ.फ.ग.हृ.ज. 11. स्वेदयुक्तो—फ.ज. प्रस्वेदनपुलकाङ्गो—ग. 12. नास्ति—अ.ब. 13. किञ्च—अ.ब. 14. प्रार्थना मम—ग. 15. सखि—क.ल.म. 16. स्थिरोऽचलस्तमःपुञ्ज़ोऽन्धकारसमूहो यस्मिन् निकुञ्जे लतागृहे त्वां पश्यति—क. निश्चलस्तम पुञ्जोऽन्धकारसमूहो यस्मिन् निकुञ्जे लतागृहे त्वां पश्यति—ल.म. 17. पुलकयत्यङ्गानीत्यर्थः—क.ल.म. 18. सरोमाञ्चो भवतीत्यर्थः—क.ल.म. 19. नास्ति—ड. 20. कल्प्य सानन्दः—ड. 21. स्विद्यते—ड. 22–24. नास्ति—ड. 25. रतिचिन्ताकुलः सुरतचिन्तायुक्तः 26. नास्ति—ड.

अक्ष्णोर्निक्षिप[1]दञ्जनं श्रवणयोस्तापिच्छगुच्छावलीं
मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ।
धूर्तानामभिसार[2]सत्वरहृदां विष्वङ्‌ निकुञ्जे सखि
ध्वान्तं [3]नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति ।।२।।

मनोहरां कथां वक्ष्यति वदिष्यति, उक्त्वा च [4]प्रत्यङ्गं प्रत्यवयवं [5]प्रत्यालिङ्गनैः प्रीतिं [6]सन्तोषं [7]यास्यति [8]प्राप्स्यति । समागम्य [9]मिलित्वा रंस्यते मया सह क्रीडिष्यतीति प्रश्ने समागम्येति पूर्वार्धे सर्वत्र योज्यम् ।।१।।

जयन्ती

सेति । हे सखि ! सा राधा समागत्य मां द्रक्ष्यति आलोकयिष्यति । स्मरस्य कथां विरहकाले मदनबाधादिकं मनस्सङ्कल्परूपं वक्ष्यति व्या(ख्या)-स्यति । प्रत्यङ्गं अङ्गमङ्गं आलिङ्गनैः प्रीतिं हर्षं यास्यति प्राप्नोति । रंस्यते च, रमेरात्मनेपदप्रयोगः । सुरतं करिष्यति; आलिङ्गनस्य प्रागुक्तत्वात् । इति सञ्चिन्तयन् प्रियः कृष्णः स्थिरो गाढवान् तमसः पुञ्जो यस्मिन् तस्मिन् निकुञ्जे दूर पश्यति मार्गमवलोकते । वेपते कम्पते । पुलकयति रोमाञ्चयति । आनन्दते हर्षति । सञ्जातानन्द इवाचरति । खिद्यति खिन्नो भवति । प्रत्यु-द्गच्छति समागताऽसीति सम्मुखं याति । मूर्च्छति अनागमान्मूर्च्छां याति । अत्र पूर्वार्धे सेति कारकस्य चतुर्णां तिङां दीपकत्वात्कारकदीपकालङ्कारः । उत्तरार्धे प्रिय इति कारकस्य सप्तानां तिङां अन्वयेन प्रकाशकत्वात्कारकदीप-कालङ्कारः । अनयोर्निरपेक्षत्वात्संसृष्टिः । सञ्चारीभावः सात्त्विकभावश्च तत्तत्क्रियाभिर्व्यज्यते ।।१।।

सञ्जीवनी

गमनकाले योग्यमन्धकारं वर्णयति–अक्ष्णोरिति । हे सखि राधे ध्वान्तं [10]निविडान्धकारं विष्वङ्‌ निकुञ्जे सर्वतः [11]कुञ्जलतामण्डपे सुदृशां सुन्दराक्षीणां प्रत्यङ्गं अवयवं प्रति आलिङ्गति । तद्वदालिङ्गनव्याजेनास्मिन् त्वया गन्तव्यमिति भावः । कीदृशं ध्वान्तम् ? अक्ष्णोर्नेत्रयोरञ्जनं [12]कज्जलं

---

1. कज्जलं–इ. 2. सम्भ्रमजुषां निःशेषकुञ्जे सखि–इ. 3. नील-विलोल–इ. 4. नास्ति–क. 5. आलिङ्गनैः–क. 6. नास्ति–ड. 7. पश्यति–ड. 8. नास्ति–ड. 9. नास्ति–ड. 10. नास्ति–अ.ब. 11. लतामण्डपे–ग. 12. नास्ति–अ.व.

निक्षिपत् विन्यस्यत् । श्रवणयोः कर्णयोस्तापिच्छगुच्छावलीं तमालस्तवकश्रेणीं निक्षिपदिति सर्वत्र योज्यम् । किञ्च मूर्ध्नि श्यामसरोजदाम नीलोत्पलमालाम् । किञ्च कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्ररचनाम् । कीदृशं ध्वान्तम् ? नीलनिचोलचारु नीलवस्त्रवत चारु मनोहरं [1]सुन्दरम् । कीदृशीनां सुदृशाम् ? धूर्तानां परवञ्चकानाम् । पुनः कीदृशीनां [2]सुदृशाम् ? अभिसारे सत्वरं शीघ्रं हृच्चेतो यासां तास्तासाम् । "[3]धूर्तः स्याद्वञ्चने लोभे" इति हारावली । "तापिच्छस्तु तमालकः" इत्यपि [4]कोशे ॥२॥

पदद्योतनिका

गमनकाले योग्यं अन्धकारं वर्णयति–अक्ष्णोरिति । हे [5]सखि [6]राधे ध्वान्तं सुदृशां [7]नायिकानां [8]प्रत्यङ्गं प्रत्यवयवमालिङ्गति । कीदृशं ध्वान्तम् ? अक्ष्णोः [9]नेत्रयोरञ्जनं कज्जलं निक्षिपत् विन्यस्यत् । श्रवणयोः तापिच्छगुच्छावलिं तमालपुष्पस्तबकं कर्णपूरपङ्क्तिं निक्षिपत् । मूर्ध्नि [10]मस्तके श्यामसरोजदाम नीलकमलमालां निक्षिपत् । [11]कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्रावलिं निक्षिपत्[12] । कीदृशीनां सुदृशाम् ? धूर्तानां परवञ्चकानाम् । पुनः [13]कीदृशीनाम् ? विष्वक् सर्वत्र निकुञ्जे लतागृहे अभिसारसत्वरगमनाय सत्वरं हृत् यासां ताः तासाम् । कीदृशं ध्वान्तम् ? नीलनिचोलवत् श्यामकञ्चुकवत् मनोहरं श्यामवस्त्रवच्चारु; सदृशमित्यर्थः । नीलवस्त्रस्थाने ध्वान्तं जातमित्यर्थः ॥२॥

जयन्ती

राधाया गौराङ्गित्वादन्धकारे स्फुटीभावः स्यादिति सञ्छादनोपायमाह–अक्ष्णोरिति । हे सखि राधे कज्जलं अक्ष्णोः नेत्रयोः निक्षिप अञ्जनं अञ्जय । श्रवणयोः तापिच्छस्य तमालस्य गुच्छाः पुष्पोत्कराः । तमालपुष्पस्य कृष्णवर्णत्वं प्रसिद्धम् । तेषां आवलीं निक्षिप । मूर्ध्नि श्यामानां सरोजानां नीलोत्पलानां दाम शिरःसञ्छादकपूर्तिस्रग्विशेषः । तत् निक्षिप । कुचयोः कस्तूरिकया लिखितं पत्रकं पत्राकृतिचित्रं निक्षिप । लिखापयेति भावः । ननु कथमेतैः स्पष्टता न स्यादित्यत आह–धूर्तानामिति । निःशेषः समस्तः कुञ्जः

1, 2. नास्ति–इ.फ.ग.ह्.ज. 3. धूर्तः स्याद्धेवके लोभे–इ. धूर्तं स्याद्वञ्चके लोके लोभे चेति–फ. 4. नास्ति–इ.फ.ग.ह्.ज. 5. नास्ति–ड. 6. नास्ति–क. 7. नास्ति–ड. 8. प्रत्यङ्गमालिङ्गति–ल.म. 9. नयनयोः–क. 10. नास्ति–ड. 11. तः 12. पर्यन्तं नास्ति–ड. 13. नास्ति–ड.

काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो रुचिमञ्जरीभिः ।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥३॥

तस्मिन्; जातावेकवचनम् । निखिलसङ्केतभवनेष्वित्यर्थः । ध्वान्तं गाढतमः । धूर्तानां अभिसारे क्रियादक्षाणां अभिसारे प्रियानुगमने सम्भ्रमः सन्तोषातिशयेन गोपनागोपनविभ्रमं जुषन्तीति जुषः तासाम् । नीलाश्च ताः विलोलाश्च ताः सुष्ठु दृशो यासां तासां प्रत्यङ्गं अवयवनिकायं आलिङ्गति श्लिष्यति । अन्धकारस्य सर्वावयवगोपकत्वान्नीलाभरणादिकं सामान्यान्न दृश्यत इति भावः ॥२॥

सञ्जीवनी

आस्तां तावदभिसरणं त्वत्प्रणयपरीक्षार्थमेतदुच्यते—काश्मीरेति । हे राधे ! एतत्तमिस्रमन्धकारं तत्प्रेम [1]तासामभिसारिकाणां प्रेम प्रीतिः तदेव हेम सुवर्णं तस्य निकषोपलतां [2]घर्षणपाषाणतां तनोति विस्तारयति । ध्वान्तालिङ्गनं यदि ईदृशं तर्हि कृष्णालिङ्गनं [3]कीदृग्भविष्यतीत्यमूल्यप्रणयः सूचित इति ध्वनिः । कीदृशम् ? [4]तमालपल्लवनीलतममतिशयेन श्यामम् । पुनः कीदृशं [5]तत्प्रेम ? अभिसारिकाणां स्त्रीणां अभितः सर्वतः रुचिमञ्जरीभिः कान्तिकिरणैराबद्धा [6]कृता रेखा येन । कीदृशीनाम् ? काश्मीरं कुङ्कुमं तद्वद्गौरं पीतं [7]वपुर्यासाम् । एतेन सौन्दर्यप्रभावबाहुल्यं चाभिसारिकाणां सूचितमिति ध्वनिः । तादृशेऽन्धकारेऽभिसरन्तीत्यभिसारिकाः ॥३॥

पदद्योतनिका

अन्धकारमेव वर्णयति—काश्मीरेति । हे राधे ! एतत्तमिस्रमन्धकारस्तत्प्रेम तासामभिसारिकाणां [8]यत्प्रेम प्रीतिः तदेव हेम सुवर्णं तस्य निकषोपलतां [9]घर्षणपाषाणतां तनोति विस्तारयति । कीदृशं तमिस्रम् ? अभिसारिकाणां स्त्रीणां मणिमञ्जरीभिः मणिकिरणैरभितः [10]सर्वतः आबद्धा कृता रेखा यत्र । कीदृशीनामभिसारिकाणाम्[11] ? [12]काश्मीरं कुङ्कुमं तद्वद्गौरं पीतं

---

1. तादृशरसिकाणां प्रेम–फ.ज. 2. घर्षणतां–ग. 3. ईदृग्भविष्यतीति–इ. 4. तमालदलनीलतमं तमालपल्लववन्नीलतममतिशयेन श्यामम्–फ.ज. 5. तत्प्रेमहेम–अ.ब.ह. 6. नास्ति–अ.व. 7. वपुर्यस्याः सा–इ. 8. तः 11. पर्यन्तं नास्ति–ड. 9. नास्ति–क. 10. सर्वत्र–ल.म. 12. काश्मीरकुङ्कुमं–ड.

हारावलीतरलकाञ्चनकाञ्चिदाम-
[1]मञ्जीरकङ्कणमणिद्युतिदीपितस्य ।
द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य
व्रीडावतीमथ [2]सखी प्रियमित्युवाच ॥४॥

---

[3]वपुर्यासाम् । पुनः कीदृशं तमिस्रम् ? [4]तमालस्य दलं नूतनं पत्रं तद्वन्नील-तमं [5]अतिश्यामम् । "कान्तार्थिनी तु या याति सङ्केतं साभिसारिका" इति [6]लक्षणम् । अभिसारिकाणां प्रेमपरीक्षासमयस्त्वयमेव यदन्धन्तमसि गमन-मिति ॥३॥

जयन्ती

काश्मीरेति । एतत्पुरोवर्ति तमालदलवत् नीलतमं अतिश्यामं आवद्धरेखं तमिस्रं कर्तृ, काश्मीरवत् कुङ्कुमकेसरवत् गौराणि वपूंषि यासां तासां अभि-सारिकाणां प्रियनिवासस्थलयायिनीनां रुचिमञ्जरीभिः शरीरकान्तिसमुदायैः अभितः परीक्षार्थं तत्प्रेमहेमनिकषोपलतां कषणशिलात्वं तनोति करोति याती-त्यर्थः । अत्र आवद्धरेखत्वनिमित्तेन तमिस्रस्य निकषोपलत्वसम्भावनादुत्प्रेक्षा-लङ्कारः । वाचकाभावादुगम्यः । आवद्धरेखात्वे शीघ्रगमनत्वं व्यज्यते । अन्यथा विन्दुतावगमः स्यात् । अभिसारिकाणामिति बहुवचनेन तत्प्रेमेत्येकवचनेन वृन्दा-वनस्थाः सर्वा अपि तमेवाभिसरन्ति । कज्जलादिसामग्रीं विनैव कषरेखावद्धा समाना इवेति तव कृतोपायवशान्न प्रकटीभाव इति भावः । वसन्ततिलकावृत्तम् । अलातचक्ररेखावत् ॥३॥

सञ्जीवनी

किञ्च हारावलीति । अथ अनन्तरं सखी राधां निजगाद पुनरप्युवाच । [7]कीदृशीम् ? निकुञ्जनिलयस्य [8]चोरमन्दिरस्य [9]द्वारे स्वाङ्गदीप्याऽन्धकारे हरिं निरीक्ष्य व्रीडावतीं लज्जावतीम् । कीदृशस्य ? हारावल्यो [10]मुक्ताहार-

---

1. केयूरकङ्कण–नि.सा. 2. सखीमियमित्युवाच–नि.सा. सखीं निज-गाद राधा–इ. 3. वपुर्यासां तासाम्–क. 4. तमालदलं–क. 5. नास्ति–क. 6. नास्ति–क. इत्यभिसारिकालक्षणम्–ल.म. 7. नास्ति–ग. 8. चोरमन्दिरे–अ.ब. 9. नास्ति–अ.ब. 10. मुक्ताहारस्य श्रेण्यः–इ.

श्रेण्यस्तासां तरलो यो [1]मध्यमणिर्मध्यनायकः काञ्चनस्य सुवर्णस्य काञ्चीदाम मेखलादाम मञ्जीरं नूपुरं कङ्कणं करभूषणमेतेषु खचिता ये मणयस्तेषां द्युत्या दीप्त्या दीपितस्य [2]प्रकाशितस्य । [3]निनीय इति वा पाठः । प्रियमित्युवाचेति पाठः । [4]व्रीडावतीं [5]राधामानीय प्रियं हरिमुवाचेति वा योजना । [6]"तरलश्चञ्चले खड्गे हारमध्यमणावपि" इति विश्वः (१०५.५८) । "निलयश्चोरमन्दिरे" इति हारावली[7] ॥४॥

पदद्योतनिका

हारावलीति । [8]अथानन्तरं सखी राधां [9]निजगाद पुनरप्युवाच । किम्भूतां राधाम् ? निकुञ्जनिलयस्य लतागृहमेव निलयं [10]निर्भयं निभृतगृहं तस्य द्वारे हरिं निरीक्ष्य [11]दृष्ट्वा व्रीडावतीं [12]सलज्जाम्; अस्मिन् मया कति निष्ठुराणि वचांसि (प्र)युक्तानि सम्प्रति कथं यामीति सल्लजा । कीदृशस्य [13]निलयस्य ? हारावलीतरलस्य मुक्ताहारमध्यमणेर्युक्त्या काञ्चनकाञ्चिदाम्नः सुवर्णकाञ्चिरसनाया द्युत्या [14]केयूरस्य बाहुभूषणस्य कङ्कणस्य ये मणयस्तेषां द्युत्या च दीपितस्य प्रकाशितस्य । एतेन ध्वान्तेऽपि दर्शनयोग्यतोक्ता ॥४॥

जयन्ती

एवमभिसारोद्योगे विलम्बे जाते स्वयमेवागत इति सङ्गतिमाह—हारावलीति । अथ सखीवचननिर्गमनानन्तरम् । हारावलीनां मौक्तिकहाराणां तरला मध्यमणयश्च काञ्चनदाम्नः सुवर्णकाञ्चिदाम्नश्च मञ्जरीणां नूपुराणां कङ्कणानां मणयश्च तेषां द्युतिभिः दीपितः उज्ज्वलितः तस्य निकुञ्जनिलयस्य कुटीरगृहस्य द्वारे हरिं निरीक्ष्य आलोक्य व्रीडावतीं कृष्णाधिष्ठितकुञ्जं प्रत्यागमनात् ह्रियमाणां राधां सखी निजगाद ॥४॥

---

1. मध्यमणिः—ग. 2. नास्ति—अ.ब. 3. निनीय वा पाठः—अ.ब.ग.इ. 4. तत्र व्रीडावतीं—फ.ज. 5. राधां निनीय—ग. राधां निनीय आनीय—फ.ज. 6. तः 7. पर्यन्तं नास्ति—अ.ब. 6. तरलः खड्गे—इ.ग.ह. 8. अनन्तरं—क. 9. पुनर्निजगाद—ङ. 10. नास्ति—क.ल.म. 11, 12. नास्ति—ङ. 13. नास्ति—ङ. 14. केयूरस्य हारावलीतरलस्य बाहुभूषणस्य—ङ.

वराडीरागे [1]मण्ठताले

मञ्जुतरकुञ्जतलकेलिसदने
[2]प्रविश राधे माधवसमीप[3]मिह ॥५॥
[4]विलस रतिरभसहसितवदने ॥ ध्रुवपदम् ॥

सञ्जीवनी

[5]वराडीरागमण्ठतालध्रुवपदानां लक्षणमुक्तमेव । श्लोकोक्तं गीतेनाह– [6]मञ्जुतरेत्यादिना । हे राधे ! इहाऽस्मिन् मञ्जुतरं [7]मनोहरतरं [8]यन्निकुञ्जतलं लताभ्यन्तरदेशस्तदेव केलिसदनं क्रीडामन्दिरं तस्मिन् माधवसमीपं [9]प्रति प्रविश गच्छ, तत्र विलस विहारं कुरु । [10]एतेन विहारातिशय उक्तः । कीदृशे केलिमन्दिरे ? राधे रः [11]कामोऽधि अधिको यत्र तादृशे । रतिरभसेन सुरतोत्साहेन हसितं वदनं यस्यास्तत्सम्बुद्धिः ॥५॥

पदद्योतनिका

[12]वराडीरागः । मञ्जुतरेति । हे राधे ! रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तत्सम्बुद्धिः । इहाऽस्मिन मञ्जुतरं मनोहरं [13]निकुञ्जाभ्यन्तरदेशस्तदेव केलिसदनं क्रीडागृहं तस्मिन् माधव[14]समीपं प्रविश गच्छ पश्चाद्विलस क्रीडां कुरु ॥५॥

जयन्ती

मञ्जुतरेति । मञ्जुतरं सुन्दरतरं कुञ्जतले केलिशयनं क्रीडाशय्या तस्मिन् । इह अत्रैव माधवसमीपं कृष्णनिकटं प्रविश विलस । अत एव शोभां इहि । हे (रतिरभसहसितवदने ! रति)रभसेन प्रेमातिशयेन हसितं वदनं

1. रूपकताले–नि.सा. प्रतिमण्ठतालेन–इ. 2. 4. पङ्क्तिद्वयमिदं व्यत्यस्तम्–नि.सा.ड. 3. इह नास्ति–ड. 4. इह विलस सरतिरभसवदने–ड. 5. वराडीरागे मण्ठताले ध्रुवपदानां लक्षणमुक्तमेव–ग. वराडीरागमण्ठताले ध्रुवपदानां लक्षणमेव पूर्वमुक्तम्–ज. वराडीरागमण्ठतालध्रुवपदानां लक्षणमेव पूर्वमुक्तम्–फ. वराडीरागमण्ठताले । रागतालध्रुवपदानां लक्षणमुक्तमेव–ह. 6. नास्ति–ग. 7. मनोहरं–ग. 8. यन्निकुञ्जतलाभ्यन्तरदेशः–अ.ब. 9. नास्ति–इ.फ.ग.ह.ज. 10. अनेन–इ. 11. कामोऽधिको यत्र–ग. 12. वराडीरागः भैरवी वा–ड. वराडरागेण अडतालेन–क. वरारिरागेण गीयते अडताले–ल.म. 13. निकुञ्जतरं कुञ्जाभ्यन्तरदेशः–क.ड. निकुञ्जाभ्यन्तरदेशः–ल.म. 14. समीपे–ड.

[1]नवलसदशोकदलशयनसारे
[2]प्रविश राधे माधवसमीपमिह ।
[3]विलस कुचकलशतरलहारे ॥६॥

यस्यास्तत्सम्बोधनम् । हे राधे ! मया किमर्थं गन्तव्यं स्वयमेवागत इति हर्षातिशयः । अत्र प्रविश राधे माधवसमीपमिह विलसेति ध्रुवा । आभोगे प्रतिपदं रभसादिभागस्य परिवर्तनं बोध्यम् ॥५॥

सञ्जीवनी

(नवेति ।) [4]कीदृशे (केलिमन्दिरे) ? [5]नवं नूतनं लसच्छोभमानं यदशोकदलं पत्रं[6]तन्निर्मितशयने शय्यायां सारो रत्नं यत्र [7]तादृशे । [8]राधाविशेषणं कुञ्जविशेषणं वा । [9]पुनः कीदृशे ? कुचयोः [10]स्तनयोर्मध्ये निपतितश्चञ्चलो वा हारो [11]मुक्ताहारो यत्र [12]तादृशे । [13]राधाविशेषणं कुञ्जविशेषणं वा[14] । [15]श्रीकृष्णपक्षे [16]काकाक्षिगोलकन्यायेन श्रीराधासम्बोधनं सदनविशेषणञ्च । [17]हे माधव समीपं [18]प्रकरणात् राधायाः समीपमिह [19]कुञ्जसदनं प्रविश विहरेति च सर्वत्र योजना ज्ञातव्या ॥६॥

पदद्योतनिका

नवेति । हे (कुचकलशतरलहारे) कुचकलशयोस्तरलश्चञ्चलः हारो मुक्ताहारो यस्यास्तत्सम्बुद्धिः । हे राधे ! इह क्रीडागृहे माधवसमीपं प्रविश विलस च । कीदृशे इह ? नवानि नूतनानि भवन्ति यानि अशोकदलानि पर्णानि तेषां शयनं तत्कृता शय्या [20]कृष्णशय्या तदेव सारो महाधनं यस्मिन् ॥६॥

---

1. नवभवदशोक–नि.सा. 2. पङ्क्तिरियं तृतीया–नि.सा. 3. इह विलस–ड. इयं पङ्क्तिस्सर्वेषु पदेषु द्वितीया दृश्यते–ड. 4. कीदृग्विशेषणं वा–ग. 5. नवभूते–इ. नवं नूत्नं–ह. 6. तन्निर्मिते शयने–इ. 7. तादृशम्–इ.फ.ग.ह.ज. 8. राधासम्बोधनं–इ.ग.ह. सम्बोधनं–फ.ज. 9. तः 14. पर्यन्तं नास्ति–फ.जः 10. तरलो मध्ये–ग. 11. नास्ति–अ.ब. 12. तादृशम्–इ.ग.ह. 13. सम्बोधनं –इ.ग.ह. 15. श्रीनन्दकुमारपक्षे–ग. 16. काकाक्ष–ग. 17. प्रविश नीत्वा हे माधव–अ.ब. 18. प्रकरणात्तु–फ.ज. 19. कुञ्जसदने–फ.ज. 20. कृष्णा शय्या–ल.म.

कुसुमचय[1]रचितशुचिवासगेहे
[2]प्रविश राधे माधवसमीपमिह ।
[3]विलस कुसुमसुकुमारदेहे ॥७॥

जयन्ती

नवभवदिति । नवं भवन्ति अशोकदलानि तेषां शयनमेव सारः उत्कर्षः तस्मिन् प्रविश । हे (कुचकलशतरलहारे) कुचकलशयोस्तरलश्चञ्चलः हारो यस्याः तत्सम्बोधनम् । विलस । ॥६॥

सञ्जीवनी

किञ्च कुसुमेति । कीदृशे [4]इह ? कुसुमचयेन पुष्पसमूहेन [5]रचितं कृतं शुचिः शृङ्गारस्तद्भोगाय वासगृहं शयनमन्दिरं यत्र । पुनः कीदृशे ? [6]विमलं यत् कुसुमं तद्वत्सुकुमारो देहो यस्याऽतिमृदुले । श्रीराधाविशेषणं वा । अन्यत्पूर्ववत् ।[7] "रः कामोत्पादके कम्पे [8]युद्धेऽधःकम्पने तथा" इत्यनेकार्थः[9] ॥७॥

पदद्योतनिका

कुसुमेति । हे (कुसुमसुकुमारदेहे) कुसुमवत्सुकुमारो देहो यस्यास्तत्सम्बुद्धिः । कीदृशे इह ? कुसुमचयेन पुष्पसमूहेन रचितं [10]कृतं शुचि अनुपहतं नायिकान्तरेणानुपभुक्तं यद्वासगृहं तत्र विलस । [11]श्रीकृष्णेन सह रतिक्रीडां कुर्विति भावः[12] ॥७॥

जयन्ती

कुसुमेति । कुसुमचयैः पुष्पगणैः रुचि रमणीयं शुचि प्रशस्तं निवासगेहं स्थितिगृहं तस्मिन् प्रविश । हे (कुसुमसुकुमारदेहे) कुसुमवत्सुकुमारः कष्टानर्हः देहः यस्याः तत्सम्बोधनम् । विलस ॥७॥

---

1. रुचिशुचिनिवासगेहे–इ. 2. पङ्क्तिरियं तृतीया–नि.सा. 3. इह विलस–ड. विमलकुसुम–अ.ब. 4. नास्ति–अ.ब. 5. विरचितं–अ.ब. 6. कुसुमवत् सुकुमारो देहो यस्यातिमृदुले–इ.फ.ग.ह.ज. 7. तः 9. पर्यन्तं नास्ति–अ.ब. 8. युद्धौघे–फ.ज. 10. नास्ति–ड. 11. तः 12. पर्यन्तं नास्ति–ड.ल.म.

[1]चलमलयपवनसुरभिशीते
प्रविश राधे माधवसमीपमिह ।
[2]विलस [3]रतिवलितललितगीते ॥८॥

सञ्जीवनी

एवमनभिगच्छन्तीं प्रत्याह—(चलेति ।) किञ्च कीदृशे इह? चलः सञ्चारी यो मलयपवन[4]श्चन्दनवायुस्तेन सुरभौ [5]सुगन्धे [6]शीते च। शीतमन्द-सुगन्धिसेविते [7]इत्यर्थः। पुनः कीदृशे? रतौ [8]सुरते वलितं कृतं ललितं मनोहरं गीतं यत्र। राधासम्बोधनं वा। ललितलक्षणम्—

"नानाविध[9]मनाहार्यं स्वभावजमनोहरम् ।
शृङ्गारचेष्टितं स्त्रीणां ललितं सम्प्रचक्षते" ॥ इति ।

कृष्णपक्षे सर्वं पूर्ववत् ॥८॥

पदद्योतनिका

चलेति। हे (वलितललितगीते) वलितं कृतं ललितं मनोहरं गीतं [10]यस्यास्तत्सम्बुद्धिः। कीदृशे इह? चलो यो [11]मलयपवनस्तेन सम्पर्कवशात्सुरभि, एवम्भूतं सत् शीतं शीतलं तस्मिन् ॥८॥

जयन्ती

चलेति। चलः मन्दसञ्चारः स चासौ मलयपवनः दक्षिणवायुः तेन सुरभि च तत् शीतलञ्च तस्मिन्। शैत्यमान्द्यसौरभ्यविशिष्टवायुशालिनीत्यर्थः। प्रविश। वलिततया चलितं कम्पितयुक्तं कलं अव्यक्तमधुरं ललितगीतं मङ्गल-गीतं यस्याः तत्सम्बोधनम्। विलस ॥८॥

1. मृदुचल–नि.सा. 2. इह विलस–ड. 3. मदनशरनिकरभीते–नि. सा. चलितकलललितगीते–इ. रसवलितललितगीते–ड. 4. वायुः–ग. 5. सुगन्धे शीते चन्दनमिश्रवायुसुगन्धसेविते इत्यर्थः–फ.ज. 6,7. नास्ति–अ.ब. 8. सुरतौ –इ.फ.ग.ह.ज. 9. मनाहार्ये–अ.ब. मनोहार्यं–ह. 10. यया–क. 11. मलय-जपवनः–क.ल.म.

विततबहुवल्लिनवपल्लवघने
प्रविश राधे माधवसमीपमिह ।
[1]विलस [2]सुचिरमलसपीनजघने ॥९॥
मधुमुदितमधुपकुल[3]कलितरावे
प्रविश राधे माधवसमीपमिह ।
[4]विलस मदनरस[5]रभसभावे ॥१०॥

सञ्जीवनी

किञ्च वितततेति । सुचिरं बहुकालं विलसेति सम्बन्धः । पुनः कीदृशे इह ? वितते [6]विस्तीर्णे [7]बहुवल्लीनां नानालतानां [8]नवपल्लवैर्घने निबिडे । अलसे सालसे पीने स्थूले जघने यस्यास्तत्सम्बोधनम् । शयनविशेषणं वा । हे माधवेत्यादि पूर्ववत् । "वलितं सरसं प्रोक्तं वलितं चेष्टितं तथा" इति मेदिनीकारः ॥९॥

किञ्च मध्विति । कीदृशे इह ? मधुना वसन्तेन पुष्परसेन वा [9]मुदितानि मधुपकुलानि भ्रमरसमूहास्तैः कलितो विरचितो रावः शब्दो यत्र तादृशे । पुनः कीदृशे ? मदनस्य कामस्य यो रसः शृङ्गारस्तत्र यो रभस [10]उत्साहस्तेनोपलक्षितो [11]भावोऽभिप्रायो यस्मिन्; सम्बोधनं वा । अन्यत्पूर्ववत् ॥१०॥

पदद्योतनिका

वितततेति । हे (चिरमिलितपीनजघने) [12]चिरमिलितेन [13]बहुकालसमागमान्योन्यसम्बन्धेन पीनं मासलं जघनं यस्यास्तत्सम्बुद्धिः । कीदृशे इह ? [14]वितता इतस्ततो विस्तीर्णा बहुपल्लववल्ल्यस्तासां नवाः पल्लवाः तैर्घने निबिडे । शयन इत्यध्याहारः ॥९॥

---

1. इह विलस–ड. 2. चिरमलस–नि.सा. अलसपीनजघने–इ. चिरमिलित–ड. 3. जनितललितरावे–इ. 4. इह विलस–ड. 5. समरसभावे–इ. रभसरसभावे–ड. 6. विस्तीर्णैर्विततैर्बहुवल्लीनां–अ. 7. बहुलवल्लीनां–ग. 8. पल्लवैः–अ.ब.ह. 9. मुदिता ये मधुपकुला भ्रमरसमूहाः–अ.ब. 10, 11. नास्ति–अ.ब. 12. चिरमिलिते बहुकालमन्योन्यसम्बन्धे पीने मांसले जघने यस्यास्तत्सम्बुद्धिः–क.ल.म. 13. बहुकालसामान्योन्य–ड. 14. नास्ति–ड.

[1]मधुरतरपिकनिकरनिनदमुखरे
प्रविश राधे माधवसमीपमिह ।
[2]विलस [3]दशनरुचिरुचिरशिखरे ॥११॥

मध्विति । हे (मदनरभसरसभावे) मदनस्य कामस्य रभस [4]आवेगस्तस्य [5]रसभावः शृङ्गारभावोऽभिप्रायो यस्यास्तत्सम्बुद्धिः । कीदृशे इह ? मधुनि पुष्परसे मुदितानि [6]तत्पानार्थं हर्षयुक्तानि [7]यानि मधुपकुलानि भ्रमरसमूहास्तैः कलितः कृतो रावः शब्दः यस्मिन् ॥१०॥

जयन्ती

विहितेति । विहितः रचितः बहुवल्लीनां नवपल्लवैः घनः तस्मिन् वने प्रविश । अलसं गतिमान्द्यकरं पीनं जघनं यस्यास्तत्सम्बोधनम् । चिरं विलस ॥९॥

मध्विति । मधुना वसन्तेन मुदिताः मधुपाः भ्रमराः तेषां कुलेन जनितः उत्पादितः ललितः मधुरः रावो यस्यास्तत्सम्बोधनम् । प्रविश राधे । मदनरसेन कामानुरागेण समरसभावः एकीभावः यस्यास्तत्सम्बोधनम् । विलस ॥१०॥

सञ्जीवनी

किञ्च मधुरेति । कीदृशे इह ? (मधुरतरपिकनिकरनिनदमुखरे) [8]मधुरतरोऽतिशयेन मधुरो यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दः तेन मुखरे वाचाले । श्रीवृषभानुजासम्बोधनञ्च । दशना दन्तास्तद्रुचिवत् रुचिरं मनोहरं माणिक्यं [9]दाडिमीबीजाभं तादृशी दन्तकान्तिर्यस्यास्तत्सम्बोधनम् । "[10]पक्वदाडिमबीजाभ माणिक्यं शिखरं विदुः" इति [11]शाश्वतः ॥११॥

पदद्योतनिका

मधुतरलेति । हे (दशनरुचिरुचिरशिखरे) दशन[12]रुचिरेव दन्त-[13]दीप्तिरेव रुचिरं शिखरं माणिक्यविशेषो यस्यास्तत्सम्बुद्धिः । कीदृशे इह ? मधुना पुष्परसेन तरलश्चञ्चलः पिकनिकरः कोकिल[14]वृन्दस्तस्य निनदेन

1. मधुतरपिक–फ.ग.ज. मधुतरलपिक–इ.ड. 2. इह विलस–ड. 3. दशनरुचिरशिखरे–इ. 4. वेगः–ग. 5. सरसभावः–ड.ल.म. 6. तस्यास्ते–क. 7. नास्ति–ड. 8. मधुतरो–फ.ग.ज. 9. दाडिमबीजाभं–इ. 10. पक्वदाडिम–फ.ह.ज. 11. शाश्वते नास्ति "शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु । पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च" (विश्वः १०१.१०४) 12. रुचिरिव–क. 13. दीप्तिरिव–क. 14. समूहः–क.ल.म.

विहितपद्मावतीसुखसमाजे
[1]प्रविश राधे मङ्गलशतानि ।
भणति जयदेव[2]कविराजराजे ॥१२॥

[3]शब्देन मुखरे शब्दान्विते । "पक्व[4]दाडिमबीजाभं माणिक्यं शिखरं विदुः" (इति) ॥११॥

जयन्ती

मधुतरलेति । मधुः वसन्तः तस्मिन् तरलाः सञ्चारशीलाः पिकानां निकराः तेषां निनदैः मुखरे नादिते । प्रविश । दशनानां रुचिराणि शिखराणि अग्राणि यस्यास्तत्सम्बोधनम् । विलस ॥११॥

सञ्जीवनी

गीतोक्तां लीलां मङ्गलत्वेन निरूपयति–विहितेति । हे राधे ! [5]जयदेवकविराजराजे [6]कविनृपनृपे [7]श्रोतॄणां पाठकानाञ्च मङ्गलशतानि भणति सति कुरु; श्रीकृष्णं प्रति गमनमिति शेषः । अथ वा हे मुरारे हे कृष्ण त्वं जयदेवकविराजराजे भणति सति श्रोतॄणां पाठकानाञ्च मङ्गलशतानि कुरु । कीदृशे ? विहितः [8]कृतः [9]पद्मावत्याः [10]सुखस्य समाजः समूहो यत्र तादृशे । अनेन स्वनायिकायां प्रेमातिशयः न त्वन्यस्यामिति भावः ॥१२॥

[11]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां एकविंशः प्रबन्धः ।

पदद्योतनिका

विहितेति । हे मुरारे कृष्ण त्वं जयदेवकविराजे मङ्गलशतानि कुरु । कीदृशे जयदेवकविराजे ? विहितः कृतः पद्मावत्याः स्वस्त्रियः सुखस्य समाजः समूहो येन । मुखसमाज इति पाठे मुखस्य [12]समाजः सन्निध्यं येन तस्मिन् । एतेन स्वनायिकायामेव प्रेमातिशयो दर्शितः । न त्वन्यस्याम् । पुनः कीदृशे ? भणति । तव गुणान् वदति[13] ॥१२॥

1. कुरु मुरारे–अ.ब.ड. 2. कविराजे–अ. 3. शब्देनान्विते युक्ते–क. 4. दाडिम्ब–क. 5. जयदेवकविराजराजे भणति सति श्रोतॄणां पाठकानाञ्च कविनृपे मङ्गलशतानि–अ.ब. 6. नृपनृपे–ग. 7. नास्ति–इ. 8. कृतः पद्मावत्याः सुखसमाजः सुखसमूहो–ग. 9, 10. नास्ति–अ.ब. 11. नास्तीयं पुष्पिका–अ.ब. इ.फ.ग.ह.ज. 12. नास्ति–क.ल.म.. 13. क्वचित्प्रविश राधे माधवसमीपमिह भणतीति पाठः । अयं भागो नास्ति–ड.

द्वाविंशः प्रबन्धः

त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः
कन्दर्पेण [1]तु पातुमिच्छति सुधासम्बाधबिम्बाधरम् ।
[2]अस्याङ्कं तदलङ्कुरु क्षणमिह भ्रूक्षेपलक्ष्मी[3]लव–
क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः ॥१॥

(इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां एकविंशः प्रबन्धः ।)

जयन्ती

विहितेति । हे मुरारे त्वं विहितः कृतः पद्मावत्यै सुखसमाजः आनन्दसन्तानं येन तस्मिन् । जयदेव इति कविराजे कविश्रेष्ठे भणति सङ्कीर्तयति सति मङ्गलशतानि अनेकमङ्गलानि कुरु । मङ्गलशतानि भिन्नपदत्वान् मध्यमणिन्यायेन भणतीत्यत्राप्यनुषञ्जनीयम् ॥१२॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकविंशः प्रबन्धः ।

सञ्जीवनी

एवमप्यप्रसन्नां पुनः [4]प्रसादयन्त्याह—त्वामित्यादिना । [5]हे सखि अन्यव्रजवधूजन[6]दुरापोऽयं [7]कृष्णस्तवैव सुलभः । तव सुधयाऽमृतेन सम्बाधं सान्द्रं बिम्बाधरं पातुं पानं कर्तुमिच्छति । कीदृशः ? त्वां चित्तेन मनसा चिरं सर्वदा वहन्नतिश्रान्तोऽतिशयश्रमयुक्तः । किन्तु कन्दर्पेण [8]कामाग्निना च भृशमतिशयेन तापितो दग्धः । अन्योऽपि भाराक्रान्तो [9]मधुरपानादिना [10]स्वामिन्या च जीव्यत इति भावः । तत्तस्मादेवमनुरक्तस्यास्य कृष्णस्याङ्कमुत्सङ्गं क्षणं [11]क्षणमात्रं अलङ्कुरु [12]भूषय । बहुवल्लभोऽयं कृष्ण इति मत्वा [13]इह [14]अस्मिन् कृष्णे कुतः सम्भ्रमः सन्देहः । तत्र हेतुः । [15]कीदृशे ? दास इव

---

1. च-नि.सा. ड.इ. 2. अस्याङ्गं–अ. 3. नव–ड. 4. प्रसादयन् प्रत्याह–ग. 5. हे सखि राधे–फ.ज. 6. दुरापोऽप्ययं–फ.ग.ह.ज. 7. श्रीनन्दकुमारः–ग. 8. कामेन च–ग. 9. यथा मधुरपानादिना जीवत इति भावः–ग. 10. नास्ति–अ.ब. 11. क्षणमाण–अ.ब. 12. भूषणं कुरु–अ.ब. 13. नास्ति–अ.ब. 14. नास्ति–अ.ब. 15. नास्ति–इ.फ.ग.ह.ज.

सेवके । पुनः कीदृशे ? भ्रूक्षेपः कटाक्षपातो मदीयोऽयमिति [1]विलोकनं तस्य या लक्ष्मीः शोभा [2]तदेव धनं तस्य यो [3]लवः अल्पमूल्यं[4] [5]नेत्रकोणनिरीक्षणं तेन [6]क्रीते गृहीते । पुनः कीदृशे ? तवै[7]वोपसेवितं पदाम्भोजं चरणकमलं येन ॥१॥

पदद्योतनिका

त्वां चित्तेनेति । हे राधे अयं कृष्णस्तव सुधयाऽमृतेन [8]सम्बाधं गहनं विम्बाधरं पातुमिच्छति । कीदृशः [9]कृष्णः ? [10]यतश्चित्तेन मनसा त्वां चिरं वहन् अतिश्रान्तः [11]यतः कन्दर्पेण भृशं तापितः । अन्योऽपि भारवाही सूर्यतापितश्च जलानि पातुमिच्छति तद्वदित्यर्थः । [12]तत्तस्मादस्य कृष्णस्याङ्कं क्रोडं क्षणं मुहूर्तमात्रं अलङ्कुरु भूषय। तत्समीपं गन्तुं [13]विभेमीत्युक्तौ तत्राह । [14]इह कृष्णे सम्भ्रमो भयं कुतः । कीदृशे[15]इह ? [16]दासवत् सेवकवत् स्थिते । पुनः [17]कीदृशे ? भ्रूक्षेपः [18]कटाक्षक्षेपः स एव लक्ष्मीः सम्पत् द्रव्यं तेन विक्रीते नूतनक्रीते। दासोऽतिभीतो भवतीति भावः। अत एवोपसेवितं पदाम्भोजं चरणकमलं येन ॥१॥

जयन्ती

त्वामिति । हे राधे इति शेषः । अयं कृष्णः चित्तेन त्वां चिरं वहन् ध्यायन्नित्यर्थः अतिश्रान्तः । वहन्नित्यस्य पृष्ठादिना वहन् (इति तस्य) श्रमजनकत्वम्। पृष्ठमस्तकादेर्बहिरङ्गत्वात् दृढत्वम्। चित्तस्य त्वन्तरङ्गत्वाच्छ्रमाधिक्यं व्यज्यते । कन्दर्पेण मदनेन भृशं तापितः सन् सुधायाः सम्बाधः सम्मर्दः समुदाय इति यावत्, यस्मिन् स चासौ बिम्बाधरः विम्बफलोपमाधरः तं पातुमिच्छति । अत्र कन्दर्पस्य तापनक्रियायामनन्वयादनलत्वेनारोपपर्यवसायित्वेन परिणामालङ्कारः । यद्यपि परिणामः क्रियार्थवद्विषयी विषयात्मनेति लक्षणेनाप्रस्तुतस्य प्रस्तुतक्रियाकारित्वं विद्यानाथादिभिरुदाहृतमिति । तत् तस्मात्कारणात् । त्वदर्थश्रान्तत्वादिति भावः । अस्य केशवस्य अङ्गं अलङ्कुरु शोभय । अधरसु-

---

1. मदीयोऽयमित्यवलोकनं–ग. 2. तः 4. पर्यन्तं नास्ति–अ.ब. 3. लवश्चाल्पमूल्यं यो नेत्रकोणनिरीक्षणं तं न कृते–इ. 5. नेत्रकोणं–फ.ज. 6. नास्ति–ग. 7. तवैव सेवितं–अ.ब. 8. सम्वाध्यं व्याप्तं–क. 9. नास्ति–ड. 10. यतचित्तेन–क. 11. अतः–क. 12. ततस्तस्मात्–क. 13. विभेमीत्यत आह–ड.क. 14. नास्ति–ल. 15. नास्ति–ड. 16. दासवत् स्थिते–ड. 17. नास्ति–ल. 18. नास्ति–ड.

सा [1]ससाध्वसं सानन्दं गोविन्दे लोललोचना ।
सिञ्जाना मञ्जुमञ्जीरं [2]प्रविवेश निवेशनम् ।।२।।

धापानेन सत्कारक्षणं कुरु । लोके श्रान्तानां वासोदानादिना सत्कारकरणं दृष्टं, तथा कुरु । भ्रुवोः क्षेपः चमत्कारविक्षेपः तस्य लक्ष्मीः शोभा लीलेति यावत् । तस्याः लवेन लेशेन क्रीते वशीकृते । अत एव दास इव उपसेवितं संवाहितं नमस्कृतं पदाम्भोजं येन तस्मिन् । इह कृष्णे सम्भ्रमः । अवश्यमङ्गीकार्यं इति भावः । अत्र लवक्रीतत्वरूपपदार्थहेतुककाव्यलिङ्गालङ्कारेण दासत्वोपमा सिद्धचतीति तयोरङ्गाङ्गीभावेन सङ्करः । सा चोपमा उपसेवितत्वरूपसाधारणधर्मस्य इवशब्दस्य चतुर्णामुपादानात्पूर्णा ।।१।।

सञ्जीवनी

एवमनुनयसन्तुष्टा निकुञ्जं प्रविवेशेत्याह—सेति । सा राधा निवेशनं केलिमन्दिरं प्रविवेश । किं कुर्वती ? मञ्जु[3]मञ्जीरं मनोहरनूपुरं सिञ्जाना वादयन्ती । [4]अतिसात्त्विककम्पेन चरणस्खलनं कुर्वतीति[5] ससाध्वसं सुरतभयसहितं [6]सानन्दमानन्दसहितं यथा स्यात्तथा । कीदृशी ? गोविन्दे लोले चञ्चले लोचने [7]नेत्रे यस्याः । सिञ्जानेति सात्त्विकम् । कम्पेन चरणस्खलनम् । साध्व[8]सहर्षेति व्यभिचारिभावः । लोललोचनेति [9]रसानुभावः कटाक्षः । एतेन [10]शृङ्गाररसः साङ्गस्तयोर्मिलने सञ्जात इति [11]निरूपितम् ।।२।।

पदद्योतनिका

सा ससाध्वसेति । सा राधा [12]निवेशनं [13]लतागृहं विवेश [14]विशति (स्म)[15]सखीवचनात् इति शेषः[16] । कीदृशी राधा ? [17]ससाध्वसं रतिविदग्धः कृष्णः कथं मया रञ्जनीय इति सभयं सानन्दं [18]हर्षविषादयोरुत्पादात् गोविन्दे कृष्णे लोललोचना चञ्चलनयना सलज्जत्वात् । पुनः कीदृशी ? मनोहरशब्द[19]युक्तं मञ्जीरं नूपुरं सिञ्जाना [20]गमनवशात्सशब्दं कुर्वती ।

---

1. ससाध्वससानन्दं–नि.सा. ससाध्वससानन्दे–अ. 2. प्रविवेशाभिवेशशनम्–नि.सा. 3. मञ्जीरं नूपुरं–अ.व. 4. तः 5. पर्यन्तं नास्ति–अ.व.इ.ग.ह. 6. नास्ति–अ.ब. 7. नास्ति–अ.ब.फ.ग.ह.ज. 8. हर्षौ व्यभिचारिभावौ–इ.फ.ग. ह.ज. 9. रसानुभवः–अ.व. 10. शृङ्गाररसनाङ्गस्तयोर्मितत्वे सिञ्जानेति–अ. 11. रूपितः–फ.ग. 12. नास्ति–ड. 13. इति स्थानं–फ. 14. नास्ति–ड. 15. तः 16. पर्यन्तं नास्ति–क. 17. साध्वसं–ड. 18. सहर्षं चरति नैकट्यात्–ल.म. सहर्षं चरति–क. 19. युक्तमञ्जीरं–ड. 20. गमनवशाच्छब्दवती–क.

वराडीरागे [1]रूपकताले

राधावदनविलोकनविकसितविविधविकारविभङ्गम् ।
जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम् ॥३॥
हरिमेकरसं चिरमभिलषितविलासम् ।
सा ददर्श गुरुहर्षवशंवदवदनमनङ्ग[2]विकाशम् ॥ध्रुवपदम्॥

क्वचित् [3]ससाध्वससानन्दगोविन्देति पाठस्तदा ससाध्वसः पूर्वापराधात् सानन्दो राधाया आगमनात् ॥२॥

जयन्ती

अष्टपदीसङ्गतिमाह—सेति। साध्वसेन सहितश्चासौ सानन्दः तस्मिन्। भयानन्दयुक्ते गोविन्दे लोले आसक्ते लोचने यस्याः सा। सा राधा निवेशनं कुञ्जगृहं सिञ्जानौ नदन्तौ मञ्जू मनोहरौ मञ्जीरौ यस्मिन् कर्मणि तथा प्रविवेश। सहेलं सङ्केतस्थानं अवाप ॥२॥

सञ्जीवनी

रागतालध्रुवपदानि पूर्ववत्। एवं निकुञ्जमन्दिरे प्रवेश्य तां सम्प्रति हरिदर्शन[4]महोत्सवमाह—राधेति। सा राधा हरिं ददर्श। कीदृशम्? राधावदनचन्द्रविलोकनेन विकसिता ये [5]नानाविधा विकारा [6]जृम्भाङ्गविमर्दनाद्यास्त एव विशिष्टोर्मयो यत्र [7]तम्। कमिव? जलनिधिमिव सुमुद्रमिव। कीदृशं जलनिधिम्? विधुमण्डलदर्शनेन चन्द्रमण्डलावलोकनेन तरलिताश्चञ्चलीकृतास्तुङ्गा [8]अत्युच्चास्तरङ्गा ऊर्मयो यत्र तम्। अत्रागाधशृङ्गाररसत्वेन जलनिधिसाम्यम्। श्रीराधामुखस्य चन्द्रसाम्यम्। [9]जृम्भाङ्गसम्मर्दादीनां तरङ्गसाम्यम्। कीदृशम्? एकः शृङ्गाराख्यो रसः [10]अनुरागो यस्य तम्। [11]यद्वा एकस्यां [12]राधायां रसोऽनुरागो यस्य नान्यासु [13]तम्। कीदृशम्?

1. यतितालाभ्याम्–नि.सा. 2. निवासम्–नि.सा. 3. ससाध्वसः सानन्दे गोविन्देति–क. ससाध्वसं सानन्दे गोविन्दे इति–ल.म. 4. महोत्सवानाह–इ.फ.ग.ह.ज. 5. नानाविकाराः–इ.फ.ज. 6. जृम्भान्त–अ.ब. 7. नास्ति–अ.ब.ग. 8. नास्ति–अ.ब. 9. जृम्भान्तासम्मर्दादीनां–अ.ब. जृम्भाङ्गमर्दनादीनां–ग. जृम्भाङ्गमर्दादीनां–इ.फ.ह.ज. 10, 11. नास्ति–अ.ब. 12. श्रीवृषभानुसुतायां–ग. 13. नास्ति–अ.ब.

[1]चिरं बहुकालं अभिलषितो वाञ्छितो विलासः केलिर्येन तम्। [2]अथ वा चिरमभिलषितः प्रार्थितो विलासो राधा[3]सम्बन्धिनी क्रीडा येन तम्। कीदृशम्? गुरुर्महान् यः प्रिया[4]प्राप्तौ हर्ष आनन्दस्तस्य वशंवदमधीनं वक्त्रं यस्य तम्। पुनः कीदृशम्? अनङ्गविकाशम् काममन्दिरं मन्मथकोटिप्रकाशमित्यर्थः ॥३॥

पदद्योतनिका

वराडीरागः। राधेति। सा राधा एवम्भूतं हरिं ददर्श। सप्तपद्यां सर्वाणि हरिविशेषणानि। कीदृशम्? राधावदनविलोकनेन विकसितः प्रकाशितो विविधो नानाप्रकारो विकार[5]विभङ्गः कटाक्षादिरचना येन। पुनः [6]कीदृशम्? जलनिधिमिव समुद्रमिव स्थितम्। कीदृशं जलनिधिम्? विधुमण्डलदर्शनेन [7]चन्द्रमण्डलालोकनेन तरलिताश्चञ्चलीकृतास्तुङ्गा महान्तस्तरङ्गाः कल्लोला यस्य। पुनः [8]कीदृशम्? एकरसं एकस्यां राधायामेव रसः प्रीतिर्यस्य। पुनः [9]कीदृशम्? चिरं बहुकालं अभिलषितः प्रार्थितः विलासः केलि[10]र्येन। पुनः [11]कीदृशम्? गुरुहर्षस्य वशवदमधीनं वदनं मुखं यस्य, सानन्दमुखमित्यर्थः। [12]पुनः [13]कीदृशम्? अनङ्गस्य कामस्य निवासं स्थानभूतं, कन्दर्पकोटिलावण्यमित्यर्थः[14] ॥३॥

जयन्ती

राधेति। राधायाः वदनविलोकनेन मुखालोकनेन विकसिताः प्रकटिताः विविधाः नानाप्रकाराः विकाराः शरीरमनसः तेषां विभङ्गाः संवेशनिवेशतया निष्पत्तिः यस्य तम्। भङ्गशब्दो विलासपरत्वेन कविभिरादृतः। "वृथा भवेत्कुङ्कुमपत्रभङ्ग" इत्यादौ हर्षातिशयेन प्रहसिततया उत्फुल्लगण्डमिति भावः। विधुमण्डलस्य चन्द्रबिम्बस्य दर्शनेन तरलिता उच्चलिताः तुङ्गाः उन्नताः तरङ्गाः ऊर्मयः यस्मिन् तम्। जलनिधिमिव समुद्रमिव ददृशे इत्यन्वयः। अत्र उपमेयस्य राधामुखावलोकनसञ्जातहर्षजन्यविलासविशिष्टस्य साम्यत्वसिद्धयर्थं उपमाने विधुमण्डलादिविशेषणं दत्तमिति कल्पितोपमा। तल्लक्षणन्तु—

यावद्विशेषणैर्युक्तमुपमेयं भवेद्यदि।
उपमाने तावदेव सोपमा कल्पितोपमा ॥

---

1. नास्ति–ग. 2. नास्ति–अ.ब. यद्वा–ग. 3. सम्बन्धी–अ.ब.इ.फ.ह. सम्बन्धा–ग. 4. प्राप्त्या–इ.फ.ग.ह.ज. 5. भङ्गः–क. 6. नास्ति–ड. 7. चन्द्रमण्डलावलोकनेन–क. 8, 9. नास्ति–ड. 10. येन तम्–क.ल.म. 11. नास्ति–ड. 12. तः 14. पर्यन्तं नास्ति–क. 13. नास्ति–ड.

[1]हारममलतरतारमुरसि दधतं परिरभ्य विदूरम् ।
स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम् ॥४॥

विम्वप्रतिविम्वभावेन राधावदनस्य चन्द्रस्य च विकसितविलासानां तरलित-तरङ्गाणां च ऐक्यात्सादृश्यनिष्पत्तिरिति पूर्णोपमा । इवेन नित्यसमासो विभक्त्य-लोपश्चेति सूत्रे विधुमिवेत्येकसमासत्वे समासगता शाब्दी ॥३॥

(ध्रुवाव्याख्यानम्) हरिमिति । सा राधा एक एव रसो भावो यस्य तम् । अभिलषिताः काङ्क्षिताः विलासानां विनोदानां विकासाः स्फुटीभावाः यस्य तम् । गुरुः महांश्चासौ हर्षः सन्तोषः तस्य वशंवदं स्वाधीनतां वदतीति वशंवदं वदनं यस्य तम् । अनङ्गस्य निकाशं सदृश हरिं चिरं ददृशे ददर्श ॥

सञ्जीवनी

(हारेति) पुनः कीदृशम् ? विदूरमतिशयेन परिरभ्यालिङ्ग्योरसि वक्षसि हारं दधतं [2]विभ्राणम् । कीदृशं हारम् ? विमलतरस्तारोऽतिविमलं मौक्तिकं यत्र [3]तम् । [4]कमिव ? स्फुटतरः [5]प्रकाशबहुलः यः फेनकदम्वः फेनसमूहास्तेन करम्वितं मिश्रितं यमुना[6]जलपूर प्रवाहमिव । अत्र [7]कृष्णद्युतेः कल्लोलत्वेन यमुनायाः साम्यम् । हारस्यातिविमलत्वेन फेनसाम्यम् ॥४॥

पदद्योतनिका

हारमिति । [8]पुनः [9]कीदृशम् ? विदूरं अतिशयेन परिरभ्य [10]आलिङ्ग्य उरसि हारं [11]मुक्ताहारं [12]दधतं धारयन्तम् । कीदृशं हारम् ? अमलतरं [13]अतिशयेन निर्मलं तारं स्वस्वरूपं यस्य । पुनः [14]कीदृशम् ? [15]यमुनाजल-पूरमिव [16]यमुनाजलप्रवाहमिव स्थितम् । कीदृशं [17]यमुनाजलपूरम् ? [18]स्फुट-तरमतिशयेन व्यक्तं फेनकदम्बं फेनसमूहस्तेन करम्वितं [19]मिश्रितम् ॥४॥

जयन्ती

हारमिति । अमलतरः स्वच्छः त्रासादिदोषरहितः तारः उच्चः तरलः मध्यमणिर्यस्मिन् तं हारं मुक्तामालां उरसि वक्षसि दधतं अविदूरं समीपे ।

---

1. हारममलतरतारतरलमुरसि दधन्तमविदूरम्–च. 2. विभ्रतम्–ग. 3. तत्–अ.व. 4. किमिव–अ.व.इ. 5. प्रकाशबाहुल्यो यः–ग. 6. जले–फ.ज. 7. श्रीनन्दकुमारद्युतेः–ग. 8. नास्ति–ड. 9. नास्ति–ड.क. 10. नास्ति–ड. 11. नास्ति–क. 12. नास्ति–क.ल.म. 13. अतिशयनिर्मलं–ड. 14. नास्ति–ड. 15. नास्ति–क. 16. प्रवाहमिव–ड. 17. नास्ति–ड. 18. स्फुटतर-फेनसमूहः–ड. 19. मिश्रम्–क.

श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम् ।
नीलनलिनमिव पीतपरागपटलभरवलयितमूलम् ॥५॥

स्फुटतरः फेनानां कदम्बः समूहः तेन करम्बितं युक्तं वलयितमिति यावत् । यमुनायाः जलपूरं अम्बुसमुदायं ओघमिति यावत् । तमिव । अत्रापि बिम्बप्रतिबिम्बभावेन मुक्ताहारफेनकदम्बयोरैक्यात् सामान्यधर्मार्थविशेषकल्पनाकल्पितोपमा । इवशब्दस्य पृथग्गतत्वाद्वाक्यगा ॥४॥

सञ्जीवनी

(श्यामेति ।) पुनः कीदृशं हरिम् ? श्यामलं नीलं मृदुलं कोमलं शरीरमण्डलं शरीरस्य प्रत्यङ्गं यस्य तम् । कीदृशम् ? अधिगतं परिवृतं प्रियाङ्गसादृश्याद्गौरदुकूलं पीताम्बरं [1]येन । कमिव ? पीतपरागानां गौरपुष्परेणूनां पटलभरः समूहातिशयः तेन वलयितं वेष्टितं मूलं यस्य तादृशं नीलकमलमिव । अत्र श्रीकृष्णस्य [2]श्यामलत्वेन परागसमूहस्य पीतेनान्तर्बहिर्मूले परागावृतत्वादभूतोपमैव ॥५॥

पदद्योतनिका

श्यामलमिति । [3]पुनः [4]कीदृशम् ? श्यामलं कृष्णं मृदुलं मनोहरं कलेवरमण्डलं शरीरावयवो हस्तादिर्यस्य । अधिगतं [5]परिधृतं गौरदुकूलं पीताम्वरं येन । [6]पुनः कीदृशम् ? नीलनलिनमिव[7] नीलोत्पलमिव स्थितम् । कीदृशं [8]नीलनलिनम् ? पीतपरागाणां गौरकुसुमरेणूनां पटलभरः समूहातिशयः तेन वलयितं वेष्टितं मूलं यस्य ॥५॥

जयन्ती

श्यामलेति । श्यामलं मृदुलं सुकुमारं कलेवरमण्डलं शरीरम्, कलेवरशब्दस्य अवयवपरत्वं वा, यस्य तम् । अधिगतं परिधानितं गौरं पीतं दुकूलं अम्वरं यस्य तं हरिम् । कलेवरमण्डलं वा विशेष्यम्, तमेव ददृशे इत्यन्वयात् । तदा श्यामलं मृदुलं च तत्कलेवरमिति कर्मधारयः । पीतः परागस्य कुसुमरजसः पटलस्य समुदायस्य भरः तेन वलयितं वेष्टितं मूलं वृन्तं यस्य तम् । नीलनलिनं नीलोत्पलमिव । अत्रापि सैवोपमा । अधिगतवलयितशब्दाभ्यामेक एवार्थः भिन्नतया उक्तः इति वस्तुप्रतिवस्तुभावत्वयुक्तविम्बप्रतिविम्बभावेन धर्म उक्तः ॥५॥

---

1. येन तम्–ग. 2. श्यामत्वेन–इ.फ.ग.ह.ज. 3, 4. नास्ति–ड. 5. परिधानीकृतं–क. 6. तः 7. पर्यन्तं नास्ति–क. 8. नास्ति–ड. नलिनम्–क.

तरलदृगञ्चल[1]वलनमनोहरवदनजनितरतिरागम् ॥
स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम् ॥६॥

सञ्जीवनी

(तरलेति ।) कीदृशं हरिम् ? तरलानां चञ्चलानां कटाक्षाणां चलनेन मनोहरं यद्वदनं तेन जनितो रतिरागः सुरतानुरागो येन तम्, अर्थाद्राधायाः । एतेन दर्शनसौख्यस्य परा काष्ठा दर्शिता । कीदृशम् ? स्फुटानां विकसितानां कमलानामुदरे मध्यं खेलितानि क्रीडायुक्तानि खञ्जनयुगानि [2]चञ्चरीटपक्षि-युगलानि यत्र तादृशम् । शरदि शरत्काले तडागमिव सरोवरं [3]यथा स्यात्तथा श्रीकृष्णः श्रीराधादर्शनेन भातीत्यर्थः । अत्रेयं व्यवस्था—तडागस्थानीयः श्रीकृष्णः, विकसितकमलस्थानीये तस्य नेत्रे, कमलोदरस्थानीयं नेत्रयोर्मध्यभागम्, खेलित-खञ्जनस्थानीये तन्नेत्रगोलके, शरत्स्थानीया श्रीराधेति यथावद्योग्यमुन्नेयम् । श्रीराधाशरत्प्राकट्येन श्रीकृष्णचन्द्रस्य [4]विकासो जात इति ध्वनिः ॥६॥

पदद्योतनिका

तरलेति । [5]पुनः [6]कीदृशम् ? तरलस्य चञ्चलस्य कटाक्षस्य चलनेन मनोहरं यद्वदनं मुखं तेन जनित उत्पादितो [7]रतौ रागः प्रीतिर्येन, [8]राधायाः [9]इति शेषः, तम्[10] । पुनः [11]कीदृशम् ? शरदि शरत्काले तडागमिव जलाशयमिव स्थितम् । कीदृशं [12]तडागम् ? स्फुटस्य विकसितस्य कमलस्योदरे मध्ये खेलितं क्रीडितं खञ्जनयुगं यस्मिन्, शरदि खञ्जरीटः पद्मे खेलति । तच्च [13]सकृद्दर्शने शकुनं राज्यादिप्रदञ्चेति ॥६॥

जयन्ती

तरलेति । तरलयोर्दृगञ्चलयोः नेत्रप्रान्तयोः वलनेन भ्रमणेन मनोहरं च तत् वदनं तेन जनितः रतिरागः सुरतासक्तिः येन तम् । एतत्कटाक्षावलोकन-वशीकृताः स्वयमेव रत्यासक्ताः युवतयो भवन्तीति भावः । स्फुटं विकसितं कमलं तस्य उदरः तस्मिन् खेलितं क्रीडा ययोस्तौ च तौ खञ्जनौ क्रीडन्ता-वित्यर्थः । तयोः युगं द्वन्द्वं यस्मिन् तम् । शरदि शरत्काले तडागं कासारमिव हरिं ददृशे । अत्र कल्पितोपमा । बिम्बप्रतिबिम्बभावमात्रेण साधारणधर्मो निर्दिष्टः इति कल्पितोपमा । स्वतस्सिद्धविशेषणत्वायोगान्नोत्प्रेक्षालङ्कारः ॥६॥

---

1. चलन्–नि.सा.ड. वलय–अ.ब. 2. खञ्जरीट–ह. 3. यथा भवति तथा–इ.फ.ग.ह.ज. 4. विकाशश्चोपात्तः–अ.व. 5, 6. नास्ति–ड. 7. रतिः–क. 8. राधायां–क. 9. तः 10. पर्यन्तं नास्ति–क.ल.म. 11, 12. नास्ति–ड. 13. शकुनदर्शने शकुनं राज्यादिप्रपञ्चम्–ड.

वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम् ।
स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम् ॥७॥

सञ्जीवनी

(वदनेति ।) कीदृशं हरिम् ? श्रीराधावदनकमलस्य परिशीलनेनात्यादरावलोकेन मीलिते स्थिरीभूते मिहिरसमे सूर्यसदृशे कुण्डले, तयोः शोभा यस्य तम् । तां विनाऽऽभरणशोभाऽपि भारवहेति ध्वनिः । यथा [1]सूर्यदर्शनेन [2]कमलप्रकाशः [3]तथा श्रीराधावदनसूर्यप्रदर्शनेन श्रीकृष्णवदनकमलप्रकाशो जात इति[4] प्रेमपराकाष्ठा दर्शिता । कीदृशं हरिम् ? स्मितरुच्या ईषद्धास्यकान्त्या रुचिरो मनोहरस्तथा समुल्लसितो [5]राधाधरपानोत्कम्पितो योऽधरपल्लवस्तेन कृतो राधाया रतिलोभः सुरततृष्णा येन तम् । [6]यथा कमलमण्डले सूर्यस्य प्रीतिस्तथा [7]श्रीराधामुखे कृष्णस्य सुरतेच्छेति ध्वनिः। अनेन श्रीराधायामेव तस्य रतिलोभः सूचितो नान्यत्र ॥७॥

पदद्योतनिका

वदनेति । [8]पुनः [9]कथम्भूतम् ? वदनकमलस्य परिशीलनाय प्रकाशनाय मिलिते ये मिहिरसमे [10]सूर्यसदृशे कुण्डले ताभ्यां शोभा यस्य । पुनः [11]कीदृशम् ? स्मितरुच्या ईषद्धास्यदीप्त्या [12]रुचिरोऽपि समुल्लसितो [13]राधाधरपानोत्कण्ठया ईषत्कम्पितोऽधरपल्लवः तेन कृतो राधायाः रतिलोभः सुरतेच्छा येन ॥७॥

जयन्ती

वदनेति । वदनकमलं मुखमेव पद्मं तस्य परिशीतलं शैत्यं तदर्थं मिलितः प्राप्तः मिहिरः सूर्यः तस्य समे च ते कुण्डले च ताभ्यां शोभा यस्य तम् । अत्र मिहिरस्य कमलमिलितत्वस्य कदाऽप्यसम्भवात् तद्योगकथनादभूतोपमा । वदनकमलरूपकसङ्कीर्णा । न च मिहिरस्य स्वतस्सिद्धत्वेऽपि शीतलमिलितत्वेन सम्भावनादुत्प्रेक्षैवेति वाच्यम् । समशब्दस्य सादृश्यवाचकस्य सत्त्वादुपमैव । स्मितरुचिरेव मन्दहासकान्तिरेव कुसुमं तेन समुल्लसितः प्रकाशितः अधर एव पल्लवः तेन कृतः जनितः रतौ लोभः अभिलाषः येन तम्। एतद्दर्शनेन कामोद्रेको भवतीति भावः। अत्राधरे पल्लवारोपत्वात् रूपकालङ्कारः । तदवयवस्मितरुचौ कुसुमत्वारोपात्सावयवः ॥७॥

---

1. सूर्यदर्शनकमलप्रकाशोपात्त–अ.ब. 2. कमलस्य–ग. 3. तः 4. पर्यन्तं नास्ति–अ.ब. 5. नास्ति–अ.ब. 6. यथा सूर्यमण्डले कमलप्रीतिः–इ.फ.ग.ह.ज. 7. नास्ति–अ.ब. 8, 9. नास्ति–क.ल.म. 10, 11. नास्ति–ड. 12. रुचिरसमुल्लसितो–क 13. राधाधरपानोत्कम्पितो योऽधरपल्लवस्तेन–क.ल.म.

शशिकिरणच्छुरितोदरजलधरसुन्दरस[1]कुसुमकेशम् ।
तिमिरोदितविधुमण्डलनिर्मलमलयजतिलक[2]निवेशम् ॥८॥

सञ्जीवनी

(शशीति ।) कीदृशम् ? शशिकिरणैश्च्छुरितं कर्बुरितमुदरे यस्य जलधरस्य तद्वत् सुन्दराः [3]सुकुसुमाः केशाः यस्य तम् । पुष्पाणां चन्द्रकिरणैः साम्यम् । केशानां बलाहकसाम्यम् । एतेन नायकस्य नायिकादर्शनेनातिशृङ्गारित्वमुक्तम् । कीदृशम् ? तिमिरेऽन्धकारे उदितं यद्विधुमण्डलं चन्द्रबिम्बं तद्वन्निर्मलो यो मलयजतिलकस्तस्य निवेशो रचनाविशेषो यस्य तम् । तिलकस्य वर्तुलत्वात् पूर्णचन्द्रसाम्यम् । एतेन नायकस्य तिलकशोभोक्ता ॥८॥

पदद्योतनिका

शशीति । शशिकिरणेन चन्द्रदीप्त्या छुरितं व्याप्तं उदरं मध्यं यस्य जलधरस्य तद्वत्सुन्दराः सकुसुमाः [4]सपुष्पाः केशाः यस्य [5]तम् । पुष्पाणां चन्द्रदीप्त्या साम्यम् । तिमिरेऽन्धकारे उदितं [6]विधुमण्डलं [7]चन्द्रबिम्बं तद्वन्मलयजतिलकनिवेशः चन्दनतिलकरचनाविशेषो यस्य । तिलकस्य च वर्तुलत्वाच्चन्द्रसाम्यम् । ॥८॥

जयन्ती

शशीति । शशिकिरणाश्चन्द्रकराः तैः छुरितं व्याप्तं उदरं मध्यभागो यस्य स चासौ जलधरः तद्वत्सुन्दरः रमणीयः कुसुमैर्युक्तः केशः यस्य तम् । तृतीयातत्पुरुषेण कुसुमसंवलितत्वं सिद्धयति । उपमानकिरणच्छुरितेति ज्ञापनान्न द्वन्द्वः । अत्रापि कल्पितोपमा । सुन्दरशब्दस्य अर्थतः सादृश्यवाचकत्वात् । शुभ्रसंवलिततया मालात्वसाधारणधर्मस्यानुपादानाद्धर्मलुप्ता । छुरितमिति छकारे परे पूर्वह्रस्वस्य तुगागमः "छे च" (पा.सू. ६.१.७५) इति सूत्रेण । तेन णकारगुरुत्वादष्टाविंशतिमात्राः सिद्धयन्ति दले । तिमिरे अन्धकारे उदितं विधुमण्डलं चन्द्रबिम्बं तद्वन्निर्मलः स्वच्छः अवदातः मलयजतिलकः धृतचन्दनकृतविशेषः तस्य निवेशः आकृतिविशेषो यस्य तम् । अत्रापि लुप्तोपमा । धर्मस्य कृष्णवर्णमध्यगश्वेतत्वस्यानुपादानात् वाचकाभावाच्च लुप्तोपमा समासगा ॥८॥

1. कुसुमकेशे–अ.ब. 2. निमेषे–अ. 3. सकुसुमाः–इ.फ.ह.ज. कुसुमकेशाः–ग. 4. नास्ति–क. 5. नास्ति–ड. 6. नास्ति–ड. 7. चन्द्रमण्डलं–ड.

विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम् ।
मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम् ॥९॥

सञ्जीवनी

(विपुलेति) पुनः कीदृशम् ? विपुलैर्विस्तीर्णैः पुलकभरैः [1]रोमाञ्चसमूहैर्दन्तुरितं व्याप्तम् ।[2] अनेन नायकस्य नायिकादर्शनेन रोमाञ्च उक्त इति ध्वनिः । कीदृशम् ? [3]रतिकेलिकलाभिः [4]सुरतक्रीडाभिः चुम्बनालिङ्गनादिकामकलाचातुरीभिरधीरम् चञ्चलम् । अथ वा रतिकेलिकलाभिरुपलक्षिता श्रीराधा तस्या दर्शनेनाधीरम् । एतेन नायकस्य नायिकादर्शनेनाति[5]व्याकुलतोक्ता । पुनः कीदृशम् ? मणिगणानां आभरणखचितरत्नसमूहानां [6]किरणसमूहैः समुज्ज्वलानि [7]देदीप्यमानानि [8]भूषणान्याभरणानि तैः सुभगं सुन्दरं शरीरं यस्य तम् । अथ वा राधाया मणिगणकिरणसमूहेन समुज्ज्वल[9]भूषणैः सुभगं शरीरं यस्य तम् । अथ वा श्रीराधाङ्गान्येव मणिगणकिरणसमूहसमुज्ज्वल-[10]भूषणानि तैः सुभगं शरीरं यस्य तम् ॥९॥

पदद्योतनिका

विपुलेति । विपुलो बहुलो यः पुलकभरो रोमाञ्चातिशयः तेन दन्तुरितं [11]व्याप्तं निम्नोन्नतमित्यर्थः । रतिकेलिकलाभिः [12]चुम्बनालिङ्गनादिभिर्विशेषचातुरीभिः अधीरं चञ्चलम् । मणिगणानाम् रत्नसमूहानां किरणसमूहे समुज्ज्वलानि दीप्यमानानि भूषणानि तैः सुभगं शरीरं शस्य ॥९॥

जयन्ती

विपुलेति । विपुलाः उच्चैस्तनाः पुलकाः रोमाञ्चाः तेषां भरः समुदायः तेन दन्तुरितं कण्टकितम् । रतिकालीनाः केलिकलाः रतिकेलिकलाः बन्धकौशल्यादयः ताभिः अधीरम् चञ्चलम् । मणिगणानां निकराणां किरणानां स्वकान्तीनां समूहैः समुज्ज्वलानि देदीप्यमानानि भूषणानि कटककेयूराङ्गदादीनि तैः सुभगं सुन्दरं शरीरं यस्य तम् । अत्र रत्नखचितभूषणसमृद्धिवर्णनादुदात्तालङ्कारः । "तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते" (प्र.रु.पृ. ३३६) इति लक्षणात् ॥९॥

---

1. रोमाञ्चितसमूहैः–इ.फ.ग.ह.ज. 2. अनेनापि–इ.फ.ग.ह.ज. 3. केलिकलाभिः–अ.ब. 4. सुरतक्रीडायां–इ.फ.ग.ह.ज. 5. व्याकुलतेति ध्वनिः–इ.फ.ग.ह.ज. 6. किरणैः समूहैः–ग. 7. दीप्यमानानि–इ.फ.ग.ह.ज. 8. भूषणानि अङ्गाभरणानि तैः–फ.ज.ह. 9. भूपणं–फ.ज. 10. भूषणैः–अ.ब.इ. 11. व्याप्तमित्यर्थः–ड. 12. चुम्बनालिङ्गादिविशेषचातुरीभिः–क.ल.म.

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम् ।
प्रणमत हृदि विनिधाय हरिं [1]सुचिरं सुकृतोदयसारम् ॥१०॥

सञ्जीवनी

[2]श्रीकृष्णस्य भजनं शिक्षयन् सर्वानुपदिशति–श्रीजयदेवेति । हे रसिकाः सुचिरं [3]निरन्तरं हरिं साधूनां भजनानुसारेण [4]पापतापहरं हृदि विनिधाय हृदये आरोप्य प्रणमत । स एव भजनीयो नान्य इति नमत । [5]तन्नमनमेव सर्वं करिष्यतीत्युपदेशः । कीदृशम् ? सुकृतस्य पुण्यस्योदयेन सारं प्राप्तिर्यस्य [6]तम् । [7]ऋ गताविति धातुः । हरिस्तु भजनसुकृतेन प्राप्यत इति [8]प्रसिद्धिः । पुनः कीदृशम् ? श्रीजयदेवभणितस्य गीतस्य विभवेन सामर्थ्येन [9]जयदेव[10]सरस्वत्या स्वगुणवर्णनेन चेति द्विगुणीकृतो भूषणभारोऽलङ्कारसमूहो येन । जयदेवसरस्वती स्वयमेवोपमालङ्कारवती भगवद्गुणैश्च सुतरामलङ्कृतेति भावः ॥१०॥

[11]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीविन्यां श्रीगीतगोविन्दटीकायां द्वाविंशः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवभणितविभवे [12]वाग्विभवे द्विगुणीकृतो भूषणभारोऽलङ्कारसमूहो येन तम् । जयदेवसरस्वती स्वयमेवोपमोत्प्रेक्षाद्यलङ्कारवती [13]भगवदगुणस्तुतिवर्णने सुतरामलङ्कृतेति भावः । एवम्भूतं हरिं कृष्णं सुचिरं हृदि [14]विनिधाय प्रणमतेति भक्तान् प्रत्युक्तिः । कीदृशं [15]हरिम् ? भवजले भवाब्धौ यत्सुकृतं पुण्यं तस्योदयस्तेन सारः प्राप्तिर्यस्य तम् । हरिस्तु सुकृतोदयेन प्राप्यते । सृ गताविति [16]धातुः ॥१०॥

इति श्रीगीतगोविन्दव्याख्यायां नारायणपण्डितविरचितायां द्वाविंशः प्रबन्धः ।

---

1. भवजलसुकृतोदयसारम्–ड. 2. श्रीकृष्णभजनं–इ.फ.ह.ग.ज. 3. नितरां–इ.फ.ग.ह.ज. 4. पापहरं–ग. 5. तत्र मनसेव–अ.ब. 6. नास्ति–अ.ब. 7. अ गताविति धातुः–अ.ब. 8. प्रसिद्धः–ग. 9. जयदेवस्य सरस्वत्या–ग. 10. सरस्वत्योः स्वगुणवर्णनयोर्वेति–इ. सरस्वत्या स्वगुणवर्णनेन वेति–ग. सरस्वत्या स्वगुणवर्णनैर्वेति–फ.ह.ज. 11. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 12. नास्ति–क.ल.म. 13. भगवद्गुणैस्तु वर्णनीयैः–क.ल.म. 14. निधाय–क.ल.म. 15. नास्ति–ड. 16. धातोः–क.

त्रयोविंशः प्रबन्धः

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन–
प्रयासेनेवाक्ष्णोस्तरलतर[1]भावं गमितयोः ।
इदानीं राधायाः प्रियतम[2]समालोकसमये
पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकरः ॥१॥

जयन्ती

श्रीजयदेवेति । श्रीजयदेवेन भणितं परिभवद्विगुणीकृतभूषणभारं हृदि विनिधाय सुकृतोदयसारं हरिं सुचिरं प्रणमत ॥१०॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां द्वाविंशः प्रवन्धः ।

सञ्जीवनी

सम्प्रति श्रीराधायाः श्रीकृष्णदर्शनेन हर्षं दर्शयति–अतिक्रम्येति । इदानीं तत्क्षणे प्रियतमसमालोकनसमये [3]कृष्णावलोकनकाले राधायाः अक्ष्णोर्नेत्रयोर्हर्षाश्रुनिकरः सात्त्विकभावेनानन्दजलसमूहः पपात । क इव ? अपाङ्गं नेत्रप्रान्तमतिक्रम्य श्रवणपथस्य कर्णमार्गस्य पर्यन्तगमनप्रयासेनेव स्वेदाम्बुपूर इव प्रस्वेदजलप्रसर इव । कीदृशयोरक्ष्णोः ? [4]श्रीकृष्णदर्शनाभिकाङ्क्षयाऽतिशयेन चञ्चलत्वं प्रापितयोः । प्रायशः [5]श्रीराधादर्शनात् श्रीकृष्णस्याप्येतानि चिह्नानि जातानीति ध्वनिः ॥१॥

पदद्योतनिका

एवम्भूतस्य कृष्णस्य दर्शनाद्राधायास्तदानीं [6]किं जातम् ? कविराह – अतिक्रम्येति । इदानीं प्रियतमसमालोकसमये कृष्णावलोकनकाले [7]अक्ष्णोः नेत्रयोः स्वेदाम्बुप्रसर इव [8]घर्मजलप्रवाह इव राधायाः हर्षाश्रुनिकरः [9]सात्त्विकभावेन नेत्राम्बुपूरः पपात । तत्रोत्प्रेक्ष्यते । अपाङ्गं नेत्रप्रान्तं अतिक्रम्य श्रवणपथस्य कर्णमार्गस्य पर्यन्तगमनं परिसरगमनं तेन यः प्रयासः [10]श्रमस्तेन [11]हेतुना अक्ष्णोः स्वेदाम्बुप्रसरोऽभूत् । कीदृशयोरक्ष्णोः ? तरलतरतारं

---

1. तारं–नि.सा. तारं पतितयोः–ड. 2. समायात–नि.सा. 3. कृष्णावलोकनहानिकाले–अ.व. 4. श्रीनन्दकुमार–ग. 5. श्रीकृष्णदर्शनात्–अ.व. श्रीवृषभानुकुमारीदर्शनात्–ग. 6. किं जातमिति कविराह–क. 7. राधायाः अक्ष्णोः–क. 8. घर्मजलप्रवाह इव घर्मजलप्रवाहसदृशः–क.ल.म. 9. भावो–क. 10, 11. नास्ति–ड.ल.म.

भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-
[1]स्मिते याते गेहाद्बहिरवहितालीपरिजने ।
प्रियास्यं पश्यन्त्याः [2]स्मरशररसाकूतसुभगं
[3]सलज्जा लज्जाऽपि व्यगमदिव दूरं मृगदृशः ॥२॥

---

[4]चञ्चलाक्षिकनीनिकं यथा स्यात्तथा[5] पतितयोः कृष्णं प्रति गतयोः । अन्यस्यापि गमनेन श्रमो भवति तेन च [6]पतति तद्वत् ॥१॥

जयन्ती

अतिक्रम्येति । अपाङ्गं नेत्रान्तं अतिक्रम्य उल्लङ्घ्य श्रवणपथः कर्णकूपः तस्य पर्यन्तं समीपे गमनं प्रयाणं तदेव प्रयासः व्यायामः तेनैव तावन्मात्रेणैव तरलतरभावं अतिचाञ्चल्यं गमितयोः प्रापितयोः राधायाः अक्ष्णोर्नेत्रयोः इदानीं अधुना प्रियतमः अत्यन्तप्रियः कृष्णः तस्य समासादितुं योग्यः समासाद्यः स चासौ समयः तस्मिन् काले हर्षात् आनन्दात् अश्रूणि वाष्पाणि तेषां निकरः प्रवाहः स्वेदाम्बुप्रसर इव स्वेदोदकनिर्झर इवेति यावत्, पपात् । कटाक्षेण हरिमवलोकयन्त्या राधायाः आनन्दाश्रु पपातेति भावः । अत्र कर्णान्तिगमनक्रियानिमित्तेन स्वेदाम्बुपूरत्वं सम्भाव्यत इति वस्तूत्प्रेक्षा ॥१॥

सञ्जीवनी

पुनस्तदेव प्रकारान्तरेणाह–भजन्त्या इति । मृगदृशः मृगाक्ष्याः श्रीराधायाः तल्पान्तं [7]शय्यायाः प्रान्तं भजन्त्याः प्राप्नुवत्या अवहिते सावधाने आलीपरिजने सखीसेवकवर्गे [8]गेहाद्बहिर्याते सति [9]लज्जासखी दूरमतिशयेन व्यपगमत् अतिदूरमगमत् । कीदृशे परिजने ? कृतं कपटेन कर्णादि[10]कण्डूयनं तेन [11]पिहितं स्मितं हास्य येन तस्मिन् । [12]कीदृश्याः ? [13]प्रियास्यं कृष्णमुखं पश्यन्त्याः । कीदृशम्? [14]स्मररसेन कामरसेनाकूतं क्रीडाविलासस्तेन सुभगं सुन्दरम् । "आकूतं स्याद्भ्रमे कामे क्रीडिते ध्वनितार्थकः" इति हलायुधः ॥२॥

---

1. स्मितं–नि. सा. 2. स्मरशरवशाकूत–नि.सा.ड. 3. सलज्जाया लज्जाऽप्यगमदिव दूरं मृगदृशः–ड. 4. तः 5. पर्यन्तं नास्ति–क. 6. पपात–क. 7. शय्याप्रान्त्यं–इ.फ.ग.ह.ज. 8. गेहात्–इ.फ.ग.ह.ज. 9. लज्जा सखीव दूरं–फ.ज.ह. लज्जासखी विदूरं–ग. 10. कण्डूयनेन–फ.ज.ह. 11. विहितं–फ.ग.ज. 12. कीदृश्याः मृगदृशः–ग. 13. सलज्जं लज्जासहितं यथा तथा प्रियास्यं कृष्णमुखं पश्यन्त्याः–फ.ज. प्रियास्यं प्राणप्रियस्य श्रीनन्दकुमारस्य मुखं पश्यन्त्याः–ग. 14. स्मररसेनाकूतं–ग. स्मररसेन कामोत्पन्नविषयरसेन–फ.ज. स्मरकृतरसेन कामरसेन–ह.

पदद्योतनिका

भजन्त्या इति। मृगदृशो मृगाक्ष्या राधाया [1]लज्जापि दूरं व्यगमदिव [2]गच्छति स्मेवेत्युत्प्रेक्षा। [3]कीदृश्या राधायाः[4] ? अवहिते सावधाने [5]आलीपरिजने सखीसेवकवर्गे गेहाद्बहिर्याति सति तल्पान्तं शय्यापर्यन्तं भजन्त्याः [6]प्राप्नुवत्याः। कीदृशे परिजने ? कृतं कपटेन कर्णादिकण्डूयनं तेन [7]विहितं [8]कृतं स्मितं हास्यं येन। पुनः कीदृश्याः ? प्रियास्यं कृष्णमुखं पश्यन्त्याः। कीदृशं प्रियास्यम् ? स्मरशरवशं कामबाणाधीनं आकूतं [9]सुरताभिप्राय. तेन सुभगं मनोहरं कामविकारहाव[10]भावादिना मनोहरमित्यर्थः। [11]पुनः कीदृश्याः ? सलज्जायाः[12] लज्जासहितायाः तस्याश्चेष्टा दृष्ट्वा वचनमन्तरेणापृष्ट्वा बहिर्गमनात् सखीनां सावधानत्वं, सर्वाः सख्यो गता इति मया कथमत्र स्थातव्यमिति [13]लज्जापि गतेति भावः ॥२॥

जयन्ती

भजन्त्या इति। कृता कपटकण्डूतिः छद्मकण्डूतिः कर्णकण्डूयनमिषेणेत्यर्थः। तया पिहितं छादितं स्मितं सन्निधानहर्षजनितहास्यं यस्मिन् कर्मणि तद्यथा भवति तथा, तल्पान्तं प्रियशय्यान्तं भजन्त्याः, स्मरात् कामात् शतं समाकूतभावाः तैः सुभगं रमणीयम्। सम्भोगाभिलाषजातहर्षेण सुन्दरं प्रियस्य कृष्णस्य आस्यं पश्यन्त्याः सलज्जायाः मृगदृशः राधायाः अवहिताः सन्निहिताः, आल्यः सख्यः परिजनाः परिचारिकाश्च द्वन्द्वैकवद्भावस्तस्मिन्। गेहात् क्रीडागृहात् वहिर्याति सति लज्जाऽपि अतिदूरं अगमत् जगाम। सखीजने परिजने स्थिते ह्रीणा त(तो) गमने निर्लज्जा सम्भोगे प्रवृत्तेति भावः। अत्र लज्जानिर्गमवर्णनेन लज्जाशमनरूपभावशान्तिः। अत्र भावस्य शृङ्गाररसापेक्षया लज्जास्वयमगमदिति वाच्यार्थस्य चमत्कारकारित्वाद्गुणीभूतव्यङ्ग्यम्। अत्र लज्जावर्णनेन प्रियमुखालोकनेन च नायिकाया मध्यात्वं नाशङ्कनीयम्। सा प्रौढेव। सखीसमक्षप्रयुक्ता लज्जा प्रौढानामस्तीति प्रौढात्वमेव। यद्याग्रहः समानलज्जामदनत्वेन तथापि प्रियसंयोगेन लज्जापगमवर्णनेन प्रौढात्वमेवेति विस्तरेणालम् ॥२॥

---

1. तः 4. पर्यन्तं नास्ति–ल.म. 2. गतेव–ड. 3. कस्मिन् सति–क. 5. नास्ति–क. 6. नास्ति–ड. प्रसर्पन्त्याः–क. 7. पिहितं–क. 8. नास्ति–क.ल.म. 9. रताभिप्रायः–क. 10. भावादिमनोहरमित्यर्थः–क.ल.म. 11. तः 12. पर्यन्तं नास्ति–ड. 13. लज्जा–क.

[1]जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव ।
भुजापीडक्रीडाहतकुवलयापीडकरिणः
प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः ॥३॥

इति श्रीगीतगोविन्दे अभिसारिकावर्णने (एकादशः सर्गः)

इति श्रीमद्विद्वत्प्रवरभिषगम्मणजनुषा
कृतायां न्यायार्थश्रुतिपदविदा कृष्णविदुषा ।
प्रगीयद्गोविन्दान्वयविवृतभावार्थविवृतौ
जयन्त्यां सर्गोऽसौ स्फुटमभवदेकादशतमः ॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सानन्दगोविन्दो नाम एकादशः सर्गः ॥

सञ्जीवनी

[2]सर्गान्ते कविराशिषमाशास्ते (—जयेति) मुरजितः श्रीकृष्णस्य भुजदण्डो जयति सर्वोत्कर्षेण वर्तते । कीदृशः ? [3]प्रकीर्णाः [4]सर्वत्र संलग्ना असृग्विन्दवो रुधिरकणा यत्र । कीदृशस्य [5]मुर(जितः) ? भुजापीडस्य वाहुदण्डस्य क्रीडया हतः कुवलयापीडनामा करी [6]हस्ती येन तस्य[7] । क इव ? जयश्रिया [8]विजयशोभया विन्यस्तैर्नानारचनया क्षिप्तैः मन्दारकुसुमैः पारिजातपुष्पैर्महित इव [9]पूजित [10]इव । पुनः क इव ? स्वयं स्वयमेव सिन्दूरेण द्विपस्य हस्तिनः रणे मुदा आनन्देन मुद्रित इव चिह्नित इव । अथ वा स्वयमात्मनां सिन्दूरेण वीररसोदयेन द्विपेन द्वाभ्यां श्रीराधाकृष्णाभ्यां शृङ्गाररसं पिबतीति द्विपः कामस्तेन यो रणः सुरतसङ्ग्राम[11]स्तस्य [12]मुदा मदेन मुद्रित इव [13]चिह्नित इव । "प्रकीर्णं शकले प्रोक्तं विस्तरेऽपीति [14]कथ्यते" इति यादवः ॥३॥

---


1. इदमेव पद्यं सर्गान्तपद्यत्वेन दृश्यते–अ.ब.ड.इ. नि.सा. ग्रन्थे तु "सानन्दं", "सौन्दर्यैक", इत्यारभ्यमाणपद्यद्वयमधिकं दृश्यते 2. सम्प्रति–इ. 3. प्रकीर्णासृग्बिन्दुः लग्ना असृग्विन्दवो–फ.ज. 4. नास्ति–ग. 5. नास्ति–इ.फ.ग.ह.ज. 6. तः 7 पर्यन्तं नास्ति–अ.ब. 8. विजयश्रिया शोभया–फ.ज. 9, 10. नास्ति–अ.ब.ग. 11. तत्र–इ.फ.ग.ह.ज. 12. मुदा आनन्देन–इ.फ.ग.ह.ज. 13. विचित्रित–ग.ह. 14. नास्ति–इ.फ.ग.ह.ज.

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[1]शिवदासात्मजश्रीवनमालिभट्टविरचितायां [2]वनमालिसञ्जीविन्यां श्रीगीतगोविन्दटीकायां अभिसारिकावर्णने एकादशः सर्गः ॥

पदद्योतनिका

जयेति । मुरजितः कृष्णस्य भुजदण्डो दण्डाकारो बाहुर्जयति सर्वोत्कर्षेण [3]वर्तते । दण्डशब्देनाजानुबाहुत्वं द्योतितम् । कीदृशो [4]भुजदण्डः ? प्रकीर्णाः सर्वत्र लग्ना असृग्बिन्दवो यस्मिन् । अत एव द्विपरणमुदा कुवलयापीडसङ्ग्रामसन्तोषेण स्वयं सिन्दूरेण मुद्रित चिह्नित इव । [5]द्विपश्चेत् सिन्दूरेण मुद्रितस्तर्हि मदीयो बाहुरपि सिन्दूरमुद्रितो भवतु । पुनः कीदृश इव ? जयश्रिया जयलक्ष्म्या [6]विन्यस्तैः विक्षिप्तैः मन्दारकुसुमैः पारिजातपुष्पैर्महित इव । जयिनः शूरस्योपरि पुष्पवृष्टिरुचिता । कीदृशस्य [7]मुरजितः ? भुजापीडस्य [8]बाहुदण्डस्य क्रीडया हतः कुवलयापीडनामा करी हस्तिर्येन सानन्दो राधा[9]समागमेन ॥११॥

[10]इति श्रीगीतगोविन्दटीकायां एकादशः सर्गः ॥



1. श्रीशिवदासपण्डितात्मज–ग.ह. 2. नास्ति–फ.ज.ग. 3. वर्तताम्–क.ल.म. 4. दण्डः–ड. 5. द्विपश्च–क. 6, 7. नास्ति–ड. 8. बाहुबन्धस्य–क. 9. समागमेनेति भावः–क. 10. इति श्रीगीतगोविन्दविवृतौ एकादशः सर्गः–ड.

द्वादशः सर्गः

(सुप्रीतपीताम्बरः)

गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-
स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम् ।
सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-
प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ॥१॥

सञ्जीवनी

द्वादशे प्रार्थितां कान्तां राधां सम्प्राप्य केशवः ।
[1]सुस्थां पल्लवशय्यायामुवाच स्मितमञ्जुलम् ॥

गतवतीति । सरसं [2]शृङ्गाररससहितं [3]यथा स्यात्तथा हरिः प्रियां श्रीराधां दृष्ट्वा उवाच, वक्ष्यमाणमिति शेषः । कस्मिन् सति ? [4]सखीवृन्दे लज्जयाऽसमं अनुपमं गतवति अपयाते सति । कीदृशीम् ? अमन्दा अधिका या त्रपा लज्जा तस्या यो भरोऽतिशयः त्यागो वा तेन ये स्मरशराः कामबाणास्त-द्वशाद्यदाकूतं साभिप्रायो विलासो वा तेन स्फीतं प्रवृद्धं यत् स्मितमीषद्धास्यं तेन स्नपितौ व्याप्तावधरौ यस्यास्ताम् । [5]पुनः कीदृशीम् ? मुहुर्वारं वारं नवप-ल्लवप्रसवशयने नूतनकिसलयपुष्पशय्यायां [6]निक्षिप्ताक्षीं निहितनयनाम् । एतेन सुरतेच्छा तस्याः सूचिता[7] ॥१॥

पदद्योतनिका

गतवतीति । अथ हरिः कृष्णः प्रियां वल्लभां राधां सरसमनसं [8]रसो-ऽनुरागस्तत्सहितं मनो यस्यास्तां दृष्ट्वोवाच वक्ष्यमाणमिति शेषः । कस्मिन् सति ? सखीवृन्दे सखीसमूहे गतवति सति अपयाते सति । कीदृशीं राधाम् ? मन्दोऽल्पो यस्त्रपाभरो लज्जाभरस्तेन निर्भरोऽतिशयितो यः स्मरशर[9]स्तस्य व-शस्तदायत्तो य आकूतः अभिप्रायस्तेन स्फीतं प्रवृद्धं यत्स्मितं तेन स्नपितो व्याप्तः अधरः यस्यास्ताम् । अथ वा मन्दः क्रूर इति स्मरविशेषणम् ।[10]पुनः कीदृशीम् राधाम्[11] ? मुहुः पुनः पुनः नवपल्लवप्रसवशयने नवपल्लवपुष्पशयने विक्षिप्ताक्षीं निहितनयनाम् । शय्यालोकनेन सुरतेच्छा ध्वन्यते ॥१॥

1. सुप्तां–इ.फ.ग.ह.ज. 2. शृङ्गारयुक्तं–ग. 3. यथा तथा–ग. 4. नास्ति –अ.व. 5 तः 7. पर्यन्तं नास्ति–अ.ब. 6. नास्ति–अ.ब.इ.ग.ह. 8. सरसानु-रागः–ग. 9. तत्परवशस्तदीय आकूतः–क.ल.म. 10 तः 11. पर्यन्तं नास्ति–क.

[1]बिभासरागे [2]रूपकतालीताले

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम् ।
तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥२॥
क्षणमधुना नारायणमनुगतमनुसर राधिके ॥ध्रुवपदम्॥

जयन्ती

कविवचनत्वेन वर्णितं पूर्वाष्टपद्या भगवान् तदर्थेऽतिदर्शनानन्तरं किमासीदित्यत आह—गतवतीति । हरिः सखीनां आलीनां वृन्दे समाजे गतवति याते सति, मन्दः त्रपाभरः ईषल्लज्जोदयः तेन निर्भरः दृढः स्मरः तेन परवशं प्रविष्टं तद्देहस्मरणकस्वत्ववृत्तात् आकूतभावः तेन स्फीतं विस्तृतं स्मितं मन्दहसितं तेन स्नपितः आर्द्रित उज्ज्वलितः अधरो यस्यास्ताम् । अनुरागव्यञ्जकमन्दस्मितान्वितामित्यर्थः । अत एव सरसं अनुरक्तं मनो यस्यास्ताम् । कीदृशीं राधां दृष्ट्वा ? नवपल्लवानां प्रसवस्य कोमलतरदलस्य कुसुमस्य शयने मुहुः विक्षिप्ते अक्षिणी लोचने यया ताम् । तत्र शयनाभिलाषिणीमित्यर्थः । प्रियां कान्तां राधां उवाच । अत्र इयं नायिका समानलज्जामदनत्वात् मध्या नायिका ॥१॥

सञ्जीवनी

हरिः प्रियामाहेति यदुक्तं तद्गीतेनाह—किसलयेति । गीतस्यास्य विभासरागः । तत्स्वरूपम्—

स्वच्छन्दसम्मानितपुष्पचापः [3]प्रियाधरस्वादुरसाभितृप्तः ।
पर्यङ्क[4]मध्यास्य कृतोपवेशो [5]बिभासरागः किल हेममूर्तिः ॥

तालध्रुवयोः स्वरूपमुक्तमेव । हे राधिके [6]अधुना मामनुसर भज । कीदृशम् ? क्षणमनुगतं [7]त्वदनुग्रहक्षणमनुगामिनं [8]अधीनञ्च । [9]अथ वा [10]तत् क्षणम-

1. श्रीरागेण एकतालीतालेन—च. 2. एकतालीतालः—ङ. 3. प्रियारसस्वादु—इ.फ.ग.ह.ज. 4. पर्यङ्कमध्यस्य—अ.ब. पर्यङ्कमध्येऽस्य—इ.फ.ग.ह.ज. 5. भासो विपूर्वः किल हेमगौरः—इ.फ.ग.ह.ज. 6. तव क्षणमधुना क्षणमधुरेण मदेन वसन्तेन वाऽनुगतं तवाधीनम् । पुनः कीदृशं माम् ? हे राधिके अधुना मामनुसर भज । कीदृशम् ? क्षणमनुगतं तवाधीनम् । पुनः कीदृशं माम् ? ना पुरुषस्तस्यायं नारः शृङ्गारः अयनमाश्रयो यस्य तम् ।...फ. 7. तदनग्रहः क्षणमनुगामिनम्—अ. तदनुग्रहक्षणमनुगामिनम्—ब. 8. अधीनं वा—इ.ग.ह.ज. 9. नास्ति—अ.ब.फ.ग. 10. तव क्षणमधुना—इ.ग.ह.ज.

धुना क्षणमधुरेण मदेन वसन्तेन वाऽनुगतं तवाधीनम्। पुनः कीदृशं माम्? ना पुरुषस्तस्यायं नारः [1]शृङ्गारः स अयनमाश्रयो यस्य[2]तम्। 'तस्येदम्' (पा. ४.३.१२०) इत्यण्। 'नडादिभ्यः फक्' (पा. ४.१.९९)। तस्य यणादेशः। एतेन शृङ्गाराश्रयो नारायण इति [3]सिद्धम्। [4]यद्वा नारा [5]आपो नारा अश्रुजलानि वा अयनमाश्रयो यस्य तम्। [6]त्वद्वियोगानलसन्तप्तत्वाज्जले वसामि रोदनं करोमि वेति भावः। हे कामिनि [7]चरणनलिनस्य (निवेशं) प्रवेशं पल्लवतल्पे कुरु प्रवेशय। इदं तव पदपल्लववैरि [8]किसलयशयनं यतस्तस्मा[9]त्पराभवं तत्कान्त्या तिरस्कारमनुभवतु प्राप्नोतु। कीदृशम्? सुवेशं सुन्दरं पल्लव[10]रचनादिनाऽलङ्कृतमपि तव पदविपक्षम्। पल्लवतल्पं त्वच्चरणविन्यासपराजयं प्राप्नोत्वित्यर्थः। अनेनान्यनायिकाशिरस्सु पादारोपः कृतो भविष्यतीति भावः ॥२॥

पदद्योतनिका

[11]किसलयेति। अस्मिन् सर्गे स्वाधीनभर्तृका नायिका वर्ण्यते।
यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।
विचित्रविभ्रमासक्ता स्यात्सा स्वाधीनभर्तृका ॥

इति[12]। [13]विभासरागलक्षणम्—

स्वच्छन्द[14]सम्मानितपुष्पचापः प्रियाधरस्वादु[15]सुधाभितृप्तः।
पर्यङ्कमध्यास्य कृतोपवेशो भासो विपूर्वः किल हेमगौरः ॥

हे राधिके अधुना क्षणं अनुगतं अधीनं नारायणं मामनुसर [16]अनुगच्छ। अनुसरणप्रकारमाह—हे कामिनि कामुकि त्वं [17]किसलयैः रचितशयने शय्यातले उपरिभागे चरणनलिननिवेशं पादपद्मार्पणं कुरु। इदं किसलयशयनं तव पादपल्लवस्य वैरि तत्तस्मात्पराभवं तिरस्कारमनुभवतु प्राप्नोतु। [18]तव पादपल्लवस्य कान्तिहरणात्। शत्रुमस्तके हि चरणो दीयते। कीदृशमिदम्? सुवेषमपि पत्ररचनादिनाऽलङ्कृतमपि ॥२॥

1, 2. नास्ति–अ.ब. 3. प्रसिद्धम्–अ.ब. 4. अथ वा–इ.फ.ह.ज. 5. नास्ति–अ.ब. 6. तद्वियोग–अ.ब. 7. चरणनलिनं तव पल्लवतल्पे–अ.ब. 8. यतः शयनं तस्मात्–इ.फ.ग.ह.ज. 9. पराभवकान्त्या–अ.ब. 10. लतादिना–इ. 11. नास्ति–ड. 12. जितभर्तृकेति क्वचित्पाठः–क. 13. विभासरागः तल्लक्षणम्–क. रागलक्षणम्–ल.म. 14. संनामित–क. समानीत–ल.म. 15. सुधातितृप्तः–क.ल.म. 16. नास्ति–ड. 17. किसलयरचित–क.ल.म. 18. इदं किसलयशयनं तवपादपद्मस्य पल्लवस्य–क.

करकमलेन करोमि [1]चरणमहमागमितासि विदूरम् ।
क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम् ॥३॥

जयन्ती

किसलयेति । हे मानिनि मानवति किसलयशयनस्य तले प्रदेशे, तदुपरीत्यर्थः । चरणावेव नलिने पद्मे तयोर्विनिवेशं कुरु । सुष्ठु वेशो रचनाविशेषो यस्मिन् तत् । इदं शयनं तव पदपल्लवस्य वैरं साम्यरूपं तस्य पराभवं तिरस्कारं अनुभवतु । पराभूतस्य पादतलघातः कर्तव्य इति भावः ॥२॥

ध्रुवाया व्याख्यानम् । राधिके हे राधे अनुगतं अनुकरणपरत्वादनुकूलम्, विधेयमिति यावत् । नारायणं विष्णोरवताररूपम् । अधुना एकान्ते क्षणं अनुसर । परस्परमनुरागत्वं श्रृङ्गारस्थानाभासत्वम् ॥

सञ्जीवनी

करकमलेनेति । किञ्च अहं [2]तव चरणं करकमलेन [3]हस्तकमलेन करोमि संवाहयामि । कथमिति चेत् यतस्त्वं [4]विदूरमागमिताऽसि [5]अतिदूरमागताऽसि सख्या नीताऽसीति वा । अतः क्षणं नूपुरं शयनोपरि [6]शय्यायामुपकुरु । नूपुरं चरणयोर्निवेशयेत्यर्थः । कमिव ? अनुगतौ तवानुसरणे शूरं मामिव । नूपुरानुगमनशूरत्वकथनव्याजेन तत्पादस्पर्शं प्रार्थयत इति भावः ॥३॥

पदद्योतनिका

करेति । हे राधे अहं करकमलेन ते [7]चरणं करोमि संवाहयामि । धातूनामनेकार्थत्वात् । यतस्त्वं विदूरमागमिताऽसि [8]मया आनीताऽसि[9] । दूरागतस्य चरणसंवाहन[10]मुचितम् । त्वं शयनोपरि क्षणं नूपुरमुपकुरु । कमिव ? अनुगतिशूरं तवानुसरणे शूरं मामिव । यथा आलिङ्गनादिना मामुपकरोषि तथा नूपुरमपि । [11]शय्यां तल्पमलङ्कुर्विति भावः ॥३॥

जयन्ती

करकमलेति । अहं नारायणः करकमलेन पाणिपद्मेन चरणं करोमि । पूर्वोक्तकिसलयशयने स्थापयामीत्यर्थः । मा याहीति शेषः । मया दूरं त्वं

---

1. चरणवहम्–ड. 2. त्वच्चरणं–इ. 3. नास्ति–फ. 4. दूरमागमिताऽसि–अ.ब. 5. दूरमागतासि–अ.ब. 6. शय्यायां कुरु–अ.ब. 7. चरणवहं पादसंवाहनं–ड. 8. तः 9. पर्यन्तं नास्ति–क.ल.म. 10. उचितमिति–क. 11. शय्यातलमलङ्कुर्विति भावः–क.ल.म.

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ।
विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम् ॥४॥

आगमिताऽसि । आनयनेन आया(सि)ताऽसि । दूरानयनार्थं पादसंवाहनं करोमीति भावः । चरणशब्दस्य तत्सेवायां लक्षणा । मामिव अनुगतौ अनुसरणे शूरं समर्थं नूपुरं क्षणमपि शयनोपरि कुरु । अनुसर । श्रान्ताऽऽश्वसितु । अत्रानुसरणधर्मस्य स्वस्मिन् स्वतःसिद्धमित्युत्कर्षः स्वोपमया व्यज्यते ॥३॥

सञ्जीवनी

वदनेति । किञ्च अमृतमिव जीवनप्रदं वचनमनुकूलं सानुरागं रचय कथय । कीदृशम् ? वदनमेव सुधानिधिश्चन्द्र[1]स्तस्माद्गलितं च्युनम् । आज्ञा-[2]पयसि चेत् तर्हि उरसि स्थितं दुकूलं पट्टवस्त्रं विरहमिव वियोगमिवापनयामि दूरीकरोमि । किमिति ? पयोधररोधकं[3] स्तनाच्छादनम् । एतेनान्यत्र [4]विरहे दुःखम् शान्तं तत्तवैवास्तीति ध्वनिः ॥४॥

पदद्योतनिका

वदनेति । त्वं अनुकूलं वचनं वाक्यममृतमिव रचय वद । कीदृशं [5]वचनम् ? वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितमुत्पन्नम् । उरसि वक्षसि वर्तमानम् दुकूलं पट्टवस्त्रं विरहमिव वियोग[6]मिवापनयामि स्फोटयामि यतः पयोधररोधकं स्तनाच्छादकम् । विरहपक्षे स्तनाश्लेषप्रतिवन्धकम् ॥४॥

जयन्ती

वदनेति । वदनमेव सुधानिधिः चन्द्रः तस्मिन् गलितं अमृतमिव अनुकूलं मनःपरितोषकं वचनं रचय वद । अत्र वदनस्य चन्द्रत्वारोपणरूपकोत्थापिता वचनस्यामृतत्वसंभावनाद्वस्तूत्प्रेक्षा । अमृतस्य स्वतःसिद्धत्वेऽपि वदनसुधानिधिगलितत्वाभावान्नोपमालङ्कारः । अहं पयोधररोधकं स्तनाच्छादकं उरसि विद्यमानं दूकूलं चेलं विरहमिव वियोगमिव अपनयामि निवारयामि । आलिङ्गनार्थे कुचावलोकनेनैव विरहो गच्छतीति भावः । मानकृतविरहस्य आलिङ्गनप्रतिवन्धकत्वात्तत्प्रधिवन्धकत्वं दुकूलस्येति तदुपमा ॥४॥

---

1. तस्माद्विगलितं–अब. 2. आज्ञापयामि चेत–क. ३. स्तनाच्छादकम्–इ.फ.ग.ह.ज. 4. विरहदुःखं शान्तं तु–इ. विरहदुःखशान्तिः–ग.ह. विरहदुःखं शान्तं न तु–फ.ज. 5. नास्ति–ड. 6. मिवापनयाम्याच्छेदयामि–क. मिव चोपचयामि स्फोटयामि–ल. म.

प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम् ।
मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥५॥

सञ्जीवनी

[1]किञ्च (प्रियेति ।) हे [2]प्रियवल्लभे ! मदुरसि मम वक्षसि कुचकलशं विनिवेशय [3]अर्पय, [4]तदर्पणेन मनसिजस्य कामस्य तापं सन्तापमात्मनो मम च शोषय नाशय । तत्स्पर्शमात्रेण कामपीडानिवृत्तिर्भविष्यतीति भावः । कमिव ? प्रियस्य परिरम्भे ([5]आलिङ्गने यो [6]रभसस्त्वरौत्कण्ठ्यं) तेन वलितमिव [7]व्याप्तमिव । कीदृशम् ? पुलकितं सञ्जातपुलकम् । एतेन [8]रसः पूर्यमाणः पुलकव्याजेन बहिरुद्भूत इति ध्वन्यते । पुनः कीदृशम् ? [9]अतिदुरवापमति दुर्लभम् । त्वदनुग्रहेणैव सुलभमिति ध्वनिः । कुचकलशपदं केलिसिन्धुतरणायोक्तमिति भावः । कामज्वरे [10]शीतलजलपूर्णकलशालिङ्गनं विधातव्यमेव । यथा—

कलशकांस्यजलप्लुतभाजनं
विरहिणी[11]मदनज्वरशान्तये ।
विरचयेन्निपुणस्तु सखीजनो
नलिनचन्दनपङ्कजयोजनम् ॥ इति ॥ ५ ॥

पदद्योतनिका

[12]प्रियेति । त्वं मदुरसि मम वक्षसि कुचकलशं [13]विनिवेशय स्थापय । तेन मनसिजतापं कामपीडां शोषय खण्डय । कीदृशम् ? [14]प्रियपरिरम्भणाय ममालिङ्गनाय रभसेनोत्साहेन वलितमिव सुमुखमिव । [15]पुनः [16]कीदृशम् ? [17]पुलकितं सञ्जातरोमाञ्चम् । पुनः कीदृशम् ? अन्यदुरापम् । अन्येनापि अतिदुःखेन प्राप्यत इति । अतिप्रयासेनापि न प्राप्यते । अतो दुरापमिति[18] । [19]सजलकुम्भक्षेपेण तापशान्तिर्युज्यत एव[20] ॥५॥

1. नास्ति–अ.ब. 2. प्रिये वल्लभे–इ.फ.ग.ह.ज. 3. नास्ति–अ.ब. 4. अर्पणेन–अ.ब. 5. नास्त्ययं कुण्डलीकृतो भागः–अ. 6. रभसं त्वरोत्कं स्वं तेन–ब. रभसो राभस्य त्वरोत्कर्ष–ज. रभसो राभस्यं त्वरौत्कण्ठ्यं–इ.फ.ग.ह. 7. नास्ति–फ.ज. 8. रसपूर्यमाणः–अ.ब. 9. दुरापमतिदुर्लभ–अ.ब. दुरवापमतिदुर्लभम्–इ.फ.ह.ज. 10. शीतजलकलशालिङ्गनं–ग. 11. वदनज्वरसांत्वने–अ.ब. वदनज्वरशान्तये–फ.ग.ह.ज़. 12. नास्ति–ड. 13. नास्ति–क. 14. परिरम्भणाय–ड.ल.म. 15. नास्ति–ड. 16. कीदृशम् ? अतिदुःखेनावाप्यत इति दुरापम्–ड.ल.म. 17. तः 18. पर्यन्तं नास्ति–ड.ल.म. 19. तः 20. पर्यन्तं नास्ति–क.ल.म.

**अधरसुधारसमुपनय [1]भामिनि जीवय मृतमिव दासम् ।
त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम् ॥६॥**

जयन्ती

दुकूलापनयनप्रयोजनमाह–प्रियेति । प्रियस्य मम परिरम्भणे आलिङ्गने रभसः वेगः तेन वलितमिव निर्गतमिव अतिपुलकितं अतिकण्टकितं, अतो दुरापम् । रोमाञ्चानां प्रतिबन्धकत्वेन मध्यस्थत्वात् । कुच एव कलशं ममोरसि वक्षसि विनिवेशय । अतः मनसिजतापं कामज्वरं शोषय नाशय । अत्र पुलकस्य सात्त्विकभावेनोत्पन्नस्य गाढालिङ्गनस्य निर्गमहेतुत्वेन सम्भावनात् हेतूत्प्रेक्षा सिद्धास्पदा ॥५॥

सञ्जीवनी

(अधरेति ।) [2]एवमप्यप्रसन्नां [3]प्रतिभात इवाह–[4]भाविनि प्रशस्ताभिप्राये अधरसुधारसं अधरामृतं उपनय समर्पय । अधरवक्त्रसंयोगं कुर्वित्यर्थः । किञ्चाधरामृतं दत्त्वा दासं त्वच्चरणानु[5]वर्तिनं मां मृतमिव जीवय । त्वदधरामृतपानेनैव मम जीवनं नान्यथेति भावः । [6]कीदृशम् ? त्वयि [7]विनिहितं मनः चित्तं यस्य त्वद्ध्याने [8]दत्तचित्तम् । [9]पुनः कीदृशम् ? विरहानलेन दग्धवपुषं [10]दग्धशरीरम् । अत एवाविलासं [11]विलासशून्यम् । एतेन [12]त्वदधीनं जीवनमात्रं कथितम् ॥६॥

पदद्योतनिका

अधरेति । [13]हे भामिनि [14]कामकलाकुशले त्वमधरसुधारसं [15]ओष्ठामृतरसमुपनय [16]देहि । [17]अनेन [18]दासं सेवकं मां मृतमिव [19]जीवय । कीदृशं [20]माम् ? त्वयि विनिहितमनसं [21]दत्तमानसम् । पुनः कीदृशम् ? विरहानलेन वियोगाग्निना दग्धं वपुः शरीरं यस्य । [22]अत एव अविलासं निश्चलम् । मृतस्तु निश्चलो भवति ॥६॥

---

1. भाविनि–ड.ग. 2. एवमप्यप्रसन्नां प्रतिभाति इवाह–अ.व. 3. प्रतिभीत इवाह–फ. 4. हे भामिनि–ग. हे भाविनि–फ.हृ.ज. 5. वर्णितं–अ. 6. किञ्च–इ.फ.ग.हृ.ज. 7. विनिहितमनसं–इ.फ.ग.हृ.ज. 8. दत्तम्–अ.व. 9. किञ्च–इ.फ.हृ. नास्ति–ग.ज. 10. नास्ति–अ.ब. 11. विलासरहितम्–इ.फ.ग.हृ.ज. 12. देहैकजीवनमात्रं–इ.फ.ग.हृ.ज. 13. तः 18. पर्यन्तं नास्ति–ल.म. 14. राधे–क. 15. नास्ति–क.ल.म. 16. प्रयच्छ–क. 17. तव–क. 19. नास्ति–ड. 20. नास्ति–ड.ल.म. 21. नास्ति–क 22. अतः विलासं–क.

शशिमुखि मुखरय मणिरशना[1]गुणानुगुणमनुगुणकण्ठनिनादम् ।
[2]श्रुतिपुटयुगले पिकरुतविकले मम शमय चिरादवसादम् ॥७॥

जयन्ती

अधरेति । हे भामिनि भामः क्रोधोऽस्या अस्तीति भामिनी तत्सम्बुद्धिः । अधर एव सुधारसः तं उपनय निवेदय, देहीति यावत् । अतः त्वयि विहितं मनः यस्य तम् । विरह एवानलो वह्निः तेन दग्धं प्लुष्टं वपुः देहो यस्य तमिव अविलासं शृङ्गारचेष्टाविहीनं दासं मां जीवय । अत्र रूपकोत्थापिताविलास-रूपचेष्टाभावनिमित्तमृतसम्भावनाद्वस्तूत्प्रेक्षा स्वतःसिद्धा । मृतोपमाऽपि । सुधा-याः जीवकत्वेन साधारणधर्मेणोपमाऽपि भाति । अनयोरिवशब्दस्य तुल्यत्वा-त्सन्देहसङ्करः ॥६॥

सञ्जीवनी

(शशिमुखीति ।) किञ्च हे शशिमुखि चन्द्रवदने श्रुतियुगले कर्णयुगे मणिरशनागुणं [3]काञ्चीदाम मुखरय वाचालङ्कारय; [4]सुरतविपरीतं विधाय वाचालङ्कारयेत्यर्थः । कीदृशम् ? अनुगुणः सदृशः कण्ठस्य निनादः कूजितं यत्र तम् । [5]कीदृशे श्रुतियुगले ? पिकरुतैः कोकिलशब्दैर्विकले व्याकुले । विरहिणां तद्ध्वनिः दुःखद एव । तदर्पणेनावसादं [6]सन्तापं मम शमय नाशय । "रसना काञ्चिजिह्वयोः" इति [7]विश्वः (७१.३०) ॥७॥

पदद्योतनिका

शशीति । हे शशिमुखि चन्द्रवदने त्वं मणिरसनागुणं काञ्चीदाम मुखरय [8]शब्दं [9]कारय । कीदृशम् ? अनुगुणः सदृशः कण्ठनिनादो यस्य । कण्ठगीतनादसदृशमित्यर्थः । त्वं मम श्रुतियुगले [10]कर्णयुग्मे चिरात्तव विरहेण योऽवसादः खेदस्तं [11]शमय । खेदे कारणमाह । कीदृशे ? पिकरुतः कोकिल-शब्दैर्विकले दुःखिते ॥७॥

---

1. गुणकिङ्किणिमधुरनिनादम्—च. गुणमनुगुणकण्ठनिनादम्—ङ. 2. श्रुतियुगले—च.ङ. 3. नास्ति—अ.ब. 4. सुरतं विपरीतं—फ.ज. 5. किञ्च—इ.फ. ग.ह.ज. 6. तापं—इ.ग. 7. मेदिनीकारः—अ.ब.इ.फ.ग.ह.ज. 8.–10. नास्ति—क. 11. नास्ति—क.ल.म.

[1]मामतिविफलरुषा विफलीकृतमवलोकितुमधुनेदम् ।
[2]मीलति लज्जितमिव नयनं तव विरम विसृज रतिखेदम्॥८॥

जयन्ती

शशिमुखीति । शशीव चन्द्र इव मुखं यस्याः तत्सम्बोधनम् । मणिरशनायाः रत्नखचितकाञ्च्याः गुणे किङ्किणीरूपे इत्यनुकरणम् । किङ्किणीति मधुरः श्राव्यः निनादः शिञ्जितरूपः ध्वनिः तम् । "भूषणादेस्तु शिञ्जितम्" इत्यमरः (१.७.२४) । मुखरय प्रकटय । अतः कुत्सितं रुतं कोकिलानां ध्वनिः तेन विकले विह्वले; उद्दीपनत्वात् । "तिरश्चां वासितं रुतम्" इत्यमरः (१.७.२५) । मम श्रुति(पुट)युगले कर्णद्वयेऽपि चिरात् अवसादं बहुकालस्थितं दुःखं शमय । अत्र निकटागमनसमये विपरीतादिसमये काञ्चीध्वनिर्भवतीति भावः ॥७॥

सञ्जीवनी

एवं श्रुत्वा किञ्चिद्विलोकयन्तीं ईषत्प्रसन्नां प्रत्याह—मामिति । हे प्रिये ! [3]इदानीं तवेदं नयनं मां [4]अवलोकितुं द्रष्टुं मीलति मुद्रां प्राप्नोति । किमिव ? लज्जितमिव । [5]रतौ विहिताचारणादिति । कीदृशं माम् ? अतिविफलरुषा अतिशयनिरर्थकक्रोधेन विफलीकृतं प्रियावलोकनादिसुखवञ्चितम् । नयनविशेषणं वा । विरम निष्फलक्रोधात् । रतौ खेदं श्रमं क्रीडादैन्यं वा विसृज त्यज । सुरतमोहं [6]मा सृजेः विसृजेति ध्वनिः ॥८॥

पदद्योतनिका

मामिति । हे राधे ! तवेदं नयमं नेत्रमधुना मां अवलोकितुं द्रष्टुं लज्जितमिव मीलति [7]पिधत्ते । कीदृशं [8]माम् ? अतिविफलरुषाऽतिनिष्फल—[9]कोपेन विफलीकृतं दुःखितम् । नयनविशेषणं वा । [10]विफलीकृतं कर्णान्तरं प्रापितं अत एव निष्फला[11]द्रोषाद्विरम विरक्ता भव । रतिखेदं क्रीडादैन्यं विसृज त्यज ॥८॥

1. मामपि विकिर रुषा विकलीकृतमवलोकितमधुनेदम्—च. 2. मीलित—च. 3. नास्ति—अ.ब. 4. अविलोकयितुं—ग. 5. कृता—अ.ब.फ. ग.ह. कृतौ—इ. 6. मादृशे—इ.फ.ग.ह.ज. 7. उपधत्ते—ड. 8. नास्ति—क. 9. रोषेण—क. 10. नास्ति—क. 11. दोषाद्विरम—ड.

श्रीजयदेवभणितमिद[1]मनुपदनिगदितमधुरिपुमोदम् ।
जनयतु रसिकजनेषु [2]मनोरमरतिरसभावविनोदम् ॥९॥

जयन्ती

मामिति । रुषा कोपेन विफलीकृतः अवमानितः तम् । याहीत्यादिना अधिकृतः । श्रान्तं वा मामपि माधवमपि अवलोकितमेव प्रेक्षणमेव मधु क्षौद्रं तेन विकिर सिञ्च । अवलोकनसत्कारेण अवमानापनोदो भविष्यतीति भावः । इदं तव नयनं मीलितं लज्जया मीलितमिव तिष्ठतीति शेषः । नेत्रे प्रसारयतीति भावः । त्वं विरम विश्रममेहि । रतौ रतिनिमित्तं खेदं विसृज । कोपानलेनाधुना मीलितं लज्जितहेतुकत्वेनोत्प्रेक्षणाद् धर्मोत्प्रेक्षा ॥८॥

सञ्जीवनी

(श्रीजयदेवेति ।) श्रीजयदेवभणितं कथितं इदं गीतं रसिकजनेषु एतत्सम्भावितान्तःकरणेषु मनोरमं [3]रतिजनकं [4]रतिः सम्भोगः शृङ्गाररसभावाः सञ्चारिसात्त्विकादयः तैस्तेषां वा विनोदं कौतुकं जनयतु [5]उत्पादयतु । कीदृशमिदम् ? अनुपदं [6]प्रतिपदं निगदितो मधुरिपुमोदः कृष्णहर्षो यत्र [7]तत् । अथ वैवं सम्बन्धः । श्रीजयदेवभणितं श्रियः राधायाः दर्शनेन जयः आनन्दो यस्य दीव्यति क्रीडति इति देवः, स चासौ श्रीकृष्णस्तेन भणितं श्रीराधां प्रति मामनुसरेत्यनुनय[8]वाक्यकथितम् । कीदृशम् ? अनुपदं निगदितं मधुरिपोः [9]स्वस्य मोदो [10]हर्षो यत्र तादृशम् । अन्यत्समानम् । "मुत्प्रीतिः प्रमदो हर्षः" इत्यमरः (१.४.२४) ॥९॥

[11]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां त्रयोविंशः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेवेति । श्रीजयदेवभणितमिदं गीतं रसिकजनेषु शृङ्गारलोकेषु मनोरमं [12]मनःप्रीतिकरं रतिः सम्भोगः रसः शृङ्गारः भावाः सञ्चारिणः

---

1. मनुपम–च. 2. मनोरमरचितसभावविनोदम्–च. 3. रतिरञ्जकं –ग. 4. रतिरसभावाः शृङ्गाररसभावाः–फ.ज. 5,6. नास्ति–अ.ब. 7. तम् –अ.ब.इ.फ.ग.ह.ज. 8. वाक्यं कथितम्–फ.ग.ह.ज. 9. तस्य–ग. 10. नास्ति –अ.व. 11. नास्तीयं पुष्पिका–अ.ब.इ.फ.ग.ह.ज. 12. मम मनःप्रीतिकरं–ड. मनःप्रीतिकरं रतिकरं–क.

चतुर्विंशः प्रबन्धः

प्रत्यूहः [1]पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूत[2]विलोकितेऽधरसुधापाने [3]कथानर्मभिः ।
[4]आनन्दाभिगमेऽपि मन्मथकलायुद्धेऽपि यस्मिन्नभू-
तुद्भूतः स तयोर्बभूव सुरतारम्भः प्रियम्भावुकः ॥१॥

सात्त्विकादयः तेषां विनोदं कौतुकं जनयतु । कीदृशमिदम् ? अनुपदं पदे पदे निगदित उक्तो मधुरिपोर्मोदो हर्षो यत्र ॥९॥

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां त्रयोविंशः प्रबन्धः ।

जयन्ती

श्रीजयदेवेति । अनुपमः असदृशः निगदितो मधुरिपोः कृष्णस्य मोदः क्रीडा येन तत् । इदं श्रीजयदेवस्य भणितं वचनं कर्तृ; रसिकाः साहित्यरसज्ञाः जनाः तेषु मनोरमरचितः सुन्दरतया जनितः, भावैः सात्त्विकादिभावैः सहितं यथा स्यात्तथा विनोदं हर्षं, कर्म; जनयतु ॥९॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां त्रयोविंशः प्रबन्धः ।

सञ्जीवनी

तमनुवर्ण्य प्रियं [5]प्रति भाविसुरतारम्भमाह–प्रत्यूहेति । तयोः [6]राधाकृष्णयोः स सुरतारम्भः प्रियम्भावुकः प्रियभवनशीलः परमसुखकर्ता वा उद्भूतः प्रकटो बभूव । स कः ? यस्मिन् निबिडाश्लेषे गाढालिङ्गने कर्तव्ये सुरतारम्भे पुलकाङ्कुरेण [7]रोमाञ्चोद्गमेन प्रत्यूहः आलिङ्गनविघ्नोऽभूत् । किञ्च [8]यस्मिन् सुरतारम्भे सुरतक्रीडायां यदाकूतमभिप्राय[9]पूर्वकमन्योन्यालोकितं तस्मिन्निमेषेण [10]पक्ष्मचाञ्चल्यं तेन प्रत्यूहोऽभूत् । किञ्च [11]नैतावदपरमपि तु । [12]सुरतारम्भे अधरसुधापाने विधेये कथानर्मभिः रहःकथाकौतुकैः प्रत्यूहोऽभूत । किञ्च[13] सुरतारम्भे आनन्दाभिगमेन आनन्दप्राप्त्या मन्मथकला-

---

1. पुलकाकरेण–च. 2. विलोकने–च. 3. कथाकेलिभिः–नि.सा.ड. सुधानर्मभिः–च. 4. आनन्दाधिगमेन–नि.सा.ड.च. 5. प्रतिभाति–अ.ब. 6. श्रीवृषभानुसुताश्रीनन्दकुमारयोः–ग. 7. रोमोद्गमेन–इ.फ.ग.ह.ज. 8. एवं सुरतारम्भे क्रीडायां सुरतक्रीडायां–अ.ब. 9. पूर्वकमवलोकितं–अ.ब. 10. पक्ष्मचलनेन–इ.ग.ह. पक्ष्मलेन–फ.ज. 11. नैतावदपरमपि–अ.ब. 12. तः 13. पर्यन्तं नास्ति–अ.ब.

युद्धे कामचतुष्षष्टिकलान्वितसङ्ग्रामे प्रत्यूहोऽभूत् । [1]एतैः सुरते विघ्नबाहुल्याद्विपरीतरतस्य [2]दुर्गेयता दुर्लभता च कथिता ॥१॥

पदद्योतनिका

प्रत्यूह इति । तयो राधाकृष्णयोः सुरतारम्भः [3]प्रियं भावितुं शीलं यस्य स उद्भूतः प्रकटो बभूव । स कः ? यस्मिन् सुरतारम्भे निबिडाश्लेषे गाढालिङ्गने कर्तव्ये पुलकाङ्कुरेण रोमोद्गमेन प्रत्यूहो विघ्नोऽभूत् । व्यवधानकर्तृकत्वा[4]द्रोमोद्गमस्य । यस्मिन् सुरतारम्भे क्रीडाकूतविलोकिते क्रीडासु अभिप्रायपूर्वकं यद्विलोकितं तस्मिन् कर्तव्ये निमेषेण पक्ष्म[5]चलनात्प्रत्यूहः । [6]यस्मिन् अधरसुधापाने [7]ओष्ठामृतपाने [8]कर्तव्ये [9]कथाकेलिभिः [10]कथाक्रीडाभिः प्रत्यूहोऽभूत । [11]अपिः समुच्चये । यस्मिन् मन्मथकलायुद्धे कामकलान्वित[12]सङ्ग्रामे कर्तव्ये आनन्दाधिगमेन आनन्दप्राप्त्या प्रत्यूहोऽभूत् । [13]च्युत्याऽऽनन्दाप्तिः ॥१॥

जयन्ती

एवं भगवद्वचनत्वेनानु(नय)प्रकारं वर्णयित्वा कविः सुरतं वर्णयति— प्रत्यूह इति । यस्मिन् सुरतारम्भे निविडो गाढश्चासौ आश्लेषः तस्मिन् सति पुलकानां रोमाञ्चानां आकरः खनिः समुदाय इति यावत्; तेन प्रत्यूहः विघ्नः अभूत् । क्रीडाया आकूतेन अभिप्रायेण भावेन विलोकने निरीक्षणे निमेषेण प्रत्यूहः । अधर एव सुधा तस्याः पाने चुम्बन इत्यर्थः; सुधावन्नर्माणि विनोदवचनानि तैः प्रत्यूहः । नर्मगोष्ठचर्थमेव चुम्बनत्यागः । चुम्बनकाले वक्तुमशक्यत्वात् प्रत्यूहः । मन्मथस्य कलायुद्धे बन्धविशेषकरणरूपे सुरते आनन्दः विगलितवेद्योत्तरतासहितसुखातिशयः तस्याधिगमः प्राप्तिः तेन प्रत्यूहः । सततबन्धादिकरणे सुखातिशय एव उद्भूतः प्रतिबन्धकः महानभूत् । सः तयोः

---

1. एतः सुरतैर्विघ्नबाहुल्यं विपरीतरसस्य दुर्लभता च कथिता—ग. एतैः सुरते विघ्नबाहुल्यं विपरीतरसस्य दुर्लभता च कथिता—इ.फ.ह.ज. 2. नास्ति—इ. 3. प्रियमासमन्ताद्भवितुं—क. 4. रोमोद्गमो यस्य—ड. 5. चलनेन प्रत्यूहोऽभूत्—क. 6. यदधर—ड. 7. नास्ति—ड.ल.म. 8. नास्ति—ड. 9. नास्ति—क. 10. कथानर्मभिः—क. कथामनोभिः—ल. नास्ति—म. 11. च्युत्या आनन्दाप्तिः तया मन्मथकला युद्धेऽपि प्रत्यूहोऽभूत्—ड. 12. सम्भ्रमे—ल. 13. प्रीत्या आनन्दप्राप्तिः—क. च्युतानन्दाप्तिः—च. च्युत्यानन्दाप्तिः—म.

दोर्भ्यां संयमितः पयोधरभरेणापीडितः पाणिजै-
राविद्धो दशनैः क्षताधर[1]पुटः श्रोणीतटेनाहतः।
हस्तेनानमितः [2]कचेऽधरमधुस्यन्देन संमोहितः
कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः ॥२॥

राधामाधवयोः सुरतस्यारम्भः प्रियं इष्टं भावुकः इष्टजनकः बभूव। अत्र पुलकनिमेषनिमित्तानां आनन्दानां प्रसूतानामेव प्रत्यूहत्वक्रियान्वयात् तुल्ययोगिताऽलङ्कारः। पुलकान्निमेषः स इवान्य इति सादृश्यगम्यत्वात्।

"प्रस्तुतानां तथाऽन्येषां केवलं तुल्यधर्मतः।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता।"

इति विद्यानाथोक्तलक्षणात् ॥१॥

सञ्जीवनी

सुरतमेव विचित्ररसारम्भेण [3]दर्शयति—दोर्भ्यामिति। दोर्भ्यां बाहुभ्यां सापराध इवालिङ्गने संयमितो यन्त्रितः। किञ्च पयोधरभरेण[4] [5]स्तनभारेणापीडितः। किञ्च पाणिजैर्नखैराविद्धः [6]खण्डितः। (दशनैः) दन्तैः क्षताधरपुटः व्रणिताधरः। श्रोणितटेन नितम्बेनाहतः [7]सम्मर्दितः। किञ्च [8]कचे केशे धृत्वा हस्तेनानमितो नम्रीकृतः पादयोर्दास इव। किञ्च अधरमधुस्यन्देन अधरामृतद्रवेण सम्मोहितो विस्मृतान्य[9]करणः कृतः। एवं विडम्बितोऽपि कान्तः [10]श्रीकृष्णः कामप्यनिर्वचनीयां तृप्तिमवाप। तत्ततो हेतोः अहो आश्चर्ये; कामस्य वामा विरुद्धा गतिः [11]स्थितिः। [12]अथ वा वामयति [13]नामयति वामा पराभवकारिणी वामा मनोज्ञा वा। एतेन विपरीतसुरतं स्पष्टमेवोक्तम्। "वामो विरुद्धशीले स्यात् क्रूरे रम्येऽपि कथ्यते" इति [14]हलायुधः। नायकप्रार्थितो दण्डः प्रसादत्वेन विनियुक्त इति ध्वनिः ॥२॥

---

1. दलः—च. 2. करे—च. 3. तः 4. पर्यन्तं नास्ति—ज. 5. नास्ति—अ.ब.ग. 6. नास्ति—अ.ब. 7. नास्ति—ग. 8. केशे धृत्वा—अ.ब. कचकेशे धृत्वा—इ. 9. रसः—इ.फ.ग.हृ.ज. 10. श्रीनन्दसूनुः—ग. 11. स्थितः—अ. कृतः—ब. 12. यद्वा—ग. 13. नामयतीति—इ.फ.ग.हृ.ज. 14. नास्ति हलायुधे

[1]माराङ्के रतिकेलिसङ्कुलरणारम्भे तया साहस-
प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि [2]यत्साहसात् ।

पदद्योतनिका

दोर्भ्यामिति । कान्तः कृष्णः कामप्यनिर्वचनीयां तृप्तिं [3]सन्तोषमाप । कीदृशः कृष्णः ? दोर्भ्यां बाहुभ्यां संयमितो बद्धः । पुनः कीदृशः ? पयोधरभरेण [4]स्तनभारेणापीडितः । पाणिजै [5]र्नखरैराविद्धः खण्डितः । दशनैर्दन्तैः क्षतमधरपुटं यस्य सः । श्रोणीतटेन कटिप्रदेशेनाहतस्ताडितः । कचे केशबन्धे हस्तेनानमितो नम्रीकृतः । अधरमधुस्यन्देन ओष्ठामृतद्रवेण सम्मोहितः । एवम्भूतो [6]तृप्तिमवाप । [7]अहो आश्चर्ये । कामस्य गतिः स्थितिर्वामा विपरीता । अस्मिन् श्लोके विपरीतसुरतं द्योतितम् ॥२॥

जयन्ती

"घटय भुजबन्धन" मित्यादिप्रार्थनया प्रार्थितप्राप्तिरभूदित्याह—दोर्भ्यामिति । दोर्भ्यां बाहुभ्यां संयमितः यन्त्रितः, राधयेति शेषः । पयोधरयोः भरेण आपीडितः । आविद्धः आच्छिन्नः । नखानां छेदकत्वेऽपि मृदुत्वद्योतनार्थं आविद्ध इत्युक्तम् । मार्जार्याः शिशुधारणवत् । दशनैः दन्तैः क्षतं दंशितं अधरपुटं येन सः । पुटशब्दस्य छाद्यच्छादकद्वयार्थत्वेनोत्तरोष्ठस्य चुम्बनं रसिकासम्मतमिति 'दल' इति सम्यक्पाठः । 'क्षतोऽधरतल' पाठेन क्रमभङ्गः । श्रोणीतटेनाहतः परस्परवेगेन नुन्नः । करेण कृष्णस्य कान्तायाः हस्तेन आनमितः करं धृत्वा बन्धादौ नमित । अधर एव मधु मद्यं तस्य स्यन्देन सम्मोहितः चित्तभ्रंशीकृतः कान्तः कामपि अवाग्गोचरां तृप्तिं तोषरूपां आप प्राप । तत् अहो आश्चर्यम् । कामस्य गतिः वामा वक्रा आघातादिना तोषजनकत्वात् । अत्र सामान्यतः कामगतेः वक्रत्वेन राधामाधवक्रीडायाः समर्थनादर्थान्तरन्यासः । हिशब्दाभावाद्गम्यः ॥२॥

सञ्जीवनी

तामेव तृप्तिं विशिनष्टि-माराङ्क इति । अनया श्रीराधया [8]साहसप्रायं [9]साहसबहुलं कान्तजयाय श्रीकृष्णजयं कर्तुं तदुपरि किञ्चिल्लोकोत्तरं सुरतमिति

1. वामाङ्के–नि.सा. वामाङ्गे–च. 2. यत्सम्भ्रमात्–नि.सा.ड.च. 3. सन्तोषं प्राप–क. 4. पीडितः–क. 5. नखैः–क.ल. 6. तृप्तिमाप–क.ल.म. 7. अहो इत्याश्चर्ये–क. 8. नास्ति–ह. 9. न बहुलं–ग. साहसबहुकालं–फ.ज.

निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं
वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिद्धयति ॥३॥

शेषः; रतिकेलिसङ्कुलरणारम्भे रतिकेलिभिः संश्लेषचुम्बनादिभिः सङ्कुले व्याप्ते रणारम्भे सङ्ग्रामोपक्रमे [1]यत् यदा प्रारम्भि तदा साहसात्सम्भ्रमा[2]ज्जघनस्थली निष्पन्दा निश्चलाऽभूदिति शेषः। [3]कीदृशम्? [4]कामस्याङ्कः छिद्रं नखक्षतादि [5]यत्र[6]। किञ्च दोर्वल्लिर्बाहुलता [7]शिथिलिता श्लथीभूता। वक्षो हृदयं उत्कम्पितम्। अक्षि चक्षुर्मीलितं [8]मुद्रितम् आलिङ्गनाय; केनापि रसविशेषेण सर्वं जातमिति भावः। एवं कृतोऽपि स्त्रीणां पौरुषरसः [9]पुरुषाभिलाषः कुतः कथं सिद्धयति; अपि तु न सिद्धयेदेवेत्यर्थः। "सङ्कीर्णे [10]सङ्कुलेऽपि" इति यादवः ॥३॥

पदद्योतनिका

माराङ्क इति। तया राधया कान्तजयाय कृष्णजयं कर्तुं माराङ्के [11]मारस्य कामस्याङ्कः चिह्नितं यस्मिन् कामचिह्ने रतिकेलिः सुरतक्रीडा चुम्बनादिस्तया सङ्कुलो व्याप्तो यो रणः सङ्ग्रामस्तस्यारम्भे उपक्रमे कामयुद्धारम्भे इत्यर्थः। साहसप्रायं साहसबहुलं यत्किञ्चिदुपरि कृष्णोपरि सम्भ्रमाद्वेगादारम्भि आरब्धं तदा जघनस्थली निष्पन्दा निश्चलाऽभूत्। दोर्वल्लिर्बाहुलता शिथिलिताऽभूत्। वक्षः उत्कम्पितमभूत्। [12]अक्षि चक्षुः मीलितं मुद्रितमभूत्। अतः स्त्रीणां पौरुषरसः पराक्रमाभिलाषः कुतः कथं सिद्धयति न सिद्धयत्येवेत्यर्थः। सङ्ग्रामपक्षे मारो मरणमङ्कं चिह्नं यस्मिन्। [13]विपरीतसुरतं विवक्षितमत्र ॥३॥

जयन्ती

रतान्तं वर्णयति—वामाङ्ग इति। वामानि सुन्दराणि वक्राणि वा अङ्गानि उत्तानस्थितव्यानतोपविष्टादिनानाकरणानि यस्मिन्। रतिकेलयः सुरतक्रीडाः ताभिः सङ्कुलः ततो रणः सुरतरूपः तस्य आरम्भे उपक्रमे तया

1. यद्यदारम्भे–ग. 2. जघनस्थलीभिः स्पन्दा–अ.ब. 3. तः 6. पर्यन्तं नास्ति–अ.ब. 3. नास्ति–ग. 4. मारस्याङ्कः–फ.ज. 5. यत्–इ. 7. नास्ति–ग. 8. मुद्रिताङ्कम्–अ.ब. 9. पुरुषरसः पुरुषाभिलाषः–फ.ज. 10. सङ्कुले व्याप्ते–इ.फ.ग.ह.ज. 11. नास्ति–ड. 12. अक्षि मीलितमभूत्–क. 13. विपरीतं–क.

तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ
[1]निर्धूताधरशोणिमा विलुलितस्रस्तस्रजो मूर्धजाः ।
काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-
रेभिः कामशरैस्तदद्भुत[2]मभूत्पत्युर्मनः कीलितम् ॥४॥

कान्तया कान्तजयाय प्रियापेक्षया उत्कर्षरूपजयाय साहसमेव प्रायः आधिक्यं तत् स्वस्याः [3]आयासमात्रस्यैव जनकं न सुखकलाविशेष इति भावः । किञ्चित्करणबन्धादिविशेषात्मकं सम्भ्रमात् अविचारात् उपरि प्रियोपरिभागे प्रारम्भि; भावे प्रयोगः; उपक्रान्तं उद्युक्तं पुरुषायितमारब्धमित्यर्थः । तदा किं किमासीत्त-दाह । जघनस्थली निर्गतः स्पन्दो यस्या सा अभूत् । दोर्वल्लिः भुजलता शिथिलिता श्लथा । गाढालिङ्गनेन विश्लथं जातमित्यर्थः । वक्षः हृदयं उत्कम्पितं अतिशयेन चलितम् । अक्षि नेत्रयुगं मीलितं अवलोकनासमर्थमभूदिति प्रत्येकान्वयार्थं अध्याहारः । स्त्रीणां पौरुषरसः पुम्भावः कुतः सिद्धयति; स्त्रीत्वा-देव पुरुषक्रियमाणव्यापारः दृढवेगगाढालिङ्गननिर्भीकत्वावलोकनादिकः न निष्प-द्यत इति आयासमात्रकरणम् । एव सुरतारम्भवर्णितैः आनन्दातिशयोऽभूदिति भावः । अत्र सामान्यतः स्त्रीणां पुरुषत्वासिद्धया प्रकृतराधायाः स्त्रीविशेषस्य पौरुषाभावसमर्थनात् अर्थान्तरन्यासालङ्कारः । हि शब्दाभावाद्गम्यः । जघन-स्थल्यादीनां अध्याहृतक्रियया दीप्यमानत्वात् क्रियादीपकालङ्कारः । तेन च खलेकपोतन्यायेन पृथगन्वयात्समुच्चयालङ्कारः । उद्देश्यविधेययोः निष्पन्दजघन-स्थल्योर्वा पर्यायव्यतिक्रमादविमृष्टविधेयांशः नोद्भावनीयः । अर्थतोऽन्वये तदनु-दयात् । आरब्धक्रमपरित्यागात् ध्वनिर्वा स एव गुणः ॥३॥

सञ्जीवनी

एवं पुरुषायितेन स्वजयमलभमाना स्वस्वभावमवलम्ब्य [4]आत्मजयं कृतवतीति; तामेव [5]जयसम्पत्तिमाह—तस्या इति । एभिः पूर्वोक्तै कामशरैः पत्युर्मनः कीलितं वशीकृतं तदद्भुतमाश्चर्यमभूत् । [6]मनसाऽप्य[7]यमन्यवधूं मा ग-च्छेदिति [8]भावः । कीदृशैः ? [9]प्रातर्निखातैः [10]प्रातः [11]प्रात.काले दृशोर्नेत्र-

---

1. निर्धौता.नि.सा. निर्धूतो—ड. निर्द्धौतोऽधरशोणिमा—इ.फ.ग.हृ.ज.
2. महो—च. 3. आयासमात्रमेव—च. 4. प्रजयं—अ.ब. 5. रससम्पत्ति—अ.ब.
6. मनसाऽप्यन्यवधूं—ग. 7. अन्यवसुं मा गच्छेदिति—अ.ब. 8. नास्ति—अ.ब.
9. तः 11. पर्यन्तं नास्ति—अ.ब. 10. नास्ति—ग.

योर्निखातैरारोपितैः। के ते शराः ? तानाह-तस्या [1]राधायाः उरः पाटलपाणिजैः [2]रक्तनखैरङ्कितं चिह्नितम् । तस्या दृशौ नयने [3]निद्राकषायेऽतिलोहिते । तस्या अधरशोणिमा अधररागः [4]निर्धूतः चुम्बनादिना । किञ्च तस्या मूर्धजाः केशाः विलुलिताः स्रस्ताः शिथिलिताः स्रजो माला येभ्यस्ते । तस्याः दर ईषत् श्लथं शिथिल अञ्चलं वस्त्रान्तं तादृशं काञ्चीदाम मेखलागुणः । नीवीमोचनान्तानि कामपञ्चशरत्वेन निरूपितानि । अन्यत्र निखातैर्बाणैरन्य[5]त्कीलितमिदमत्याश्चर्यमित्यर्थः ॥४॥

पदद्योतनिका

तस्या इति । एभिः पूर्वोक्तैः कामशरैः पत्युः स्वामिनो मनः कीलितं विद्धम् । तदद्भुतमाश्चर्यमभूत् । किम्भूतैः [6]कामशरैः ? [7]प्रातःकाले दृशोर्नयनयोर्निखातैरारोपितैः[8] । इतीति किम् ? तस्या राधाया उरः पाटलपाणिजैः श्वेतरक्तनखैरङ्कितं चिह्नितम् । तस्या निद्राकषाये निद्रालोहिते दृशौ नेत्रे । तस्या निर्धूतः अधरशोणिमा अधर[9]लौहित्यम् । तस्या विलुलिता म्लानाः स्रस्ताः शिथिलाः [10]स्रजो माला येभ्यस्ते मूर्धजाः केशाः । दर ईषत् श्लथं शिथिलं अञ्चलं वस्त्रं [11]एतादृशं काञ्चीदाम मेखलागुणः । नखक्षतजागरणचुम्बनकेशाकर्षणनीवीमोचनानि पञ्चशरत्वेन निरूपितानि । अन्यत्र निखातैर्बाणैरन्यत्कीलितमित्याश्चर्यमित्यर्थः ॥४॥

जयन्ती

तस्या इति । तस्या राधायाः पाटलानि ईषद्रक्तपाण्डुराणि पाणेः जाताः तेषां नखानां अङ्कानि चिह्नानि यस्मिन् तत् । भावार्थे इतच्प्रत्ययः । उरः वक्षः । निद्रया रुद्धादितया कषाये ईषद्रक्ते दृशौ । निर्धूतः चुम्बनगलितः अधरस्य शोणिमा रागः । रागाभावविशिष्टोऽधर इत्यर्थः । विलुलिताः विगलिताश्च ताः स्रस्ताश्च स्थानच्युताश्च ताः स्रजः कुसुममाला येषु ते मूर्धजाः केशाः । काञ्चीदाम मेखलैव रज्जुः दरश्लथं ईषत् शिथिलं अञ्चलं यस्य तत् । इति अनन्तरं प्रातः उषसि दृशोः निखातैः अवलोकितैरित्यर्थः । एभिः कामशरैः सक्ष-

1. श्रीकिशोर्याः–ग. 2. रक्तरेखैरङ्कितं–अ.ब. 3. निद्रया कषाये–इ.फ.ग.ह.ज. 4. निर्धौतः–इ.फ.ग.ह.ज. 5. कीलितमित्याश्चर्यमित्यर्थः–अ.ब.इ.ज. कीलितमिदमित्याश्चर्यमित्यर्थः–फ. कीलितमिदमित्याश्चर्यमिति भावः–ग. 6. तः 8. पर्यन्तं नास्ति–ल.म. 7. काले काले–क. 9. लोहितम्–क. 10, 11. नास्ति–ड.

[1]व्याकोशः केशपाशस्तरलितमलकैः [2]स्वेदलोलौ कपोलौ
[3]दष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः ।
काञ्ची [4]काञ्चिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः
[5]पश्यन्ती सत्रपं मां तदपि [6]विलुलितस्रग्धरेयं धिनोति ॥५॥

तोरःकषायनयनादिभिः राधापत्युः कान्तस्य मनः कीलितं दृढलग्नमिति यत् तत् अद्भुतं आश्चर्यम् । अहो इत्याश्चर्ये । अत्र एभिः कामशरैरिति निरवयवं रूपकम् । पाणिजाङ्कितत्वादीनि कुण्ठताभिप्रायकाणीति परिकरालङ्कारः । तदुत्थापिता कार्यज्ञानरूपा विशेषोक्तिः । विकुण्ठशरकार्यमन्तरकीलनं तदनुत्पत्तेरिति कार्याजनिर्विशेषोक्तिः । 'सति पुष्कलकारणे' इति लक्षणात् । इत्यद्भुतरसः शृङ्गार(रस)स्याङ्गमिति रसवदलङ्कारः ॥४॥

सञ्जीवनी

तदेवाह—व्याकोश इति । इयं [7]श्रीराधा तदपि मां धिनोति प्रीणयति । यद्यपि केशपाशः केशकलापो व्याकोशो विलुलितो जातः, अलकैश्चूर्णकुन्तलैस्तरलितं इतस्ततः प्रसृतम् । कपोलौ [8]स्वेदलोलौ स्वेदेन [9]सात्त्विकभावजलेन चञ्चलौ । बिम्बाधरश्रीर्दष्टा खण्डिता । [10]कुचकलशरुचा कान्त्या हारयष्टिः हारकलापः हारिता निर्जिता । काञ्ची मेखला काञ्चित् [11]आशां गता चलिता । तथाविधा जाताऽपि [12]किं कुर्वती ? हस्तेन स्तनजघनपदं स्तननितम्बभागमाच्छाद्य सद्यः शीघ्रं सत्रपं सलज्जं मां पश्यन्ती । कीदृशी ? विलुलितां म्लानां स्रजं धारयन्ती । मज्जयाय कृतप्रयत्ना स्वयमेव [13]प्राप्तपराभवेति भावः ॥५॥

---

1. व्यालोलः—ड.च. 2. स्वेदमोक्षौ—नि.सा. 3. स्पष्टा दष्टाधरश्रीः—ड. क्लिष्टा बिम्बाधरश्रीः—च. 4. कान्तिर्हृताशा—नि.सा. काञ्चि किञ्चिद्गताशां—ड. काञ्ची किञ्चिद्गताशां—च. 5. पश्यन्ती सत्रपा सा—नि.सा. पश्यन्ती ह्यात्मरूपं—ड. 6. विलुलिता मुग्धकान्तिर्धिनोति—नि.सा. विलुलल्लज्जिता रक्तभावात्—च. 7. श्रीवृषभानुकुमारी—ग. 8. नास्ति—फ.ग.ज. 9. सात्त्विकभावजेन—ह. 10. कुचकलशे रुचा—इ. 11. आशां दिशान्तरं—ग. 12. नास्ति—ग. 13. पराभवेति भावः—ग. पराभूता इति भावः—फ.ज.

[1]मीलद्दृष्टि मिलत्कपोलपुलकं सीत्कारधारावशा-
दव्यक्ताकुलकेलि काकुविकसद्दन्तांशुधौताधरम् ।

पदद्योतनिका

व्यालोल इति । इयं राधा तदपि तथापि धिनोति [2]प्रीणयति [3]अर्थात् कृष्णम् । कीदृशी राधा ? पाणिना हस्तेन स्तनजघनयोः पदमाभोगं सद्य आच्छाद्य आत्मरूपं पश्यन्ती । पुनः विलुलितां म्लानां स्रज धारयन्ती[4] । आत्मरूपमेवाह—केशपाशो व्यालोल इतस्ततो [5]विक्षिप्तोऽभवत् । अलकैश्चूर्णकुन्तलैस्तरलितं स्थानाच्चलितम् । कपोलौ स्वेदेन घर्मजलेन लोलौ व्याप्तौ । दष्टाधरश्रीः खण्डिताधरलक्ष्मीः स्पष्टा व्यक्ता । कुचकलशरुचा स्तनघटदीप्त्या हारयष्टिः [6]मुक्तामाला हारिता दूरीकृता । काञ्ची रसना काञ्चिदाशां दिशं गता[7]चलिता । यद्यपीति सर्वत्र योजनीयम् ।.५।।

जयन्ती

व्यालोलेति । केशा एव पाशाः मोहकत्वात्पाशत्वारोपः । व्यालोलः गलितबन्धकत्वात्परिलम्बमानः; अलकैः तरलितं, भावे प्रयोगात् अलकाः चलिता इत्यर्थः । कपोलौ स्वेदलोलौ स्वेदार्द्रतया गलितचित्रलेखावित्यर्थः । बिम्वाधरश्रीः क्लिष्टा । सक्षतत्वात्सवेदनोऽधर इति भावः । कुचकलशयोः रुचा कान्त्या हारयष्टिः मुक्ताहारलता हारिता प्रमोषिता । हाराभावाद्विगतश्रियौ कुचावित्यर्थः । पाणिना सद्यः तत्काले आच्छाद्य सान्द्ररूपं कान्तिमित्यर्थः । पश्यन्ती । तदपि च तथापि रक्तस्य सम्भोगासक्तस्य भावात् । विलुलद्विशेषेणोदयद्यथा स्यात्तथा लज्जिता अभूदित्यर्थः । स्रग्धरावृत्तम् ।।५।।

सञ्जीवनी

एवं पुरुषायित[8]विलासमुक्त्वा मुखपान[9]सौख्यमाह—मीलदित्यादिना । धन्यः [10]श्रीकृष्णः कुरङ्गीदृशः [11]मृगीदृशः श्रीराधायाः आननं मुखं धयति

1. ईषन्मीलितदृष्टि मुग्धविलसत्सीत्कार–नि.सा. ईषन्मीलितदृष्टि मुग्धहसित सीत्कार–ड. ईषन्मीलितमुग्धदृष्टिहसितं–च. 2. नास्ति–क.ल.म. 3. तः 4. पर्यन्तो भागः क.ल.म. ग्रन्थेष्वेवं दृश्यते—विह्वल इति । कीदृशीम् ? विलुलितां आम्लानां स्रजं धारयन्तीति । पुनः कीदृशी ? आत्मरूपं पश्यतीति । स्तनजघनपदं स्तनौ च जघनपदं च पूर्वद्वारं इत्यर्थः । पाणिना करेण सद्य आच्छाद्य–क. अर्थात् कृष्णम् । कीदृशी ? विलुलितां म्लानां स्रजं धारयतीति–ल.म. 5. विक्षिप्तोऽभूत्–क.ल.म. 6. मुक्ताकलापः–क.ल.म. 7. नास्ति–क. 8. सुरतविलास–इ.फ.ग.हृ.ज. 9. सौभाग्यमाह–इ.फ.ग.हृ.ज. 10. श्रीनन्दनन्दनः –ग. 11. मृगनयनायाः–इ.फ.ग.हृ.ज.

[1]श्यामोत्तुङ्गपयोधरोपरिष्वङ्गी कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्यो धयत्याननम् ॥६॥

---

[2]चुम्बति । धन्योऽहमिति सादरं राधाधरामृतं पिबतीति भावः । कीदृश्याः ? हर्षस्य [3]सुरतानन्दस्योत्कर्षेणाधिक्येन विमुक्ता [4]सालसा निःसहा श्रान्ता व्यापाराक्षमा तनुर्देहो यस्याः । कीदृशः ? श्यामायाः [5]श्रीराधायाः यौ उत्तुङ्गौ [6]उच्चौ स्तनौ [7]तयोरुपरि परिष्वङ्गी आलिङ्गनस्वभावः । एतेन सुरतविरामेऽपि सुरतातृप्तिः कथिता । कीदृशमाननम् ? केनचित्सुरतानन्दसुखविशेषेण सुरतश्रमेण वा मीलद्दृष्टि मुद्रिताक्षि । कीदृशम् ? मिलतोः स्फुरद्रोमाञ्चयोः कपोलयोः पुलकानि यत्र तत् । पुनः कीदृशम् ? सीत्काराणां धारा[8]स्तासां [9]अंशवः [10]किरणश्रेणयः तद्वशात्तदधीनादव्यक्ता अप्रकटा आकुलाश्च याः [11]केलयस्तासु या काकुः क्रीडाध्वनिविशेषस्तेन विकसन्तः प्रकटीभवन्तो ये [12]दन्तास्तैः धौतः प्रक्षालितोऽधरो यत्र तादृशम् । "काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः" इत्यमरः (१.६.१२) ॥६॥

पदद्योतनिका

ईषदिति । धन्यो जनः कुरङ्गीदृशः [13]हरिणनयनायाः आननं मुखं [14]धयति । कीदृश्याः कुरङ्गीदृशः ? श्वासेन कामजनितेनोन्नद्धौ किञ्चिच्चलितौ [15]यौ पयोधरौ स्तनौ तयोरुपरि परिष्वङ्गात् यो हर्षोत्कर्षो हर्षाधिक्यं तेन विमुक्ता त्यक्ता सालसाऽत एव निःसहा कार्याक्षमा तनुर्यस्याः सा । [16]अथ वा ल्यब्लोपे पञ्चमी । परिष्वङ्गं कृत्वा आलिङ्ग्य धन्योऽधरं पिबतीति भावः । कीदृशमाननम् ? ईषन्मीलितदृष्टि मुकुलिनयनं मुग्धं सुन्दरं हसितं हास्यं यस्मिन् । पुनः कीदृशम् ? सीत्कारधारावशात्कामविकारपरम्परावशात्

---

1. शान्तस्तब्धपयोधरं भृशपरिष्वङ्गत्कुरङ्गीदृशो–नि.सा. श्वाशोन्नद्धपयोधरोपरि परिष्वङ्गात्कुरङ्गीदृशो–ड. श्वासान्नुच्चपयोधरोपरिपरिष्वङ्गात्कुरङ्गीदृशो–च. 2. पिवति–इ.फ.ग.ह.ज. 3. सुरतानन्दयोरुत्कर्षेण–अ.ब. 4. सालसा निःक्षमा–अ.ब. 5. श्रीगोपकुमार्याः–ग. 6. नास्ति–इ.फ.ग.ह.ज. 7. तयोरुपरिष्वङ्गी–ग. 8. तेषां–अ.ब.इ. 9. वशादधीनादव्यक्ता–ग.ह. 10. नास्ति–अ.ब. 11. केवलस्तेषु–अ. केलयस्तेषु–ब. 12. दन्तासु अंशवः किरणास्तैर्धौतः–ग. दन्तास्तेषां अंशवः किरणास्तैर्धौतः–ह. 13. हरिणीनयनायाः–क. 14. धयति पिबतीत्यर्थः–क. 15. नास्ति–ड.ल.म. 16. तनोः परिष्वङ्गं आलिङ्ग्य आननं धन्यो धयति पिबति इति भावः–क.

[1]अथ कान्तं रतिश्रान्तमपि मण्डनवाञ्छया ।
जगाद माधवं [2]राधा मुग्धा स्वाधीनभर्तृका ॥७॥

अव्यक्ता आकुला या केलिस्तस्यां या काकुः शोकभीत्यादिभिर्ध्वनिविशेषः तेन विकसन्तः प्रकटीभवन्तो ये दन्तांशवस्तैर्धौतः क्षालितः अधरो यस्मिन् ॥६॥

जयन्ती

ईषदिति । ईषत् स्वल्पं मीलिते सङ्कुचिते मुग्धे च ते दृष्टी यस्मिन् तच्चैतादृशं हसितं यस्मिन् तत् । मीलितमुग्धदृष्टि यथा तथा हसितं यस्मिन्निति वा । सीत्काराणां दन्तक्षतासहनजातानां धारा परम्परा तस्याः वशात् । अव्यक्ता च सा स्फुटा च सा आकुला च सा केलिकाकुः सुरतोद्भवस्वरविकारः तया विकसन्तः दृश्यमानाश्च ते दन्तास्तेषां अंशुभिः कान्तिभिः धौतः स्वच्छः अधरो यस्मिन् तत् । उच्चौ पयोधरौ तयोरुपरि परिष्वङ्गात् श्वासान् अमुञ्चदिति शेषः । हर्षस्य उत्कर्षः आधिक्यं तेन विमुक्ता [3]उपवेशनाद्यभावान्निपतिता च सा निःसहा क्षन्तुमशक्या तनुः शरीरं यस्याः तस्याः कुरङ्गीदृशः आयताक्ष्याः आननं मुखं धन्यः धयति पिबति चुम्बतीति भावः । पुण्यवतामेव गाढालिङ्गनसहिताधरचुम्बनसुखातिशयो भवतीति । शृङ्गारः सम्भोगरूपरस एव । अत्र एवम्भूताया राधाया आननं कृष्णः पपाविति प्रस्तुते विशेषे सामान्यमभिहितमिति अप्रस्तुतप्रशंसालङ्कारः ।—

अप्रस्तुतप्रशंसा स्यात्सा यैव प्रस्तुताश्रया ।
कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ॥
तदन्यस्य वचस्तुल्ये तत्तुल्यस्येति पञ्चधा ॥

इति लक्षणात् ॥६॥

सञ्जीवनी

(अथेति ।) [4]अथेति मङ्गलम् । अथानन्तरं वा । राधा [5]सुरत[6]श्रमापहृतमण्डना पुनरपि मण्डनवाञ्छया माधवं श्रीकृष्णं जगाद उक्तवती ।

---

1. पद्यमिदं "अथ सहसा सुप्रीतं" इत्यस्या आर्यायाः पूर्वं दृश्यते—अ.ब. नास्ति—ड.च.नि.सा. 2. मुग्धा राधा—इ. 3. उपवेशानादित्यक्ताभावान्निपतिता—च. 4. अथानन्तरं—इ. 5. सुरतश्रमापहृतमण्डनवाञ्छया—ग. 6. श्रमापहृत—इ. श्रमहृत—फ.ज.

[1]अथ सहसा [2]सुप्रीतं सुरतान्ते सा नितान्तखिन्नाङ्गी ।
राधा जगाद सादरमिदमानन्देन गोविन्दम् ॥८॥

कीदृशी ? स्वाधीनभर्तृका । पुनः कीदृशी ? मुग्धा सुरतसङ्ग्रामचतुरा सुन्दरी वा । कीदृशं [3]माधवम् ? कान्तं मनोहरं रतिश्रान्तं कृतसुरत[4]श्रममित्यर्थः ॥७॥

सञ्जीवनी

(अथेति ।) [5]अथ सा राधा इदं वक्ष्यमाणं सुरतान्ते आनन्देन सादरं गोविन्दं जगाद उक्तवती । कीदृशम् ? सहसा [6]ईषत्प्राप्ता ये असवः प्राणास्तैः [7]सुप्रीतं [8]सुतरां प्रीतियुक्तम् । कीदृशी ? नितान्तखिन्नाङ्गी [9]स्मरजर्जरिताङ्गी । एतेनाङ्गमेव भिन्नं न तु मनः इति पुनः सुरताभिलाषः सूचितः ॥८॥

पदद्योतनिका

अथेति । अथानन्तरं राधा सुरतान्ते आनन्देन गोविन्दं कृष्णं इदं वक्ष्यमाणं सादरं जगाद । [10]कीदृशी ? [11]सहसा ईषद्धास्ययुक्ता । कीदृशं गोविन्दम् ? सन्तुष्टम् । पुनः कीदृशी ? नितान्तमतिशयेन खिन्नं खेदयुक्तं [12]अङ्गं यस्याः सा ॥८॥

जयन्ती

उत्तराष्टपदीमवतारयति--अथेति । अथ क्रीडानन्तरं सहसा सुरतान्ते नितान्तं अत्यन्तं खिन्नं श्रमयुक्तं अङ्गं यस्याः सा राधा सुप्रीतं सम्भोगानन्दवशीकृतं गोविन्दं माधवं प्रति आदरेण सहितं यथा स्यात्तथा आनन्देन हर्षेण इदं वक्ष्यमाणाष्टपदीरूपं वाक्यं जगाद। अत्र जगादेत्यनेन धात्वर्थेन वाक्ये कर्म लभ्यते; पुनरिदमिति पुनरुक्तम्; तथापि सामान्यतः उक्तिरेव लभ्यते विशेषाधानार्थमिति वोध्यम् ।, उद्गीतिर्नाम गणच्छन्दः । आर्याव्यत्ययात् पूर्वार्धे षष्ठो गणो लमात्र इति ॥८॥

---

1. अथ सहसा सा प्रीतं सुरतान्तनितान्तखिन्नाङ्गी–ड. 2. नास्ति–इ. 3. नास्ति–अ.ब.इ.ग.ह. 4. श्रमम्–इ.फ.ग.ह.ज. 5. नास्ति–इ.फ.ग.ह.ज. 6. ईषत् ये प्राप्ता असवः–इ.फ.ग.ह.ज. 7. सुतरां–अ.ब. नास्ति–इ.फ.ग.ह.ज. 8. नास्ति–ह. 9. स्मरशरजर्जरिताङ्गी–ग 10. कीदृशी राधा–क. 11. सहसा साहसेन हास्येन सहसा ईषत्हास्ययुक्ता–क. 12. अङ्गं हस्तपादादि यस्याः–क.

[1]विभासरागे रूपकताले

कुरु यदुनन्दन [2]चन्दनशिशिरतरेण करेण पयोधरे ।
मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे ॥९॥
निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने ॥ध्रुवपदम्॥

सञ्जीवनी

रागतालध्रुवाणां लक्षणं [3]पूर्ववत् । अत्र स्वाधीनभर्तृका इयं नायिका । पूर्वं जगादेति यदुक्तं तद् गीतेनाह— (कुर्विति ।) [4]सा राधा यदुनन्देनेति [5]निजगाद उक्तवती। कीदृशे ? क्रीडति रममाणे हृदयानन्दने चित्ताह्लादजनके । [6]किमुक्तवती ? [7]हे यदुनन्दन नन्दनन्दन । 'यादवानां हितार्थाय धृतो [8]गोवर्धनाचल' इति । अत्रास्मिन् पयोधरे कुचे करेण मृगमदपत्रकं कस्तूरिकापत्ररचनां कुरु रचय । करेणेति पुनः करस्पर्शाभिलाषः सूचितः । कीदृशेन करेण ? चन्दनादपि [9]अतिशीतलेन । कीदृशे पयोधरे ? मनोभवस्य कामस्य मङ्गलाय [10]कलशः पूर्णकुम्भस्तस्य सहोदरे [11]समाने ॥१॥

पदद्योतनिका

तदेवाह— [12]कुर्विति । अत्र स्वाधीनभर्तृका वर्णनीया । लक्षणान्तरम्—

[13]क्षणं कराहतेनैव क्षणं चरणपाणिना ।
कन्दुकेनेव कान्तेन [14]क्रीडेत्स्वाधीनभर्तृका ॥

[15]रामकरीरागलक्षणं [16]तु पूर्वोक्तमस्ति प्रथमसर्गे । हृदयानन्दने चित्तहर्षके यदुनन्दने कृष्णे क्रीडति सति सा राधा निजगाद उक्तवती । किं जगादेत्यत

1. रामकरीरागयतितालाभ्यां–अ.ब. रामकरीरागः वा मल्हारेण रूपकतालः–ड. रामक्रीरागेण रूपकतालेन गीयते–च. रामकरीरागे रूपकताले–इ.फ. ग.ह.ज. 2. चन्दनचर्चितशिशिरकिरणपयोधरे–च. 3. पूर्वोक्तमेव–इ. पूर्वमुक्तमेव–फ.ग.ह.ज. 4 सा राधा हृदयानन्दने यदुनन्दने साभिलाषं जगाद उक्तवती–इ. सा राधा यदुनन्दने जगाद उक्तवती–ग.ह. सा राधा यदुनन्दन इति साभिलाषं जगाद उक्तवती–फ.ज. 5. निजगादेति यदुक्तवती–अ.ब. 6. नास्ति–अ.ब. 7. हे यदुनन्दन नन्दयतीति नन्दः–ग. 8. गोवर्धनो मयेति–इ.फ.ह.ज. गोवर्धनोऽचलेति पद्मपुराणे–ग. 9. शीतलेन–ग. 10. पूर्णकलशस्तस्य–अ.ब. 11. तुल्ये–इ. फ.ग.ह.ज. 12. नास्ति–ड. 13. नास्ति–क.ल.म. 14. क्रीडा स्वाधीन–ड. 15. रागलक्षण पूर्वोक्तमपि रामकरीरागः–क. 16. नास्ति–ड.

अलिकुलगञ्जन[1]सञ्जनकं रतिनायकसायकमोचने ।
त्वदधरचुम्बनलम्बितं कज्जलमुज्ज्वलय प्रिय लोचने ॥१०॥

आह—हे यदुनन्दन कृष्ण त्वं मम अत्रास्मिन् पयोधरे स्तने करेण [2]स्वहस्तेन मृगमदपत्रकं कस्तूरिकापत्रावलिं कुरु। कीदृशेन करेण ? चन्दनवच्छिशिरतरेणातिशीतलेन। कीदृशे पयोधरे ? मनोभवस्य [3]कामस्य [4]मङ्गलो यः [5]कलशः पूर्णकुम्भः तस्य सहोदरे तुल्ये[6]। मङ्गलं हिरण्यमिति ॥९॥

जयन्ती

कुर्विति। हे यदुनन्दन यदूनां सन्तोषकर यदुकुलोत्पन्न माधव। मनोभवस्य मङ्गलकलशः स्वस्तिवाचनार्थं स्थापितकलशः तस्य सहोदरः तत्सदृशत्वात्सोदरः तस्मिन्। चन्दनर्चाचितशिशिरकिरणपयोधरे कुचे अत्र अस्मिन् हस्तनिर्दिश्यमाणभागे मृगमदेन कस्तूर्याः पत्रमेव पत्रतुल्यत्वात् पत्रकं चित्रं कुरु॥ ध्रुवाया व्याख्यानम्। सा राधा हृदयस्य अन्तःकरणस्य आनन्दयति सुखयतीति आनन्दने यदुनन्दने कृष्णे क्रीडति सति निजगाद। किमित्यतः कुर्वित्यादिपदानि ॥९॥

सञ्जीवनी

(अलीति।) किञ्च हे प्रिय वल्लभ लोचने नेत्रे त्वदधरचुम्बनेन [7]लम्बितं गलितं यत्कज्जलमुज्ज्वलय पुनरर्पय। कीदृशम् ? भ्रमरसमूह[8]मर्दकं पराभवजनकम्। [9]कीदृशे ? रतिनायकस्य [10]कामस्य सायकान् मोचयतीति मोचने [11]कामबाणापहारिणि। [12]यद्वीक्ष्य [13]जगद्विजयाय [14]कामो बाणं न मुञ्चति [15]तादृशे। "[16]लम्बितं गलिते प्रोक्तं लम्बमानदुरापयोः" इति रत्नकोशः[17] ॥१०॥

---

1. मण्डनकेलि–च. 2. हस्तेन–क. 3. नास्ति–ड. 4. तः 6. पर्यन्तं नास्ति–ल.म. 5. नास्ति–ड. 7. लम्बितं विगलितं कज्जलमुज्ज्वलय–इ.फ.ह. लम्बितं कज्जलमुज्ज्वलय–ग. लम्बितं विगलितं गलितं–ज. 8. मर्दनं–इ.ग. मर्दनपराभवजनकम्–फ.ह.ज. 9, 10. नास्ति–अ.ब. 11. कामबाणापहारी–ग. 12. यमुद्वीक्ष्य–ग.ह. 13. जगद्विजये–अ.व. 14. कामोऽपि बाणं मुञ्चति–ग. कामोऽपि बाणं न मुञ्चति–ह. 15. नास्ति–अ.ब. 16. तः 17. पर्यन्तं नास्ति–अ.ब. एतत्समनन्तरपदव्याख्यान्ते दृश्यते–इ.फ.ज. 16. लम्बिते–ग.

नयनकुरङ्गतरङ्गविकास[1]निरासकरे श्रुतिमण्डले ।
मनसिजपाशविलासधरे [2]शुभवेश निवेशय कुण्डले ॥११॥

पदद्योतनिका

अलीति । हे प्रिय कृष्ण [3]त्वं लोचने मदीयनेत्रे त्वदधरचुम्बनेन त्वदधरकृतचुम्बनेन यत् लम्बितं [4]गलितमधःस्रस्तं कज्जलं [5]तत् उज्ज्वलय पुनरुद्दीपय । कीदृशं कज्जलम् ? अलिकुलस्य भ्रमर[6]समूहस्य गञ्जनं अभिभवं सञ्जनयतीति सञ्जनकं विधायकम् । कीदृशे लोचने ? रतिनायकस्य कामस्य सायकान् मोचयति इति । एतत्प्रेरणया कामो बाणान् मुञ्चतीत्यर्थः ॥१०॥

जयन्ती

अलीति । हे प्रिय ! अलीनां भ्रमराणां कुलं गणं गञ्जयतीति । गञ्जनेन मण्डनकेलि भ्रमरातिशयनीलवर्णम् । "भ्रमरालय" इत्यमरः (२.५.२९) । रतिनायकस्य मदनस्य सायकं नीलोत्पलादिकं मोचयति त्याजयतीति मोचने । तत्कार्यकारित्वात् तेन किमर्थं शरा धर्तव्या इति भावः । लोचनं नेत्रं तस्मिन्, जातावेकवचनम्; द्वयोरित्यन्वयः । त्वत् तव अधरस्य चुम्बनेन लम्बितं वञ्चितं अपहृतं कज्जलं उज्ज्वलय पुनः अञ्जनेन स्पष्टीकुरु ॥१०॥

सञ्जीवनी

किञ्चापरमप्याह—(नयनेति ।) हे शुभवेश रुचिरमूर्ते मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशय अर्पय । कीदृशे ? नयनकुरङ्गस्य [7]नेत्रकुरङ्गस्य तरङ्गाणां विकासस्य प्रकाशस्य निरासकरे निरोधके । एतेन कर्णान्तविशाललोचनत्वमुक्तम् । [8]पुनः कीदृशे ? कामजालस्य क्रीडानुकारके[9] । "वेशोऽलङ्करणे केलिभवनेऽद्भुतभावके" इति वैजयन्ती ॥११॥

पदद्योतनिका

नयनेति । हे शुभवेष रुचिरालङ्कारवेष कृष्ण त्वं मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशय कुण्डलयुगं यथास्थानं स्थापय । कीदृशे श्रुतिमण्डले ? नयनकुरङ्गस्य [10]नेत्रमृगस्य तरङ्गविकासस्य उत्फालगमनस्य निरासं निषेधं

1. निवासकरश्रुतिमण्डले—च. 2. विनिवेशय शुभकुण्डले—च. 3. मदीयलोचने नेत्रे—क. 4. अधःस्रस्तं—क. 5. नास्ति—ड.ल.म. 6. सङ्घस्य—क.ल.म. 7. नास्ति—इ.फ.ग.ह.ज. 8. तः 9. पर्यन्तं नास्ति—अ.ब. 10. नास्ति—ड. नेत्रकुरङ्गस्य—क.

भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम सम्मुखे ।
जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे ।।१२।।

---

[1]करोति । पुनः कीदृशे ? [2]मनसिजपाशः कामपाशस्तस्य विलासं सादृश्यं लीलां [3]धारयति । पाशः पशुगमननिरोधको भवतीति ।।११।।

जयन्ती

नयनेति । मनसिजस्य मन्मथस्य पाशः वशीकरणरज्जुः तस्य विलासं युवजनवशीकरणं तस्य धरे धारयतीति धरः तस्मिन् । नयने कुरङ्गाविव तयोः तरङ्गं उद्वेलनं तस्य विकासः प्रान्तप्रसरः तस्य निवासकरं स्थितिकरं उल्लङ्घनरोधकं श्रुतिमण्डलं कर्णशष्कुलीरूपं तस्मिन् । शुभे च ते कुण्डले विनिवेशय । मनसिजपाशेत्यादि कुण्डलविशेषणत्वेन वा योज्यम् । अत्रोपमाननिदर्शनयोः सन्देहसङ्करः ।।११।।

सञ्जीवनी

(भ्रमरेति ।) [4]किञ्च हे प्रिय ! मम मुखे अलकं चूर्णकुन्तलं परिकर्मय मण्डय, चुम्बनादिना । [5]कीदृशमलकम् ? उपरि मुखोपरि सुचिरं निरन्तरं भ्रमरसमूहं भ्रमरश्रेणिशोभां जनयन्तम् । सजातीयबुद्धया भ्रमरास्तत्र पतन्तीति भावः । पुनः कीदृशम् ? रुचिरं मनोहरं नर्मजनकं परिहासक्रीडाकारकम् । नर्मजनः परिहाससखीजनः तस्य कं सुखरूपं वा । कीदृशे ? विमले निर्मले । [6]अनेनाकलङ्कभावः सूचित । कीदृशे ? सन्मुखे सुन्दरे अनुग्रहाभिमुखे वा । पुनः कीदृशे ? जितं कमलं येन तस्मिन् [7]तत्सम्बोधने वा हे जितकमल । [8]जितमात्मनयनकान्त्या कमलं येन तत्सम्बोधनं वा । तदा इविमले इः कामः तेन विमले [9]निर्मले [10]प्रसन्ने । "परिकर्म प्रतिकृतौ भूषणे दासकर्मणि" इति कोशसर्वस्वे ।।१२।।

पदद्योतनिका

भ्रमरेति । [11]हे [12]सखे [13]कृष्ण मम [14]सम्मुखे अलकं केशपाशं परिकर्मय प्रसाधय, [15]मण्डनं विधेहीत्यर्थः । कीदृशमलकम् ? उपरि मुखोपरि

---

1. कुरुते–ड. 2. मनसिजस्य कामस्य पाशः–क. 3. धारयतीति–क. 4. नास्ति–ग. 5. अलकं कीदृशम्–इ.ह. 6. अनेन कलङ्काभावः–इ.फ.ग.ह.ज. 7. हे जितकमलनयन–इ. हे जितकमल–फ.ग.ह.ज. 8. जितं कान्त्या कमलं येन–इ. 9. नास्ति–इ.फ.ग.ह.ज. 10. नास्ति–अ.व. 11, 12, 13. नास्ति–ड.ल.म. 14. सम्मुखे सुमुखे सुन्दरे मुखे–क. 15. मण्डयेत्यर्थः–क.ल.म.

मृगमदरस[1]वलितं ललितं कुरु तिलकमलिकरजनीकरे ।
[2]विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे ॥१३॥

सुचिरं बहुकालं व्याप्य रुचिरं भ्रमरसमूहं रचयन्तम् । [3]स्वजातीयबुद्धया भ्रमरास्तत्र पतन्तीति भावः । यद्वा मुखं कमलस्थानीयं कमले भ्रमरास्तिष्ठन्ति तद्वत् [4]ललितम् । कीदृशे मुखे ? जितं कमलं येन तत् । विमले निर्मले । कीदृशमलकम् ? नर्मजनकं [5]क्रीडाकारकम् ॥१२॥

जयन्ती

भ्रमरेति । जितं कमलं येन तस्मिन् । विमले स्वच्छे मम मुखे वदने नर्मजनकं विनोदकरं अलकं चूर्णकुन्तलं सम्मुखे समक्षमित्यर्थः । उपरि ललाटोपरि सुचिरं रुचिरं रुचिरत्वं कान्तिमित्यर्थः । भावप्रधानो निर्देशः । रचयन्तं कुर्वन्तं भ्रमरचयं भ्रमरगणमिव परिकर्मय अलङ्कुरु । अलकमेव भ्रमरं कुर्विति भावः । अत्र जितकमलत्वेन व्यतिरेकालङ्कारः । तेन वरकमलात्साम्यं सिद्धम् । तत्रालकस्य भ्रमरचयत्वारोपात् मुखेऽपि कमलत्वमर्थतः सिद्धमिति एकदेशवृत्तिरूपकम् । रुचिरत्वविशिष्टारोपः ॥१२॥

सञ्जीवनी

(मृगमदेति ।) हे कमलानन कृष्ण अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु रचय । कीदृशम् ? कस्तूरीरसेन निर्मितम्; अत एव [6]ललितं [7]मनोहरम् । कीदृशम् ? विहिता [8]कृता कलङ्ककला चन्द्रकलङ्कशोभासादृश्यं येन तत् । कीदृशे ? विश्रमितो विश्रामं प्रापितः श्रमशीकरोऽम्बुकणो यत्र तादृशे । "ललाटमलिकं गोधिः" इत्यमरः (२.६.९२) । "मृगनाभिर्मृगमदः कस्तूरी गन्धशेखरः" इति हारावली (१०३) । "वलित निर्मितं युक्ते" इति यादवः । "शीकरोऽम्बुकणः स्मृतः" इत्यमरः (१.३.११) । "[9]रोहिणीशो निशानाथो रजनीकर" इति हलायुधः[10] ॥१३॥

पदद्योतनिका

मृगेति । [11]हे कमलानन कृष्ण अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु । कीदृश तिलकम् ? मृगमदरसेन वलितं निर्मितम् । अत एव ललितं मनोहरम् । पुनः कीदृशम् ? विहिता [12]कृता कलङ्कस्य कला षोडशभागो यत्र ।

1. कलितं–च. 2. कलितकलङ्कमलं कमलानन विश्रमितश्रमजशीकरे–च. 3. सजातीय–क. 4. नास्ति–क.ल.म. 5. प्रीत्युत्पादकम्–क. क्रीडाजनकम्–ल.म. 6. सल्ललितं–ग. 7. नास्ति–अ.ब. 8. नास्ति–अ.ब.ग. 9. तः 10. पर्यन्तं नास्ति–अ.ब. 11, 12. नास्ति–ड.

मम रुचिरे चिकुरे कुरु मानद [1]मनसिजध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे ॥१४॥

---

[2]अथ वा कला शोभा [3]यत्र । द्वितीयाचन्द्रप्रायं तिलकं कुर्वित्यर्थः । किम्भूते अलिकरजनीकरे ? विश्रमिता उपशान्ताः श्रमशीकराः प्रयासजलकणा यत्र । एतेन चन्द्रोऽपि प्रकटलाञ्छनच्छविर्दृश्यते ॥१३॥

जयन्ती

मृगमदेति । विश्रमिताः विरमिताः श्रमजलानां स्वेदानां शीकराः अम्बुकणाः यस्मिन् तस्मिन् । अलिकं भालमेव रजनीकरः तस्मिन् । मृगमदरसः कस्तूरिकापङ्कः तेन कलितं संवलितं ललितं सुन्दरं तिलकं कुरु । स्वेदक्षालितफाले तिलकं कुर्विति भावः । अर्धचन्द्राकारेऽपि कलङ्कतुल्यत्वमाश्चर्यकरम् ॥१३॥

सञ्जीवनी

(ममेति ।) किञ्च हे मानद मानखण्डन मानप्रदायक इति वा । मम रुचिरे [4]सुन्दरे चिकुरे केशपाशे कुसुमानि कुरु रचय । [5]मनसिजस्य कामस्य ध्वजचामरतुल्ये । कीदृशे ? रतिगलिते सुरतसमये [6]बन्धनान्मुक्ते । (ललिते मनोहरे ।) शृङ्गारचेष्टया सुन्दरे वा । कीदृशे ? शिखण्डिनो मयूरस्य शिखण्डकाश्चन्द्रकास्त एव डामराः [7]आटोप आडम्बरो वा [8]चाकचिक्यानि वा यस्य तादृशे । "डामरो [9]वाद्यभेदे स्यादाटोपे शिखिनामपि" इति भोजे ॥१४॥

पदद्योतनिका

ममेति । हे मानद [10]मानदायक मम रुचिरे सुन्दरे चिकुरे केशे कुसुमानि पुष्पाणि कुरु; रचयेत्यर्थः । कीदृशे चिकुरे ? [11]मानसजस्य कामस्य ध्वजचामरतुल्ये । पुनः कीदृशे [12]चिकुरे ? [13]रतिगलिते सुरतसमये मुक्तबन्धने । ललिते शृङ्गारचेष्टायुक्ते । पुनः कीदृशे[14] ? शिखण्डिशिखण्डकस्येव [15]मयूरपिच्छस्येव [16]डामर आटोपो यस्य । आटोप आडम्बरमिति यावत् ॥१४॥

---

1. मनोध्वजचामरे–च. मानसध्वजचामरे–इ.फ.ह.ज. 2. वा–ड. 3. यस्य–ड. 4. नास्ति–अ.ब.इ.फ.ज. 5. मानसजस्य–इ.फ.ह.ज. 6. बन्धनमुक्त –इ.फ.ग.ह.ज. 7. आटोपा आडम्बरा वा–फ.ग.ह.ज. आटोपा आडम्बराः–इ. 8. काकविक्यानि–अ.ब. 9. बन्धभेदे–फ.ज. 10. मानखण्डन मानदायकेति वा–क.ल.म. 11. मनसिजस्य–क.ल.म. 12. नास्ति–क.ल.म. 13. तः 14. पर्यन्तं नास्ति–ड. 15. नास्ति–ड. 16. डम्बरः–ड. नास्ति–ल.

**सरसघने जघने मम शम्बरदारणवारणकन्दरे ।
मणिरशनावसन भरणानि शुभाशय वासय सुन्दरे ॥१५॥**

जयन्ती

ममेति । मानं द्यति खण्डयतीति मानदः सन्मानदो वा । मनोध्वजस्य त्रिलोकविजयार्थंस्थापितस्य चामरे वीरुदप्रदर्शके रुचिरे मम चिकुरे केशपाशे ललिते शिखण्डिनां मयूराणां शिखण्डकः चन्द्रको ज्वलितवर्हः तस्य डामरः उत्तंसः तस्मिन् । रतौ सुरते गलिते सति च्युते सति कुसुमानि गुम्फयेति शेषः । उत्तरवाक्यस्थवासयेति क्रि(य)यान्वयः । 'मनसिजध्वजे'ति पाठे मात्राधिक्यं भवति यतिगणभङ्गोऽपि भवति ।

पञ्चभगणानन्तरं नगणत्वेन कथितैः लाः प्रवन्धमात्राणाम् ।
यथासम्भवैकोनविंशतिमात्रवती यमलार्जुनप्रदर्शितेति ॥१४॥

सञ्जीवनी

(सरसेति ।) [1]किञ्च हे शुभाशय शुभान्तःकरण मम सुन्दरे जघने नितम्बे मणिरशना मणिखचितक्षुद्रघण्टिकावसनाभरणानि वासय परिधानं कारय । कीदृशे ? सरसे शृङ्गारादिरससहिते घने निविडे च । कर्मधारयः [2]समासः । पुनः कीदृशे ? [3]शम्वरं [4]दारयति (इति) शम्वरदारणः कामः [5]स [6]एव [7]वारणः कुञ्जरस्तस्य कन्दरे निवासे । "कुञ्जरो वारणः करी" इत्यमरः (२.८.३४) ॥१५॥

पदद्योतनिका

सरसेति । हे शुभाशय महोदारचित्त त्वं मम सुन्दरे जघने [8]मणिरशना मणियुक्तरशना [9]क्षुद्रघण्टिका [10]वसनानि वस्त्राणि [11]आभरणानि वासय परिधानं कारय । कीदृशे जघने ? सरसः कामजनको घनो निविडश्च पश्चात्कर्मधारयः । पुनः कीदृशे ? [12]शम्बरदारणः कामः स एव वारणः कुञ्जरस्तस्य कन्दरे वासस्थाने ॥१५॥

जयन्ती

सरसेति । हे शुभाशय शुभः स्वच्छः आशयः अन्तःकरणं यस्य तत्सम्बुद्धिः । सुन्दरे । शम्बरं दारयतीति नाशयतीति दारणः नाशकः मदनः स एव

1, 2, 3, 4. नास्ति–इ.फ.ग.ह.ज. 5, 6, 7. नास्ति–अ.ब. 8. मणिरशनानि मणियुक्तरशनानि–ड. 9, 10, 11. नास्ति–ड. 12. शम्बरदारणवारणकन्दरे शम्बरदारणवारणः कामकुञ्जरः–क.

श्रीजयदेववचसि [1]जयदे हृदयं सदयं कुरु मण्डने ।
हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखण्डने ॥१६॥

वारणः शीतः तस्य कन्दरः बिलस्थलमित्यर्थः । तस्मिन् । कारणकन्दरेति पाठे शम्बरदारण एव दारणकः स्वार्थे कः । तस्य आसमन्तात् रणकन्दरः युद्धभूमिः तस्मिन् । सरसः अनुरागेण लावण्यरूपेण वा रसेन सहितं च तत् घनं च तस्मिन् मम जघने मणिरशनाश्च वसनं च आभरणं च तानि काञ्चीदुकूलभूषणानि वासय । अत्र जघने कन्दरत्वारोपाद्रूपकम् ॥१५॥

सञ्जीवनी

(श्रीजयदेवेति ।) हे रसिकजन [2]श्रीजयदेववचसि वचने दयासहितं [3]सदयं हृदयं कुरु । कीदृशे ? [4]जयदे विश्वजयप्रदे । कीदृशे ? मण्डने [5]विश्वालङ्कारभूते । पुनः कीदृशे ? हरिचरणस्मरणामृतेन कृतं कलिकलुष[6]ज्वरस्य खण्डनं नाशो येन तादृशे । [7]यद्वा जयदेवेति पाठे जयतीति जयः दीव्यदीति देवः । हे जयदेव [8]श्रीकृष्णचन्द्र श्रीजयदेववचसि स्वहृदयं सदयं कुरु । तद्वचांसि मण्डयेत्यर्थः । [9]पुनः कीदृशे जयदेववचसि ? मण्डने [10]श्रीराधालङ्कारसम्पादके । अन्यत् [11]समानम् ॥१६॥

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां गीतगोविन्दटीकायां चतुर्विंशः प्रबन्धः ।

पदद्योतनिका

श्रीजयदेवेति । हे भक्तजन त्वं मण्डने अलङ्कारभूते शुभदे कल्याणप्रदे श्रीजयदेववचसि गीतरूपे हृदयं मनः सदयं दयायुक्तं [12]तत्परं कुर्वित्यर्थः । [13]कथम्भूते वचसि ? हरिचरणस्मरणामृतेन [14]कृष्णपादचिन्तनामृतेन [15]कृतं कलिकलुषज्वरस्य कलिकृतपापरूपज्वरस्य खण्डनं नाशो येन ॥१६॥

---

1. रुचिरे–नि.सा. शुभदे–ड. नास्ति–च. 2. श्रीजयदेववचने–ग. 3. नास्ति–इ.फ.ग.ह.ज. 4. जयदेवे विश्वदे–फ. जयदेवे विश्वजयप्रदे–ज. 5. अलङ्कारभूते–फ. अलङ्कारभूषिते–ज. 6. ज्वरखण्डनं–ग. 7. नास्ति–अ.ब.ग. 8. कृष्ण–इ.फ.ह.ज. श्रीनन्दसूनो–ग. 9. कीदृशे ? मण्डने–इ.फ.ग.ह.ज. 10. श्रीवृषभानुसुतालङ्कारसम्पादके–ग. 11. समानमित्यर्थः–अ.ब. 12. यत्परं–ड. 13. कीदृशे वचसि–क.ल.म. 14. नास्ति–क.ल.म. 15. सुकृतं–ल.म.

रचय कुचयोः [1]पत्रं चित्रं कुरुष्व कपोलयो-
र्घटय जघने काञ्ची[2]मञ्च स्रजा [3]कबरीभरम् ।
कलय वलयश्रेणीं पाणौ [4]पदे कुरु नूपुरा-
विति निगदितः प्रीतः पीताम्बरोऽपि तथाऽकरोत् ।।१७।।

[5]इति श्रीगीतगोविन्दव्याख्यायां नारायणपण्डितविरचितायां चतुर्विंशः प्रबन्धः ।

जयन्ती

श्रीजयदेवेति । हरेः विष्णोः चरणयोः स्मरणमेव अमृतं औषधरूपं तेन कृतं कलिकलुषमेव ज्वरः तस्य खण्डने नाशके । अत एव सज्जनानां मण्डने भूषणे प्रतिष्ठाकारे श्रीजयदेवस्य वचसि हृदयं सदयं करुणायुक्तं कुरु । श्रोतारं प्रति वा भगवन्तं प्रति वा कविवचनमिदम् ।।१६।।

[6]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां चतुर्विंशः प्रबन्धः ।

सञ्जीवनी

गीतोक्तमेव श्लोकेनाह—रचयेति । हे कृष्ण ! मम कुचयोः पत्रं [7]पत्र-रचनां [8]मकरिकां रचय । किञ्च कपोलयोश्चित्रं चित्राख्यं रचनाविशेषं कुरु । किञ्च जघने नितम्बे काञ्चीं क्षुद्रघण्टिकां घटय [9]परिधापय । किञ्च कबरी-भरं केशसमूहं स्रजा पुष्पमालया अञ्च संयोजय । किञ्च वलयश्रेणीं कङ्कण-समूहं पाणौ कलय कुरु । किञ्च पदे चरणयोर्नूपुरौ कुरु । [10]इति एवमुक्तो [11]राधया [12]प्रीतः सन्तुष्टः सन् पीताम्बरः [13]कृष्णोऽपि [14]तथाऽकरोत् । एतेन स्वाधीनभर्तृकत्वमुक्तम् ।।१७।।

पदद्योतनिका

रचयेति । इति [15]राधया निगदितः उक्तः प्रीतः सन्तुष्टः पीताम्बरोऽपि श्रीकृष्णोऽपि तथाऽकरोत् । [16]यथोक्तं तथाऽकरोत् । इतीति किम् ? हे

1. चित्रं पत्रं–नि.सा. हारं–च. 2. मुग्धस्रजा–नि.सा. मुञ्च स्रजः–च. 3. कवरीभरे–च. 4. पदेऽपि. च नूपुरौ–च. 5. इति श्रीगीतगोविन्दस्य टीकायां नारायणपण्डितकृतायां चतुर्विंशः प्रबन्धः–ड. नास्ति–क.ल.म. 6. नास्तीयं पुष्पिका–च. 7. पत्रिकारचनां–इ.फ.ग.ह.ज. 8. मकरिकाञ्च–अ.ब. नास्ति–ग. 9. परिधारय–अ.ब. 10. नास्ति–इ. 11. श्रीवृषभानुनन्दिन्या–ग. 12. प्रीतिसन्तुष्टः–इ. 13. श्रीनन्दकुमारोऽपि–ग. 14. तथैवाकरोत्–इ.फ.ग. ह.ज. 15. राधानिगदितः–क. 16. यथातथोक्तं तथाऽकरोत्–क.ल.म.

[1]यद्गन्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृङ्गारविवेक[2]तत्त्वमपि यत्काव्येषु लीलायितम् ।
तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः
[3]सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः ॥१८॥

कृष्ण ! मम कुचयोः [4]पत्रं [5]चित्रविशेषकं रचय । कपोलयोश्चित्रं पत्रावलिं कुरुष्व । जघने काञ्चीं क्षुद्रघण्टिकां घटय अर्पय । स्रजा पुष्पमालया कवरीभरं केशपाशं अञ्च [6]पुञ्जय बन्धनं कुर्वित्यर्थः । हस्ते वलयश्रेणिं कङ्कणपङ्क्तिं स्थापय । पदे चरणयोर्नूपुरौ कुरु स्थापयेत्यर्थः । गीतोक्तस्य सङ्क्षेपार्थकथनेन न पुनरुक्तिदोषः ॥१७॥

जयन्ती

उक्तमर्थं पद्येनाह—रचयेति । हे माधव ! त्वं कुचयोः हारं स्वयमञ्जय आमुञ्च । कपोलयोः पत्रं मकरिकाकारं चित्ररूपं कुरुष्व रचय लिख । जघने काञ्चीं मेखलां घटय योजय । स्रजः पुष्पमालाः कवरीभरे केशपाशे मुञ्च निधेहीत्यर्थः । वलयानां कङ्कणानां श्रेणीं पङ्क्तिं पाणौ कलय योजय । अपि च पदे नूपुरौ कलय । इति निगदितः पीताम्बरोऽपि; अपिशब्दात् जगदाराध्योऽपि; प्रीतस्सन् तथा उक्तानुसारेण सर्वमकरोत् । मुञ्चेत्यत्र ग्राम्यत्वं नाशङ्कनीयम् । प्रीत्यादिविशिष्टस्य आमोचनादेरग्राम्यत्वात् । घटय जघनं काञ्च्येति तृतीयान्ते पाठे आमुञ्चेति सिद्ध्यति । क्रमपरित्यागदोष इति व्याख्यातपाठः साधुः । हरिणीवृत्तम् । स्वाधीनपतिका नायिका । "प्रियोपलालिता नित्यं स्वाधीनपतिका मता" इति लक्षणात् ॥१७॥

सञ्जीवनी

(यद्गन्धर्वेति ।) [7]किञ्च यद्गन्धर्वकलासु [8]गानविधानेषु कौशलं नैपुण्यं प्रावीण्यम् । गन्धर्वो[9]मार्गदेशिवित् । कला नृत्याङ्गभेदविलासाः । यद्वैष्णवं विष्णोरनुध्यानं अनुक्षणं चिन्तनञ्च । [10]यच्छृङ्गारस्य [11]शृङ्गारस्य विवेकः

---

1. पद्यमिदं 'पर्यङ्कीकृते'ति पद्यञ्च व्यत्यस्ते–ड. 2. तत्त्वरचना काव्येषु–नि.सा.च. 3. सानन्दं–च. 4. नास्ति–ड. 5. चित्रं विशेषकं–ड. 6. नास्ति–ड. पूजय–ल.म. 7. नास्ति–इ. 8. गानविधासु–इ. गानविद्यासु–ग.ह. गानविधिषु–फ.ज. 9. मार्गदेश–अ.ब.फ.ज. 10. यश्च शृङ्गाररसस्य–फ.ज. 11. नास्ति–अ.ब.फ.ग.ज.

सम्भोगादिविधानकौशलं [1]तस्य तत्त्वं [2]यथार्थज्ञानम् । किञ्च यत्काव्येषु कविरचनासु लीलायितं क्रीडाविलाससर्वस्वं तत्सर्वमन्यदपि च सुधियः जयदेवपण्डितकवेः पण्डा सदस[3]द्विवेकबुद्धिः, कविर्देवताप्रसादलब्ध[4]कविता सम्पत्तिमान् तस्य [5]श्रीगीतगोविन्दतः श्रीगीतगोविन्दग्रन्थात् परिशोधयन्तु [6]विवेकेन [7]विचारयन्तु जानन्त्वित्यर्थः । कीदृशाः सुधियः ? सानन्दा आनन्दसहिताः । कीदृशस्य कवेः ? कृष्णैकतानात्मनः कृष्णे [8]हरौ एकतानं तदाकारमात्मा मनो यस्य तस्य । [9]अथ वा कृष्णस्यैकतानो मुख्य आत्मा मनो यस्यां श्री राधायाम्; इत्यनेन श्रीराधाकृष्णोपासकत्वमुक्तम् । "[10]एकतानोऽनन्यवृत्तिरे[11]काग्रैकमनावपि" इत्यमरः (३.१.७९) ॥१८॥

पदद्योतनिका

यद्गन्धर्वेति । यत् जयदेवपण्डितकवेर्गन्धर्वकलासु [12]गानविद्यासु [13]कौशलं पटुत्वं प्रावीण्यमित्यर्थः । अस्तीत्यध्याहारः । यद्वैष्णवं विष्णोरिदमनुध्यानं अनुक्षणं चिन्तनमस्ति । यत् श्रृङ्गारस्य [14]श्रृङ्गाररसस्य यो विवेकः [15]सम्भोगविप्रलम्भादिरूपेण यद्विवेचनं तस्य तत्त्वमर्थज्ञानं तस्य रचना कृतिरस्तीति । यत्काव्येषु कविकर्मसु लीलायितं विलसितमस्ति जयदेवपण्डितकवेस्तत्सर्वं श्रीगीतगोविन्दतो [16]गीतगोविन्दग्रन्थात् सुधियः [17]पण्डिताः सानन्दाः आनन्दयुक्ताः सन्तः परिशोधयन्तु विवेकेन विचारयन्तु शुद्धं कुर्वन्त्वित्यर्थः । कीदृशस्य [18]जयदेवपण्डितकवेः ? कृष्णे हरौ एकतानस्तत्पर आत्मा मनो यस्य ॥१८॥

जयन्ती

यद्गन्धर्वेति । गन्धर्वाः देवगायकाः तत्सम्बन्धित्वाद् गन्धर्वं सङ्गीतं तस्य कलासु विद्यासु कौशलं कुशलानां भावः कौशलं चातुर्यं नानातालालङ्कारषाडवौडवमूर्छनादिकेन रञ्जनं यत् । अनु ततोऽनन्तरं यच्च वैष्णवं विष्णुसम्बन्धि ध्यानम् । पीताम्बरादिकं नानावल्लीपरिवृतत्वेन गोपालोपासनादिषु प्रतिपादितं ध्यानं प्रत्ययैकतानतारूपम् । यत् श्रृङ्गारः नायिकानायकपरस्पराविष्कारस्था-

---

1. नास्ति–ग. 2. यथाज्ञानं–ग. 3. विवेका बुद्धिः–अ.ब. विवेचिका बुद्धिः–इ 4. कवित्वं–अ.ब.इ.फ.ग.ह.ज. 5. नास्ति–फ.ज. 6, 7. नास्ति–अ.ब. 8. श्रीगोपालसुते–ग. 9. यद्वा–ग. 10. एकतानोऽनन्यवृत्तिः–अ.ब. 11. एकाग्रैकमना अनन्यधीः–फ.ज. 12. नास्ति–क. 13. पटुत्वं कौशलं–ड. 14. नास्ति–ड. 15. संयोग–क. 16. श्रीगीतगोविन्दनामकग्रन्थात्–क. 17, 18. नास्ति–ड.

[1]पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
सङ्क्रान्तप्रतिबिम्बसंवलनया बिभ्रद्वपुर्विक्रियाम् ।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचर[2]न्नुपचितीभूतो हरिः पातु वः ॥१९॥

यिभावचर्व्यमाणरसः तस्य विवेकः हास्यादिभिस्साङ्कर्येण कथनं तस्य तत्त्वं रहस्यं आभासत्वानपादकं तस्य रचना। अर्थतः कथनात्मकानि काव्यानि निर्दुष्टगुणालङ्कारशब्दार्थरूपाणि तेषु लीलायितं सूक्तिरूपं यत्; तत्सर्वं त्रयं कृष्णैकतानः भगवदेको यः आत्मा चित्तं यस्य तस्य; जयदेव इति पण्डितश्चासौ न्यायादिशास्त्रवेत्ता कविः कवितामात्रकर्ता च तस्य तत्सर्वं श्रीमद्गीतः गोविन्दो येन यत्र वा सः गीतगोविन्दप्रवन्धः तस्मादिति पञ्चम्यास्तसिल्। सुधियः धीमन्तः आनन्देन सहितं यथा भवति तथा परिशोधयन्तु। अत्र पण्डितकवि-शव्दाभ्यां एक एवार्थः प्रतीयत इति पुनरुक्तवदाभासः; पुनरुक्तपदाभासा-लङ्कारः ॥१८॥

सञ्जीवनी

सर्गान्ते कविराशिषमाशास्ते—पर्यङ्कीति। हरिर्वो युष्मान् पातु रक्षतु। कीदृशः? कायव्यूहं बहुशरीरमिवाचरन्। [3]उपचितं पवित्रं आकूतं कामभारो यस्य[4] स। कीदृशः? अक्ष्णां शतैः सहस्रैः पादाम्भोरुहं कृष्णचरणकमलं धारय-(ती)ति धारिणी या वारिधिसुता लक्ष्मीस्तां दिदृक्षुः द्रष्टुमिच्छुः। लक्ष्मीदर्शनं तु नेत्रयुग्मेन न सम्भवतीति कायव्यूहं नेत्रसहस्रं कृत्वा द्रष्टव्येति भावः। किं कुर्वन्? पर्यङ्कीकृतः शय्यास्थाने कृतो यो नागनायकः शेषस्तस्य फणाश्रेणीनां पङ्क्तीनां ये मणयस्तेषां गणे समूहे [5]सङ्क्रान्तप्रतिबिम्बसंवलनया सम्बद्धप्रति-बिम्बप्रसरणेन वपुर्विक्रियां विस्तरप्रकारं विभ्रत् [6]दधत्। मणीनामनन्तत्वा-दनन्तदेहलाभेन तादृङ्नेत्रलाभोऽभूदित्यर्थः। पक्षे [7]वारिधितुल्यगुणो वृषभानुस्त-त्सुता [8]श्रीराधा [9]तद्दर्शनमेकेन वपुषा कुर्वाणोऽपि तोषमलभमानः कायव्यूह-

1. पद्यमिदं नास्ति—नि.सा.च. 2. उपचिताकूतो—ड. 3. उपचितं समृद्धं आकूतं कामभरो यस्य—ग.ह. उपचितः वृद्धिगतः आकूतः क्रीडाविशेषो यस्य सः—फ.ज. उपचितं कामभरो यस्य सः—अ.ब. 4. नास्ति—ग. 5. सङ्क्रान्तबिम्ब—अ. ब.इ.ग. 6. नास्ति—अ.ब. 7. वारिधिसुता वारिधितुल्यगुणो—फ.ज. 8. श्रीनन्द-सूनुवधूः—ग. 9. तद्दर्शनमेकेनैव वपुषा—फ.ज.

[1]त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरि कालकूटमपिबन्मूढो मृडानीपतिः ।
इत्थं पूर्व[2]कथाभिरन्यमनसो विक्षिप्य [3]वक्षोऽञ्चलं
राधायाः स्तनकोरकोपरि [4]मिलन्नेत्रो हरिः पातु वः ॥२०॥

मिवाचरन्निति तुल्यम् । अस्मिन् पक्षे नागशब्देन [5]नागासनं [6]तत्प्रतिशोभार्थं निहिता ये मणिगणा इत्यादि व्याख्येयम् । "[7]श्रेणी तु कथिता पङ्क्तौ [8]श्रेणो तुल्यार्थम[9]संहतावपि" इति यादवः । "सङ्क्रान्तः प्रतिबिम्बे स्यात्प्रवेशे सङ्क्रमेऽपि च" इत्यपि (यादवः) ॥१९॥

पद्द्योतनिका

पर्यङ्कीकृतेति । उपचित समृद्धं आकूतं [10]कामभावो यस्य स हरिः श्रीकृष्णो वो युष्मान् पातु [11]अवतु [12]इत्यन्वयः । [13]कीदृशो [14]हरिः ? वपुर्विक्रियां [15]देहविक्रियां शरीरपरम्परामित्यर्थः । बिभ्रत् धारयत् । किं कुर्वन् ? पर्यङ्कीकृतः शय्यास्थाने कृतो यो [16]नागनायकः [17]शेषः तस्य फणाश्रेणी फणासमूहस्तस्यां ये मणयस्तेषां गणे समूहे सङ्क्रान्तं सम्वद्धं यत्प्रतिबिम्बं [18]प्रतिकृतिस्तस्य संवलनया अन्वयेन स्थितेत्यर्थः; कायव्यूहमिव [19]बहुशरीरतामिवाचरन् कुर्वन् । किमिति कायव्यूह इत्यत आह । पुनः कीदृशः ? पादाम्भोरुहं कृष्णचरणकमलं धारयतीति धारिणी या वारिधिसुता लक्ष्मीस्तां अक्ष्णां [20]शतैः नेत्रसहस्रैर्दिदृक्षुः [21]द्रष्टुमिच्छुः । लक्ष्मीदर्शनं नेत्रद्वयेन तथा न सम्भवतीति कायव्यूहेन नेत्रसहस्रं कृत्वा द्रष्टव्येति भावः ॥१९॥

सञ्जीवनी

पुनः कविर्ग्रन्थसमाप्तावाशिषमाशास्ते—त्वामिति । हरिः वः पातु । हे सुन्दरि ! [22]मृडानीपतिः [23]शङ्करः क्षीरोदतीरोदरे क्षीरसमुद्रतटे त्वामप्राप्य

1. पद्यमिदं नास्ति–नि.सा; च. अस्या अष्टपद्याः पूर्वं "तस्याः पाटल" इत्यस्मात्पद्यात्पश्चाद्दृश्यते–ड.क.ल.म. 2. कथास्वनन्यमनसो–ड. 3. वामाञ्चलं–ड. 4. चलन्नेत्रो–ड. 5. नागासने शोभार्थं–ग. 6. तं प्रति–इ.फ.ह.ज. 7. तः 8. पर्यन्तं नास्ति–अ.ब. 9. संहतावपीति–ग.फ.ज. 10. कामभरो–क. कामभारो–ल.म. 11. नास्ति–ड. रक्षतु–ल.म. 12. नास्ति–क.ल.म. 13, 14. नास्ति–ड. 15. नास्ति–ड.ल.म. 16. नागनाथः–क. 17. नास्ति–ड. 18. प्रतिनिधिः–क. नास्ति–ल.म. 19. शरीरतामिवाचरन्–ड. 20. शतैरेव सहस्रैः–ड. 21. नास्ति–ड. 22. नास्ति–अ.ब. 23. रुद्रः–इ.फ.ग.ह.ज.

[1]साध्वी माध्वीक चिन्ता न भवति भवतः शर्करे कर्कशाऽसि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीर नीरं [2]रसस्ते ।
माकन्द क्रन्द कान्ताधर [3]धरणितलं गच्छ यच्छन्ति [4]याव–
[5]द्भावं शृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि ।।२१।।

इति श्रीगीतगोविन्दे सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ।।

समाप्तञ्चेदं काव्यम्

कालकूटं विषमपिबत् इति शङ्के । इत्थमनेन (प्रकारेण) पूर्वकथाभिर[6]न्यमनसोऽन्यमनस्काया वक्षोञ्चलं [7]स्तनावरकवस्त्रं विक्षिप्यापसार्य राधायाः स्तनौ कोरकौ जाताङ्कुरौ तदुपरि मिलन्नेत्रः । कीदृशीं त्वाम् ? मयि स्वयंवरपराम् । अनेन किशोरलीलाविलासत्वं ध्वनितम् ।।२०।।

पदद्योतनिका

त्वामप्राप्येति । हरिः कृष्णो वो युष्मान् पातु । कीदृशो [8]हरिः ? राधाया [9]स्तनौ कोमलत्वापतितत्वादिना गुणेन कोरकाविव तयोरुपरि चलन्ती सम्बद्धे नेत्रे यस्य । किं कृत्वा ? वामाञ्चलं हृदयवामदेशलग्नाञ्चलं विक्षिप्य दूरीकृत्य । कीदृश्या राधायाः ? इत्थं इति [10]पूर्वकथाभिरन्यमनसः कथादत्तचित्ताया इत्यर्थः । कथामेवाह—हे सुन्दरि ! क्षीरोदतीरोदरे क्षीरसमुद्रतीरमध्ये मृडानीपतिर्महादेवः त्वामप्राप्य कालकूटविषम[11]पिवत् इत्यहं शङ्के तर्कयामि यतो मूढो ज्ञानरहितः । कीदृशीं त्वाम् ? मयि मन्निमित्तं; निमित्ते सप्तमी; स्वयंवरपरां मदेक[12]परामित्यर्थः । इत्थं पूर्वकथा । अनेन [13]गौरीपतित्वेऽपि सुखालाभात् विषमपिबदिति गौर्या अपि त्वमधिकगुणेति भावः ।।२०।।

सञ्जीवनी

इदानीं कविरात्मनः काव्यस्य माधुर्यादिगुणत्वं कथयति—साध्वीति । हे माध्वीक मधो भवतस्तवेयं मधुरोऽहमिति चिन्ता साध्वी न भवति । एतत्सदृशं

---

1. पद्यमिदं ग्रन्थसमाप्तेरनन्तरं 'पञ्चसद्रत्नस्तवके' पञ्चपद्येष्वन्यतमत्वेन दृश्यते—ड. 2. समन्ते—च. 3. धरणितले गन्तुमिच्छन्ति यावत्—च. 4. भावं—नि.सा. 5. यावच्छृङ्गारसारं शुभमिव जयदेवस्य वैदग्ध्यवाचः—नि.सा. भारं शृङ्गारसारं शुभमिह जयदेवस्य वैदग्ध्यमस्ति—च. 6. अन्यमनसाऽन्यमनस्कया—ह. 7. स्तनवस्त्रं—ग. स्तनावरकं—फ.ज. 8. नास्ति—ड. 9. स्तनौ कोमलत्वपीतत्वादिना—क. 10. पूर्वकथास्वमनसः—ड. 11. अपिबत्; पीतवानित्यर्थः—क. 12. पतिकामित्यर्थः—क.ल.म. 13. गौरीपतिस्तवालाभात्—क. गौरीपतित्वेऽपि तवालाभात्—ल.म.

[1]भवामीति चिन्ता नैव कार्या । किञ्च हे शर्करे [2]त्वञ्च कर्कशाऽसि कार्कश्येन [3]रजोरूपाऽसीत्यर्थः । किञ्च हे द्राक्षे त्वां [4]के द्रक्ष्यन्ति के आस्वादयिष्यन्ति; [5]अवलोकयिष्यन्ति वा । किञ्च हे अमृत त्वयाऽपि माधुर्य [6]मादकत्वादिगुणातिशयेन गर्वो न धार्यः । तदपेक्षया त्वं मृतमसि । [7]किञ्च हे क्षीर [8]ते [9]तव रसः नीरं जलवदमधुरम् । हे माकन्द पक्वाम्रफल क्रन्द विलप । किञ्च हे कान्तावर त्वं [10]धरणीतलं गच्छ । [11]जयदेवस्य विष्वक्सामस्त्येन वचांसि यावच्छृङ्गारभावं श्रीराधाकृष्णविषयं यच्छन्ति [12]प्रयच्छन्ति तावद्युष्माभिर्न स्थेयम् । कीदृशानि ? सारस्वतानि सरस्वती[13]सारभूतानि । श्रीजयदेवभणितामृतेन सर्वे पदार्था निराकृता [14]इत्यर्थः ॥२१॥

श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ॥
साधूनां स्वत एव सम्मतिरिह स्यादेव भक्तार्थिना–
मालोक्य ग्रथनश्रमञ्च विदुषामस्मिन् भवेदादरः ।
ये केचित्परकृत्युपश्रुतिपरास्तानर्थये मत्कृतिं
भूयो वीक्ष्य वदन्त्ववद्यमिह चेत्सा वासना स्थास्यति ॥

[15]स्वटीकायां सर्वसम्मतियोग्यतामाह–साधूनामिति । इह वनमालिसञ्जीवन्यां [16]श्रीगीतगोविन्दटीकायां भक्तार्थिनां [17]साधूनां भक्तानां सम्मतिः स्वीकारः [18]स्यादेव । विदुषामपि नानाशृङ्गाररसग्रथनश्रम विचार्य अस्यामादरो भवेदेव । ये च भक्तिपाण्डित्यहीनाः विरलाः परग्रन्थनिन्दापरास्तानर्थये याचे । [19]किं तत् ? मत्कृतिं [20]भूयो वारं वारं वीक्ष्य इह टीकायामवद्यं वदन्तु । टीकाश्रमेषु ज्ञातेषु परनिन्देच्छा वासना स्थास्यति चेत् भक्तिमार्गपरिशीलनेन कुतः ? सा दुर्वासनेति भावः ।

---

1. भवामीति चिन्तैव न कार्या–फ.ग.ह.ज. 2. त्वं–फ.ह.ज. त्वमपि–ग. 3. रजोरूपा भासीत्यर्थः–ह. 4. नास्ति–इ.फ.ग.ह.ज. 5 अवलोकयिष्यन्तीति वा–इ.फ.ग.ह.ज. 6. मोदकादि–ग. 7. नास्ति–इ.फ.ग.ह.ज. 8, 9. नास्ति–अ.ब. 10. पातालं–इ.फ.ग.ह.ज. 11. जयदेवस्य विष्वक् वचांसि सामस्त्येन वचांसि–ग. 12. नास्ति–इ. 13. रसभूतानि–इ.फ.ग.ह.ज. 14. इति भावः–इ.फ.ग.ह.ज. 15. कवितास्तुतौ विदुषां योग्यत्वेऽपि अविदुषामपि तद्योग्यतामाह–साधूनामिति–फ.ज. 16. टीकायां–अ.ब. 17. नास्ति–अ.ब. 18. स्वत एव स्यात्–फ.ज. 19. किन्त्वन्यकृतिं–इ. 20. भूयो वीक्ष्य वारं वारं वीक्ष्य–ग.

टीकासप्तकमालोक्य सारं सारं समुद्धृतम् ।
तत्रापि स्खलितं किञ्चित् [1]क्षन्तुमर्हथ सूरयः ॥
शिवदासतनूजेन भट्टेन वनमालिना ।
गीतगोविन्दटीकेयं रचिता शुभदाऽस्तु वः ॥
वैशाखे कृष्णपक्षस्यैकादश्यां शुभमङ्गले ।
वाराणस्यां कृता टीका भट्टेन वनमालिना ॥
काश्यां नरोत्तमगृहे मध्ये माधव[2]शर्वयोः ।
रचिता गीतगोविन्दटीका श्रीवनमालिना ॥
[3]कलिन्दजातीरविहारशीलं गोपाङ्गनानां नयनाभिरामम् ।
[4]वंशोरवैर्मोहितमारकोटिं वन्दे सदा तं वृषभानुजारतम् ॥

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां सुप्रीतपीताम्बरो नाम द्वादशः सर्ग ॥

पदद्योतनिका

स्ववचसि मधुरकोमलकान्तेत्यादिनोक्तं माधुर्यमनन्यसाधारणं प्रकटयति-साध्वीति । हे माध्वीक हें मद्य चिन्ता त्वयि माधुर्यचिन्ता साध्वी उत्कर्ष-हेतुत्वेन समीचीना न सम्भवति । मदहेतुत्वात् । भू सत्तायामित्यतो लट् परस्मै-पदम् । भवति भवतः भवन्ति इति रूपाणि । हे शर्करे हे सिते भवती त्वं कर्कशा पाषाणरूपत्वेन कठिना असि भवसि । अस भुवीत्यतो लट् । असि स्थः स्थ । अतिकाठिन्यमेवात्र दोषः । हे द्राक्षे यद्यपि त्वं न कठिना तथापि के पुरुषाः त्वां भवन्तीं द्रक्ष्यन्ति पश्यन्ति द्वीपान्तरान्तर्हितत्वात् । दृशिर् प्रेक्षणे । द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति । हे अमृत हे सुधे मृतं मृतप्रायमेव त्वमसि । यद्यपि द्राक्षा द्वीपान्तरस्थैस्तद्ज्ञैः कैश्चित्पुरुषैः दृश्यते तथा त्वं न दृश्यसे परलोक एव स्थास्यसि; इह सर्वथा सर्वैः सर्वदाऽदृष्टत्वान्मृतासीति भावः । हे क्षीर हे पयः ते तव रसो गुणः नीरः नीरसः नित्यनपुंसकम् । यद्यपि त्वमप्यमृतं इह सर्वैः सर्वदा दृश्यसे तथापि त्वं नीरस इति भावः । हे माकन्द हे रसालफल अति-मधुरचूत एतेष्वेवं सत्सु मम कादाचित्कत्वात्के मां पृच्छन्तीति क्रन्द रोदनं कुर्वित्यर्थः । क्रन्द चिक्रोशने । क्रन्द क्रन्दतम्, क्रन्दत । हे कान्ताधर कान्तायाः योषितः अधर अधरोष्ठ त्वं तु यावत् यावत्कालं जयदेवस्य तन्नामककवेः वैदग्ध्य-वाचः विषयप्रतिपादकवचांसि इह लोके शुभं कल्याणरूपं यावत्सारं सर्वसारं

1. क्षन्तुमर्हन्तु–ग.फ.इ.ह.ज. 2. सर्वयोः–अ.ब.इ. 3. पद्यमिदं नास्ति–अ.ब. 4. वंशीरवामोहित–ग.

शृङ्गारसारं शृङ्गाररसं यावत् गच्छन्ति प्राप्नुवन्ति; गम्लृ गतौ गच्छति गच्छतः गच्छन्ति; लट्; तावत् धरणितलं भूमण्डलं प्रति गच्छ तत्रावस्थानं कुरु न तदूर्ध्वम् । न हि निशीथ इव मध्याह्ने खद्योतप्रकाशः ।।२१।।

श्री भोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य ।
पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ।।

(श्री भोजदेवेति ।) [1]श्रीशब्दस्तु ग्रन्थान्ते मङ्गलायेत्यर्थः । श्रीभोजदेवः पिता रामादेवी माता, पराशरादिप्रिया व्यासादिशिष्याः । प्रीतो राधासमागमात् । [2]आनन्दयुक्तः पीताम्बरः कृष्णो यत्रेति ।।

लक्ष्मीदासतनूजेन [3]भीषदासेन धीमता ।
कारिता गीतगोविन्दटीकेयं सुखदाऽस्तु वः ।।
[4]भीषदासनियुक्तेन [5]कृष्णपत्पद्यसेविना ।
नारायणेन सुकृतं गीतगोविन्दटिप्पणम् ।।
टिप्पणे [6]चेन्मदीये वै स्खालित्यं स्यात्प्रमादतः ।
न कर्तव्यो ममाक्षेपो गन्तुर्हि [7]स्खलितं भवेत् ।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां पदद्योतनिकायां सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ।।

जयन्ती

स्ववचसां सर्वोत्कृष्टत्वमाह--साध्वीति । हे माध्वीक मधुकृतमद्यवतः भवतः तव साध्वी हिता चिन्ता न भवति; मधुरान्तरस्य सत्त्वात् कथं निश्चिन्ततया तिष्ठसीति भावः । हे शर्करे इक्षुरसपरिपाकजे त्वं शर्करा सूक्ष्मशिलाऽसि। शर्करापदस्याश्मवाचकत्वं तदभिधाय(क)त्वमाह । नानानीरसत्वात्पाषाणत्वव्यपदेशः । हे द्राक्षे गोस्तनिके त्वां (के) द्रक्ष्यन्ति; न केऽपीत्यर्थः । हे अमृत पीयूष त्वं मृतमसि विषमसि । वैद्यके मृतस्य विषवाचकत्वात् । हे क्षीर दुग्ध नीरं जलं ते समम् । नीरमपि क्षीरमुच्यते । "नीरक्षीराम्बुशम्बरम्" (इत्यमरः १.१०.४) । नीरतुल्यत्वात्क्षीरमिति कथ्यते । हे माकन्द रसाल रसकन्द क्रन्द आक्रन्द यत्त्वत्तोऽधिकसत्त्वादाक्रोशयेति परिदेवयेति भावः । हे कान्तायाः

1. श्रीशब्दस्तत्र ग्रन्थान्ते मङ्गलार्थः–क. श्रीशब्दस्य ग्रथान्ते मङ्गलमर्थः–ल.म. श्रीशब्दस्तु ग्रन्थानन्तरमङ्गलात्यर्थः–ड. 2. परमानन्दयुक्तः–क. 3. भीषिदासेन–क.ल.म. 4. भीषिदास–क.ल.म. 5. श्रीकृष्णपदसेविना–क. 6. चेन्मदीयेऽस्मिन्–क. 7. स्खलनं–ल.म.

अधर धरणितले भूतले त्वां रसिकाः इति शेषः । यावद्भारं नीरसत्वात् यथेष्ट-भारं गन्तुं प्राप्तुं इच्छन्ति । तत्र हेतुमाह । जयदेवस्य वैदग्ध्यचातुर्येण वाक्यं शृङ्गार एव उज्ज्वलरस एव सारं सत् इह धरणितले इदं शुभं अस्तीति । अत्र माध्वीकादीनां उपमानानां कण्ठतोऽर्थतश्च वैयर्थ्यकथनात् जगद्रञ्ज(न)-क्रियारूपधूर्वहत्वेन प्रतीपालङ्कारः । मालारूपः । स्रग्धरावृत्तम् ॥२१॥

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः ॥

इति श्रीमद्विद्वत्प्रवरभिषगम्मणजनुषा
कृतायां सन्न्यायश्रुतिपदविदा कृष्णविदुषा ।
प्रगीयद्गोविन्दान्वयविवृतगूढार्थविवृतौ
जयन्त्यां सर्गोऽसौ समभवदिह द्वादशतः ॥

राधाकृष्णौ जयतः



अनुबन्धः (१)

[1]पञ्चसद्रत्नस्तबकः

सौन्दर्यैकनिधेः कलाख्यललनालावण्यवल्लीजुषो
राधाया हृदि पल्वले मनसिजक्रीडाकरालस्थले ।
रम्योरोजसरोजखेलनसरित्तादात्म्यमाख्यापयन्
ध्यातुर्मानसराजहंसनिभतां देयान्मुकुन्दो मुदम् ।।१।।

श्रीगुरुभ्यो नमः

जयदेवकृतेर्भावं नाख्यातुं कवयोऽप्यलम् ।
मादृशो मन्दबुद्धिस्तु तद्व्याख्याने कुतः क्षमः ।।
तथापि तद्रसास्वादमोहितः किञ्चिदावदे ।
धत्तूरमोहितानां किं न गृह्णन्ति वचो जनाः ।।
जयदेवकवीन्द्रस्य वचस्सुरतरोरहम् ।
पञ्चसद्रत्नस्तवकं विचिन्वे कृपया गुरोः ।।

कविः कथाप्रसङ्गं तावत्प्रस्थाप्य सर्गान्ते भक्तानामाशिष आशास्ते—सौन्दर्यैकनिधेरिति । अत्र मुकुन्दः मुक् मोक्षं ददातीति दः । भक्तानां संसारमोक्षसुखप्रदाता भगवान् । सौन्दर्यैकनिधेः सुन्दरस्य भावः सौन्दर्यं तस्यैकनिधिः मुख्याश्रयः तस्य । "एके मुख्यान्यकेवलाः" (अमरः ३.३.१६) इत्युक्तत्वात् संख्यावाचकस्याप्येकशब्दस्य मुख्यार्थकत्वं ज्ञेयम् । सौन्दर्यसागरस्य श्रीकृष्णस्येति शेषः । मानसे मानससरोवरे विद्यमानो राजहंसः मानसराजहंसः राजहंसनामा पक्षिविशेषः तस्य निभतां साम्यं मानससरःस्थितराजहंसपक्षिसाम्यम् । ध्यातुश्चिन्तयतो योगिनः तं प्रतीत्यर्थः । मुदं मुक्तिसुखं देयात् दद्यादित्यन्वयः । दा दान इत्यतो लिङ । देयात् देयास्तां देयासुः इति रूपाणि । किंकुर्वन् सन् ध्यानकर्तेत्यत आह—रम्येति । राधायाः तन्नाम्न्याः उरसि जायेते इति उरोजौ; रम्यौ च तौ उरोजौ च रम्योरोजौ; सरसि जायेते इति सरोजे; तयोः खेलनसरित् क्रीडासरः तत्तादात्म्यं तदात्मनो भावः तादात्म्यं पद्मसरःस्वरूपमित्यर्थः ।

1. पञ्चसद्रत्नस्तबकाख्योऽयं ग्रन्थभागः सव्याख्यः ड संज्ञकग्रन्थान्ते दरीदृश्यते । व्याख्यातुर्नाम तु नोपलभ्यते । नारायणपण्डितस्य 'पदद्योतनिका'-निर्मातुरेवेयं व्याख्या भवेदित्यभ्यह्यते ।

सानन्दं नन्दसूनुर्दिशतु मितिपरां सम्पदं मन्दमन्दं
राधामाधाय बाह्वोर्विवरमनुदृढं पीडयन् प्रीतियोगात् ।
तुङ्गौ तस्या उरोजावतनु वरतनोर्निर्गतौ मा स्म भूतां
पृष्ठं निर्भिद्य तस्माद्बहिरिति वलिमद्ग्रीवमालोकयन्वः ॥२॥

आख्यापयन् सम्यक्प्रकटयन् । यद्वा 'सुप्तसु प्रथमा' इति सूत्रात् प्रथमा षष्ठ्यर्थे । प्रकटयन् प्रकटयतः । कस्मिन तादात्म्यप्रकटनमित्याशङ्क्याह—हृदीति । अत्रापि राधाया इत्यस्यानुकर्षः । हृदि पल्वल इति सामानाधिकरण्येनाभेदो बोध्यते । राधाहृदयमेव पल्वलं अल्पकर्दमोदकस्थानं तत्रेत्यर्थः । कथम्भूते पल्वले ? मनसि जायत इति मनसिजः, अलुक्समासः । मनसिजो मन्मथः तस्य क्रीडाभिः लीलाभिः करालस्थले अरम्यस्थले, पल्वलं महिष्यादिभिः करालम् । मन्मथोद्भिन्नराधाहृदयं श्रीकृष्णाख्यराजहंसविहाराश्रयकुचसरोजाश्रयत्वेन मानससरोवरमिति [1]ध्यातुरभिप्रायः । यद्वा कथम्भूताया राधायाः ? सौन्दर्यैकनिधेः । कलाख्यललनालावण्यवल्लीजुषः चतुष्षष्टिकला विद्याख्या या ललना स्त्री तस्याः लावण्यं कान्तिः तदेव वल्ली लता तां जुषते सेवत इति जुट् तस्येत्यर्थः । चतुष्षष्टिकलाविद्याविशारदत्वात्सौन्दर्यैकनिधिरिति भावः । आभ्यां राधाविशेषणाभ्यां तद्धृदयस्य पल्वलत्वमुपपादितम् । तत्राद्येनासेव्यत्वम् । निधिसमीपस्थस्य पल्वलस्य कथमप्यसेव्यत्वात् । द्वितीये वल्लीग्रहणेन किन्न पत्रतृणादिमत्त्वं द्योत्यत इति बोध्यम् ॥१॥

महतां स्वभावप्रकटनपूर्वकं स्वयमपि तेष्वन्यतम इति सूचयन् स्वेष्टदेवता-(प्रार्थनपूर्वक)माशिषमाशास्ते—सानन्दमिति । अत्र नन्दसूनुः नन्दस्य नन्दगोपस्य सूनुः सुतः नन्दात्मजः श्रीकृष्णः वः युष्मभ्यं; सम्प्रदाने चतुर्थी, ब्राह्मणाय धनं दद्यादितिवत्; सम्पदं ऐहिकामुष्मिकैश्वर्यं दिशतु ददातु इत्यन्वयः । दिश अतिसर्जन इत्यतो लोट् । दिशतु, दिशतां, दिशन्तु इति रूपाणि । कथम् ? सानन्दं आनन्देन सहितं यथा भवति । लोके तुष्ट एव ददाति न तु रुष्टः । सम्पच्च निरवधिकदैशिककालिका अमूर्ता चेत्याह—मितिपरामिति । मितेः देशतः कालतः परिमाणतश्च परिमितेः परामन्यां विलक्षणाम् । निरवधिकैश्वर्यमिति यावत् । तोषकारणं दर्शयति राधामाधायेत्यादिना । अत्र स्थित इत्यस्याध्याहारः । तच्च नन्दसूनुविशेषणम् । किं कुर्वन् स्थित इत्यत आह—आलोक-

---

1. ध्यातुरित्यभिप्रायः—ङ.

स्वामिन् भङ्गुरबालकं सतिलकं फालं विलासं कुरु
प्राणेश त्रुटितं पयोधरयुगे हारं पुनर्योजय।
इत्युक्त्वा सुरतावसानसुखिता या पूर्णचन्द्रानना
स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम् ॥३॥

यन्निति । पश्यन् । दर्शनकर्म निर्दिशति—वलिमद्ग्रीवमिति । वलिमत् त्रिरेखाभिर्युता ग्रीवा यस्य सः । पृष्ठं; कस्यास्तस्या राधायास्तदत्राप्यन्वेति । महदवलोकनेनार्थसिद्धिरेव भवति। अत एव वेद(व)त्या सा(दर)मवलोकितः कीटोऽपि राजा बभूव। अतः किमत्र प्रयोजनमित्यतस्तद्दर्शयति तुङ्गावित्यादिना । तस्या राधायास्तुङ्गावुन्नतावुरोजौ कुचौ, वरा उत्तमा तनुर्देहो यस्याः सा तस्याः राधायाः; अतन्विति । सुविस्तृतं पृष्ठं निर्भिद्य भित्त्वा तस्मात् पृष्ठभागात् बहिर्बाह्यप्रदेशे निर्गतौ निष्क्रान्तौ मा स्म भूतां मा भूतां न भवताम् । स्मृत्यनुकम्पयोरिति पूर्वोक्तप्रयोजनोद्देशेन । भूसत्तायामिति धातुः । पृष्ठं निर्भिद्य गमने कारणं सूचयन्नाह—दृढं पीडयन्नित्यादिना । पुनः किं कुर्वन् ? प्रीतियोगात् प्रीतेरानन्दस्य योगादुद्रेकात् बाह्वोः स्वहस्तयोर्विवरं तन्मध्यप्रदेशे । 'कालाध्वनोरत्यन्तसंयोगेद्वितीये' त्यादिनाऽत्र द्वितीया ज्ञेया । राधां लक्ष्मीमाधाय प्रस्थाप्य स्वीकृत्येत्यर्थः । मन्दमन्दं शनैः शनैः अनुसृत्य दृढं गाढं पीडयन् प्रीत्यतिशयेन राधां दृढमालिङ्गन्नित्यर्थः। एतेनालिङ्गनमेवानन्दे कारणमित्युक्तं भवति । राधादर्शनेनानन्दोद्रेकः तेन च गाढालिङ्गनं तेन च कुचयोः पृष्ठनिर्भेदनेन तद्बहिर्निर्गमनशङ्का तया पृष्ठसम्बन्धिग्रीवावलोकनमिति भावः ॥२॥

…त्यादिनोक्तमेव व्यासससमासाभ्यां वर्णयन्ति कवय इति पुनर्विशदयति—स्वामिन्निति। हे स्वामिन् हे मन्नियामक। त्वमित्यध्याहारः। त्वं भङ्गुरबालकं (भङ्गुराणि बालकानि) चूर्णकुन्तलानि यस्मिन् तत्, सतिलकं कस्तूरीतिलकसहितं फालं ललाटं विलासं सुप्रकाशितं कुरु । माराङ्केत्यादिनोक्तमन्मथयुद्धेन ललाटे विस्रस्तकेशान् परिकर्मय [1]वक्रतिलकं रुजु कुर्वित्याशयः । प्राणेश हे प्राणापानादिपञ्चप्राणानां ईश प्रेरक । यद्वा हे प्राणेश मदिन्द्रियनियामक । अथ वा मुख्यप्रणेश । पयोधरयुगे स्तनयुग्मे त्रुटितं रतिकेलिसङ्कुलरणे छिन्नं हारं, जात्येकवचनम्; मुक्ताविद्रुमादिनवरत्नहारम् पुनर्मुहुर्योजय सम्मेलय । अत्र 'लिखति सतिलकं मणिसरममलं तारकपटलम्' इत्यादिना कृष्णेन हारादीनां

---

1. वक्त्रतिलकं–ङ.

साध्वी माध्वीक चिन्ता न भवति भवती शर्करे कर्कशाऽसि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि क्षीर नीरं रसस्ते।
माकन्द क्रन्द कान्ताधर धरणितलं गच्छ गच्छन्ति याव-
त्सारं शृङ्गारसारं शुभमिह जयदेवस्य वैदग्ध्यवाचः ॥४॥

योजनात्पुनरित्युक्तम्। इति स्वामिन्नित्याद्युक्तप्रकारेण उक्त्वा प्रोच्य सुरताव-सानसुखिता सुरतस्य रमणक्रियाया अवसानेन समाप्त्या सुखिता सुखवती। पूर्णचन्द्रवत् आननं यस्याः सा तथा। तेन कृष्णेन तथैव स्वोक्तप्रकारेणैव स्पृष्टा अलङ्कर्तुमिति शेषः; या राधा सा जातपुलका उत्पन्नरोमाञ्चा सती मोहनं मोहवशं पुनः प्राप्ता बभूवेत्येकान्वयः। निकुञ्जशय्यायां कृष्णस्पर्शेन रमणात्पूर्वं मोहितत्वात्पुनरित्युक्तम् ॥३॥

स्ववचसि मधुरकोमलकान्तेत्यादिनोक्तं माधुर्यमनन्यसाधारणं प्रकट यति—साध्वीति। हे माध्वीक हे मद्य चिन्ता त्वयि माधुर्यचिन्ता साध्वी उत्कर्ष-हेतुत्वेन समीचीना न सम्भवति। मदहेतुत्वात्। भू सत्तायामित्यतो लट् परस्मै-पदम्। भवति भवतः भवन्ति इति रूपाणि। हे शर्करे हे सिते भवती त्वं कर्कशा पाषाणरूपत्वेन कठिना असि भवसि। अस भुवीत्यतो लट्। असि स्थः स्थ। अतिकाठिन्यमेवात्र दोषः। हे द्राक्षे यद्यपि त्वं न कठिना तथापि के पुरुषाः त्वां भवन्तीं द्रक्ष्यन्ति पश्यन्ति; द्वीपान्तरान्तर्हितत्वात्। दृशिर् प्रेक्षणे। द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति। हे अमृत हे सुधे मृतं मृतप्रायमेव त्वमसि। यद्यपि द्राक्षा द्वीपान्तरस्थैस्तद्ज्ञैः कैश्चित्पुरुषैर्दृश्यते तथा त्वं न दृश्यसे परलोक एव स्था-स्यसि; इह सर्वथा सर्वैः सर्वदाऽदृष्टत्वान्मृताऽसीति भावः। हे क्षीर हे पयः ते तव रसो गुणः नीरः नीरसः नित्यनपुंसकम्। यद्यपि त्वमप्यमृतं इह सर्वैः सर्वदा दृश्यसे तथापि त्वं नीरस इति भावः। हे माकन्द हे रसालफल अति-मधुरचूत एतेष्वेवं सत्सु मम कादाचित्कत्वात्के मां पृच्छन्तीति क्रन्द, रोदनं कुर्वित्यर्थः। [1]क्रदि रोदने; क्रन्द क्रन्दतम् क्रन्दत। हे कान्ताधर कान्तायाः योषितः अधर अधरोष्ठ त्वं तु यावत् यावत्कालं जयदेवस्य तन्नामककवेः वैदग्ध्य-वाचः विषयप्रतिपादकवचांसि इह लोके शुभं कल्याणरूपं यावत्सारं सर्वसारं शृङ्गारसारं शृङ्गाररसं यावत् गच्छन्ति प्राप्नुवन्ति; गम्लृ गतौ, गच्छति

---

1. क्रन्द चिक्रोशने—ड.

इत्थं केलिपरे विहृत्य यमुनातीरे समं राधया ।
तद्रोमावलिमौक्तिकावलियुगे वेणीभ्रमं बिभ्रति ।
तत्राह्लादिकुचप्रयोगफलयोर्वीप्साभृतोर्हस्तयो-
र्व्यापाराः पुरुषोत्तमस्य ददतु स्फीतां मुदं सम्पदः ।।५।।

(इति पञ्चसद्रत्नस्तबकः समाप्तः ।।)

गच्छतः गच्छन्ति; लट् । तावत् धरणितलं भूमण्डलं प्रतिगच्छ तत्रावस्थानं कुरु न तदूर्ध्वम् । न हि निशीथ इव मध्याह्ने खद्योतप्रकाशः ।।४।।

एवं समापितगीतगोविन्दो भगवान् जयदेवकविः राधार्थितालङ्कार-कर्ताऽयं सर्वैश्वर्यपूरकोऽपि भूयादित्यन्तेऽपि तं सम्प्रार्थयते–इत्थमिति । इत्थं मेघैरित्याद्युक्तप्रकारेण केलिपरे क्रीडासक्ते श्रीकृष्णे, सत्सप्तमीयम् । यमुनायाः यमुनानद्यास्तीरे रोधसि राधया समं सह विहृत्य विक्रीड्य तद्रोमावलिमौक्तिकावलियुगे तस्या राधाया रोमावलिः नाभिमारभ्य हृदयपर्यन्तं विद्यमाना केशपङ्क्तिः तस्या युगं युग्मम्; "युग्मं तु युगलं युगम्" इत्यभिधान(रत्नमाला); तस्मिन्; केशपाशः तदुभयपार्श्वस्थमौक्तिकावलियुगञ्चेति त्रयं दृष्ट्वा वेणीभ्रमं त्रिवृद्धवेणीयमिति भ्रमं भ्रान्तिं बिभ्रति धृतवति सति; तत्र वेण्यां आह्लादिकुचप्रयोगफलयोः आह्लादिनि अशुष्कितत्वेन प्रफुल्ले कुचावेव प्रयोगफले गुच्छौ तयोः; सप्तमीद्विवचनम् । वीप्साभृतोः, वीप्सा क्रियासमभिहारः तां बिभ्रतोः । कृष्णस्य धृतवतः पुनः पुनः स्पृशत इत्यर्थः । पुरुषोत्तमस्य, पुरुषेषु उत्तमस्य प्रधानस्य हस्तयोः व्यापाराः स्पर्शनरूपाः स्फीतां स्पष्टं मुदं सन्तोषं सम्पदमनल्पैश्वर्यञ्च ददतु दिशतु इत्यन्वयः । दा दाने इत्यतो लोट् ददातु दत्तात्, दत्तां ददतु इति रूपाणि । नाभेरूर्ध्वं भोगिभोगाकारं केशोद्गमं दृष्ट्वा तदुभयपार्श्वस्थमुक्ताहारं च दृष्ट्वा त्रिवेष्टितत्वाद्वेणीयं किमिति भ्रान्तः तदुपरिस्थौ द्वौ पीनौ कुचौ दृष्ट्वा किमिमौ वेणीबन्धकस्वर्णगुच्छाविति पुनः पुनः कराभ्यां स्पृष्टवानिति भावः ।।५।।

अनुबन्धः (२)

श्रीगीतगोविन्दस्थश्लोकानुक्रमणी

अनुबन्धः (३)

श्रीगीतगोविन्दीयाष्टपदीपदानामनुक्रमणी

शुद्धिपत्रम्

पृष्ठसंख्या	पङ्क्तिः	अशुद्धम्	शुद्धम्
१०	१	हरिस्मरण सरस	हरिस्मरणे सरसं
१६	४	मखदम्	मखेदम्
५१	१	मलकमल	अमलकमल
१३२	२	वृत	वृतं
१४८	३	मधूदनस्य	मधुसूदनस्य
१५१	४	माधव	माधवं
२३९	१	चयुकुग	कुचयुग
२५५	४	क्षण	क्षणं
२६०	३	स्वच्छन्द	स्वच्छन्दं
२८०	४	शृणु	शृणु
३०५	४	मुपस्थित	मुपस्थितः
३१५	१	श्रृणु	शृणु
३६३	५	तुद्भूतः	दुद्भूतः
३७२	१	पयोधरोपरिष्वङ्गी	पयोधरोपरि परिष्वङ्गी
३८३	३	नूपूरा	नूपुरा

OUR PUBLICATIONS

A. GENERAL SERIES

JÑĀNACATURVIṀŚĪ	1 25
PAṆḌITARĀJA KĀVYA SAṄGRAHA	6.00
ṚGARTHASĀRA	2 50
SAṀSKṚTA KAVI JĪVITAM	3 50
KṢEMENDRA LAGHU KĀVYA SAṄGRAHA	15 00
NARAKĀSURA VIJAYA VYĀYOGA	1.50
SĪTĀRĀMA VIHĀRA KĀVYA	4.00
DĀNODDYOTA	6.50
CATALOGUE OF SANSKRIT MANUSCRIPTS IN OSMANIA UNIVERSITY	30.00
ĀRYĀSAPTAŚATĪ	8.00
VIKRAMORVAŚĪYAM	8.00
DĀNODDYOTA PART II.	8.50
,, ,, PART III.	12.50
VṚTTARATNĀKARA	12.00
KĀŚIKĀ PART I.	25.00

B. POPULAR SERIES

STORIES FROM KATHĀSARITSĀGARA, PART I.	2.00
,, ,, ,, PART II.	5.00
GEMS FROM SANSKRIT LITERATURE	1.50

SANSKRIT ACADEMY
OSMANIA UNIVERSITY,
HYDERABAD-7.